संस्कृत

निबन्ध-मणि-माला

एम ए. (संस्कृत), आई. ए. एस., पी. सी. एस., बी. ए. आनर्स, शास्त्री
एवं आचार्य आदि उच्च श्रेणियों के उपयुक्त एक मात्र निबन्ध-पुस्तिका।

लेखक

साहित्याचार्य

शिवप्रसाद भारद्वाज शास्त्री, एम. ए., एम. ओ. एल.

(विश्वविद्यालयीय पदक-विजेता)

साहित्यरत्न

प्राध्यापक

विश्वेश्वरानन्द वैदिक शोध संस्थान स्नातकोत्तर महाविद्यालय

साधु आश्रम, होशियारपुर

सूर्य-प्रकाशन, नई सड़क, दिल्ली।

मूल्य : ७.५०

लेखकस्यावेदनम्

"सुर-भारती-रस-माधुरी-मधुव्रतानां विदित-वाग्रहस्य-रस्य-वचसां विदुषां तच्चरण-सेवा-हेवाकिनां च विद्यामधिगच्छतामन्तेवसतां पुरत इमां 'निबन्ध-मणि मालाम्' उपस्थापयतोऽस्यल्पज्ञस्यापि महान् परितोषः। गीर्वाण-वाणी-वाङ्मयरत्नकोशे नवनव-ग्रन्थ-रत्नैः समर्घनीये, सत्स्वप्यनेकेषु सरसेषु प्रौढेषु च निबन्ध-ग्रन्थेषु पुस्तकेषु विरचितेषु निखिल-विषय-गत-तत्त्व-संभार-प्रौढिम-पारदृश्वनि विद्वद्भिः किंचिज्ज्ञस्य सस्खलिताऽपि च कृतिरियं नार्हत्युपेक्षणीयतां निष्प्रयोजनतां वा। भाण्डागारे हि लघूनि गुरूणि च प्रभा-भासुराणि किट्टाञ्जचितानि च रत्नानि संगृह्यन्ते। वैशिष्ट्यं च तत्र वस्तुशो भवति किमपि येन न मतमस्यापि व्यर्थतां याचते।

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः पर-प्रत्यय-नेय-बुद्धिः॥

अद्यत्वे च सर्व-विध-रचना-विशेष-शालिनां सकल-विषय-स्पर्श-बन्धुराणां ग्रन्थ-रचनीयत्वेन संस्कृतोपासकानां बुधानां स्कन्धे महान् कर्तव्य-भार उपहितः। अतीव जना देववाण्यां सकल-विषय-निरूपण-प्रौढ-ग्रन्थ-निर्माणम्। पुरस्याद् विद्यमानं पुस्तकर्नं कृतकृत्यता। भाषायाः प्रौढिमा भावाभिव्यञ्जन-क्षमत्वं च साहित्य एव तस्य चोन्नतत्वं निबन्धैरिति प्रायशः सर्वासु समृद्ध-भाषासु निबन्ध-वाङ्मयस्य प्रमाणमति। संस्कृतेऽद्यापि दारिद्र्यमेवास्यास्य।

निबन्धाश्च नास्यां सर्वे मदुपज्ञाः। शैली-भेद-परिचायनाय प्राक्तनेभ्यो नवेभ्यश्च । उद्धृताः सन्दर्भा अत्र सगृहीताः। यथा बाणभट्टस्य कादम्बरीतो लक्ष्मीनिन्दा ःताच्च ग्रीष्मर्तु-वर्णनं संकलितम्। दण्डिनो दशकुमारचरितात् कन्दुक-क्रीडा ता। अम्बिकादत्तव्यासस्य शिवराज-विजयात् श्रीनिवास-शास्त्रिणश्च 'चन्द्र- ।' उपन्यासात् केचिदंशा मालायामस्या गुम्फिताः। एतेन रचना-प्रकार-विशे- विषयशस्तारतम्यं छात्राणां स्फुटतामायास्यतीति मे मतिः। अभिनवस्य चास्यो- ास्य व्यवहारोपयोगिनव-शब्द-निर्माण-पद्धति दिग्दर्शिका विदुषामस्मिन् पथि। ालमुल्लिखिता गण्याः, अन्येऽपि ममोत्तमर्णा। होश्यारपुरस्थे विद्वत्परिवृढ- न्धुशास्त्रिभिः संचालिते विश्वेश्वरानन्द-वैदिक-शोध-संस्थाने सुप्रतिष्ठिते सुर- ा-सेवा-समानेऽनुसंधायक-प्रवरौ मनीषिणौ श्रीमानमरनाथशास्त्री विद्यानिधि- च निबन्धत्रय-रचनया गरीयस्यप्यस्मिन् कर्मणि मम दत्तस्कन्धावजायेतामिति ा कैः शब्दैः प्रकाशयेयमिति न विभावयामि। श्री सूर्यनारायणः शास्त्री साव- संशोधनेन श्री ब्रह्मदत्तो वेदतीर्थः, शिवप्रसाद शास्त्री, अग्रवालोपाह्वः सतीशकुमार ए० च पूर्वमुद्रनिरीक्षणादिना मम निष्कामं महत्साहाय्यमाचरन्तिति नितरा- ोऽहं तेषाम्। पिपीलिका-संचारं सचरन्तो मुद्रणालय-कर्मकराः सूर्य-प्रकाशना- श्रीतनसुखरामगुप्तश्च दीर्घेणाऽप्यनेहसा प्रकाशमनयन्निमां मालामित्यभि- ायस्तेषा पराक्रमः। लोकभाषा-ज्ञानेऽपि संकोषमञ्चद्भिरस्थानेऽपि पदानि शकल- शब्द-ब्रह्मणो विगृह्यमवगृह्णद्भिः सीताक्षरयोजकैर्मुहुर्मुहुः संशोधनेऽपि कृते शुद्धयोऽत्र विहिता मत्कृता वा तासां काश्चित् शुद्धि-पत्रे निर्दिष्टाः, अपराश्च -मार्गाटकैः पाठकैः स्वयमेवोह्याः। भाविनि पुनः प्रकाशने तासां निराकरणं स्यते।

बाल-निर्मोक-मोचन-चञ्चुभिः समालोचक-प्रवरैश्च निर्दर्शितानि मत्स्खलि- समानं स्वीकार्याणि स्फुरन्ति तेऽपि स्वनियोगानुष्ठानायाभ्यर्ण्यन्ते यथा द्वितीये रणे तेषा प्रायश्चित्तिः सुकरा जायेत।

अन्ते च प्रतिलिप्यादि कार्येषु कृताभिनिवेशान् स्वशिष्यानाशीराशिभिः सभा- ाधस्तादिकेदानिकपाणा। विदारिता चरणेषु आमाण्यापादेस्थापयति हरति मयं जनः। तथाहि—

"हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा॥'

विदुषां वशंवदः

शिवप्रसादो भारद्वाजः

विषय-सूची

क्रम संख्या	विषयः	पृष्ठांक
	लेखकस्याऽऽवेदनम्	
	सरस्वती-स्मरणम्	
	परिचय	१-४
	वर्णनात्मका निबन्धाः	
(१)	प्रातः सुषमा	५-६
(२)	होलिकोत्सव —चन्द्र महीपते सकलित	७-७
(३)	ग्रीष्मर्तु.—हर्ष-चरितात् (दिल्ली विश्वविद्यालय एम ए. १९५४)	९
(४)	शरदृतु-वर्णनम् (प वि वि १९५७)	१० ११
(५)	कथड्डी क्रीडा (प. वि वि १९५७)	१२-१३
(६)	श्मशान वर्णनम्	१४-१६
	विवरणात्मका निबन्धा —	
(७)	कन्दुकावत्या. कन्दुकक्रीडा—दशकुमार-चरितात्	१७-१८
(८)	एथरेम्ट-विजय	१९-२१
(९)	कल्पिता विमान-यात्रा	२२-२४
(१०)	क्रिया सिद्धिः सत्वे भवति महता नोपकरणे—शिवराज विजयात् । (प वि वि १९५८)	२५-२७
	भावात्मका.	
(११)	मम भारतम्	२८-३०
(१२)	मम प्रियतम पुस्तकम् (प वि वि ५७-५८, दि वि वि १९५३)	३१-३३
	विवेचनात्मकाः—	
(१३)	वेद-वेदाङ्ग मीमांसा—अमरनाथ शास्त्रिणा (आगरा वि वि. १९८१)	३४-३६

(१४) वैदिकी देवासुर-मीमांसा ४०-४४
(रा. पू. वि. वि. १९५८)
(१५) वेदोऽखिलो धर्ममूलम्—विद्यानिधि शास्त्रिणः ४५-५३
(पं. वि. वि. १९५८)
(१६) इन्द्रः ५४-५७
(१७) वरुणः ५८-६१
(पं. वि. वि. १९६०)
(१८) अश्विनौ ६२-६४
(पं. वि. वि. ५७)
(१९) पुनर्जन्मवाद—अमरनाथ शास्त्रिणः ६५-६९
(दि. वि. वि. १९५६)
(२०) काल-चक्रम् संस्कृत-दर्शने तत्स्वरूपं च ७०-७३
(रा. पू. वि. वि. १९५८)
(२१) निर्दुष्टं काव्यलक्षणम् ७४-७८
(रापू. वि. वि. १९५८)
(२२) काव्येऽलंकाराणां स्थानम् ७९-८२
(२३) काव्ये रसाः ८३-८६
(पं. वि वि. १९५५, दिल्ली १९५७)
(२४) व्यंजना-व्यापारः तत्स्वरूपं परम्परा च । ८७-९२
(२५) लक्षणा-वादः ९३-९७
(वाराणसेय सं. वि. वि. सा. आ. १९५९)
(२६) काव्येषु नाटकं रम्यम् ९८-१०१
(आगरा वि. वि. १९५९)
(२७) आदिकविर्वाल्मीकिः १०२-१०७
(आगरा वि. वि. १९५२, दिल्ली ५५,५६, पं. ५७)
(२८) कालिदासस्य काव्य-सौष्ठवम् १०८-११३
(दि. वि. वि. ५२, ५६, ५७, पं. ५७)
(२९) नाटककृत्कालिदासः ११४-१२३
(प. वि. वि. १९५५)
(३०) तावद् भा भारवेर्भाति० १२४.१३०
(३१) भवभूतिः १३१-१३६
(दि. वि. ५४, पं. ५७)

(३२) बाणोच्छिष्ट जगत्सर्वम् १३७-१४१
(आ. १९५९ दि ५३, ५७)
(३३) संस्कृत-साहित्ये प्रकृति-चित्रणम् १४२-१४७
(३४) साहित्ये काम-भावना १४८-१५२
(३५) एको रस. करुण एव० १५३-१५५
(प० १९५७)
(३६) वेदाः सम्प्रति तदध्ययनस्योपयोगिता च १५६-१५८
(आ. ५६-५८, दि ५३-५५)
(३७) साहसे श्री निवसति १५९-१६०
(आ ५०, प. ५८)
(३८) ज्वलितं तु क्षणं श्रेयो न तु धमायितं चिरम् १६१-१६३
(आ. ५६, ५७, पं. ६१)
(३९) व्यतिषजति पदार्थानान्तरः कोऽपि हेतु० १६४-१६६
(प. १९५९)
(४०) उपार्जितानां वित्तानां त्याग एव हि रक्षणम् १६७ १६९
(प १९५८)
(४१) हासस्य स्वरूपमुपयोगिता च १७०-१७२
(४२) पुराणमित्येव न साधु सर्वम् १७३-१७५
(आ १९५१, प. ५७)
(४३) लक्ष्मी-निन्दा— कादम्बर्याः १७६-१७७
(४४) जननी जन्म-भूमिश्च स्वर्गादपि गरीयसी १७८-१८०
(४५) पुमान् पुमांस परिपातु विश्वतः १८१-१८३
(आगरा १९५५)
(४६) सर्वाम्युदयया३. १८४-१८५
(चन्द्र महीपते.)
(४७) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा १८६-१८८
(आ. १९५६)
(४८) त्यजन्त्यसून्नशं च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम् । १८९-१९०
(४९) सतां हि सन्देह-पदेषु वस्तुषु प्रमाणमन्त.करण प्रवृत्तयः । १९१-१९२
(५०) भारतीय-स्वातन्त्र्यस्य साभा. १९३-१९५
(पं० वि. १९५६)

(५१) स्वतन्त्रे भारते संस्कृतस्य स्थानम् १९६-१९९
(आ. ५०, पं. वि. ५८)
(५२) भारतीया संस्कृतिः तस्या प्रभावश्च । २००-२०४
(आ. ५१, ५५, प. ५५, ५८, दि. ५४, ५५)
(५३) शिक्षा-पद्धतावपेक्षिताः परिष्काराः २०५-२०७
(आ. ५५)
(५४) शिक्षा-पद्धतावाङ्गल-भाषायाः स्थानम् । २०८-२१०
(आ. १९५८)
(५५) मानो हि महतां धनम् २११-२१२
(पं० शास्त्री १९६०)
(५६) मृत्युः २१३-२१५
(५७) अहिंसाया जीवनोपयिकत्वम् २१६-२१८
(आ. ५०, रा. पू. ५८)
(५८) वासुदेव जरा कष्टम् २१९-२२०
(५९) कष्टं निर्धन-जीवनम् २२१-२२३
(६०) चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च २२४-२२५
(६१) भारतीय-संस्कृतौ स्त्रीणां स्थानम् २२६-२२८
(आ. ५२)
(६२) आचार-प्रभवो धर्मः २२९-२३१
(६३) आर्जवं हि कुटिलेषु न नीतिः २३२-२३३
(६४) महान्महत्येव करोति विक्रमम् २३४-२३५
(दि. वि. ५२,५९)
(६५) कांचः काञ्चन-संसर्गाद्धत्ते मारकतीं द्युतिम् । २३६-२३८
(६६) भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व-संशयाः । २३९-२४३
(६७ आशा हि परम ज्योति निराशा परमं तपः । २४४-२४६
(आ. ५५)
(६८) यस्मिञ्जीवति जीवन्ति बहवः सोऽत्र जीवतु २४७-२४८
(६९) संघे शक्तिः कलौ युगे २४९-२५१
(७०) किं विश्वरूपो मानवः ? २५२-२५३
(७१) अणु-शक्तिः २५४-२५६
(पं. १९५६)
(७२) आधुनिका उपग्रह-प्रयोगाः २५७-२५८

(७३) विश्वसंघस्यावश्यकता २५९-२६१

(७४) भारतस्य परराष्ट्र नीति २६२ २६४

(७५) जनतन्त्र पद्धते गुंणा दोषाश्च । २६५-२६७

(आ ५८)

(७६) भारत-चीन-सीमा विवाद

(प ६०) २६८ २६९

(७७) स्त्री-शिक्षा कीदृशी भवेत् ।

(आ वि ५५) २७०-२७२

(७८) वर्णाश्रम व्यवस्थाया उपयोगिता २७३-२७६

(आ ५०, वि ५२, ५५, ५६)

(७९) ग्रामोन्नति २७७ २७९

(८०) विज्ञानस्य लाभा दुष्परिणामाश्च २८० २८२

(८१) भारतस्य पाञ्चवर्षियो योजना

(प ६१) २८३-२८५

(८२) योग कर्मसु कौशलम्

(प ६१) २८६ २९०

(८३) न ऋते श्रान्तस्य सखाय देवाः २९१-२९३

(प ६१)

(८४) मौन सर्वार्थ-साधनम् २९४ २९५

(प ६१)

(८५) धर्मार्थकाममोक्षाणामारोग्य मूलमुत्तमम २९६-२९८

(प ६१)

(८६) कामो स्वतो पश्यति २९९-३०२

(इण्डियन एडमिनिस्ट्रेटिव सर्विस १९५९)

(८९) मतिं कवीनां विश्व प्रतिफलति ३०३ ३०९

(प एम ए ६१)

(९०) यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता ३१० ३१४

(प शास्त्री ६१)

(९१) प्राप्त सर्वो भवति करणो वृत्तिरार्द्र-तरात्मा ३१५-३१७

(इ ए स १९२९)

(९२) हेम्न समघयते ह्यग्नौ विशुद्धि श्यामिकाऽपि वा ३१८ ३२०

(प एम ए ६२)

(९३) एक सद्विप्रा बहुधा वदन्ति ३२१-३२४
(प. एम ए ६१)
(९४) स्वधर्मे निधन श्रेय ३२५ ३२६
(प. शास्त्री ६१)

रूप-रेखा:

(१) गतानुगतिको लोको न लोक पारमार्थिकः ३३०
(२) नीरक्षीर-विवेके हंसालस्य त्वमेव कुरुषे चेत्० ३३१
(३) सहसा विदधीत न क्रियाम् ३३२
(४) भिन्न-रुचिर्हि लोक ३३३
(५) अरसज्ञ करोति इज्योमपूरात् ३३४
(६) स्त्रीणा प्रियाऽऽलोक-फलो हि वेष ३३५
(७) किमिव हि मधुराणा मण्डन नाऽऽकृतीनाम् ३३६
(८) अनुत्सेक खलु विक्रमाऽलंकार ३३७
(प १९५८)
(९) ज्वलित न हिरण्य-रेतस त्यजमास्कन्दति भस्मना जन ३३८
(आ ५९)
(१०) गुणगृह्या वचने विपश्चितः ३३९
(११) सेवाधर्म परम गहनो योगिनामप्यगम्य ३४०
(१२) इन्द्रियाणा प्रसङ्गेन दोषमृच्छत्यसशयम् ३४१
(आ ५६)
(१३) विकारहेतौ सति विक्रियन्ते येषा न चेतासि त एव धीरा । ३४२
(१४) कामार्ता हि प्रकृति कृपणाश्चेतनाचेतनेषु । ३४३
(१५) सर्वनाशे समुत्पन्ने अर्ध त्यजति पण्डित । ३४४
(१६) न्याय्यात्पथ प्रविचलन्ति पद न धीरा । ३४५
(१७) बहुप्रजा निर्ऋतिमाविवेश । ३४६
(१८) कर्म क स्वकृतमत्र न भुङ्क्ते । ३४७
(१९) उपनतमवधीरयन्त्यभज्ञा । ३४८
(आ ५१)
(२०) सुखमुपविश्यते परस्य । ३४९
(आ ५१)

अशुद्धि-पत्रम् (Errata)

पृष्ठम्	पङ्क्ति	अशुद्धम्		शुद्धम्
४	२०	सौकार्याय		सौकर्याय
६	१३	कोप		कोश
७	३	० तोप्ण		तोप्णो
११	३१	० ञ्चनान्नामिति		० किञ्चनानामिति
१६	११	० त्सेघमद		० त्सेघमद.
२०	१६	वायो०		वायो०
"	१६	यावान्त्ते		यावत्ते
"	२६	शिप्यत्		शिप्यत
"	३२	अस्य		अस्या
२४	१६	विस्फूर्जितत्सहवृतो		स्फूर्जितसह०
"	"	ह्लादिनो, निर्ह्लाद		ह्लादिनी-निर्ह्लाद.
२५	१७	युत्त		प्रयुक्त
२६	१५	स्फोटट्या		स्पोट्या०
"	२१	अकस्तात्		अकस्मात्
"	२२	सौदामनी		सौदामिनी
२७	३	समवलो०		समवालो०
२८	२२	यस्य		यस्या
"	२३	पाणयो-र्जुन०		पाणयोऽर्जुन०
२९	६	भ्रासो		भ्रंसो०
"	२३	ह्रेषणं		ह्रेषण
"	२८	० धान्यर्हाणि		० धान्यार्हाणि
३७	३२	द्वयारमेव		द्वयशरमेव
३८	१२	अप्रतयतो		अप्रतियतो
"	१६	यवाये		यवोये

३९	७	सगर्थः	समर्थः
४०	८	बह्वश्च	बहवश्च
”	२१	विद्धयन्त	विद्धयन्ते
४४	२०	वाग्गि	० वाग्नि०
४७	१५	० त्तमिता	त्तम्भिता
५७	१२	पश्चाद्वृतिवत्	पश्चाद्वर्तिवृत्त०
५९	११	संमासेतुं वत्सरे०	मासतुं संवत्सर०
६३	११	निर्णयतः	निर्णयन्ति
”	२०	सूर्यायाच	सूर्यायाश्च
”	२२	Diospouroi	Dioskouroi
६६	९	स्वमुयपजायते	स्वयमुपजायते
७६	१	शब्यार्थौ	शब्दार्थौ
८८	२१	सौभाप्यादि	सौभाग्यादि
८९	१५	वार्च्यं	वाच्ये
९३	१२	रोधयति	रोचयति
९४	३०	बोधयताति	बोधयतीति
१११	१०	कालिदास्य	कालिदासस्य
१ ३	३	व्णामव	०व्णामिव
१२२	८	केनायु०	केनाप्यु०
१२८	१६	निबधतीति	निबध्नन्तीति
१३३	१	परिणतो	परिणतो
१३५	१२	नत्यंमानं	नत्यंमानं
१३६	४	स्तम्भमभ्येति	स्तम्भमभ्येति
१३८	१६	इति अस्य	इति । अस्य
१३९	२५	गधं	गद्य
१४५	४	कर्कन्धना०	कर्कन्धूना०
”	१४	सौवर्णं	सौवर्णं
१५०	२१	कुवेरगुतां	कुवेरगुप्तां
१५६	६	निविशते	निविशते
१६४	१७	० रूपाधीन्	० रूपाधीन्
१६६	४	चक्षुसा	चक्षसा
१७०	२	विमुदितानतश्च	विमुद्रिताननश्च

"	४	प्रणीयनी	प्रणयिनी
१७२	१३	अन्तवलम	अन्तःबलं
"	२७	यावज्जीवम्	यावज्जीवम्
१८०	१३	लज्जयन्ति	लज्जयन्ति
"	२६	जनः	जनाः
१८२	७	स्वताऱ्य०	स्वातन्त्र्य०
१९३	२०	लुष्यका	लुण्टाका
१९४	१६	साशात्	सकाशात्
"	२७	रुन्मूल्यते	रुन्मूल्यते
"	३१	० याङ्कस्थापनाय	० यातङ्कस्थापनाय
१९५	२	बर्गो	वर्गो
	८	स्वीकृते	स्वीकृतम्
१९७	१	मॉल०	माङ्ग्ल
"	३	परिचालितास्यामपि	परिचालितायामपि
	१७	प्रशासनादि	प्रशासनादि
	११	लतइङ्कुरिता	लताऽङ्कुरिता
२००	२०	दर्शनेषु	दर्शनेषु
२०१	१७	अन्त्येष्ट्यां	अन्त्येष्ट्या
२०२	२	०नुययिभि	नुयायिभि
	१०	प्रसाई	प्रसारो
	१३	इत्युक्तवा	इत्युक्त्वा
२०७	१३	निर्विवादम्	निर्विवादम्
२०८	६	तोरूस्को	तोएप्को
	२४	स्यन्तु	स्यास्तु
२११	६	महात्मामिः	महात्मभिः
२१३	७	बृहितः	बृंहितः
२१४	७	प्रयातुमृ	प्रयातुम्
२१५	६	भारतायाः	भारतीयाः
२१६	५	न्	न
"	६	अतिशेतुम्	अतिशयितुम्
	१७	अनुरोद्धया	अनुरोद्धव्या
	६	० मुगृत्य	मुत्मृज्य

"	२५	प्रतिविधान	अप्रतिविधान
२१८	४	भजिष्यति	भक्ष्यति
२१९	९	दरद्दीर्णेदरा	दरद्दीर्णेदरा
"	३४	कपल्यो	कल्पो
२२१	२	दारिद्रय	दारिद्रय
२२२	२६	एद	एव
२२३	४	दारि–द्रय	दारिद्र य
२२४	१०	नर	नर
२२५	१६	घटनासु	घनघटासु
	२१	विलोक्य	विलोक्य
२२६	८	भङ्यन्तरेण	भङ्ग्यन्तरेण
"	१६	सुमगली	सुमगली
"	१९	मन्त्र द्रष्ट्रय	मन्त्र-द्रष्ट्रय
२२६	२३	क्वचित्त	क्वचित्तु
२२७	१७	पावन	पावन
२२८	१५	अयन्त्र	अन्यत्र
२२९	२२	वह्नित्व	वह्नित्व
२३०	१३	निर्णयत	निर्णयति
"	२८	प्राञ्च	प्राञ्च
२३२	८	० वलम्बेन	० वलम्बने
२३३	४	निपिता	निशिता
	१८	इष्टिकाना	इष्टकानां
२३६	१३	तमेव	तदेव
२३७	१२	अपाकरोति	अपाकरोति
२३८	१	कीटोंऽपि	कीटोऽपि
२४०	२७	प्रत्यागत्मान	प्रत्यगात्मानम्
२४१	६	तत्र	तत्
"	२४	भुवनानि	भुवनानि
२४६	१६	व्यवहार०	व्यवहार०
२४९	२०	सघ शक्तया	सघशक्तया
२५३	१७	प्रमाजयन्	प्रमार्जयन्
२५४	५	दनुष्ठिम्	•दनुष्ठितम्

२५६	२	अनवृष्टि	अनावृष्टिश्च
२५८	२	उच्छायम्	उच्छ्रायम्
२६२	२४	साहाट्यार्थम्	साहाय्यार्थम्
२६३	१६	यथार्धताम्	यथार्थताम्
"	२२	प्रद्रानेन	प्रदानेन
	२६	भातस्य	भारतस्य
२७२	२	बुद्धयुत्कर्षेण	बुद्ध्युत्कर्षेण
"	८	भातृत्व	मातृत्व
२८४	३१	माध्यमिकी	उच्चमाध्यमिकी
२८५	२७	Incom Tax	Income Tax
२८६	३	० शचार्यः	० राचार्यैः
	४	यज्ञदानाभि.	यज्ञदानादिभिः
२८७	७	नून्थिलान्	ग्रन्थिलान्
२८९	१०	स्वेच्छाचारेण	स्वेच्छाचारेण
२९१	६	कुक्षिमंरिपु	कुक्षिम्भरिपु
२९३	१३	भयति	भवति
२९४	१०	० करोतित्येव	० करोतिइत्येव
२९५	५	सिपाघमीषुः	सिपाघयिषुः
३०१	१८	गन्धवहेन	गन्धवहेन
३०२	९	मनसिरुज.	मनसिजरुज'
३०७	३	तार्जिते०	तर्जिते०
३१२	१६	बध्यते	बुध्यते
३१५	१	करुणा वृत्ति	करुणा-वृत्ति०
३१८	१८	गुणा	गुणा
३२३	२५	विष्णवरघः	विष्णवोरघः
३२४	२२	रूपं	रूपं
३३१	१	हंसालस्यं	हंसालस्यं
३३२	१५	सत्फले नैवा०	सत्फलेनैव०
३४२	१४	रेण	रेणु
३४५	१०	ह्लदयते	ह्लादयते
३४८	७	बुद्धिमस्तः	बुद्धिमन्तः

संकेत-विवरणम् (Abbreviations)

अथ अवे अ अथर्ववेद
अवा—अस्यवामीयसूक्तम्
ईउ —ईशोपनिषद्
उच —उत्तररामचरितम्
उमे —उत्तरमेघ
ऋ —ऋग्वेद
ऋनासू —ऋग्वेदे नासदीय सूक्तम्
ऐब्रा —ऐतरेयब्राह्मणम्
औविच —औचित्य विचार-चर्चा
कउ —कठोपनिषद्
काकल्प —काव्यकल्पलतावृत्ति
काल —काव्यालङ्कार
काप्र —काव्य प्रकाश
काव्या —काव्यादर्श
किरा —किरातार्जुनीयम्
कुस—कुमारसंभवम्
गी—गीता
छांउ —छान्दोग्योपनिषद्
ध्वा —ध्वन्यालोक
नाशा —नाट्यशास्त्रम्
नै —नैषधीयचरितम्
भनाशा —भरतनाट्यशास्त्रम्
भश —भर्तृहरिशतकम्
भाकाल —भामह काव्यालंकार
भा —भामह
भावि —भामिनीविलास
मभा —महाभारतम्
मभाआप —महाभारत आदिपर्व
मालवि —मालविकाग्निमित्रम्
मेदू —मेघदूतम्

यजु —यजुर्वेद
यु —युद्धकाण्डम्
वजी —वक्रोक्तिजीवितम्
विक्र —विक्रमोर्वशीयम्
विच —विक्रमाङ्कदेवचरितम्
विस —विष्णुसहस्रनामस्तोत्रम्
वेस —वेणीसंहार
वैभूसा —वैयाकरणभूषणसार
वैश —वैराग्यशतकम्
वैसिम —वैयाकरणसिद्धान्तमञ्जूषा
वैसू —वैशेषिक-सूत्रम्
रग —रसगङ्गाधर
र व —रघुवंश
रामि —रामायणे किष्किन्धाकाण्डम्
रामा —रामायणे बालकाण्डम्
श —शतपथब्राह्मणम्
शब्रा —शतपथब्राह्मणम्
शा —शाकुन्तलम्
शाभवा —शाकुन्तले भरतवाक्यम्
शिव —शिशुपालवधम्
शिशु—शिशुपालवधम्
श्वे —श्वेताश्वतरोपनिषद्
स —सर्ग
साद —साहित्यदर्पणम्
सांसू —सांख्यसूत्रम्.
सु —सुन्दरकाण्डम्
सुम —सुन्दरकाण्डम् अध्याय
प्र —प्रस्तावना
अभि शा —अभिज्ञान शाकुन्तलम्।

भिन्न एव विचारणीयोऽर्थ स्वीक्रियते लोकेऽधुनेति न सोऽपि पर्यायार्हः ।

परिभाषा—नितरा बध्यते वस्त्वेकमत्रेति निबन्ध । तत् कस्याप्यनधिकृतस्य विषयस्य स्पर्शोऽनपेक्षित एवात्र । तथा सति रस-भगो विवेच्य वस्तुनश्चासिद्धि सम्पद्यते । आमूलादेक वस्त्वधिकृत्य यावदन्त तस्यैव सर्वाशत प्रतिपादने निबन्धकला-रहस्य निहितमिति साधु विभाव्य शिक्षार्थिभि ।

इतिहास—निबन्धकलाया इतिहासोऽपि नातिप्राचीन । पश्चिमे सर्वासु समुन्नतासु भाषास्वस्या प्रचुरो विकास । आग्लभाषाया मरे (Murrey) एव बेकनश्च (Bacon) अस्या प्रतिष्ठातारौ स्मृतौ । तयोर्विचारेण मिथोऽसबद्धाना भावाना सघात एव निबन्ध । परमद्यत्वे नैतन्मत समादरस्य विषय । तादृशी कृतिस्तु प्रमत्तभणितिमात्रत्वेन स्वीक्रियेत । इदानी स निबन्ध सुदृढभित्तिवत् परस्पर-सश्लिष्ट-वस्तूपन्यासात्मिका नाति विस्तृता, नाति-सक्षिप्ता, तर्कैर्नाति-कर्कशा, नापि श्लथ-विचार-बहुला, साधु पद-विन्यासा, सुव्यक्तभावमधुरा, पृथुविवेकाऽपि मुग्धवचना, गभीराऽपि चपलगति विलासिनी, सुश्लिष्टा कृति । साहित्यस्याया विधा प्रायो मनोवेग-तरग भगी-विलोडिन्यो भावतत्त्वप्रधाना , पर निबन्धे सदसद्विवेक-चातुरी-सुरीग्रथित-वस्तुपटे पटीयसि बुद्धितत्त्वस्यैव प्राधान्यम् । इतरत्तु गौणमेव । द्वयो समन्वयस्तु साधीयान्, अत एव स विदुषा विचारकाणा समीक्षकाणाञ्च मस्तिष्ककण्डूविघटन-पटु । फ्रास देशस्य मोन्तेञ् सज्ञको निबन्ध लेखकाना मूर्धन्यो विचार-बहुलेऽप्यत्र तर्काणा गलहस्तिकामेव ददाति । तस्यायमेवाभिप्रायो यत्तर्कवितर्ककर्कशीकृते सति निबन्धे मनोरञ्जकत्व तस्य व्याहन्येत येन काव्यत्व तत्र न स्वीक्रियेत । निबन्धस्य साफल्य विचारस्य पूर्णतायामपि काव्य-गुणानामक्षतत्व एव । अन्यथा स शास्त्रायते ।

निबन्धस्य प्रकारा :—आधुनिकै समीक्षकैर्मुख्यतया चत्वार' प्रकारा निबन्धस्य स्वीकृता । तेषु प्रथमस्तावद् वर्णनात्मक , अपरो विवरणात्मक , तृतीयो भावात्मक , चतुर्थश्च विचारात्मक । तत्र स्थानतु -प्रभृतिवर्ण्यवर्णनात्मक माद्य , यथा प्राभाति-की सुषमा, वसन्ततु वाऽधिकृत्य कृते लग्ने तद्वैशिष्ट्य-वर्णनमेव क्रियते । तत्र लेखकस्य प्रवृत्तिनिरीक्षणशक्ति गगीक्रियते । द्वितीय च प्रकारे व्यतीत-कालसम्पातिनी घटना स्वय दृष्टा पठिता वा वर्ण्यते । पूर्वो वर्तमान द्वितीयोऽय भूत कालस्पृशतीति तयो-र्वैशिष्ट्यम् । जनाना जीवनकथाऽप्यस्यामेव विधायां समापतति । सस्मरणान्यप्यत्रैवा-न्तर्भवन्ति ।

तृतीये भेदे च किमपि वस्तु स्थान वा गमीकृत्य मानसी प्रतिक्रिया काव्यगुण-सारमन्थरया गिरा व्यज्यते । अस्मिन् भावावेगस्य प्राधान्य यदुपयोगिनी ललित-

ललिता पदावल्यपीष्यते । एवविधे च व्यतिकरे तत्र गद्यमपि पद्यायते पद्यमपि गीतायते गीत च काव्यायते काव्य च मृद्वीकायते । गद्यगीतमपि तदा तन्निबन्ध व्यपदिशन्ति काव्यमर्मज्ञाः ।

चतुर्थे प्रकारे सामाजिक-समस्यामयाः, शास्त्रीया., नृपनयसम्बन्धिनः, दर्शनं स्पृशन्तः, साहित्य-गोचराश्च सर्वेऽपि विविध-विषयावगाहिन आलोचनामया गूढा अगूढा अपि परिकलिता भवन्ति । तेषा शैली प्रसाद-सुमुखी, सारवती, गभीरा, स्फुट-लघु-पद-विन्यासकगनीया, विचारचारुतामयी, शास्त्रीयसूक्ति-प्रमाणाटीकन-पटीयसी, बाह्यकृत्रिमसज्जाऽऽडम्बर-रहिताऽपि निसर्ग-भाव-भर-मन्थराऽमन्द-रस-निर्भरा, राग-विवेक-समन्वयावदाता रमणीव किमपि रामणीयकमातनोति कृतौ । सिद्धवाचा विदुषा लेखनी स्वयमेव नृत्यति तेषु ।

निबन्धस्य वैशिष्ट्यम्—पूर्वमेवाकितं यन्न निबन्धे साहित्यस्येतर-प्रकारेष्विव रागात्मकं तत्त्व प्रमुखता भजते । इह तु बुद्धि-तत्त्वस्यैव प्राधान्यम् । अत्र हि न नूतनया कल्पनया नवं वस्तु सृज्यते, यथा-रुचि वोद्भाव्यते । अपि तु सत्य जगत् सूक्ष्मेक्षिकया निभाल्यते तोल्यते च सदसद्विवेक-तुलायाम् । परीक्ष्यते विविध-विचार-निकषैः । वैकटिका इव मणि-गण-जाति-समीक्षणेऽधीतानेकवेद्यविद्याः, करतलाऽऽमलक-वत् सकलमपि विचार-निघ्न वस्तु जानन्तो विद्वास एव प्रभवन्ति तेषा लेखने । अतो नाऽज्ञरा कोऽपि डित्थो डवित्थो वा निबन्धे गाढव लब्धुगोष्टे । गम्भीरमध्ययनम्, लेखन्यामधिकारः, विविधासु शैलीषु समान नैपुण्यम्, अनल्प-शब्द-प्रयोगावसानः कोष-परिचय., अनुप-जात-सद्यो-विरामोऽभ्यास, कोविदान्तरलिखितलेखानुशीलनम्, नव-नव-विचार-प्रसूति-कुशला नैसर्गिकी प्रतिभा, वस्तु-विवेचनक्षमा दृष्टिः, सूक्ष्मानुवीक्षण च जगतोऽपरिहार्यम् निबन्धलेखने दक्षता लिप्समानस्य । स्वैयानस्य महिमा साहित्यागस्य । लब्धाधिकारोऽत्र प्रसारयति यशो दिक्षु, आरोपयति प्रताप्रम्, उपकरोति जिज्ञासून्, अर्जयति सम्मानम्, समर्धयति सरस्वती कोशम्, परिष्करोति भाषाम्, तनोति विवि-धविषयविज्ञानम् । इयमनुपजात-क्षया श्रीः कस्यापि वाङ्मयस्य । समीदयता विश्व-साहित्यम् । सर्वत्रानुदिनमेधते निबन्ध-रत्नराशिः । उपचीयन्ते पटीयासः सर्वेष्वपि विषयेषु निबन्ध-बन्धन-बन्धुराः सिद्ध-लेखनीका. सम्पादन्त. । कः कालो हिन्दी-साहित्य-समुन्नतेः ? विदत्प्रायैर्वर्षे. पूरितोऽस्य कोशः प्रतिभा-प्रभोल्लासिभिः मणि-गणैरिव प्रबन्धराशिभि । नागुलिपरिमिताऽद्य तदीय-लेखकाना सख्या, अन्या अपि प्रान्तीया भाषा. समृद्धा एव सम्पदाऽनया । का कथाऽग्लादीनाम् ।

पर हन्त ! सम्कृतमेव दरिद्रायतेऽद्योऽभाव-ग्रस्तम् । 'गद्यं कवीनां निकषं वदन्ति' इति सूक्तिर्न बहुभिः कामेणविषयीकृता । निबन्धस्तु तत्र नाम्त्येव । कति-

सरस्वती-स्मरणम्

मम वाणि ! विधेहि मन शरणम् ।
करवाणि किमन्यदये नवनम् ?
सरण त्वरण विरसे परुषे
कलुषे, बहु सेवति मोह-पथे ।
ननु हस रये ! मम हृसमिम
सुरधीकुरु, ते चरण शरणम् ॥
मम वाणि ! विधेहि मन शरणम् ॥

सुकलामयि ! धेहि कलाममला—
मयि चिन्मयि ! मे हृदये सदये !
हर सन्तमस, कुरु सन्तमस—
शयमर्थमिहाविकलस्फुरणम् ॥
मम वाणि ! विधेहि मन शरणम् ॥
मम लेखनिका खनितामयता—
मनुरूप-पदोज्ज्वल भाव-मणे ।
नव-चारु-विचार-रुचा रुचिरा
रचना रचयेदिति ते स्मरणम् ॥
मम वाणि ! विधेहि मन शरणम् ॥

परिचयः

स्वरूपम्—मनोभावानामादान-प्रदान सौकर्याय भाषैव सर्वसाधनाना मौलि-भूतेति न कस्यापि विवादास्पदम्। बालोऽपि स्फुटदसमञ्जसपद किलकिलागर्भं 'बा—बा—मा—मा—अम्बा' प्रभृतिभिरनभिव्यक्त-पद-विभागैः स्वोद्गारमाविश्चिकीर्षति। सा च भाषा भूयो भूयो व्यवह्रियमाणा संस्क्रियमाणा च परिष्कृतां, परिमार्जिता नव-नव-शब्द-रत्न-समर्थिता प्रौढमनोरमा नामाख्याततद्धित-कृदन्त-कारक-स्त्री-प्रत्यया-व्यया कौमुदी विविधवस्तूपन्यासा नैकन्यायदर्शना विबुधजनलक्षित-व्युत्पत्तिवादा-नुदिनमुल्लासैरुपह्वितकाव्यप्रकाशा हृदयावर्जिमयूख-पीयूषवर्षचन्द्रालोका गुण-सहत्या गभीरादपि हृदयाद् भावरसानाहर्तुं क्षमा सती विकसितनवतारुण्या विद्वज्जन-मनोरमणी रमणीव रमणीया तनु वहन्ती साहित्री-संज्ञामादधाति। साहित्य हि वाचा परिनिष्ठितो विलास।

वाग्विकल्पाना भूयस्त्वेन नेयत्तया परिच्छेद सभवति साहित्यस्य। 'अनन्ता वाङ्मयस्याहो नेयस्येव विचित्रता।' गद्यम्, पद्यम्, चम्पू, नाटकम्, आख्यानम्, कथा, आख्यायिकेत्यादीन् तस्य प्रकारान् पूर्वसमृद्धान् नवनवोन्मेषोदयमानान् को नाम गणयितु प्रभवेत्। पर तत्र मुक्तक प्रबन्धश्चेति द्वौ भेदौ तस्यानायासेन सभवत इति कृत्वा द्विधैव तद् विभज्यतेऽस्माभि। प्रथमे निरपेक्षाणि पद्यानि, गीतानि, प्राभाणकानि, वाणीविलासा, सभस्यापूर्तय, सूक्तयश्च समाहर्तुं शक्यन्ते। अपर-स्मिंश्च महाकाव्यम्, खण्डकाव्यम्, एकार्थकाव्यम्, आख्यायिकाख्यानकानि, नाटकम्, कथा प्रभृतीनि पात्राणि। प्रबन्धो हि प्रकर्षेणाभूलादिति यावत् एकस्य वस्तुनो बन्ध उपन्यास। यत्र कोऽपि विषय, सागोपागतया विशद विविच्यते, लाट्टो लेखप्रकार प्रबन्धसंज्ञामावहति। मुक्तकवाक्येषु न किमपि सागतयाऽभिधीयते। स च प्रबन्ध पद्ये गद्ये चोभयत्राऽपि भवितुमर्हति।

प्रकृतौ निबन्धोऽपि प्रबन्धान्तर्गत एव कैश्चन तेनैव नाम्ना, प्रस्ताव-संज्ञया लेखाभिधानेन च प्रस्तूयते। पर सत्यपि बाह्यसामान्ये निबन्धो नितरा पार्थक्यमा-वध्नाति पर्यायतया स्वीकृतेभ्य। प्रबन्धो हि गद्ये पद्ये च निर्विशेष। महाकाव्य नाटकमपि प्रबन्धो न तु निबन्धस्तदभिन्न। स खलु प्रबन्धापेक्षया लघीयान् स्वल्पिमश्च पूर्णं। वारमेकमारभ्य सगाप्यैव य विरम्यते। अत एव लेखोऽपि तदपेक्षया ह्रासीयान्। स खलु मासिकपत्रेष्वधतः प्रकाश्यमानो विस्तारमतिशयेन भजति। प्रस्ताव-शब्देनापि

भिन्न एव विचारणीयोऽर्थ स्वीक्रियते लोकेऽधुनेति न सोऽपि पर्यायाहं. ।

परिभाषा—नितरा बध्यते वस्त्वेकमत्रेति निबन्ध. । तत् कस्याप्यनधिकृतस्य विषयस्य स्पर्शोऽनपेक्षित एवात्र । तथा सति रस भगो विवेच्य वस्तुनश्चासिद्धि सम्पद्यते । आमूलादेक वस्त्वधिकृत्य यावदन्त तस्यैव सर्वांशत प्रतिपादने निबन्धकला-रहस्य निहितमिति साधु विभाव्य शिक्षार्थिभि ।

इतिहास —निबन्धकलाया इतिहासोऽपि नातिप्राचीन । पश्चिमे सर्वासु समुन्नतासु भाषास्वस्या प्रचुरो विकास । आग्लभाषाया मरे (Murrey) एव बेकनश्च (Bacon) अस्या प्रतिष्ठातारौ स्मृतौ । तयोर्विचारेण मिथोऽसबद्धाना भावाना सघात एव निबन्ध । परमद्यत्वे नैतन्मत समादरस्य विषय । तादृशी कृतिस्तु प्रमत्तभणितिमात्रत्वेन स्वीक्रियेत । इदानी स निबन्ध सुदृढभित्तिवत् परस्पर-सश्लिष्ट-वस्तूपन्यासात्मिका नाति विस्तृता, नाति-सक्षिप्ता, तर्कैर्नाति कर्कशा, नापि श्लथ-विचार-बहुला, साधु पद विन्यासा, सुव्यक्तभावमधुरा, पृथुविवेकाऽपि मुग्धवचना, गभीराऽपि चपलगति विलासिनी, सुश्लिष्टा कृति । साहित्यस्यान्या विधा प्रायो मनोवेग-तरग भगी-विलोडिन्यो भावतत्त्वप्रधाना , पर निबन्धे सदसद्विवेक चातुरी-तुरीग्रथित-वस्तुपटे पटीयसि बुद्धितत्त्वस्यैव प्राधान्यम् । इतरत्तु गौणमेव । द्वयो समन्वयस्तु साधीयान्, अत एव स विदुषा विचारकाणा समीक्षकाणाञ्च मस्तिष्ककण्डूविघटन-पटु । फ्रास देशस्य मोन्तेञ्-सज्ञको निबन्ध लेखकाना मूर्धन्यो विचार बहुलेऽप्यत्र तर्काणा गलहस्तिकामेव ददाति । तस्यायमेवाभिप्रायो यत्तर्कवितर्ककर्कशीकृते सति निबन्धे मनोरञ्जकत्व यस्य व्याहन्येत येन काव्यत्व तत्र न स्वीक्रियेत । निबन्धस्य साफल्य विचारस्य पूर्णतायामपि काव्य-गुणानामक्षतत्व एव । अन्यथा स शास्त्रायते ।

निबन्धस्य प्रकारा :—आधुनिकै समीक्षकैर्मुख्यतया चत्वार प्रकारा निबन्धस्य स्वीकृता । तेषु प्रथमस्तावद् वर्णनात्मक , अपरो विवरणात्मक, तृतीयो भावात्मक, चतुर्थश्च विचारात्मक । तत्र स्थानतुं-प्रभृतिवर्ण्यवर्णनात्मक आद्य, यथा प्राभाति-की सुषमा, वसन्ततुं वाऽधिकृत्य कृते लेखे तद्वैशिष्ट्य-वर्णनमेव क्रियते । तत्र लेखकस्य प्रकृतिनिरीक्षणशक्ति समीक्ष्यते । द्वितीय च प्रकारे व्यतीत-कालसम्पातिनी घटना स्वय दृष्टा पठिता वा वर्ण्यते । पूर्वो वर्तमान द्वितीयोऽप भूत कालस्पृशतीति तयो-र्वैशिष्ट्यम् । जनाना जीवनकथाऽप्यस्यामेव विधाया समापतति । सस्मरणान्यप्यत्रैवा-न्तर्भवन्ति ।

तृतीये भेदे च किमपि वस्तु स्थान वा समीक्ष्य मानसी प्रतिक्रिया काव्यगुण-मारमन्यरया गिरा व्यज्यते । अस्मिन् भावावेगस्य प्राधान्य यदुपयोगिनो ललित-

ललिता पदावल्यपीष्यते । एवंविधे च व्यतिकरे तत्र गद्यमपि पद्यायते पद्यमपि गीतायते गीतं च काव्यायते काव्यं च मृद्वीकायते । गद्यगीतमपि तदा तन्निबन्धं व्यपदिशन्ति काव्यमर्मज्ञाः ।

चतुर्थे प्रकारे सामाजिक-समस्यामयाः, शास्त्रीया, नृपनयसम्बन्धिनः, दर्शनं स्पृशन्तः, साहित्य-गोचराश्च सर्वेऽपि विविध-विषयावगाहिन आलोचनामया गूढा अगूढा अपि परिकलिता भवन्ति । तेषा शैली प्रसाद-सुमुखी, सारवती, गभीरा, स्फुट-लघु-पद-विन्यासरमणीया, विचारचारुतामयी, शास्त्रीयमूक्ति-प्रमाणाटीकन-पटीयसी, बाह्यवृत्तिमसज्जाऽऽडम्बर-रहिताऽपि निसर्ग-भाव-भर-मन्थराऽमन्द-रस-निर्भरा, राग-विवेक-समन्वयावदाता रमणीव किमपि रामणीयकमातनोति कृतौ । सिद्धवाचां विदुषा लेखनी स्वयमेव नृत्यति तेषु ।

निबन्धस्य वैशिष्ट्यम्—पूर्वमेवाकितं मन्न निबन्धे साहित्यस्येतर-प्रकारेष्विव रागात्मक तत्त्व प्रमुखतां भजते । इह तु बुद्धि-तत्त्वस्यैव प्राधान्यम् । अत्र हि न नूतनया कल्पनया नवं वस्तु सृज्यते, यथा-रुचि वोद्भाव्यते । अपि तु सत्यं जगत् सूक्ष्मेक्षिकया निभाल्यते तोल्यते च सदसद्विवेक-तुलायाम् । परीक्ष्यते विविध-विचार-निकषैः । वैमटिका इव मणि-गण-जाति-समीक्षणेऽधीलानेक वैद्यविद्याः, करतलाऽऽमलक-वत् सकलमपि विचार-निघ्न वस्तु जानन्तो विद्वास एव प्रभवन्ति तेषा लेखने । अतो नाऽल्पा कोऽपि द्वित्रो ऽवित्रो वा निबन्धे पाटव लब्धुमीष्टे । गम्भीरमध्ययनम्, लेखन्यामधिकारः, विविधासु शैलीषु गमने नैपुण्यम्, अनल्प-शब्द-प्रयोगावसानः कोष-परिचयः, अनुप-जात-गद्यो-विरामोऽभ्यासः, कोविदाग्रलिखितलेखानुशीलनम्, नव-नव-विचार-प्रसूति-कुशला नैसर्गिकी प्रतिभा, वस्तु-विवेचनक्षमा दृष्टिः, सूक्ष्मानुवीक्षणे च जगतोऽपरिहार्यम् निबन्धलेखने दक्षता क्षिप्तमानस्य । स्वैयालस्य महिमा साहित्यागस्य । लब्धाधिकारोऽत्र प्रगायति यशो दिशु, आरोपयति प्रतापम्, उपकरोति जिनामूर्, प्रजनयति सम्मानम्, समर्धयति सरस्वती कोशम्, परिष्करोति भाषाम्, तनोति विवि-धविषयविज्ञानम् । इयमनुरञ्जन-क्षमा श्रीः सम्यापि वाङ्मयस्य । समीक्षयता विदग्-धाग्रियम् । सर्वत्रानुदिनमेधते निबन्ध-रत्नराशिः । उपचीयन्ते पटीयासः सर्वेष्वपि विषयेषु निबन्ध-बन्धन-बन्धुराः सिद्ध-लेखनीकाः सव्यापन्नः । कः खलु हिन्दी-साहित्य-समुन्नतेः ? विस्तरप्रायैर्वर्णैः, पूरितोऽस्य कोशः. प्रतिभा प्रभोल्लासितं-भंगि-भणितिरिव प्रबन्धराशिभिः । नानुचितपरिमिताऽस्य सदीय-लेखकानां सङ्ख्या, अन्या अपि प्रान्तीया भाषा समृद्धा एव गण्यशालिन्या । का कथाऽन्यादीनाम् ।

कः हन्त ! मन्त्रामेव दरिद्रायोद्योगाय-कल्पन् । 'गद्यं कवीनां निकष वदन्ति' इति सूक्तिं बहुभिः कामेषुविषयीकृता । निबन्धस्तु तस्य नाम्नदेय । यत्र-

पया दरिद्रा कृतीर्विहायाभाव एव दृश्यते तदीय-रचनानाम् प्राचीनसाहित्ये, प्रबन्ध-चिन्तामणिसदृश्यो नेमा कोटिं वस्तुत स्पृशन्ति। अर्वाक्तनैरेव कैश्चिल्लेखकै-र्विरचिता पुस्तिका नालमारीकु क्षिभरयो यत्र तत्रोपलभ्यन्त इति शोच्या दशा।

अतो विदुषा तेषा चरणेषु विद्यामधिजिगासमानानामन्ते-वसता च कर्तव्यमिद दुरभावस्यास्यास्त-करणम्, कोऽह सिद्धवाचामनुशासने, परमनभ्यस्तचरा अनुपगत-प्रौढयश्छात्रा एव शिक्षयन्ते। नाल्पज्ञोऽनधिगत-सर्वविषयक-सामान्य-परिचयो, वा जन साफल्येन प्रभवति निबन्धाल्लेखितुमिति मनसिकृत्याऽनवरत शास्त्र-परिशीलन-परैर्भवितव्यम्, विविधविषयावगाहनाय सयतनै प्रकाशितपुस्तिकासु, मासिक-पत्रिकासु च पररचित-निबन्धाना विषयसामग्री शैली चाधिकर्तुं माग्रह ग्रहिलै सतताभ्यासे वर्तितव्यम्। शैल्यो हि गद्यस्य विषयानुसारिण्य। पद्येऽपि निबन्धन सभवति पर विचार चक्रमण-चातुरी चर्मायै न सा पद्या साधीयसी। 'ओज समास-भूयस्त्वमेतद् गद्यस्य जीवितम्, इति नैकान्तिको नियम। विगत-वृत्तिरल्पवृत्तिरपि वा पदावली परिष्कृता चेत् सुतरा वरीयसी विवक्षितवस्तु-प्रस्तावे। विषयानुसारिणी च परिवर्तमाना विराजते शैली। वर्णनात्मकेषु निबन्धेषु प्रवला भवति भावुकतेति काव्य-तत्त्वाना शोभनस्तत्रावसर। स्फुट-पद-विन्यासा लघुतरा वाक्यावली ववचन सवृत्तिवा सानुप्रासशब्दकृतनाद-झाकारिणी वृत्तगन्धिगद्यमयी, सालकारा क्षगतेऽपूर्वा रुचिगा-धातु तेषु। गहन-विषय-गभीरेषु तु सरलाऽवृत्तिका विमर्शबहुलाऽनाडम्बरा पद्धति प्रसादमासेदुषी प्रभवति विचारान् हृदयान्यारोपयितुम्। आरब्धशब्दक्रीडो हि तादृशेषु लेखेषु नावगाढु क्षमो विषयस्य तलम्।

निबन्धागानि—शैलीमभ्यस्यता छात्राणा सौकर्याय निबन्धस्यागान्यत्र प्रस्तूयन्ते। तदनुसारेणैव तैर्विवेचनीयविषयस्य विभागमयी रूपरेखा कार्या। भूमिका, हेतु, उपपत्ति, उपसहारश्चेति चत्वारि तस्यागानि। तत्र प्रथमे वस्तुपरिचय, द्वितीये कारणात्मिका पृष्ठभूमि, किमप्यैतिहासिक वृत्त मूले यदि स्यादत्रैव योज्यम्। पर नोदाहरणतया। ततश्च युक्ति प्रति-युक्तय, दृष्टान्ता, प्रमाणानि। अन्ते च निष्कर्ष इति संविभक्त वस्तुजात सुतरा साध्नोति निबन्धम्।

सतुलित स्यादगोपन्यास। नाति-ह्रस्व, नाति दीर्घ, नावगाढविषयान्तर, नाविमृष्टप्रकृतवस्तुक, नावाञ्छित सामग्री दूषितो निबन्ध सुतरा रोचते समालो-चकेभ्य। असमविभक्तावयवो हि भजत्युपहास जन समाजस्य। अतस्तया प्रयतनीय छात्रैर्यथा ऋजुनैव पथा स्वल्पेनैव कालेनाभ्यस्तविविध शैलीका नाना विषयज्ञाना-धिगतय प्रौढि भजेयुर्लेखनकलाया। किन्नाम नासाद्यतेऽभ्यास-शीलै? तथाहि—

"क्रिया सिद्धि सत्त्वे भवति महता नोपकरणे।"

—०—

प्रातः सुषमा

हन्त ! विभाता रजनी ! अपसृत दिग्वधूवदनावगुण्ठन गहन तम । सहृतो नामारुण-परिचारकेण मसृण-किरण-सरणिमार्जन्या गगनपथेऽवकीर्णस्तारकाव-करसकर । कुलाय-सकुल-खगकुलोत्कूजितैराकुलिता नभस्थली । दूर्वासु मुक्तामया, किसलयेषु पद्मरागरुचय, शाद्वलेषु मरकत-शकलाकृतय, अच्छाच्छ-स्फटिक-शिलासु क्षीर लववपुषो रोचन्ते निशा नूपुर मणिगणाइव हिमकणा । अवसीदति विषादो विरह विधुर-चोकमिथुन मनोगुहोपचित । प्रसरति प्रकाश. समीरेण समम् । नृत्यन्ति लता जनहृदयै सह, वेपन्ते पत्राणि तिमिरकिशोरकै साकम् । अपसरति क्षणदा-कृता चक्षुषोरगतिरुपचितया वपुर्म्लान्या राधम् । समायाति जरदरुणशिख-शिखारुणारुणरथा कूजद-विहग परिगीयमान विरुदगीता कुसुम-रस-पाटच्चरैश्च-चूर्यमाणैश्चचरीकै कृतजयनिनादा विकचिलकुसुममञ्जरी प्रसाधना भगवत्युषा । समीक्ष्य तामागता समुद्घाटित-हृदयकवाटो वैदिक कविमुंदा गातुमारभते—

एषा दिवो दुहिता प्रत्यदर्शि ज्योतिर्वसाना समना पुरस्तात् ।
ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥

आगतयैव तया स-चटचटा शब्द विमुद्रितानि कमल-कुड्मलानि । विरमति च कङ्कणखणत्कारमनोरमेण गोधूमपेषणपर-रमाकुल-गृहिणी करेण समाश्लिष्ट चक्र भ्रमणात् । मुञ्चन्ति नीडान् खगा, आरतीर्णं तृणबुससकुल शयन तर्णका, मन्दीकृतरोमन्थ क्रिया हम्बारव सुरभय, नालाकृष्ट-जलविहितगुडगुडा शब्द निश्वास-सहकृत-वान्त-धूम हुडुत्का (हुक्का) कृषका । आलक्ष्यन्ते चोच्छलता सलिलेन परिपूर्ण-कलशै स्नाय शिरस इतराश्च चाटुशत विबोधित रुदित-वत्सोपशमनव्यग्र-सहज-वात्सल्या, अपराश्च दुह्यमान-धेनु-सम्मुखोपधावितस्य वत्सस्य सच्चुचुत्कार ग्रहणे व्यस्तहस्ता, अन्याश्च गृहीत निशितदात्रकरा पृष्ठावलितोत्तरीयमुद्गता, अनभिव्यज्य-मानकलगीतिगानावधीरितखेद सपाटव लुनन्त्य शष्प ग्राम-ललना । नगरेषु च तन्द्रिल-नयना अवशिष्ट निद्रासालसारसवपुष पृथु निलम्बिन्यो दीर्घ-जृम्भा विवृत-वदनास्तनु रुचि-विहसिताचिरविलासिन्यो विलासिन्य सानुरोध प्रियकर निरुध्यमानो-त्थानावेगा अपि त्रपावधीरित-प्रणयि प्रणया जहति शयनीयम् । सालसाश्च युवानोऽर्ध-

शयाना पल्यकेषु सनाट्यमधरविचुम्बितोष्णोष्ण पानचषका, करगृहीतधूम्रवर्तिका मञ्चिकोपनत समाचार-पत्र परिशीलयन्ति, विलोकयन्ते च गृहाद्-गृहम्, रथ्यातो-रथ्याम्, विपणेर्विपणि बभ्रम्यमाणा समाचार-वितरका 'गृह्णीत भो ! समाचार-पत्रम्' (अखबार लेना जी) इति तारस्वर वदन्तो द्विचक्रिकया धावन्त । प्रबुद्धा भ्रमणप्रिया प्रवयस पृष्ठतोऽनुधावित पृथुका सरिन्मुखाभलित-गमना । किं बहुना, निस्पन्दतामिवागत सकल जगत् सहसैव कलप्रचलितयन्त्रवत् स्वे स्वे कर्मणि प्रवृत्तम् ।

हहो ! किमिदमचिरेण बहुवर्णतामाकलयति भुवनम् ? क्षितिज कुहरे जरन्मर्कटमुखप्रतिमा, असितजलधरकुलेषु धूमाकुल-दहनज्वालानिभा, शिखरि शिखरेषु प्रज्वलच्छिखि-शिखा-ताप्यमान-तापनीय-तरल-चपला, महीरुह शिरसु सादर पिष्ट-किञ्जल्कवारि-कपिशा, सौध-मूर्धसु, चतुष्पथेषु, सरित्तटेषु क्रीडास्थलेषु, अविरल-प्रवाह-कूल-कपाऽतल वारिराशिषु सहसा प्रकीर्णोऽनुपम, अमित, असीम, अभेद्य प्रकाशकोष[2]ः ।

अये ! अधिरूढो नभ पथ घन-शिशु विशद सोपान सरणिश्चराचराश्वासन-समाग्रहिसहस्रकरो भगवान् गभस्तिमाली । पादाक्रान्तानि सहसैव तेन भूभृच्छिरासि । प्रचलिता गोचराभि मुख पुर सरीकृत क्वणत्किङ्किणीझणझणायित-ध्वनित दिगन्तर-गोवत्स-पटला वल्लव-मण्डली । उत्पतिता गगनाभिमुख कूजद्विहगश्रेणी, प्रस्थित क्षेत्राभिमुख स्कन्धस्थबीज-गोणिरग्रत स लागलसनाथगोमिथुन कृषीबल । प्रयाता आपणान् पण्यभारवाहितवामी-दासेरका सार्थवाहा । विसृजति प्रखरकरे करशर-प्रकरान् सर्वतोमुख विद्रुता गृहान् प्रति भ्रमणार्थिन । वयमपि विरमामहे स्मृत-कृत्य-व्यूहा अधिक पल्लवनान्निबन्धस्य । पर स्मार स्मारमुपाकलितहिमकणहारिणी प्राभातिकी सुषमा प्रसीदतितमा चेत ।

होलिकोत्सवः

(चन्द्रमहोपतेः)

ऋतुरय वसन्त होलिकोत्सवश्च, स्वच्छ नीलमम्बरम् । नातिशीतोष्णो वातस्तनु सुखयति । उडवो महता प्रयासेन जगत्तमोऽपहन्तु प्रयतन्ते । राजेवाकृतकार्यान् विज्ञाय सैनिकान् धृतवाश्मीरवर्णवेशोऽशेषन्तमोऽपहन्तुमुपस्थितश्चन्द्र । राजतैर्वाणैरिव किरणै-र्हेलया नाशित तम । विचक्राम तेन मनो मोदयत विजयेन धन्यवादमिव वितरद्भसदिव सर्वञ्जगत् । विजयपटहध्वानमिव चक्रुर्नवोढा वलयनूपुरमणिमञ्जीरशिञ्जितम् । निशान्तेषु प्रसुप्तकान्तावसनध्वजच्छलेन भुवन विस्तारयामासेव विजय वायु ।

अद्यतनेषु दिनेषु सर्वत्र भङ्गाभक्ष्या सप्रेम पूजनम् । सा हि परपक्वेल्लजवातादद्राक्षाखाखस-बीज-पञ्चक वकुलदल मिश्रा मिश्रेमदुग्धसिताङ्गसङ्गिनी अङ्गिना साग-सामोद विनोद मोदयति । सम्प्रत्यहिफेन आद्रियते, आसव आसूयते, निकुञ्जेषु गजाया अनिभृत मेवा । गुलालस्य कथैव का, या या वीथिरवलोक्यते गुलालरचितेवाभाति, आरक्तवासस्तया स्त्री-निर्विशेष पुरुषा विदूरतो वीक्ष्यन्ते । बहुविध रागपूर्णैर्निर्झरैर्जंगा जगदेव रञ्जयन्ति । वराकाना गर्दभानामधत्वे गरीयसो दुःखस्य समय उपस्थित । एते यत्र क्वापि भ्रष्ट-कूप निपाने, निपतितगृहकोणे, श्मशानगृहे वाऽऽत्मान तिरोभावयन्ति तत्रैवैते नागरिका दुर्बाला एतेषा वराकाणा पृष्ठ न शून्य कुर्वते । ताड्यमाना धाव्यमाना रेंकारशब्देनान्यान् सहयोगिन सूचयन्त इव व्यथा प्रकटयन्त इवाभित प्रेक्षन्ते । अश्लील शब्दैरुन्मुक्तमुखमानन्दमाम्राज्यमनुभूयते ।

एकतो मनुष्या महता चर्मनद्धेन ढक्केन सहोहोकार कायन्ति, इतरतश्च कामिन्य सवलयसणत्कार तार गायन्ति । एकतो युवानो मध्य धृतमुरजा चतुष्पन्थासेन स्थिता दण्डखण्डेन दण्डखण्ड वादयन्तो गा दडदडायन्ते । अन्यतश्च वधूटयो यौवनच्छटा वचसा, वाससा, निरीक्षणैर्भूषणैश्चलनेन, गमनेन, हावैर्हारैर्नोद्भवमन्त्य खेलायन्ति । क्वचन काश्मीरागुरु पूर्णा मुष्टिरामृश्यते, क्वचन भरगोमयगोमूत्राणि निपिच्यन्ते । प्रतीयते, सवत्सरसचिता पाशवप्रवृत्ति पुमानशेषेण प्रमार्ष्टुं सज्जते ।

विविध-कल्पा सविमाना सासवा सभस्मचूर्णा चरकसंहितेव बभौ होलिका। सुश्रुता वाग्भटेन केनाप्यनुत्तरेण नावतस्थे। नन्दन-विनन्दकेन पादपातित-चैत्ररथपरिमलेन सकलसंसारसुगन्धसारसूतेनेव कान्यकुब्जोद्भवेन जितेन्द्रियाणामपि घ्राणमाकर्षयता, सुरभिलोलुप-मिलिन्द-वृन्द-विहित-पिधानेन निहारिणा द्रवेण पूरिता होलिकोत्सवाय परिकमला-भवनं स्थापिताः शुभ्रमणिखचिता नील-दृषन्निर्मिता तारकितमिव नभोऽनुकुर्वंत्यः स्नानजलकुण्डिका विशेषतो भवनं भासयन्ति। समयेऽस्मिन्नविगणय्य कमलिनी-सङ्कोचशोकं रोलम्बकदम्बेनारब्धा झंकृतिरनुसुगन्धिद्रवम्। आमोदिना तेन दिशः प्रसेदुः। जन्मभूरिव सौरभस्य प्रभव इव पद्मिन्या भवनमवर्तत।

—❀—

ग्रीष्मर्तुः

(हर्षचरितात्)

अत्रान्तरे कुसुम-समय-युगमुपसहरन्नजृम्भत ग्रीष्माभिधान, फुल्लमल्लिका-धवलाट्टहासो महाकाल । प्रत्यग्रनिर्जितस्यास्तमुपगतवतो वसन्तसामन्तस्य बाला-पत्येष्विव पय पायिषु नवोद्यानेषु दर्शितस्नेहो मृदुरभूत् । अभिनवोदितश्च सर्वस्या पृथिव्या सर्वकुसुमबन्धनमोक्षमकरोत प्रतपन्नुष्णसमय । स्वयमृतुराजस्यागृह्यन्ताभिषे-कार्द्रश्चामरकलापो इव वामिनी-चिकुरचया कुसुमायुधेन । हिमदग्धसकल-कमलिनी-कोपेनेव हिमालयाभिमुखी यान्तमादशुमाली । ललाटन्तपे च तपति तपने चन्दन-लिखितललाटिकापुण्ड्रकेरलक-चीवर-समन्वितै स्वेदोदबिन्दु मुक्ताक्षवलय-वाहिभिर्दिन-कराराधननियमा इवागृह्यन्त ललनाललाटेन्दु-द्युतिभिश्चन्दनचूलिचूसराभिरसूर्यं-म्पश्याभि कुमुदिनीभिरिव दिवसमसुप्यत सुन्दरीभि । निद्रालसा रत्नालोकमपि नासहन्त हरा किमुत जरठातपम् । अशिशिरसमयेन चक्रवाकमिथुनाभिनन्दिता सरित इव तनिमानमनीयन्त सोढुपा शर्वयं । अभिनवपटु पाटलामोदसुरभिपरिमल न केवल जल, जनस्य पवनमपि पातुमभिलापोऽभूत् । दिवसकर-सन्तापात् क्रमेण च खरखग-मयूख-खण्डितशैवले, शुष्यत्सरसि, सीदत्स्रोतसि, मन्दनिर्झरे, झिल्लीझङ्कारिणि, कातरकपोतकूजितानुबन्धबधिरितविश्वे, श्वसत्पतत्रिणि, करीषकषमरुति, विरल-वीरुधि, रुधिरकुतूहलि-केसरिकिशोर लिह्यमान कठोरघातकीस्तवके ताम्यत्स्तम्बेरम-यूथवमथुतिम्यन्महामहीधरनितम्बे, दिनकरदूयमानद्विरददीनवदनाश्यानदानश्यामिका-लीनमूकमधुलिहि, लोहितायमानमन्दारसिन्दूरितसीम्नि, सलिलस्यन्दसन्दोह-मुह्यन्महामहिष विषाणकोटिविलिख्यमान स्फुटत्स्फाटिक-दृषदि, घर्ममर्मरितगमुं ति, तप्तपासुकुकूलविकरण-कातर-विकिरे, विवर-शरणश्वाविघे, तटाजुं न कुररकूजाज्वर-विवर्तनोत्तानशफरशारपङ्क्तेशपल्वलाम्भसि, दावजनितजगन्नीराजने रजनी-राज-यक्ष्मणि कठोरीभवति निदाघकाले, प्रतिदिशमाटीकमाना इवोपरेषु प्रपाकटकुटी पटल-प्रकटलुण्टका पक्वकपिकच्छूगुच्छाच्छोटन चापलैरकाण्ड कण्डूला इव कर्पन्त, शर्करिला, कर्करस्थली, स्थूलदृषच्चूर्णमुचो मुचुकुन्दकन्दलदलनदन्तुरा, सन्ततपन-ताप-मुखरचीरीगणशीकर-शीत्यमान-तनवस्तरुणतरतरणितापतरले तरन्त इव तरगिणि मृगतृष्णिकातरगिणीनामलीक वारिणि शुष्यच्छमीममंरमारवमार्गलघन-लाघवजवजघाला, दावदहनपच्यमानचटकाण्डखण्डखचिततरुकोटरकीटपटलपुटपाक-गन्धकटव प्रावर्तन्तोन्मत्ता मातरिश्वान ।

शरद्-ऋतु-वर्णनम्

अहो ! अपगता प्रावृषेण्या दुर्निशा, विरता खलु तडिद्दीपितान्तरा नीलनीला कादम्बिनी । विगतो नाम भेकरटित कटुकर्णज्वर । उपारत उत्तुंगतरंगभंगी-विबोधित सिन्धु कुलोत्साह । उपशान्त पिशुनकुलव्रतमिव मशकगणस्य कर्णेजपत्वम् । कल्पान्तकालिक इव सक्षय एव जातो विवर्धमानकृमिकुलशतस्य । अपकीर्य मुक्तहस्त सकलशुचि-सचित पयोराशि रिक्तकोश स्तनितमात्र पौरुषो याति शिथिल धाराधर । क्वचित् क्वचित् रुदत इवात्म स्वनत स्थूलाश्रु विन्दव इव पतन्ति जलविन्दव । समीक्ष्य च त विगत व्ययितस्व पलितपलित जजरतनु वातेनापि क्षिप्यमाणमलभमान पद गगनपथेऽपि सहृत लक्ष्मीका विलीना क्वाऽपि सौदामिनी । स्फुरति च परितो निशा-कलुपघस्मरेऽच्छाच्छ कुमुद-राजि राजित-प्रतापे भुवनतलव्यापिस्फारातपे राजनि नक्षत्रकुल-सनाथे पलायित द्युतिलवलाभदुर्विदग्धंस्तस्करैरिवेतस्ततश्चक्रम्यमाणं-ज्योतिरिङ्गणं । वर्षासु मधुतमोऽपि केकिना केकारवोऽधुना विषधराशनसविष इव न रोचते जनेभ्य । निस्तीर्य च वनवास-कालमिव पाण्डवा जलधर-समय पुनरव-तसयन्ति धरणीतल कलहसा । वर्णयति च महाकवि मघ —

समय एव करोति बलाबल प्राणिगदन्त इतोव शरीरिणाम् ।
शरदि हसरवा परुषीकृतस्वरमयूरमयूरमणीयताम् ॥

अधुनाऽऽभाति मही विपङ्का, विरजस्का, अपरुषा, अतिमिरा, अपुष्कलकृमि, अवर्षबाधा च । पुनरिय शोभते विमलतारकित नीलाम्बरा, वसाना चीनाशुकमिव चन्द्रिकावरण भिल्ली झकृतिकलगीति सुखदा चन्द्रातप प्रतानधवलितनभोऽवकाशा श्यामा शरच्छर्वरी । कामिनीकलकठगीतो दूर प्रयाति जनकर्णशष्कुली पूरयन् सुधापूर इव मधुरो गीतध्वनि । काशमयमिव, कुमुदमयमिव, पुण्डरीकमयमिव शेफालिका-मयमिव च विभाति भुवनम् । गायति च भारतीविलास सोल्लास कालिदास —

काशांशुका विकचपद्म-मनोज्ञ वक्त्रा,
सोन्माद हस-रव-नूपुर-नाद-रम्या ।
आपक्वशालिरुचिरा तनुगात्र-यष्टि,
प्राप्ता शरन्नववधूरिव रूप रम्या ॥

नगरेष्वदानी श्यानपङ्केषु राजमार्गेषु शफयं इव सरित्सु प्रतिक्षणं पो-पो-ध्वनिभिरपसारितपुरःसरा सरीसृपा इव धावन्ति दिशोदिश तैलसवट्य । विहरन्ति स्वैरमापणवीथिषु वातोद्धूयमान-चीनाशुका उपनेत्रश्यामायिताक्ष्य पृथुश्रोणिबिम्बा-मन्वितानुयात्रिकयो वस्तु क्रय-व्यग्रा प्रमदा । अपाकृते वृष्टिजे मार्गबाधे, अनुप्लुते च यातायातकर्मणि द्विगुणितो व्यवसायिना व्यवसाय । आपूरिता विविध-खाद्यपेय-व्यजनादि-सभारं पण्यवीथ्य । प्रवर्तते च यथारुचि यथाकार्यं च पर्यटकाना यात्राक्रम ।

ग्रामेषु च सुरभिकलम-मञ्जरीपिञ्जरा, वातानर्तितशालिपरम्परानिरन्तरसस्या, तारध्वनिपरक्षेत्रपति-वार्यमाणशुककुला, मुद्गमाषशिम्बीचुम्बितप्रान्तपालिका, युगधर-सरवक्रपीवलकृष्यमाण केदारा, क्षेत्रपति कुटुम्बिनीजनरोप्यमाणमरिचा-ङ्कुरा जलसेकशिशिर-मूल-परिवर्धमानेक्षुदण्डा क्षेत्रभागा । अपि च—

सपन्न-शालिनिचयावृत भूतलानि
स्वस्थस्थित-प्रचुर-गोकुल शोभितानि ।
हसैः ससारस कुलैः प्रतिनादितानि
सीमान्तराणि जनयन्ति नृणा प्रमोदम् ॥

शेफालिका-कुसुमै सुशोभितान्युद्यानानि कूजत्खगकुल-कलरवैर्मुखरयन्ति दश दिश । मुक्ताफलामलसलिल-शोभि शोभते चारु सरस्तलम् । क्रीडत्कलहसमिथुनानि, क्रौंकारकृति प्रवणसारस-युगसनाथानि च सरिता तटानि । चञ्चत्-खञ्जनमञ्जु-लीला विलोलितानि तरुलता गुल्मानि, मरकतकण-रुचिरचिर नव-दूर्वाप्रवाल लालितानि हारीतहरितद्युतिहारीणि शाद्वलानि । किन्नास्ति नयन-विलोभि दृश्यम् । सर्वथा राजतेतमामिय शरत् स्व सुषमा-प्रपञ्चैन ।

पर हन्त ! किं सर्वेषामिय हृदयहरी ? रोगकषायिताननस्येव मधुरमशनम्, शीताकुलस्येव सुरधुनीस्नानम्, पतिव्रताया इव वारागना-सुलभ वैभवशतानि कृपणस्येव पात्रोत्सर्गपुण्यम्, निर्घृणस्येव करुणोपदेश कोकमिथुनस्येव वासती निशा न मदयति मनो दारिद्रमथितस्य क्षुधा जर्जरस्य जनस्य । तस्य कृते तु मलयवात्याऽपि निदाघ-ज्वालायते, लतामण्डपमपि दहन-कुण्डायते, कलकण्ठ वाकलीधिक्करण-चञ्चुरकामिनी-स्वरसनाथ वीणा क्वणितमपि कर्णज्वरायते । यत —

'बुभुक्षित न प्रतिभाति किञ्चित् ।'

अत स्वर्णसारवता पूरितोदरदरीणा विहारैककतव्यानामेवानुभवयोग्या रसनीया सुखकरी चेय शारदी सुषमा न तु क्षुद्दहनददह्यमान सप्त-धातूनाम् अकिञ्चना-नामिति शम् ।

'कबड्डी'

(क्रीडा)

विविधकरणीयभारवति जगति जीवनमिव मनोरञ्जनमपि परमावश्यकमिति न कस्यापि विप्रतिपत्ति । पुरुषार्थचतुष्टय नामास्य जीवितस्य प्रयोजन तच्च शरीरालम्बनम् । नित्यकार्यव्यापृतस्य जनस्य शरीरमिव मनोऽपि श्रान्ति सवेत्ति तदपनोदार्थं च विनोद एवामोघोपधि । क्रीडाविहारभ्रमणादिषु विनोदसाधनेषु क्रीडा सर्वोत्तमा यथा शरीरस्य मनसश्च समकालमेव सिध्यति व्यायाम । बालानामिव यूना जरठाना च परमप्रीत्यास्पदमियम् । स्वदेश्या विदेश्या चेति द्विविधा क्रीडा । तत्र वैदेशिकय महार्घतया न सर्व-सुलभा इति भारतीया एव सामान्य जनस्योपयोगार्हा । तासु कबड्डीसज्ञा न स्वल्पमपि व्ययमर्हति देहबलस्य च वर्धयित्रीति रोचतेतमा ग्रामीणेभ्य । बलिष्ठा एव ता क्रीडितु क्षमा । भारतस्य चेय ख्याततमा क्रीडा ।

एतदर्थं प्रायश्चतुर्दश क्रीडका अपेक्ष्यन्ते ये क्रीडाक्षेत्रस्योभय-पार्श्वोस्तिष्ठन्ति । क्षेत्र चाक्षवाट-सम मसृणतल विमर्दक्षम च श्रेयस्कर येन क्रीडकाना न जानुनी हस्तौ वा भज्येते । मध्ये-क्षेत्र चैका विभागरेखा पार्श्वौ विभनक्ति । एकश्च मध्यस्थस्तेषा क्रीडने क्रियमाणाम् अनियमितता निरीक्षते । क्रीडनकाले सर्वे केवलमन्तर्वस्त्रं परिदधति । प्रतियोगितासु चोभयपक्षगाना विशेष एव निर्देशको गणवेशो धार्यते येन दर्शका पृथक् सर्वान् विभागशो ज्ञातु क्षमेरन् ।

क्रीडारम्भे क्रमज्ञानार्थं निरीक्षक काचिन्मुद्रामन्यद् वा वस्तु पक्षशो भागौ निर्धार्योपरि क्षिपति । यस्य भाग उपरिष्टाद् भवति स एव[1] वारनिर्धारकस्य (Toss) विजेता मन्यते । तत सर्वे कुमारा. स्व-स्व पार्श्वा क्षेत्ररक्षादि-विचारेण तिष्ठन्ति । प्रत्येक पक्षे कश्चिन्नायको (Captain) भवति य. स्वानुगाना नेतृत्वमाचरति । स्थितेषु स्व-स्व-स्थाने निरीक्षक सीत्कृति (Whistle) करोति यस्या ध्वनिना सहैव कुमारा कुमारणमारभन्ते । एक क्रीडक करतलेग जघे स्फालयन् मुखेन च कबड्डीति शब्दमुपाशु स्फुट वोच्चारयन् प्रतिपार्लीं प्रविशति । विनैव श्वासमोक्ष च प्रतिद्वन्द्विनः स्पृष्टु यतते । ते च स्वपाली-गतमेव त दिधीर्षन्ति । धृतोऽपि तै श्वासस्य भगात्पूर्व-

मेव विभाग-रेखां गतश्चेत् तेन स्पृष्टास्तावतोऽङ्कान् लुम्पन्ति परश्च पक्षस्तदधिकारी भवति । क्वचिच्च स्पृष्टा. क्षेत्राद् बहिस्तिष्ठन्ति यावन्न स्वयमपि तावतः प्रतिपक्षिणः स्पृशेयुः ।

निरीक्षकश्च सावधानं निरीक्षते यथा न कोऽपि प्रमादं (Fowling) कुर्यादिति । तादृशं प्रमादं पश्यति चेत् क्रीडा पुनरारम्भयति । क्रीडाकाले क्षेत्रबहिर्गतो बहिष्क्यः (Out) व्यपदिश्यते, क्वचित् पञ्चदश विंशति वा जेयाङ्का भवन्ति । पक्षद्वये समानाङ्क-भाजि निरीक्षको वारमेकं पुनस्तौ खेलयति । जिताधिकाङ्कं च पक्षं जेतारं घोषयति ।

प्रतियोगिता-काले मुहूर्तमात्रं मध्यावकाशोऽपि भवति कुमाराणां विश्रामार्थम् । उभयपक्षप्रियाः क्षेत्रपरिधेर्बहिस्तात् तिष्ठन्ति । ते स्वपक्षानुत्साहयन्ति तेषा त्रुटीश्च बोधयन्ति । बहुधा दर्शकाना महीयान् संमर्दो (Crowd) भवति व्यवस्थार्थं रक्षापुरुषाश्च (Police) आहूयन्ते ।

बहुवंकं वारदायिनमेक एव प्रतिपक्षी धरेदित्येव नियमो दृश्यते । भवति च तत्र कुमाराणा बलपरीक्षा । बलवत्तरस्तत्र भूयसोऽङ्कानर्जयति ।

यदा कश्चिदपि पक्षो जयाभिलाषुकः कूटक्रीडामालम्बते, तदा कलिरपि पदं करोति । निरीक्षकोऽपि बहुधा प्रतारयन् कमपि पक्षमनुभवति ताडनम् क्रीडकानाम् ।

प्राणायामशक्तिरस्या क्रीडायामपरिहार्या । परपालीगत एव कश्चिदस्पृष्टरेखो मुक्तश्वासो म्रियते चेल्लुम्पति सोऽप्यङ्कम् । कोऽपि बलवान् धारक लत्ताप्रहारेण ताडयति पातयति च भूतले चेद् भूयसीः रुक् तस्यापद्यते । अतो वर्जित-प्राय एव लत्ता-प्रहारः कर्तरीबन्ध. (कैंची) वा तादृशीषु क्रीडासु । वैमनस्य-प्रतिशोधनाय क्रीडिते तु बहुवारं क्रीडागण समरागण एव परिणमति । पक्ष-द्वये च केशाकेशि हस्ताहस्ति युध्यमाने सर्वः क्रीडारसो विनश्यति ।

रुचिरेय क्रीडा क्रीडिता चेत् शुद्धेन हृदा । अवाञ्छनीयोऽत्र कलहो विकासश्चास्या विधेय. । शरीरबलस्य विकासिकेयं व्यायविरहितेति सुगमा भारतीयानाम् ।

श्मशान-वर्णनम्

अहो कीदृशं दृश्यम् ? एकत. पुरुषा अनेके विवर्णवदना अस्तव्यस्त-वसना: शोचन्त उपविष्टा:, अपरतश्च सवक्षस्ताडन सतारक्रन्दनं रुदन्ति नार्य: सततरुदितोच्छून-नयना. । काचिन्मत्तेव, प्रमत्तेवोन्मत्तेव चेतेस्ततो विक्षिपन्ती करौ कदाचिद् धावति सरिति पातयितुमात्मानम्, अपरा च 'हा तात, क्व गतोऽसि, देहि मे प्रतिवचनम्, पश्येमा जननी विह्वला प्राणानगणयित्वा जले मुमूर्षन्तीम् । किमिति विस्मृता त्वया चिरमङ्के लालिता बाल्यत. स्नेह-परायणा भगिनी । कथ वा प्रभवसि त्यक्तुं जनकमेन पलितशिरस त्वन्मुख-चन्द्रदर्शनाप्त-संजीवनम् । अद्य मुषितं मे चक्षु:, केनापनीता मे करयष्टि.? केनोद्धृतो मे हृदयखण्ड. ? को लुण्ठति मम जीवनम् ? किं करोमि ? क्व गच्छामि हताशा ? कस्याधुना नवोदितमिव शशिन वदनममलं प्रेक्षिष्ये, को मा सस्नेहमम्बेति भणित्वाऽऽलिंगिष्यति,' इति तारतारं विलपति । कृच्छ्रेण ता सान्त्वयन्ति पार्श्वस्था द्विजा महिला: ।

अये ! केय वराकी किशोर्यवाष्टादशवर्ष-देशीया नवोद्भिन्न यौवनाऽनवद्य-लावण्य-कमनीयाऽचिर-विकच-कोकनदारुणच्छविकरतला विमुक्तवेणी-बन्धविकीर्ण-कुसुमप्रकरा गलितनक्षत्र-परिवर्धमानान्धकारेव निशा क्षीवेव, अपस्मार-ग्रस्तेव, पिशाच-भुक्तेवापहृतमणिरिव भुजगी चिरताडनभग्नकपाला बाला वृद्धाभिरनेकाभि. प्रयत्नेन धार्यते । हा मृष्टाऽपि सिन्दूर-रक्ताऽस्या. सीमन्तरेखाऽभिनव प्रज्वलित-सौभाग्य-दहन-ज्वालेव दूरादपि दृश्यते । मन्ये, अचिरोढाया. अस्या. सपद्येव कालेन करालेन कवलित: प्रेयान् ।

अमी च पुरत. सकलैरपि करणैरक्षतमपि विचेष्टं मानव शरीरं स्नपयित्वा वस्त्रै-राशिर: पादावधि परिवेष्टितं निचिते काष्ठ-निवहे निदधति । अहह ! दीपितोऽ-परेण वृशानु: सचट-चटाशब्दं परितो विस्फुरन् लेलिहानया करालया जिह्वयेव कपिलया ज्वालया गुणपस्थिता मज्जा मेदस्विताभिव भ्रजन् स्फूर्जंता स्फुलिंग-निकरेण रुचिमिव प्रकटयन् प्रवृत्त: शवमात्मसात्कर्तुम् । अये. क एष नृशंस इव घातक इव सवैर इव वह्निना ग्रस्यमानस्याप्यस्य वराकस्य कपालं वंशकाष्ठेन भिनत्ति । बलीया-

अहो विलापोऽधुना बन्धूनाम् । नित्य वसन्तोऽपि तत्रैव साधु-परिचिता अपि तथा-विधाना दृश्याना करुणयाऽश्रुकलुपा दृष्टि परिमृजन्ति ।

हा दग्ध प्राये परेते तृणमिव विहाय तथास्थितमेव त केचिन् सचैल स्नाता अस्नाताश्चापरे गृह प्रति निवर्तन्ते । सर्वेषा मुखे जगतोऽनित्यता, जीवनस्य क्षणभगुरता च चर्चाया विषय । एते गता, इतरे चाचिरेणैवायाता । शिक्षयतीव ससृतेर्गतागत-प्रकृतिमिय भूमि । अहो ! सकलमगलानामेकायतनमपि कियान् रौद्रोऽत्र विभावसु । शान्तिरप्यत्रोद्वेजयत्येव मन । न कोऽपि जीवन् वाञ्छति स्वत इहागमनम् ।

प्राचीन-काव्येषु वर्णन श्मशानानामति भीषणम् । मालतीमाधवे तदीय प्रसगोऽतितरामुद्वेजको जुगुप्सितश्च । क्वचित् पिशाचाना कलकल, अन्यत क्रव्य-भुजा गृध्राणाम्, काकाना शिवाना वा ममर्द । एकस्यापि मासखण्डस्य कृते परस्पर कलहायन्ते । इतश्च पिशाचाना शृगारा दशनीया एव । शवमास भुञ्जानस्य प्रेत-रक्तस्य वर्णन च स्वाभाविकमपि जुगुप्सिततरम् ।

उत्कृत्योत्कृत्य कृत्ति प्रथममय पृथूत्सेध भूयासि मासा—
न्यसस्पिक्पृष्ठपिण्डाद्यवयव-सुलभोन्युग्र पूतीनि जग्ध्वा ।
आर्त, पर्यस्तनेत्र, प्रकटितदशन, प्रतरक घरका—
दङ्कस्यादस्थि मस्थ स्थपुट-गतमपि क्रव्यमव्यग्रमत्ति ॥

(मा० मा०)

एवमेव क्षेमेश्वरस्य चण्डकौशिकाभिधाने नाटके । महाभारतेऽपि गृध्रगोमायु-सवादे श्मशानस्य वर्णन तथा विधमेव । यथा—

अत्र स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायु सकुले ।
कृकालबहुले घोरे सर्वप्राणि-भयकरे ।
न चेह् जीवित कश्चिदकाल-धर्ममुपागत ।
प्रियो वा यदि वा द्वेष्य प्राणिना गतिरीदृशी ॥

पर नाद्यत्वे तादृशी भीषणता जनानामन्तिम विश्राम-स्थलीषु । कातरतया काम विभेतु मानव न पर जुगुप्साया कारण तत्र लभ्यते, नगरेषु रमणीया श्म शान भूमय क्रियन्ते, ग्रामेषु च बहिस्तात् परिवर्ज्य गृहान् क्षेत्राणि च दूर विधीयन्ते । न तत्रापि तादृशी कुत्सिता स्थिति । काश्या मणिकर्णिकाघट्टे क्षणमप्यविरहिते शर्वरपि न तादृशी भीषणता ग्रथेष्वेतेषु वर्णितपूर्वा । अतीते नगराद् ग्रामाद् वा बहिस्तात् कस्या अपि निर्धोस्तटे तासा स्थितेरेतादृशी स्थितिरभवत् । बहनि वर्णनानि च रूढिकृतानि

पिशाचादीना ग्रन्थमात्रप्रसिद्धेः। कापालिकानामघोरमतानुयायिना च श्मशानानि सिद्धिभूमय. । मन्ये, पुराऽर्थलोभात्केऽपि धनपिशाचा दह्यमान एव शवे काष्ठानि जलेन निर्वाप्य विक्रयार्थमगृह्णन् शवस्य चार्धदग्धस्य गृध्रादिभिर्दुर्गतिरेवाक्रियत ।

सर्वथा भावनाकृतेय भीषणता श्मशानभूमे. । अन्यथा साहसिकानां न किमपि भय तस्याः, शरीरस्य निसर्ग-प्राप्तिस्थलीति कृत्वा नमस्तस्यै ।

—०—

कन्दुकावत्याः कन्दुक-क्रीड़ा

(दण्डिनो दशकुमारचरितात्)

तावतोदैरत रणितानि मणिनूपुराणाम् । अथासौ जात-संभ्रमा 'प्राप्तंवेयं भर्तृदारिका कन्दुकावती वन्दुक-क्रीडितेन देवी विन्ध्यवासिनीमाराधयितुम् । अनिपिद्ध-दर्शना चेयंमस्मिन्कन्दुकोत्सवे । सफलमस्तु युष्मच्चक्षुः । आगच्छ तां द्रष्टुम् । अहमस्याः सकाशवर्तिनी भवेयम्' इत्यथासीद् , तामन्वयाव चावाम् । महति रत्नरंगपीठे 'स्थितां प्रथमं ताम्रोष्ठीमपश्यम् । अतिष्ठच्च सा सद्य एव मम हृदये । न मयान्येन वान्तराले दृष्टा, चिन्तीयाविष्टचित्तश्चाचिन्तयम्—'किंमियं लक्ष्मीः । नहि नहि । तस्याः किल हस्ते विन्यस्तं कमलम् । अभुक्तपूर्वा चासौ पुरातनैन पुंसा पूर्व-राजैश्च; अस्याः पुनरवद्य-मयातयामं च यौवनम् ।' इति चिन्तयत्येव मयि, मानघ-सर्वंगात्री व्यत्यस्त-हस्त-पल्लवाग्रस्पृष्टभूमिरालोलनील-कुटिलालका सविभ्रमं भगवतीमभिवन्द्य कन्दुकमन्द-राग-रुषिताक्षमनङ्गमिवालम्बत । लीलाशिथिलं च भूमौ मुक्तवती । मन्दोत्थितं च किञ्चित्कुञ्चितागुष्ठेन प्रसृत-कोमलांगुलिना पाणिपल्लवेन समाहृत्य हस्तपृष्ठेन चोन्नीय, चटुल-दृष्टिलाञ्छितं स्तवकमिव भ्रमरमालानुविद्धमवपतन्तमाकाश एवाग्रहीत् , ममुच्चच्च । मध्यविलम्बितलये द्रुतलये मृदु मृदु च प्रहरन्ती तत्क्षणं चूर्णपदम-दर्शयत् । प्रशान्त च तं निर्दय-प्रहारैरुदपातयत् । विपर्ययेण च प्राशमयत् । पक्ष-मृज्वागतं च वामदक्षिणाभ्यां कराभ्यां पर्यायेणाभिघ्नन्ती शकुन्तमिवोदस्थापयत् । दूरोत्थितं च प्रपतन्तमाहृत्य गीतमार्गमारचयत् । प्रतिदिशं च गमयित्वा प्रत्यागमयत् । एवमनेक-करण-मधुरं विहरन्ती रङ्गगतस्य रक्त-चेतसो जनस्य प्रतिक्षणमुच्चावचः प्रशंसावाचः प्रतिगृह्णती, प्रतिक्षणारूढ-विभ्रम-कोशदासमसेऽवलम्ब्य कण्टकितगण्ड-मुत्फुल्लेक्षण च मय्यभिमुखीभूय तिष्ठति तत्प्रथमावतीर्ण-कंदर्पकारितं-कटाक्ष-दृष्टि-स्तदनुमार्गविलसित-लीलाञ्चित-भ्रूलता, श्वासानिलावेगान्दोलितैर्दन्तच्छदरश्मिजा-लैर्लीला-पल्लवैरिव मुख-कमल-परिमल-ग्रहणलोलालिनस्ताडयन्ती, मण्डल-भ्रमणेषु कन्दुकस्यातिशीघ्र-प्रचारतयाविशन्तीव मद्दर्शन-लज्जया पुष्पमयं पञ्जरम्, पञ्चबिन्दु-प्रसृतेषु पञ्चबाण-बाणान्युगपदिवाभिपततस्त्रासेनावघट्टयन्ती, गोमूत्रिकाप्रचारेषु घनदर्शित-राग-विभ्रमा विद्युल्लतामिव विडम्बयन्ती, भूषणमणि-रणित-दत्तलय-

संवादि-पादचारम्, अपदेशस्मितप्रभानिपिक्त-बिम्बाधरम्, अस-स्रंसित-प्रतिसमाहित-शिखण्डभारम् , समाघट्टित-क्वणित-रत्न-मेखला-गुणम्, अञ्चितोत्थित-पृथुनितम्ब-विलम्बित-विचलदशुकोज्ज्वलम्, आकुञ्चित-प्रसृतवल्लितभुजलताभिहत-ललित-कन्दुकम्, आवर्जितबाहुपाशम्, उपरि परिवर्तित-त्रिकविलग्नलोलकुन्तलम्, अवगलित-कर्णपूर-कनक-पत्र-प्रतिसमाधान-शीघ्रतानतिक्रमित-प्रकृतक्रीडनम्, असकृदुत्क्षिप्यमाण-हस्तपादबाह्याभ्यन्तरभ्रान्त-कन्दुकम्, अवनमनोन्नमन-नैरन्तर्य-नष्टदृष्ट-मध्ययष्टिकम्, अवपतनोत्पतन-निर्व्यवस्थमुक्ताहारम्, अकुरितघर्मसलिल-दूषितकपोलपत्रभङ्ग-शोषणाधिकृत-श्रवण-पल्लवानिलम् , आगलितस्तनतटांशुक-नियमन-व्यापृतैक-पाणि-पल्लव च निपद्योत्थाय निमील्य स्थित्वा गत्वा चैवातिचित्र पर्यक्रीडत राजकन्या। अभिहत्य भूतलाकाशयोरपि क्रीडान्तराणि दर्शनीयान्येकेनैव वानेकेनैव कन्दुकेनाऽदर्शयत् । चन्द्रसेनादिभिश्च प्रिय-सखीभि सह विहृत्य विहृतान्ते चाभिवन्द्य देवीं मनसा मे सानुरागेणेव परिजनेनानुगम्यमाना, कुवलयशरमिव कुसुमशरस्य मय्यपाङ्गं समर्पयन्ती सापदेशमसकृदावर्त्यमानवदन-चन्द्रमण्डलतया स्वहृदयमिव मत्समीपे प्रेरित प्रति-निवृत्त न वेत्यालोकयन्ती, सह सखीभि कुमारीपुरमगमत् ।

—o—

एवरेस्ट-विजयः

साध्विदमुक्तमभियुक्तैः "नास्ति किमपीहासाध्यं साहसिकानाम्" इति। प्राक्केवलं बुद्धिबलाद् विवेकाच्चेतरं प्राणिजातं जयन् मानवोऽधुना वर्धितोत्साहोऽजेयां दुर्धर्षां च प्रकृतिमपि जेतुकामो नवनवानि साहसकर्माणि समाचरति। मूलं च तत्राजेय-विजिगीषा। तथाहि :—

किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः।
प्रकृतिः खलु सा महीयसां सहते नान्य-समुन्नतिं यया॥

सैव प्रवृत्तिरेवरेस्टविजयप्रेरणादायिनी। अस्मिन् युगे दुस्तरान् नदानिव दुरारोहाणि पर्वतशिखराण्यपि भूयोभूय आरोढुं यतते मनुजः। प्रकृतेराह्वानमिव प्रत्युत्तरयति सः।

हिमालयस्योच्चतमं २९००२ चरण(Foot) परिमितोत्सेधमदः शृङ्गं तिब्बत-भाषायां "चोमोलुङ्मा" संज्ञयाऽऽख्यायते। केषांचिन्मते तदेव गौरीशंकर-नाम्नाऽपि व्यवह्रियते। आंग्लशासनकाले राधानाथनामा भूनिरीक्षणविभागस्य (Survey-department) कर्मकरः गणितबलेन सर्वोच्चतमं पर्वतशिखरमिदमित्यबुध्यताभाणीच्च 'स्वाध्यक्षमेवरेस्ट-नामानं भवत्संज्ञयैवास्य गिरिशृंगस्य व्यवहार उचित'इति। धन्या चाटुकारिता भारतीयानाम्! क्वेदानीमांग्लशासनम्? क्वासौ चैवरेस्टसंज्ञोऽधिकृतः। परमद्यापि तस्यैव नाम्ना व्यपदिश्यते तदद्रिशिखरम्।

सततमतुलहिमानी-कृतावरणमिदं शैलशिखरं पिच्छिलैर्गण्डशैलैर्दुरारोहं झर्झर-रावश्रुति-सुखानां निर्झराणां फेनराजिभिर्द्विगुण्येनवलक्षतामापादितं रवि-शशि-करोद्योत-द्विगुणित-भायुतं चिरादाह्वयते पर्वतारोहरसिकान् साहसिकान्। नेपालराज्यस्य त्रिविष्टपस्य (तिब्बत) च सीम्नि वर्तमानमिदमुभयतोऽपि गम्यम्। परं पूर्वापेक्षया परमति-दुष्करं कठिनारोहत्वत्वात्। निरन्तरतुषारपातैः प्रालेयराशि-शिशिरित-वात्या-चक्रैश्च भीषणां विपदमनुभवन्त्येतदारोढुकामा जनाः। पाश्चात्येभ्य एतादृशानि परमसाहसिकानि कार्याण्यतितमा रोचन्ते इति त एव गौरीशंकरविजयसूत्रधाराः।

आद्यौ सर फासिस यंग हस्बेन्डसञ्ज एतदारोहणायायतत । १८९६, १९०६, १९०८ तमेषु खीष्ट-वर्षेषु स गिरिशिखरमिदं विजेतुमुदसहत, पर व्यरमतास्मात्कार्यादनुपलब्ध-माहात्म्य । श्रमकनेऽपि तत्प्रयासे पश्चाद्-वर्तिनु आरोढारस्तदनुभवानुपायुञ्जत ।

सर्वप्रथम ब्रूस-संज्ञः सेनानीः १९२१ तमे वर्षे शिखरमिद जेतुं दलमनैषीत् । आग्ल-देशस्यानुभविन आरोहिणस्तत्सदस्या अभूवन् । नेपाल-त्रिविष्टप राज्ययोः सिक्यमय-(सिक्किम) शासनस्य चानुमतिमुपलभ्य दलमिदमभिगौरीशङ्करशिखरमयात् । त्रिविष्टपवासिनो देव-भावेन पूजयन्त शिखरमिद न जात्वक्राम्यन् । पञ्चविंशति-सहस्र-सख्य-चरणमित प्रदेशमारुढा अम्योपजनस्य (आक्सीजन) न्यूनत्वादुत्तरोत्तर लघीयान्-श्वसनो न प्राणितुमासीदलमिति न प्राभवन् शिखरमधिगन्तुम्; जडिम्न. समीरस्य घातिशयेन परावर्तितुं बाधिता आसन् । तदीयानुभवस्य सारः पर्वतशिखरस्यास्य वैशाखज्येष्ठमासयोर्नगाहपट्क एवारोहण सभवतीति, परमुत्तरकालिकाभियातृणा कृते लाभप्रदोऽयमभूत् ।

आगामिन्यपि वर्षे तस्यैव नेतृत्वे त्रयोदशगौरागा आरोहिणः पञ्चिना भारि-याणाम्, विंशत्युत्तरेण शतत्रयेण च वेसरादि पशूना सार्धं मई-मासस्य प्रथमदिने रागब्रुकनाम स्थानमासेदु , त्रयोविंशति-सहस्र-चरणं यावद् गन्तुं घाटमन्त । परमोपजनस्योनता—वायोश्चातिमूढमता हानिकरीति ते तत्रैव चतुर्थ-शिखरेऽतिष्ठन् । नवभारकैः सह चत्वारो गौरागा अग्रे गन्तुं प्रवृत्ताः, पर श्रमिक-चतुष्टयस्य रुग्णतया तनू निवर्त्य स्वयं पञ्चमे शिविरे न्यवात्सुः । अन्येद्युश्च तेषामप्येको रोगेण ग्रस्त इति त्रयस्तमपि तत्रैव परित्यज्य अग्रे गन्तु प्रवृत्ता. । यावान्ते पञ्चचत्वारिंशदुत्तर-षड्विंशति-सहस्राणि मनवशतानां चरणानामारोहन्ति तावदेव दिनावसानकाल. समाससाद । न तत्रावस्थान सम्भवतीति चतुर्थशिविरे गमनं गुरुधाया अपरिहार्यमारीत् । प्रवृत्तादश्च ते मनवैरवरोढुं न कश्चिद् यथा हिमे स्खलति । आलम्बितरज्जवः मृच्छ्रेणावरुह्य शिविरं प्राप्नुवन् निशा च व्यत्यायपन् । अन्येद्युस्तान्निवर्त्य ततस्थाने समरवेल, मलेरी, आपङ्गच्च चतुर्दश-सहचरैः सहारोढुमुपलभ्य । शिविरादेव मिथोबद्धरज्जवो-ऽवहिता अभवन् । तुहिनस्य मृदुतया तत्र मज्जनाशंका पदे पदेऽजनि । यदा चरणानां सहस्रद्वयमेवावाशिष्यत्, मलेरी विश्रामयाम. शिलामेकामधिष्ठायोपाविशत् । अथस्मादेव विस्फोट-पूर्वकं शिला सा भुवि न्यमज्जत् । यदो बद्धरज्जुतया मलेरी यथाकथंचिद् रक्षितमानम् । अन्येऽपि स्वयं निरक्षाभवन्, परं हन्त ! सप्त भारिका वराकास्तत्रैव-मृता । हताश आरोहिणः पाषाणमयं तेषां स्मारकं निर्माय संस्थाप्य च तत्रैवापूर्ण-कामा एव न्यवर्तन्त ।

चतुर्विंशत्युत्तरैकोनविंशतिशततमे वत्सरे ब्रूसेनैवाधिष्ठिताभ्यामण्डली मई-मासे पुनरिदं शिखरमभ्यगात् । अथ सर्व एव तस्मात् पर्वतारोहणे दक्षा आसन् ।

ते स्थाने २ निरमिमताश्रयशिविराणि, अक्षमन्त च सप्त-विंशति-सहस्राणि पदानामाक्रान्तुम् । परं सहसा समरवेलः शैत्यातिशयकृतेन त्रासेन पीडितः, नाटंनश्च तिमिरदोषादेकमपि वस्तुद्वित्वेन लक्षयितुं प्रवृत्त इति षोडश शतोत्तराष्टाविंशतिसहस्राणि पदानां गतोऽपि मृत्युभयात् परावर्तनाय बाध्यतामगात् । मलेरीः एकविंशति-वर्ष-देशीय र्हविनश्च सहोपजनौगतावन्येद्युरारोढुं परं सहसैव नीहारपाताद् घनागमनाच्च मृतो मार्ग एव । तदा द्वितीयमहासमरावधि कृताः सबला अपि प्रयासाः विफलतामेवाभजन् ।

द्विपंचाशदुत्तरैकोनविंशतितमेऽब्दे स्विट्जरलैण्ड-देशात् पुनरेकमभियातूदलं समागच्छत् मार्गदर्शकत्वेन च तेनसिंहं शेरपाजातीयमवृणात् । स रेमेन्ट-लेम्बर्ट-संज्ञकेनान्यतमेन सदस्येन सह प्राभवदष्टाविंशति सहस्राणि पंचदशोत्तरं शतद्वयं च चरणानामधिरोढुम् , ऐच्छच्च शिष्टमपि लंघयितुम् । परं ह्रा रे मात्सर्य ! येन वशीकृतो दलाध्यक्षो नानुजानादिमं भारतीयं शिखर-विजयश्रेयोभाजनं भवितुम् ।

दुर्मना अनेन व्यवहारेण तेनसिंह आगामिनि वर्षे आंग्लदेश्याभियानदलाध्यक्षेण सेनान्या हण्टेन भूय' साहाय्यायामन्त्रितः सत्यावश्यकत्वेऽनुमतिमेकाकिनोऽपि शिखराधिरोहणाय समयमकरोत् । नेता च सहर्षमिदं स्वीकृत्याधिकृतसदस्यता तस्यान्यमनुत पर नास्य चर्चां बूटनीत्या व्यधात् । अन्ततो हिलेरी-संज्ञकेनान्यतमेन सदस्येन सह तेनसिंहः त्रिपचाशदुत्तरैकोनविंशतितमे हायने गिरिशिखरमजित-पूर्वमिदं विजित्यैव व्यश्राम्यत् ।

नेपालाभिजनोऽपि दार्जिलिंग-वासात् तेनसिंहो भारतस्यैव नागरिक इति तस्य विजयो भारतस्यैव मानं वर्धयतितमाम् । कस्य नाम सत्कारस्य भाजनता न सोऽमन्तदवधि ? भारतराजधान्यामितरस्थानेषु चाधिगतातिमान आंग्लदेशाधीश्वर्या सपरिजनो लन्दन-नगरे निमन्त्रित. पुरस्कृतश्चाभूत् । अधुना भारतीय-पर्वत-रोहण-गोष्ठ्या निर्देशकः सन् भारतीयान् शैलाभियान शिक्षयति ।

किं न कर्तुं शक्ता भारतीया उत्सहेरंश्चेत् ? युवकाना प्रेरणादायकमिदं कर्म तेनसिंहस्य । अस्मिन्वर्षेऽपि दलद्वयेनैतदभियानं कृतम् । तत्र चीनाः स्वसाफल्याय विकत्थन्ते पर न ज्ञायते, किमत्र सत्यम् ।

कल्पिता विमान-यात्रा

आसीत् तापसी निशा दीर्घतरदिवसकृत-सविभागेव तनीयसी, स्थवीयसी चास-रति समीरणे, पटीयसी मुहुरताम्यमागरसरसातृपोद्बोधने, लघीयसी च निद्राणशिशु-रुदित-विहित-कर्णज्वरे । अध्यास्त गगनशयनं सकल-दिशा-प्रसारित-करश्चन्द्रिका-धवलितजगतीतलो मज्जयन् भुवन धवलिम-सागरे तारा-सनाथो निशापतिः । स्ति-मित-गुणे नभसि, कुलायकवलिते विहगकुले, निर्मक्षिके भवणांपर-कोलेयक-कृत-जागरे च जनपथे, भुजगगणपीत-शेष इव दूरागमन-जनित-श्रान्ति-हृतगताविव च मन्दं वाति-वाते, विसर्जित-सकलकरणीयः सपरिजनोऽहं हर्म्यपृष्ठमध्यासिषम् । पतित एव चास्तृतास्त रणीये शयनीये, विगत-तापानुकलिते चिराभिलषिते जडिमनि विलय-काम इव सपद्येव प्रतीक्षमाणयेव निद्रयाऽऽलिंगितोऽभवम् । सुखसुप्तश्चाहं नाज्ञासिष क्व वर्त इति ।

अथातीते निशीथे शयान एवान्वभवम् कस्यापि मसृणतो पहसित-नलिनीद-लस्य रमणीकरस्य जनितरोमहर्षं स्पर्शम् । आलोकयं च कामपि निशाधिदेवतामिव प्रफुल्ल-तारका, प्रहसितामिव शुचिस्मिता, चन्द्रिकामिव विकचकुमुदकर्णपूरां लाव-ण्यापहसित-सुररमणीरामणीयका शनैः शनैस्तनौ स्पृशन्तीं श्रमदाम् । दृष्ट्वैव च चकित इव, स्तब्ध इव, जडित इव, तन्द्रित इव, विसंज्ञ इव न प्राभवं किमपि प्रतिपत्तुं निभालयन्, केवलं विस्फारितेन चक्षुषा मूर्तिमतीमिव सुन्दरताम् । न जाने क्व गता तदा सदागतिमपि परिभवन्ती मनसश्चपलता, विलीना कस्मिन्नपि महा-मोहाम्बुधाविन्द्रियाणां स्फुरणा, कृतकृत्यतामलभत दृष्टैकदर्शनीयं नयनयुगलम् । तथा स्थितं च विस्मयसागरे निमज्जन्तम्, पिबन्तं चावण्ठं तदीयरूपसुधा मा स्नपयन्तीव स्मितरसवृष्टिभि, उज्ज्वलयन्तीवोन्मुद्रितमुखकमल-संपुटाद् विगलितेन विद्युद्द्युति-सदृशेन दन्तरोचिषा, प्रक्षालयन्तीव च नयनसितिम-सरित्-स्रोतसा, कलकण्ठ-श्रावली-मधुरयता मधुरतया मम श्रवण-बुहरयोर्वचोऽमृतमुदगिरत्—किमिति सखे ! न परि-चितोऽपि मां श्वेत-द्वीपैक-निलया तव बालसखी मंजुलाम् ? चिरात् स्मरन्त्या अपि न भवान् नयनगोचर इति मनोज्ञवरं जुषाणाऽद्य प्रणिधानेनेह स्थितं भवन्तम-बोधिषं रणरणक-प्रवणिता च सज्जित-नमोरथोदचलम् अमुं देशं प्रति । अपि कुशलिनी

से लोक-यात्रा ? किमिति जीयमास्से ? एहि, यापय दिनानि विगलितचिन्ता-ज्वराणि धिक्कृत पुरन्दर-पुर-रामनीयके मम पुरे विहरन्। अलमिह मक्षिकानि-चयनिचिते होश्यारपुरे मशकवृतकर्णवीणारव श्रुत्वा। इति वदन्त्येव किमपि जल्पितुम-प्रभवत्येव मयि विचारयत्येव 'केयम्, सुत इयम्, कथमिह समागता, किमिति चिकी-र्षितमस्या, बालमख च मा भणति, नाभ्युपगच्छामि चिर स्मरन्नपि परिचिताभि-धाम्। मोहिन्यस्या आकृति। कुत्रेय निनीषति माम्? न प्रभवाम्यात्मन। गते च मयि का दशा भविष्यति शिशूनाम्। किं प्रतिपत्स्यते वराकी गेहिनी? किं वा विचारयिष्यति तत्र भवान् जनक। चरमे वयसि स वर्तते' इति बहुश सा सबल हस्तग्राह जग्राहाचक्षेप च बहिस्तात्। मन्त्रमुग्ध इव चाहमुदचल मणिरणित-मुग्धमजीर-निक्वाणप्रतिस्वनिनि पथि तामनु। निष्क्रान्तेन च भवनादद्दश्यत प्रसारित-दीर्घपक्ष युगल गमनाभिमुखतया सघर्घरशब्द विशालकाय नभोयानम्। अपावृते च तद्द्वारे द्विज इव वैनतेयोदरे सकौतुक प्राविशम्। मामनु च साऽप्युत्प्लव-मानेव सोपान-पथे प्रविश्य द्वारे समजीघटत्। मयैव सहैकस्या मसृणतरतूलिकाऽ-पक्षपाया सुनासन्द्या (स्प्रिंगदार चेयर) उपाविशत्, प्रतीक्षमाणमिव चावयोरुप-वेगनम् अगीकृतव्योमयान यानमुदपतत्। उच्चलति च तस्मिन् सहसाऽऽहतोऽपि सरभ-सोत्पतनाघातेन पतनोन्मुखोऽपि घूर्णनाऽभिमुखोऽपि तस्या स्पर्शोपघेन प्रबोधित चैतन्य इव समाहितोऽभवम्।

ततस्तस्या वार्त्तालापेषु सदानितमना नभसि विचरन् जालमार्गेण बहिर्व्यलोकयम् दृष्टवाश्च सकलमपि ज्योतिर्मण्डल विभासयितुमिव प्रवृत्तमिद भुवन-तलम्। क्षीरस्निग्धा पीयूषवर्षिणी कौमुदी दिगाभोगेषु शिखरिशिखरराजिषु, कान्तार-प्रान्तेषु, निद्राणकेसरि-घोणास्वरघोरासु गिरिगुहासु, सुप्त पतत्रिगण-द्विगुणितश्यामलि-मनि तरुलतागण्डे, उद्यानवीथीषु, प्रतोलीषु भवन मूर्धसु, लतामण्डपेषु, निभृतसुप्तक्षोत्र-पालासु केदारपालीषु च सुख स्वपन्तीवारोचत। क्रीडनकानीवाभ्र लिहानि हर्म्याणि, रजतरेखा इव शान्ततरग लेखा सरित, मणिगुम्फितदलानि क्रीडापर्वतक्षु पानीव हिमकणचितानि तरुलता गुल्मानि, पुत्तलिका इव नरनार्योऽदृश्यन्त पृथिवीस्थिता। वान्तधूमा सविषेव काल-भुजगी न्यभाल्यत कुटिल धावमाना धूम्रशकटी। क्वचिदुद्ग-मनाभिलाषुका सोत्कण्ठेव गगनस्य धरणी प्रत्यस्मानुच्छ्वसन्तीव, क्वचिच्च पवत-शिखराणि परिरभमाणेव, क्वापि च लीयमानेव वसुमत्या शैलराजिरपरत्र न प्रति-दिशि धावमानेव तरुपरम्पराऽन्यत्र च शाद्वलानीवारण्यानि परतश्चारण्यानीव केदार सरणिरुपालक्ष्यत।

सुधापूरस्नात इव निखिलेऽपि दिगाभोगे, चन्द्रिका-चन्द्रिते नभोमडले नीलाऽपि सधालिप्तेव मेघराजिरवर्तत, जलधरमण्डलगते च व्योमयाने जालमार्गमा-

च्छादयति नीहार-राशौ छन्ने इव चक्षुषी न किमपि निभालयितुं प्रभवताम्। रजत-कसायित, सुधापिण्डायित, क्षीरफेनायित, दधिपत्रायितो नीलनीले विमति सुतराम-भासत निशावल्लभ ।

अतिक्रान्ते च दीर्घतमे पथि सैव निर्दिशन्ती किमपि मृणाललालिते नागुलि-नाऽधरतलच्छुरितया दन्तत्विषा द्विगुणयन्ती कौमुदीप्रवाह मौन-जननी विस्मिति-मुद्रा ममालुम्पत्। सखे, न पश्यसि किं परस्तात्क्षितिजचुम्बि धवलधवलगिरिशिखरमुत्तरस्या दिशि । अत्रैवोनीकृत-हिमाचलो युगशताद्भुत-हिमानीचयेन, अधरित-पय शख-सुधा शुक्ति-धवलिमा जडिम्नश्चरमा भूमि, प्रसूतिराश्चर्याणाम्, कौतुकालय साहसि-कानाम् उत्तरो ध्रुव प्रदेश । इममेव पुञ्जीभूतमिव सकल-ब्रह्माण्ड-शुभ्रताया राशिमिव श्वेतिम्नो यथागुण श्वेत-द्वीपमिति वदन्ति जना । वर्षशतनिचितेन शैवाल-जालेन शाद्वलायितमिद हरित-द्वीपतयाऽपि (Green Land) व्यवहरन्ति। पुराननुमेयमात्रा पाण्डित-तुषार-कृत-जडिम-भीतो न मानव समस्पृक्षदिमा भूमिम्। पर चरमामुन्नति व्रजति विज्ञान-तत्त्वे परिवर्धिता सीमोत्साहोऽहमहमिकया चात्रत्य-हिमगुहागर्भं खनिजनिधिमपारमेयम दृष्टमश्रुतमात्मसात्कर्तुं लालसावश्य-हृदयो नरोऽद्येममपि प्रदेश दूषयति पदस्पर्शेन। घनकुहाखिली-कृतेऽत्र विषये चाकचिक्य-प्रसूविस्मयावहोऽनत्य श्वेतोऽन्धकारो येन मनीषिणामपि मनो निमज्जति महामो-हाम्बुधौ। कुरु तावत्समीपेन तत्सर्वं चक्षुषोर्गोचरम्।

इति वदत्यामेव तस्या सहसैव स्फोटित-कर्णकुहर सगडगडाशब्द घनाघन-घटाटोप-विस्फूर्जित सहकृतो ह्लादिनी, निर्ह्लाद सहसैवाजृम्भत। सकल-दिगाभोगवधिरी-करणपटुभाकारध्वनीना शतघ्नीना विस्फोट इव समजनि। समकालमेव छिन्नपुंख इव खेचर, लूनशुण्ड इव गजपति, हृतमणिरिव विषधर, स्थानच्युतेवोल्काऽसमत-चलनयन्त्र सफटफटा ध्वनि-स्फुटित तैलकुप्य यान स्वतोदीप्त-वह्नि ज्वाला-जटिल भूमिमभिचस्खाल। तदाघातनिहतो यावदह लोचन उन्मीलये, तावद् भूमिपतित विस्मितया समकाल प्रबुद्धया गृहिण्यो पहस्यमानमात्मानमलोकयम्।

—o—

क्रिया-सिद्धिः सत्त्वे भवति महतां नोपकरणे

(अम्बिकादत्तव्यासस्य शिवराज-विजयात्)

मामोऽयमापाढ, अस्ति च साय समय, अस्त जिगमिषुर्भगवान् भास्कर सिन्दूरप्रवस्नातानामिव वरुणदिगवलम्बिनामरुणवारिवाहानामभ्यन्तर प्रविष्ट, कल-विङ्काश्चवाटकैरलं. परिपूर्णेषु नीडेषु प्रतिनिवर्तन्ते, वनानि प्रतिक्षणमधिकाधिका श्यामता कलयन्ति। अथाकस्मात् परितो मेघमाला पर्वतश्रेणीव आदुरभूत, क्षणं सूक्ष्म-विस्तारा, परत प्रकटित-शिखरिशिखर-विडम्बना, अथ दर्शित-दीर्घशुण्डादण्ड-मण्डित-दिगन्त-दन्तावलभयानकाकारा, तत पारस्परिक-संश्लेष-विहित-महान्धकारा समस्त गगनतल पर्यच्छादीत्।

अस्मिन् समय एक षोडशवर्ष-देशीयो गौरो युवा हयेन पर्वतश्रेणीरुपर्युपरि गच्छतिस्म। एष सुघटित-दृढशरीर, श्याम-श्यामैर्गुच्छ-गुच्छै, कुञ्चित-कुञ्चितै कचकलापै रमनीय-कपोल पालि, दूरागमनायासवशेन सूक्ष्म-मौक्तिकपटलेनेव स्वेद-बिन्दुव्रजेनाच्छादित-ललाट-कपोलनासाग्रोत्तरोष्ठ, प्रसन्न-वदनाम्भोज-प्रदर्शित-दृढ-सिद्धान्तमहोत्साह, राजतसूत्र-शिल्पकृत-बहुल-चाव-चक्य-वक्र-हरितोष्णीष-शोभित, हरितेनैव च कञ्चुकेन प्रकटीकृतव्यूढ-गूढ चरता-कार्य, कोऽपि शिववीरस्य विश्वासपात्र सिंहदुर्गात् तस्यैव पत्रमादाय तोरण-दुर्गं प्रयाति।

तावदकस्मादुत्थितो महान् झञ्झावात, एक साय-समय-प्रयुक्त स्वभाववृत्तोऽ न्धकार, स च द्विगुणितो मेघमालाभि। झञ्झावातोद्धूतै रेणुभि, शीर्णपत्रै, कुसुमपरागै शुष्क-पुष्पैश्च पुनरेष द्विगुण्य प्राप्त। इह पर्वत-श्रेणीत पर्वतश्रेणी, वनाद् वनानि, शिखराच्छिखराणि, प्रपातात् प्रपाता, अधित्यकातोऽधित्यका, उपत्य-कात उपत्यका, न कोऽपि सरलो मार्ग, नानुद्भेदिनी भूमि, पन्था अपि च नावलोक्यते, क्षणे क्षणे हयस्य खुराश्चिक्कण-पाषाणखण्डेषु प्रस्खलन्ति, पदे पदे दोधूयमाना वृक्ष-शाखा सम्मुखमाघ्नन्ति, पर दृढसकल्पोऽय सादी न स्वकार्याद् विरमति। परित सहडहडाशब्द दोधूयमानाना पर सहस्र-वृक्षाणा, वाताघात सजातपाषाण पतानां

प्रपाताना, महान्धतमसेन ग्रस्यमानानामिव सत्त्वाना क्रन्दनस्य च भयानकेन स्वनेन कवलीकृतमिव गगनतलम्, पर नैप वीर स्वकार्याद् विरमति । कदाचित् किञ्चित् किञ्चिद् भीत इव घोटक पादाभ्यामुत्तिष्ठति, कदाचिच्चलन्नवस्मात् परिवर्तते, कदाचिदुत्प्लुत्य च गच्छति, परमेप वीरो वल्गा संयच्छन्, मध्ये मध्ये सैन्धवस्य स्कन्धौ कन्धर च करतलेनास्फोटयन् चुचुत्कारेण सान्त्वयश्च न स्वकार्याद् विरमति। तावदारब्धश्चञ्चच्चञ्चल-चामीकररेखाकाराभिश्चञ्चलाभिरपि स्वचमत्कार । यावदेकस्यां दिशि नयने विक्षिपन्ती, कर्णौ स्फोटयन्ती, अवलोचकान् कम्पयन्ती, वन्यास्त्रासयन्ती, गगन कर्त्तयन्ती, मेघान् सौवर्णकपयेव घ्नती, अन्धकारमग्निनेव दहन्ती चपला चमत्करोति, तावदन्यस्यामपि अपरा ज्वालाजालेनेव बलाहकानावृणोति, स्फुरणोत्तर स्फुरण गर्ज्जनोत्तर च गर्ज्जनमिति पर शतशतघ्नी-प्रचारजन्येनेव कन्दरि-कन्दरा प्रतिध्वनिभिश्चतुर्गुणितेन महाशब्देन पर्यंपूर्यत सारण्यानी, परमधुनापि देह वा पातयेय कार्यं वा साधयेयम् इति कृत प्रतिज्ञोऽसौ शिववीरचरो न निजकार्यान्निवर्तते ।

× ×

अथ किञ्चित् स्रोतस्समुल्लघमानोऽस्य तुरग कस्यापि दोधूयमानतरो शाखया तथाभिहतो यथोच्छलन् भूमौ पपात सादिन चैकत समपीपतत्, किन्तु तत्क्षणादेव सादी समुत्थितो वाजिनो वल्गा गृहीत्वा सचुचुत्कार ग्रीवा पृष्ठ चास्फोटय्याज्ञासीद् यदश्व स्वेदै स्नातोऽस्तीति, तत् चक्षुपो विस्फार्य पार्श्वस्थपलाशिन निपुण निरीक्ष्य तच्छाखायामेव कानिचिन्निजवस्तून्यासज्य दक्षिण-करधृतरश्मिरश्व शनै शनै परिभ्रमयितु मारेभे । अश्वश्च फेनान् पातयन्, कन्धरामुद्धूनयन्, हेषारवैश्चिरपरिश्रम प्रकटयन्, प्रस्यन्द-जलसिक्तभूभाग, पमुत्सृष्टपुरीप, शुष्क-स्वेदो मुहूर्तार्द्धेनैव विस्मृत परिश्रम सगतिस्तम्भ खुराग्रैर्भूमिमुत्खनन्, कर्णावुत्तम्भयन्, लाङ्गूल लोलयन् सादिनो दक्षिणदेशे पृष्ठ निकटयन् पुनरेन वोढु परतो धावितु च समीहा समसूसुचत् । तावदकस्मात् पूर्वस्यामतिरक्तात प्रलम्बाति भयानका सकडकडा-शब्द सौदामनी समदेदीप्यत, तच्चमत्कार-चकित चाश्वमेप यावत्स्थिरयति तावत्सतडातड-शब्द पूगस्थूलैर्विन्दुभिर्वपितुं मारब्धो मघवा । पर रामकार्यार्थं प्रतिष्ठमानेन मारुतेनेव न सह्यते कार्य हानि शिववीरचरेणातत्क्षणमेवासौ पुन सज्जीभूय, समुत्प्लुत्य घोटक पृष्ठमारुरोह । घोटकश्च पुनस्त्वरित-गत्या प्रचलित । यदा यदा विद्युद् विद्योतते, तदा तदा पन्था अवलोक्यते, तदनुसन्धानेनैव वाह्योऽय शिलातलानि परिक्राम्यन्, लता प्रतानानि त्यजन् स्रोतास्युल्लघमानो गर्ताश्च परिजहदुच्चचाल । तावद् दूरत एवावालोक्यत तोरणदुर्गदीप । इतश्च चरस्यैतस्य दृढ प्रतिज्ञता, निर्भीकता, सोत्साहता, स्वामिकार्य साधनसत्य सकल्पता च परीक्ष्येव प्रशशाम वृष्टि, अम्लबलेन च दुग्धमिव खण्डशोऽभून्मेघमाला, दृश्ये च पर्वस्या कलानाथ ।

अथ क्षणेनैव पर्वत-नदी-वेग इव निर्जगाम झञ्झावातोत्पातोऽपि । ततो नूतनवारिधारा-क्षालन-प्रकट-परम-हारित्याना परकोटि-वीरपटल-परीतानामिव समवलोक्यत लोचन-रोचिषा शोभा पलाशिनाम् । सादी च चञ्चच्चन्द्रचमत्कारेण द्विगुणितोत्साहो माभूद् द्वार-रोधो मद्गमनात् पूर्वमेवेति सत्वर-सत्वरो भिल्लीरव-मिश्रित-कवच-शिञ्जित, हेषमाण-हयोत्साह वाष्पवारि-व्रज-विधूत-स्वेद बिन्दु-सन्दोह, साधुवाद-सवर्धित-सपद्यवतोरण-दुर्ग-यामिक-पादचार-परिमर्दितायां भुवि समाजगाम ।

—•—

मम भारतम् ?

अहो इयं मम मातृभूमिः, मानव-सभ्यताया आद्यावतारस्थली, प्रकृते-विहार-धनी, प्राचीनतमाया आर्यसंस्कृतेः क्रीडांगणं भारतम् । त्रिषु दिक्षु प्रसृतावस्य चरणौ स्फार-कल्लोलजालैर्द्योतयन्निव स्वं मोदातिरेकं हिण्डीर-पिण्ड-छलेन गृहीत-नैर्मल्य-कल्पो महार्णवः प्रक्षालयति सश्रद्धम् । कुसुम-भर-मन्थरा नव-वल्लरी किसलयच्छलेन गृहीत-चीनांशुका लालयन्तीरिव सततचंक्रमणपराः पतंगिका पानगोष्ठीमिवानुभावयन्ती चञ्चरीकान् प्रसाधयन्तो विविधवर्णैकैः सुमनोनिवहैः षड्ऋतव आराधयन्ति यत् पुष्पाञ्जलीनिव समर्पयन्तः । उत्तरेण चास्य धवलधवलाः प्रालेय-राशिच्छलेन रजतशिला-जटिता इव, वज्र-घटिता इव मनस्वि-मान-गिरय इव दुर्लंघ्याः शृंगपरम्परा वहन् समुदित-दिनकर-कर-निकर-प्रति-फलन-विहित-चारुचिक्यो हिरण्य-संभारमयतामिव दधानो हिमाचलो मुकुट इव राजते । विविध-तरु-लता-खण्ड-मण्डिता निदाघदिवसेष्वपि वर्जित-रवि-किरण-प्रवेशाः सतत-स्रुत-निर्झर-झर्झरारव-मुखरित-प्रदेशा गहनोद्देशाः, मलीमसं खेलयन्त्य इव ऋजुकुटिल-सर्पिण्य. सर्पिण्य इव फेन-राजि-पाण्डुराः स्वच्छता-च्छटामिव प्रकाशयन्त्योऽसंख्याः सरितः सरसयन्ति यदन्तरं स्नेह-परम्परा-मिवान्न-राशिं च जनयन्ति । 'स्निग्धश्यामाः क्वचिदपरतो भीषणाभोगरूक्षाः' शीततमा उष्णतमाश्च, क्षमा विषमाश्च, पावना अपावनाश्च, अनूपा मरुसिकतिलाश्च, शस्यश्यामला ऊषर-वप्रवश्च, लक्ष्मी-विलास-दुर्ललिता दौर्गत्य-कलुषिताश्च नाना-संस्थाः प्रदेशा अस्य नैकविधं महिमानं प्रतिपादयन्ति ।

अत्रैव सरस्वती सारस्वत-विलास-ललिता 'वाजेभिर्वाजिनीवती' यस्यास्तटेऽविषटे तपोधन-संकटे उद्गुष्यत चिरं वसिष्ठादिभिः ऋषिभिर्वेद-घोषः । अत्रैव तमसा यस्या-स्तरल-तर-तीर-वातैस्तर्पित-मनीषोद्गायत रामायणं वाल्मीकिः' । अत्रैव भागीरथी रोधसि यस्यवगत् द्वैपायनः पुराण-संहितां महाभारतं च निर्ममे । अस्या एव कुक्षेर-वापन्ता मान्धातृ , प्रमुखा दिग्जयिनः, सत्य-दल-दसनमलीमस-कृपाण-पाणयोरर्जुन-सहजा भटाः, [हनूमद्-भीष्म-प्रभृतयो बलवर्य-यशाः, प्रतापशिवाजी-तिलक-दुर्याः

स्वातन्त्र्य भक्ता । अत्रैवाजनि रामभद्रो भद्रकर्मा मार्मापहरण-कलव-वालीकृतं दशवदन-मुख दालयन् खड्ग धारा-जलै । एवंव रगस्थली वैचित्र्य चित्रित-चरित्रस्य योगि-राजस्य श्रीकृष्णस्य येन गीता ऽद्यापि गीता हरति जनमानस-सचित मोहान्धतमसम् । अत्रैवासन्नकमला कमला, अलघु विलासा अचपलाऽचपला, अहमवाहना हस-वाहना, पातिव्रत-व्रत-धुरीणा असिहवाहिन्यो दुर्गा, अनवला अवला, मुख-सु-मो-हसित पद्मिन्य पद्मिनीप्रभृतयो महेला हेलानिर्जितरिपुमदा । इहैवाचरदास-फखान निशितासि विलासै-रश्वराप-श्चलुपानन बहुशोऽविजित-दुर्गा दुर्गा । अस्यामेव भुवि समजनि सतनुरिव भारतभाग्यलक्ष्मी पौरुषलक्ष्म-भूषणा साकारेव लक्ष्मी लक्ष्मीर्कासी-दुर्गाधिदेवतेव महासमराधिष्ठात्रीव या स्वकोप-कुटिल भ्रूभगराहुणा गोरण्ड-दुर्मद-दोषाकर मूलग्रास जग्रस । इममेव धरणी प्रबलस्वातन्त्र्यभावनान्धी-कृतात्म शासनस्यार्हिसाप्राणस्य गुणगण-जन-सम्मोहनस्य मोहनस्य गान्धिन ।

हा तदेव सदपि न तदिव भारतमद्य । क्वा धुना तदसाधारण पौरुष पुरुषेषु ? न सा निष्ठा नारीषु, न सा विद्या विद्वत्सु, न तत्साहस साहसिकेषु न बन्धुता बन्धुषु, न मैत्री मित्रेषु, न करुणा कारुणिकमन्येषु, नौदार्य स्वौदार्य-प्रख्यापकेषु । न जन-वात्सल्य जननायकेषु, न कर्मठता कर्मचारिषु, नाचार्यताऽऽचार्येषु, न शिक्षार्थिता शिक्षार्थिषु, न धर्मो धार्मिकेषु । अफलेदानीमुप्तबीजापि वन्ध्येव भूमि । सम्प्रति कौशल परप्रतारणे, पौरुष मानिनीमान भञ्जने, निष्ठा भोगे, अवधान वेशविन्यासे, पाण्डित्य पुस्तकेषु, दाक्षिण्यमुत्कोच ग्रहणे गर्व परनारीनराभिमर्शे, पाटव धर्म-निन्दने, प्रागल्भ्यमात्म विज्ञापने ।

नाद्यावमानना करोति विमनसो भारतीयान् । न ते लज्जन्ते विक्रीणन्तो भगिनी, सुता भार्यां च पदाभिलाषेण । दूरे कथा देशरक्षाया, स्वप्रतिष्ठा-मेव स्थेयसी चिकीर्षन्त परकृताक्रमणान्युपेक्षन्ते, गृहीतोत्कोचाश्च रहस्यानि शासनस्य शत्रुसुबोधानि विदधति । नास्त्यद्य किमप्यनार्यं कुत्सित ह्रेषण वैतेषा भारतीयाना कृते । प्रलापमात्रमद्य—

'गायन्ति देवा किल गीतकानि धन्यास्तु ये भारतभूमि भागे ।'

इत्युक्ति । साम्प्रतमिय कापुरुषाणा दम्भिनामनाचाराणा शालावृकाणां भुजगाना पिशुनाना वधिकाना पाटच्चराणा च भूमिः । सर्पा इवैते परेषां प्राणै खेलन्ति । घृणितान्यखाद्यान्यर्हाणि द्रव्याणि भोज्येषु मिश्रयित्वा, कूटतुलाभिस्तोल-यित्वा कूटविज्ञापनै कूटमूल्यैश्च वस्तु विक्रीय धनमर्जयन्ति । नैषा मनसि सवेदना, नात्माभिमान, न लज्जा, न विवेक न जुगुप्सा, न कर्मठता । अर्थशौच तु पलायित-

मस्माद् देशात् । विलीनं परदु.खकातर्येण । अद्य तु दु.खितात् दुर्गताद्, आपद्ग्रस्तादधिकं जिहीर्षन्ति वणिजः । परोपजीवतया प्राणायितमद्य समाजस्य ।

वैदेशिकाः सोल्लुण्ठं तिरस्कुर्वन्ति तान्, आक्रामन्ति तेषां भूमिम्, परं गिरय इव ते निष्कम्पाः कुक्षिभरण-मात्र-प्रयोजनाः । विदेशेभ्यो गृहीतो महान् ऋणभारो दु.साध्यरोगकरोऽनु-दिनमेधते । रक्तबिन्दुभिः सह प्रजानां संहृत. कर-राशिर्द्रौपदी-शाटीव प्रतिवर्षं-मुपचीयमानः कल्पते केवलमधिकृतां क्षुधा-हरणाय । दरिद्रा दरिद्रतरा धनिनश्च द्विगुण-धनाः । राजा प्रजाश्च सर्वेऽपि प्रचारप्रिया', लुब्धाः, व्यसनिनः, लम्पटाः, नवनीत-हृदया', आत्मरताः, दम्भिनः, अशुचयः, अविवेकाः, अनात्मज्ञाः, अकर्मण्याः त्यक्तमानाश्च । तादृशी दुरवस्थामनुभूयापि नैते जाग्रति । ग्रामा नगराणि च रोग-ग्रस्तानि, क्षुधाक्षामानि, भोगातिशयरूक्षाणि दिनादिनं क्षीयन्ते । न जाने गेहेनर्दिनामेतेषा भारतीयानां का दशा भविश्री येषा पौरुषं मिथो विग्रहे-ऽवशिष्टम् । सर्वतः प्रान्तगतो जाति-गतः, सम्प्रदाय-गतो वर्गगतश्च विरोधो दृश्यते । खण्डशः कृतेऽपि देशे नैतेषा जागर्ति विवेकइत्यहो दुर्दैवस्य विलसितम् ।

—o—

मम प्रियं पुस्तकम्

सन्त्यत्र लोके ज्ञान-प्रदानि, मनोरंजकानि समय-यापन-साधनानि चानेकानि पुस्तकानि। परं न सर्वाणि सर्वेभ्यो रोचन्ते। मुण्डे मुण्डे हि मतिर्भिन्ना। मम प्रेयान् ग्रन्थस्तु भगवद्गीतैव। तस्या नामापि कर्णशष्कुलीं स्पृशदेव तनुं पुलकयति, हृदयं हर्षयति, वृत्तौ रमयति, बुद्धिं स्थिरयति तरलयति च विचार-सरणिम्।

नेयमुपन्यासवल्लिरपि कौतुकाकुलितं नव-युव-युवति-प्रणयरसपूरपूरितं विस्मयस्फीतिदं चमत्कृति-मयं वस्तूपन्यस्यति, न वा साहसिक कर्मपटुपाटच्चर-पाटवाटीकनं तन्निग्रहमतिनिपुणवेष-सन्धायिप्रणिधि-कौशलवन्धं वोपदिशति, अपि तु कृत्याकृत्य-विवेक-मूढस्य गाढे तमसि विहाय सत्पथं निमज्जतो भ्रान्तस्य जगतः प्रकाश स्तम्भो राजवीथी—समुपदेष्टा। इयं ध्यानं प्रशंसति न वकाचारम्, योगमनुशास्ति नाभियोगम्, कर्मठतामुपदिशति नाक्रमंतां विक्रमंतां वा। भक्तिं शिक्षयति न भोगासक्तिम्। एनामधीयानस्य न मृत्योर्भयं स्पृशति हृदयम्। लोकाः क्षणिकसुखासंगेन विस्मरन्त्यात्मनः, तं पातयन्ति, दूषयन्ति कलुषयन्ति च। परमु-पनिषद इव साऽपि हिततमं बन्धुतमं प्रियतमं चात्मानमुपदिशति—

"उद्धरेदात्मनाऽऽत्मानं नाऽऽत्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥" (६।५)

आत्मनोऽमरता तस्या अपूर्वः सन्देशः।

'नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥' (२।२३)

लोके निवृत्तिः प्रवृत्तिश्चेति द्वौ मार्गौ विवादास्पदभूतौ। संसारे स्थित्वाऽपि कर्मणां त्यागं कृत्वा केचिन्मुक्तिमभिलषन्ति। अपरे चेह स्थिता नाना-भोग-परायणा अर्थ-कामावेव भजन्तो धर्मं मोक्षं च विस्मरन्ति। केचन तु पाप-पुण्ययोः कर्तव्या-कर्तव्ययोर्विवेकेऽक्षमाः सन्तः कार्यमपि शास्त्रविहितं च कर्म यथेच्छमेवानुतिष्ठन्ति।

कर्तव्य-कर्मपरित्यागेन कापायधारण मात्रमेवेतरे सन्यास मन्वाना काल यापयन्ति । गीता तेषामुत्पथ-निवारणी । तस्या उपदेश —

निवृत्ति प्रवृत्तिश्च समन्वितैव श्रेयसी । न केवल कर्मणस्त्यागात्ससार-त्याग सभवति ।

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
यस्तु कर्म-फल-त्यागी स त्यागीत्यभिधीयते ॥

सन्यास कर्मफल-सन्यासमेव विदु । न कोऽपि सर्वथा कर्माणि त्यक्तु समर्थ ।

नहि देह भृता शक्य त्यक्तुं कर्माण्यशेषत ।
कार्यते ह्यवश कर्म सर्व प्रकृतिजैर्गुणै ॥

नात्मा स्वय किमपि कर्माकर्म वा करोति । पर प्रकृतिरेव सत्व-रज-स्तमोमयी शुभमशुभवाऽनुतिष्ठति । परमहकार-विमूढात्मा कर्ताहमिति मन्यते । लोकस्य सुख दु खादि-भोगो निसर्गकृत, ये नाम मुक्तादम्भिन प्रत्यक्ष विषयाञ्जहतोऽपि मनसा नित्यमेव तान्स्मरन्ति, ते मिथ्याचारा एव । अतएव कर्माणि कृत्वा तेषा फल भोगान्मुक्त्वाऽपि तेषा रसे चानासक्तिरेव सत्यो योग । 'योगो हि कर्मसु कौशलम् ।'

कर्तव्येन कर्मणा कृतेन न पाप लिम्पति न च पुण्यम् । पद्म-पत्रमिवाम्भसा न कर्म-फलेन लिप्यतेऽनासक्तभावेन कर्मणामनुष्ठाता ।

कर्मण्यकर्म य पश्येदकर्मणि च कर्म य ।
स बुद्धिमान् मनुष्येषु स युक्त कृत्स्न-कर्मकृत् ॥

जनकादयोऽपि जीवन्मुक्ता ब्रह्मज्ञानिन कर्मणैव सिद्धिमास्थितवन्त' । मानवस्य कर्तव्य स्वकर्मानुष्ठान नतु फलानुसन्धानम् ।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्म फलहेतुर्भू मा ते सगोऽस्त्वकर्मणि ॥ (२।४७)

जीवस्य कर्तव्य जगति पुन स्वपद प्राप्ति । वेदोक्तकर्मानुष्ठानेन स्वर्गस्याधिपति धाम सम्पद्यते पर सा न श्रेयसी । क्षीणे पुण्ये हि पुनस्ते मर्त्य-लोक विशन्ति । अत परब्रह्मण प्राप्तय एव प्रयतितव्यम् । 'यत पद तत्परिमार्गितव्य यस्मिन्गता न निवर्तन्ति भूय । 'यल्लब्ध्वा नापर लाभ मन्यते नाधिक तत ।' तज्जन्य च 'सुखमात्यन्तिक यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।' इय ब्रह्मण प्राप्तिश्च ज्ञानेन भक्त्या च सभवति । पर ज्ञान सुदुष्कर येन सर्वभूतात्मवादो गृह्यते । भक्तिस्तु सुकरा । तया परिप्लुत-हृदयो जनो योग-क्षेम चिन्तामपि भगवति विन्यस्य तत्रैव रमेत ।

मानवमात्रे समदर्शितांसदाचारपरायणतां, स्वधर्माचरणे मृत्युमपि स्वीकरणीयं च गीतोपदिशति । 'शुनिचैव श्वपाके च पण्डिता. समदर्शिनः ।' न जातिभेदो भक्तिमार्गे बाधको भवति । सर्वेऽपि भक्त्या प्रभुं स्मरन्तः परमं पदं यान्ति ।

सा सामाजिकमर्यादारक्षणं सम्यङ्निर्दिशति । चातुर्वर्ण्यस्य स्वकर्मणि रुचिः समाजस्य क्षेमावहा । श्रेष्ठपुरुषा हि मर्यादास्तम्भा लोकस्य, तदाचरितमेव जनः समुदायोऽनुकरोति ।

यद् यदाचरति श्रेष्ठस्तत्तदेवेतरोजनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥

अतः कर्माचरणं विहितं सदा विधेयम्, परं शास्त्रोक्तमार्गेण न तु स्वेच्छाचारेण । यत. 'यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः । न स सिद्धिमवाप्नोति न सुखं न परा गतिम् ।' यच्च कर्म विधीयते तत्सत्त्वेनावप्टब्धं कार्यम् । यतो रजोगुणेन तमोगुणेन च व्याप्त कर्म मुक्तिपरिपन्थि स्यात् । मुक्तये निर्दम्भः कर्तव्यहितभावो जन एवेष्ट. ।

इत्थं गीता सामाजिकाचारं सर्वाधिकमुपदिशन्त्यपि शाश्वते ब्रह्मणि निलय कामयते । न च काम-भोगेपूदास्ते सा । 'धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ।'

एव जीवनसंदेशदात्री नैराश्यहारिणी कर्तव्यपालने दर्शितव्रता नित्यमुपास्यैव क्षीरतरंगिणीव रसदा गीता । महामोहान्धकारस्य घनस्येव वात्योद्धूननी, प्ररूढवेगस्य रागासगस्य प्रभंजनस्येव शमनी जलधारा, पयस इव नवनीतमुपनिषदा सारः सा । 'गीता सुगीता कर्तव्या किमन्यै. शास्त्रविस्तरैः । या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता' । अतएव जीवनसंगिनी सा कृत्याकृत्यविमर्शमूढे मनसि सत्परामर्शदात्री, उदीर्णे शोकावेगे सान्त्वयित्री चेतस, खेदाकुलाया बुद्धो रमयित्री रसास्वादने, प्रकाशस्तम्भो भ्रान्तस्य, निदाघरविप्रभा निश्चितनैष्कर्म्यहिमस्य, कौमुदी विषयातपस्य, पथदर्शिका परम-पद-पथिकस्य, रसधारा भक्तिपीयूषस्य, व्याख्यात्री साख्यस्य, प्रतिष्ठापयित्री विश्वमैक्ष्या, ख्यापयित्री भूतकरुणायाः, उपदेष्ट्री निःसंगतायाः, बोधयित्री वासुदेवरूपस्य, पोषयित्री साम्यभावस्य गीता । गोस्तन्यमिव सर्वविकारहारी कस्य न सचेतसो मनसो मुदे स्यात्तस्या उपदेश । अत एव कृपणस्य धनमिव, वृद्धायाः सुत इव, सुतस्य जननीव, जनन्या वात्सल्यमिव, वात्सल्यस्य भावनिर्भरत्वमिव, साधकस्य सिद्धिगुटिकेव प्रिया, प्रेयसो श्रेष्ठा च मे सेति शम् ।

पठ्यते । ज्योतिषामयन चक्षुर्निरुक्त श्रोत्रमुच्यते । शिक्षा घ्राण तु वेदस्य, मुखं व्याकरण स्मृतम्, तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।' एव च शिक्षा, व्याकरणम्, निरुक्तम्, छन्द , कल्प , ज्यौतिषम् इति षड् अङ्गानि वेदविदुषा वेदितव्यानि भवन्ति । तत्र वेदाङ्गाना कथ वेदोपकारकत्वमिति वेदितव्यो विषय ।

शिक्षा—यथा विद्यारम्भे बालकस्य प्रथम वर्णमालोपदेश । एवमेव वेदमधिजिगासूना वर्णमालास्थानीय शिक्षाऽभ्यास । शिक्षामेव तैत्तिरीया शीक्षामामनन्ति । तथा च तैत्तिरीयोपनिषदि स्पष्टमुक्तम्—'शीक्षा व्याख्यास्याम । वर्ण , स्वर , मात्रा, बलम्, साम, सतान इत्युक्त , शीक्षाध्याय ।' अकारादिवर्णस्वरूप, उदात्तादिस्वरनिर्णय , ह्रस्वादिमात्रोपदेश , स्थानप्रयत्नाभ्या वर्णबलपरीक्षा, द्रुतमध्यविलम्बित वृत्तिभेदे सत्यपि वेदवर्णोच्चारणसामञ्जस्यमेव साम, सतान सहितापाठेन वेदमन्त्र पाठ इतीयान् विषय शिक्षाया वेदितव्यो भवति । तस्माद् वर्णमात्राकालादिव्यवहार शिक्ष्यतेऽनया सा शिक्षेति साध्वी व्युत्पत्ति सगच्छते । तत्र स्वरवर्णादिदोषेण वेदाधीती वाग्वज्राहतोमा भूद इति 'एक शब्द सुप्रयुक्त स्वर्गे लोके च कामधुग् भवति' इत्युपदेश शिक्षामूलम् । शिक्षा वेदस्य घ्राणम् अङ्ग प्रचक्षते । वेदस्य घ्राणस्थानीयता शिक्षाया कथ सिध्येदित्यपि विमृश्यम् । यथा घ्राणेनेन्द्रियेण सुदूरस्थमपि सुगन्धिकुसुमोल्लसितम् उद्यान पुरुषो नेदीय इव पश्यति, तथा शिक्षोपदेशसस्कृतेन वर्णस्वरमात्रादिसूच्चारणपूर्वक वेदपाठेन विप्रतिपन्नमतयोऽश्रद्धालवोऽपि पुरुषा वेदे बद्धादरा भवन्ति, वेदशिक्षाया च प्रवर्तन्त इति सूर्यालोक इव घ्राणस्थानीयतया शिक्षाया वेदोपकारकत्वमनवद्यम् ।

व्याकरणम्—वर्णस्वरादिज्ञानरूपाया वर्णमालायामुपदिष्टाया पदवाक्यरचना बालानां सुकुमारमतीना शिक्ष्यते । तत्र 'यन्नवे भाजने लग्न सस्कारो नान्यथा भवेत्' । इतिन्यायेन वाणीसस्कारद्रढिम्ने साधुशब्दानेवोपदिशन्ति नापशब्दानिति शब्दसाधुत्वासाधुत्वावधारणपूर्वक प्रकृतिप्रत्ययसबन्धोभिपित वेदार्थानुगन्धानमूल नामासाधारण वेदाङ्ग व्याकरणम् । वेदपुरुषस्य मुखमङ्गमपि व्याकरण व्यपदिशन्ति । मनीषिणां तदपि रुच्यम् । यथा मुखद्वारेणाऽशितास्वादितविविधं. पौष्टिकैरन्नादिव्यञ्जनै स्वपोष पुष्यमाण मानवशरीर मामपि कमनीया शान्ति भजते । एधमानानि च प्रज्ञामेधाबलानि पुरुषायुपजीवने सक्षम तन्निष्पादयन्ति । तथैव मुखेन व्याकरणाङ्गेन स्वभ्यस्तेनैव वेदस्वरूप वेदाङ्गानि चेतराणि मुखानि । प्रधाने च हृतो यत्न फलवान् भवति । 'सर्वे पदा हस्तिपदे निमग्ना इति' स्वरवर्णोच्चारणसौष्ठवसपादिकाया शिक्षायां अधीतायाम् व्याकरणाध्ययन वेदस्वरूप स्वर्णं सौरभमिव सपादयति । अतो वेदारम्भात् प्राक् शब्दापशब्दविवेकज्ञानार्थं स्वरानुशीलनतो वेदार्थं-

सम्प्रधारणार्थं च मुखं व्याकरणम् अभ्यसनीयम् । व्याकरणाभ्यासेनैव च वेदा वेदाङ्गानि च सिध्यन्ति, नाऽवैयाकरणो बालिशो वेदस्वरूपं रक्षितुमध्यवस्येत् । प्रतिपदपाठेन विश्वे शब्दा न शक्याः प्रतिपत्तुम् । बृहस्पतिरत्र प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रम् अध्ययनकालः, तदपि नान्तं जगाम । किं पुनरद्यत्वे, यत्रेदं जीवति शतं वर्षाणि जीवति, तस्माल्लघुनोपायेन शब्दपारावारपारीणतामधिजिगमिषता वेदरक्षाव्रतिना पुरुषेण मुखं वेदाङ्गं व्याकरणमवश्यंपाठ्यम् । अद्य खलु सांप्रदायिकाः स्वैरं वेदमन्त्राणामर्थसंपादने प्रयतन्ते । परं स्वरशृङ्खलानुस्यूतवेदपाठेन कर्मधारयबहुव्रीहिसमासकृतस्वरभेदं पश्यन् न साधुदर्शी वैयाकरणस्तया स्वच्छन्दतामलं समर्थयेत् । व्याकरणनिर्धूतवाणीकल्मषा एव मनीषिणो जगतां प्रातवंन्द्याः पाणिनिप्रभृतयः, येभ्यो वाग्देवी 'जायेव पत्य उशती सुवासाः' आत्मीयां तनूं समर्पयति । तस्माद् व्याक्रियन्ते शब्दापशब्दविवेचनया प्रकृतिप्रत्ययादिसम्बन्धेन व्युत्पाद्यन्ते शब्दा अनेन तच्छब्दानुशासनाख्यमन्वयं नाम मुखं वेदाङ्गं व्याकरणम् । अत्रेदमवधेयम्-शाकटायनादिप्रणीतव्याकरणानां लौकिकशब्दमात्रोपकारकतया न यथार्थतो वेदाङ्गत्वम् । इदं नाम पाणिन्युपज्ञमेव व्याकरणमूर्धन्यं धन्यं व्याकरणं यद् अञ्जसा वेदस्योपकरोति । प्रतिवेदशाखमभ्यस्यमानानि ऋषिप्रवरप्रणीतानि प्रातिशाख्यादिव्याकरणानि सन्त्यपि, विषयनिरूपणासौष्ठवात् प्रतिपादनशैलीवैविध्याच्च न वेदोपकारकाणि । अत एव मूषिकशतकृत्तविकृत्ताक्षरपत्राणां बृहत्पुस्तकालयीयकक्षेषु प्राप्तशाश्वतविश्रमाणां तेषां प्रातिशाख्यग्रन्थानां नामापि न विविदिषन्ति विद्वन्मूर्धन्याः । कामं स्वल्पमप्युपकुर्वद् वेदस्य पाणिनीयं व्याकरणं विषयप्रतिपादनशैलीसौष्ठवादिगुणैरद्य देशविदेशेष्वाबालं संस्कृताध्येतॄणां वेदार्थंगहनप्रविविक्षूणां चाजिह्मा राजपद्धतिः ।

निरुक्तम्—वर्णमालोपदेशानन्तरं पदवाक्यरचनापटीयानेव शब्दार्थज्ञानगम्यवसातुं प्रभविष्णुरिति आपामरं वेत्ति । शीक्षायां परीक्षितायां व्याकरणे कृतानवरतश्रम एव निरुक्तं नाम तृतीयं श्रोत्रस्थानीयं वेदाङ्गं द्रष्टुमलंभविष्णुः किमुत स्वाध्याये । 'अर्थनित्यः परीक्षेत' इति प्रणेतुर्यास्कस्य प्रतिज्ञा । 'नाऽवैयाकरणाय निब्रूयात्' इति निरुक्तं वैयाकरणेनैवाऽनुशीलनीयं नेतरेण विद्वन्मूर्धन्यम्मन्येनाविदुषेति तदीयो विश्वासः । 'वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्' इति निरुक्तस्वरूपं विदितचरं निर्वचनवेदितॄणाम् ।

यद्यपि यास्ककालीनैर्वैयाकरणैरपि भवेद् वर्णागमाद् हंसः, सिंहो वर्णविपर्ययात् गूढोत्मा वर्णविकृतेर्वर्णलोपात् 'पृषोदरम्' इति निरुक्तप्रतिपादितानि चत्वारि पदनिर्वचनानि विशदमाम्नातानि 'पृषोदरादीनि यथोपदिष्टम्' इति पाणिनिनाप्युपज्ञातानि समेषां विदितचराणि । तत्र हन् 'गतौ' धातोः सकारवर्णागम. हंसशब्दमूलम् । हिंस इति विपरीत द्वयक्षरमेव सिंहशब्दो निष्पद्यते । कामं तत्र धातुर्हिंसार्थकः । 'अर्थनित्यः परीक्षेत' इति प्रणेतुर्यास्कस्य प्रतिज्ञा । 'नाऽवैयाकरणाय निब्रूयात्' इति निरुक्तं वैयाकरणेनैवाऽनुशीलनीयं नेतरेण विद्वन्मूर्धन्यम्मन्येनाविदुषेति तदीयो विश्वासः । 'वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्' इति निरुक्तस्वरूपं विदितचरं निर्वचनवेदितॄणाम् ।

यद्यपि यास्ककालीनैर्वैयाकरणैरपि भवेद् वर्णागमाद् हंसः, सिंहो वर्णविपर्ययात् गूढोत्मा वर्णविकृतेर्वर्णलोपात् 'पृषोदरम्' इति निरुक्तप्रतिपादितानि चत्वारि पदनिर्वचनानि विशदमाम्नातानि 'पृषोदरादीनि यथोपदिष्टम्' इति पाणिनिनाप्युपज्ञातानि समेषां विदितचराणि । तत्र हन् 'गतौ' धातोः सकारवर्णागम. हंसशब्दमूलम् । हिंस इति विपरीत द्वयक्षरमेव सिंहशब्दो निष्पद्यते । कामं तत्र धातुर्हिंसार्थकः ।

"वेद-वेदाङ्ग-मीमांसा"

(लेखक :—अमरनाथशास्त्री व्याकरणाचार्यः, साधु आश्रम. होशयारपुरम्)

'शरदः शतं पश्येम, जीवेम, शृणुयाम, प्रब्रवाम, अदीनाश्च स्याम ; याचि-तारश्च नः सन्तु मा च याचिष्म कंचन' इति भद्रोपनतो मानवमात्रस्य सुखाभिलाषः स्वाभाविकः । अयं च अभिलाषप्रासादो न केवलंमनोमोदककल्पः. सकल्पैरलं निर्मातुं सुशकः । प्रथमम् आत्माभ्यन्तरे ततो यथायथं परिजनेषु स्वजनेषु ग्रामे नगरे जनपदे देशविदेशेषु, किं ब्रूमः सकलेऽपि जगतीतले सद्भावभूमिकः परस्परानुरञ्जनो-न्मिषितप्रशान्त-वातावरणसुधालेपादिभिर्मण्डित एव च निर्मातुं शक्यः । प्रशान्तं वातावरणं च 'परस्परं भावयन्तः श्रेयः परमवाप्स्यथ' इति विश्वजनीनं मूलमन्त्रम-पेक्षते । इयं परस्परभावना च न केवले भूलोक एव सुदूरदेशीयान् मानवान् माला-कारेण सद्भावसूत्र ओतप्रोतान् भावयति, प्रत्युत अन्तरिक्षलोकस्थान् स्वर्लोक-निवासिनोऽपि देवान् यज्ञसूत्रेण ग्रथ्नाति । 'अग्नौ प्रास्ताहुति सम्यग् आदित्यमु-पतिष्ठते, आदित्याज्जायते वृष्टिर्वृष्टेरन्न ततः प्रजा' इति मानवं वचः, 'यज्ञाद् भवति पर्जन्यः' इति गीतावचनं चापीदमेव ध्रुवं सत्यं विशकलयत । अयमेव त्रयीधर्मः । त्रयी नाम ऋग्यजुःसामानि । तत्र ऋचा स्तुति-मन्त्राणां विनियोगेन देवता आवाह-यित्वा, साम्ना गीतिस्वरेण तासामभिनन्दनं यजुषा च मन्त्राणां प्रयोगेण यज्ञविधया तासां परितोष इति परस्परभावनाभित्त्याश्रितस्त्रयीधर्मो मानवमात्रस्य भद्रमातनो-तीत्यतिरोहितं शेमुषीजुषां विदुषामिति ।

यज्ञप्रक्रियाया कर्मकलापं व्यवहारेणाचरन्तस्त्रय एवर्त्विजः । ऋग्वेदस्य होता, यजुर्वेदस्याध्वर्युः, सामवेदस्योद्गाता चेति । अथर्ववेदस्य ऋत्विग् ब्रह्मा तु न वस्तुतो यज्ञकर्मव्यापृतः, स्वाहाकारान्तेषु प्रदानेषु न ब्रह्मणो व्यापारः, जाते जाते स्खलिता-दिदोषे स्वीययाऽनवद्यया विद्यया तत्साधूकरणमेव तदीयो धर्मः इति । 'ऋचा त्वः पोषमास्ते पुपुष्वान्, गायत्रं त्वो गायति शक्वरीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः, (ऋ सं. १०) । इति श्रुतेरेवेद रहस्यमनावृतम् । पर न

केवलं यागप्रक्रियाप्रवर्तका वेदा । वेदा हि विविधज्ञानविज्ञानराशि । अतो विविधविज्ञानदर्शनै सामाजिकविवाहादिमानवसंस्कारादिस्रोत प्रवाहैश्चाऽयवेद-मपि चतुर्थं गणयित्वा चत्वारो वेदा प्रमाणम् । वेदप्रमाणा आस्तिका, तेषा त्रयो वा चत्वारो वा वेदा परमादरास्पद जीवनसर्वस्वम् । निबिडेऽन्धतमसे भ्राम्यतामा-लोकवद् वेदा एवास्तिकाना जरामरीयवेदनामनुभवतामनन्यमभयशरणमिति कैमु-तिकम् । वेदाना मन्त्रप्रायत्वाद् तद्व्याख्यानतया यज्ञकर्मणां प्राधान्येनोपदेशकतया च ब्राह्मणान्यपि वेदा इति मतमभ्यर्हितम् । मन्त्रब्राह्मणयोर्वेदनामधेयम्, कर्मचोदना ब्राह्मणानि' इत्यापस्तम्बीयवचन वेदस्वरूपमभिरूप प्रतिपादयितुमलम् । 'अतीन्द्रिय-विषयाणा वेदनादेव चतुर्णां वेदाना वेदता सिध्यति । 'प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते । एत विदन्ति वेदेन, तस्माद् वेदस्य वेदता' इत्यन्वर्थं वचन चात्र प्रमाणम् । एतावता वेदा ज्ञानस्वरूप वा ज्ञानसाधन वा सिध्यन्ति । ब्राह्मणो मूर्त शब्दरूप वेदा इति श्रद्दधता विपश्चिता नाऽनया करण-व्युत्पत्त्या सन्तोष । 'वेदयति विश्वपदार्थान् अवगमयति, इति वेद' इति कर्तृव्युत्पत्त्यैव तेषा मनस्तोष । अस्तु ।

भारतीयसंस्कृतेर्जीवातुभूताना वेदाना गुरुशिष्यपरम्परानुगतसम्प्रदायत प्रवचन-प्रचारणाद्यर्थम् आ कश्मीरेभ्य आरामेश्वर ग्रामेषु चारण्येषु च चरणानि (विद्यास्था-नानि) प्रतिष्ठिपन्नाचार्या । चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति,—आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन व्यवहारकालेन, इति मूलमन्त्रेण भारतीयमात्रस्यान्तरङ्ग-तरङ्गभूतान् वेदानकुर्वन् । साक्षात्कृत-धर्मणा वेदविद्यानवद्यदर्शनानामृषीणा सम्प्रदायो यावद् गङ्गास्रोत प्रवाह इव प्रावहत् तेऽसाक्षात्कृतधर्मभ्योऽवरेभ्य ऋषिभ्य उपदेशेन मन्त्रान् सम्प्रादु । अत्यल्पप्रज्ञत्वात् सम्प्रदायानुगत वेदोपदेश ग्रहीतु सर्वथाऽशक्तान् दुर्बोधांश्चावरान् शिष्यान् पश्यन्त उपदेशाय ग्लायन्तोऽवरे ऋषयो बिल्मग्रहणाय विविच्य पदपाठस्वरचिह्नादिभिर्वेदतत्त्वग्रहणार्थं ग्रन्थभूतान् वेदान् प्राग्रथ्नन् । इदमेव रहस्य यास्काचार्यस्याभीष्टम् 'साक्षात्कृतधर्माण ऋषयो बभूवु । तेऽवरेभ्योऽसाक्षात्कृत-धर्मभ्य उपदेशेन मन्त्रान् सम्प्रादु । उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेम ग्रन्थ समाम्नासिषु, वेद च वेदाङ्गानि च' इति ।

वेदाङ्गानि —यथा चक्षु श्रोत्रादिभिरङ्गै पुरुष साङ्गोपाङ्ग प्रतीयते, अङ्गैरेव चाङ्गिन पुरुषस्य पूर्णताव्यपदेश, तथैव षड् वेदाङ्गानि वेदपुरुषस्याङ्गानि, सवेदाङ्गस्यैव वेदराशेर्महिमा न विकलाङ्गस्येति । यथा शाखापत्रादिक वृक्षस्यैव विस्तार तथा वेदाङ्गानि वेदस्यैव प्रपञ्च । यथा वृक्ष प्रचलन् सहावयवै प्रचलति, तथा वेदाङ्गानुस्यूत इव वेदविज्ञानोन्मेष । अत एव 'ब्राह्मणेन निष्कारणो धर्म षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति व्याकरणमहाभाष्ये पातञ्जल प्राञ्जलं वच समुन्मिषति । पाणिनीयशिक्षाया वेदाङ्गनिरूपण सम्यक् प्रतिपादितम् । यथा—'छन्द पादौ तु वेदस्य, हस्तौ कल्पोऽथ

'गूढ आत्मा इति शब्दो' मध्यस्थितस्य आवर्णस्य ओकारीभावेन वर्णविकृत्या 'गूढोत्मा' सपन्न । पृपदुदरम् एव मध्यमतकारलोपात् पृषोदर वृत्तमिति तदाशय । तथापि धात्वर्थप्राधान्याद् नैकधात्वन्वयवीभूतमेक पदमर्थनियामकमिति यास्कस्य महर्षे-र्दर्शन स्वोपज्ञमेव ब्रूम । यथा 'सत्यम्' इतिशब्द पाणिनीयैर् अस् 'सत्तायाम्' इति धातोरेव निष्पाद्यते । नात्र व्युत्पत्तौ कश्चन चमत्कार । पर यास्क शब्द विलक्षणयैव प्रतिभया चमत्कृत निरवोचत्—सन्तमर्थम् आययति प्रत्याययति गमयतीति सत्यम् । अत्र निर्वचने द्वौ धातू । प्रथम. अस् धातु 'सन्तम् अर्थम्' इत्येतावदशप्रत्यायक । ततो द्वितीयो धातु इ 'गतौ' ण्यन्तावस्थापन्न 'आयि' इत्येवस्वरूपः परिशेष वाक्यमभिव्यनक्ति । एव च (अस्>) सत्+यम् (<इ> आयि) इति द्वयो पदयो समासेनाऽभिनिष्पन्न. 'सत्यम्' शब्दो यास्कस्य स्वोपज्ञ । अत एव व्या-करणशास्त्रीयन्यूनतापरिहारपूर्वक कार्त्स्न्यसपादक स्वतन्त्र वेदाङ्ग निरुक्तमिति—'अथा-पीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते । अर्थम् अप्रतयतो नात्यन्त स्वरसस्कारोद्देश । तदिद विद्यास्थान व्याकरणस्य कार्त्स्न्यं स्वार्थसाधक चेति ।' अपि च वेदाङ्ग निरुक्तं वेदस्य श्रोत्रम् । यथा श्रोत्रमाध्यमेनैव जगतामर्थव्यवहार । श्रोत्रेन्द्रियेण श्रुतमेव परकीय छन्द स्वच्छन्द जनो वाचा व्यनक्ति, मनसा मनुते, पाणिपादेन चाचरति, तथा निरुक्तश्रोत्रेण वेदार्थावबोधे सुमहत् सौकर्यम् । तस्माद् अर्थावबोधे वेदाङ्गान्तरनिरपेक्षतया यत्र पदजात निश्शेषेण प्रत्यङ्गपरीक्षयोच्यते तन्निरुक्तमिति सूपपन्नम् ।

छन्द —आत्मानुरागस्य सगीतस्वरेणाऽभिव्यक्तिरेव छन्द । छन्दोबद्धपद्यानि नियतमात्राक्षराणि छन्द शास्त्रीयनियमानुप्राणितानि यथा सामाजिकाना ब्रह्मानन्दा-परपर्यायम् आनन्दसन्दोह जनयन्ति न तथा जल्पितसामान्यानि । वेदा अपि वस्तुतो ब्रह्मण आत्मानन्दाभिव्यक्ति. । वेदमन्त्रा छन्दोमया । प्राचीन साहित्यमेव प्रायेण कवित्वमयम् । किं ब्रूमो भोजराजराज्ये काष्ठाहारा अपि पद्यैरनवद्यैः समवदन्त । प्राणिमात्रस्यात्मोल्लासाभिव्यक्तिसाधन छन्द एव । ययोद्यानात् कुसुमान्यवचित्य यथास्थान तानि सनिवेश्य हृदयहारि कुसुमवृन्त (गुलदस्ता) सपद्यते, तथैव वर्ण-मात्राद्यनुरूपा विचितिरेव छन्दसा विचिति । पूर्वे साक्षात्कृतधर्माण ऋषयो वेदार्थ-सपादने स्वरतादोषपरिहारार्थं यथा वेदमन्त्रेषु स्वरचिह्नान्यकुर्वन्, तथैव विजातीयपद-प्रक्षेपादिना मा केचन साध्रदायिका वेदमन्त्राणा स्वरूप नीनशन्निति नियतवर्णमात्रा-ऽनुपूर्व्यादिछन्दोविचिते परिशीलनमुपदिष्टवन्त । वेदमन्त्रेषु छन्दसां परिशीलनं च प्रतिवेदमनुक्रमणीग्रन्थप्रतिपादितया दिशैव सपद्यते । पिङ्गलसूत्र छन्दोनियमावबोधे महद् उपकारि । वेदमन्त्रेषु प्रायेण पिङ्गलसूत्रोपदिष्टाना वर्णच्छन्दसा व्यपदेश । लौकिकेषु महाकाव्यादिषु च मात्राच्छन्दसा प्रायोव्यवहार । चतुर्विशत्यक्षर गायत्रीच्छन्द इति

विश्रुतम् । तदेव चतुरुत्तरैरक्षरैर् अर्थात् अष्टाविंशत्यक्षरैरष्णिक् छन्दः संपन्नम् । ततः चतुरधिकैरक्षरैः=द्वात्रिंशदक्षरैरनुष्टुप् छन्दो वृत्तम् । एवम् उत्तरोत्तरैश्चतुरधिकैरक्षरैः संपद्यमानानि छन्दांसि यथाक्रमं बृहती (=षट्त्रिंशदक्षरैः), पंक्तिः (=चत्वारिंशदक्षरैः), त्रिष्टुभ् (=चतुश्चत्वारिंशदक्षरैः), जगती (अष्टाचत्वारिंशदक्षरैः) छन्दांसि संपद्यन्ते । छन्दःशास्त्रं उच्चावचानि छन्दांसि निर्दिष्टानि, नेह तेषां सर्वेषां समावेशः कर्तुं मिष्टः । इमां छन्दोविचितिं वेदपुरुषस्य पादौ वदन्ति । यथा पादविकलः पुरुषोऽपथं खलु जगद्व्यवहारं संचालयितुम्, एवमेव छन्दोज्ञानमन्तरेण वेदाध्यायः पुरुषो विकलाङ्ग इव । प्रत्यक्षरं शुद्धाशुद्धविमर्शे संदिहानः क्वचित् चतुष्पथे प्रपन्नः कान्दिशीक इव किंकर्तव्यविमूढो वेदान्नाधीयीतेति छन्दोविचितिरपि वेदोपकारिणी सती यथार्थं वेदाङ्गम् ।

कल्पः—कल्पो नाम कल्पनं विधानं विधिः, तत्प्रतिपादकतया शास्त्रमपि कल्पः । आश्वलायनप्रभृतिमहर्षिप्रवरैर्ब्राह्मणग्रन्थप्रतिपादिता एव यज्ञयागादिविषयो विस्तरेण श्रौतसूत्रेषु निरूपिताः । तानि श्रौतसूत्राण्येव कल्पसूत्राणि कल्पा वेति नामभाञ्जि । यथा वेदमन्त्राणां व्याख्यानानि ब्राह्मणानि, तथैव ब्राह्मणव्याख्यानभूताः कल्पा इति वक्तुं निश्चप्रचं शक्यम् । वस्तुतस्त्रयीप्रतिपादितस्य धर्मस्य व्यवहारशास्त्रं कल्पः । तस्मात् त्रयीधर्ममनुप्रपन्नैः कल्पशास्त्रज्ञानम् अवश्यंकार्यम् । यज्ञयागादिव्यवहारोपदेशेन कल्पो वेदाङ्गं वेदप्रचारस्याऽनल्पमुपकरोति । कल्पं हस्तौ वेदस्य वदन्ति । प्राणिमात्रस्य सकलाङ्गव्यापारः प्राधान्येन हस्तायत्तः, कल्पं नाधीयानास्त्रयीधर्मम[illegible]ज्ञान्तः कालेन नास्तिका मा भूवन्निति कल्पोऽध्येतव्यः ।

ज्यौतिषम्—ज्योतिषां सम्बन्धादेव ज्यौतिष वेदाङ्गमभिनन्द्यते । यागादिषु यज्ञकालार्थसिद्धय एव न ज्यौतिषस्योपयोगः । आ सृष्टेर्मानवमात्रस्य दिव्यैर्नक्षत्रतारागणैराध्यात्मिकः संबन्धः । जातमात्रस्यैव शिशोः सुखदुःखादिसंवेदनासु नक्षत्रतारादीनामभिनिवेशः । खगोलज्ञानमन्तरेण भूगोलविज्ञानमकिञ्चनमिति भूगोलविज्ञा. खगोलविद्यया नक्षत्रादीनां स्वरूपे विविदिषन्ति । प्रत्यक्षमक्षिलक्ष्यीक्रियमाणं सूर्यमण्डलं कियन्मात्रं लोकमुपकरोति, सूर्याचन्द्रमसोर् अमावासादेवाऽमावास्या तिथिर्निष्पन्ना । अमावास्यातिथावुपदिश्यमान एव यागो दर्शयागः । सूर्याचन्द्रमोभ्यामेव दिनरात्रिचर्यारूपो मानवजीवनविकासः । अयमभिसंधिः—पुरुषः प्राणिति, अपानिति, जीवति म्रियते । सर्वासु क्रियासु ज्यौतिषमेव शरणम् । 'सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः' ज्यौतिषमन्वर्थमेव वेदपुरुषस्य चक्षुः । चक्षुभ्यां यत् प्राणिमात्रस्योपक्रियते, तदेव वेदाङ्गेन ज्यौतिषेण वेदानां क्रियत इति । तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते इत्यवितथम् ।

—०—

वैदिकी देवासुरमीमांसा

वेदेषु, ब्राह्मणेषु, रामायणे, महाभारते, पुराणेषु च देवानामसुराणां च परस्परं सघर्षो विजयः पराजयश्च वर्ण्यन्ते । देवानामपि स्वरूपं नैकविधम् । केऽपि देवाः शक्तिरूपिणोऽन्ये च पदार्था एव । यथा सोममर्दनोपयोगी ग्रावा, यज्ञशालाद्वारः, बर्हिस्तादृशा एवान्ये च । क्वापि भाववचनान्येव देवताः । यथा नासदीयसूक्ते भाववृत्तम्, दानसूक्ते च दानम् । संख्यापि तेषा देवाना नाल्पीयसी । क्वचिच्छतम्, क्वचित्त्रयस्त्रिंशत्, अपरत्रैकादशैव, अन्यत्रैक एव देवो विविधनामा वर्ण्यते । यथेन्द्र एव सूर्यत्वेन। सूर्यस्य च रूपभेदाः पृथक्पृथङ्नामभिः स्तूयन्ते । यथा सूर्यः, सविता, वरुणः, मित्रः पूषा, विष्णुः, आदित्यः तत्प्रभृतयोऽन्ये च । बह्वश्च पार्थक्येन, स्तुतिभाज. यथाऽग्निः, वरुणः, इन्द्रः, विष्णु , पूषा, भग, ब्रह्मणस्पतिः, अश्विनौ, उषाः, बृहस्पति.। एव खलु देवाना त्रैविध्यं स्वरूपभेदश्च लोकान् निमज्जयति भ्रमसागरे । अत एव पाश्चात्या वेदेषु बहुदेववादं (Polytheism) एकदेववादं च वर्णयन्ति ।

अत्र विवेचनीयास्त्रयः पक्षाः । आधिदैविकः, आधिभौतिक , आध्यात्मिकश्च । प्रथमे तावदिन्द्रादयो लोकोत्तराः (Supernatural) शक्तय एव । द्वितीये प्राकृता एव माया देवत्वेन स्तूयन्ते । तृतीये तु भावात्मिकय एव शरीरान्तर्गताः शक्तयो देवतावद् वर्ण्यन्ते । याज्ञिका अधिदेवपक्षम्, ऐतिहासिका द्वितीय योगिनश्च तृतीयमनुसरन्ति । तत्र वेदाङ्गत्वेन निरुक्तस्य मतं पूर्वमवेदर्णीयम् । तथाहि—

'यत्कामऋषियंस्या देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवत. स मन्त्रो भवति' । तास्त्रिविधा ऋचः—परोक्षकृता., प्रत्यक्षकृता., आध्यात्मिकयश्च । तत्र परोक्षकृताः सर्वाभिर्नामविभक्तिभिर्युज्यन्ते प्रथमपुरुषैश्चाख्यातस्य । 'इन्द्रो दिव इन्द्र ईशेपृथिव्याः,' 'इन्द्राय सामगायत';.....अथ प्रत्यक्षकृता मध्यमपुरुषयोगास्त्वमिति चैतेन सर्वनाम्ना । 'त्वमिन्द्रबलादधि', 'वि न इन्द्र मृधो जहि', अथापि प्रत्यक्षकृताः स्तोतारो भवन्ति परोक्षकृतानि स्तोतव्यानि । यथा 'मा चिदन्यद् विशंसत'...।...

आध्यात्मिकय उत्तमपुरुषयोगा अहमिति चैतेन सर्वनाम्ना । यर्यतदिन्द्रो वैकुण्ठो लक्षमूक्तं वागाम्भृणीयमिति', इति । एव मन्त्रेषु त्रैविध्येन देवकरणं कृत्वा प्राकृतानां पदार्थानामदेवत्वमपि निरुच्यते । यथा— अपि ह्यदेवता देवतावत्स्तूयन्ते, यथाश्वप्रभृतीन्योषधिपर्यन्तानि । अथाप्यष्टौ द्वन्द्वानि स न मन्येतागन्तूनिवार्षान् देवतानाम्, प्रत्यक्षदृश्यमेतद् भवति, माहाभाग्याद् देवताया एक आत्मा बहुधास्तूयते, एकस्यात्मनोऽन्ये देवा. प्रत्यङ्गानि भवन्ति, अपि च सत्त्वाना प्रकृतिभूमभिप्रेत्य स्तुवन्तीत्याहु प्रकृति सार्वं नाम्न्याच्च । इतरेतरजन्मानो भवन्तीतरेतरप्रकृतय, कर्मजन्मान , आत्मज मान, आत्मवैषा रयो भवति, आत्मायुधम्, आत्मेषव आत्मा सर्वं देवस्य देवस्य ।' (नि दै १)

निरुक्तकारस्यैतासु पवितपु त्रयोऽपि पक्षा समायान्ति । यज्ञपद्धत्या खलु देवानामिव पार्थक्य हविर्भावत्व सह स्तोतव्यता च । तत्रैवोलूखलमुसलादयोऽपि देवतावत्स्तूयन्ते, पर स खलु भावतो व्यवहार । अत एव च देवानामाकारचिन्तने तत्रैव पुरुषविधत्वेन, अपुरुषविधत्वेन, उभयधा च देवाकार प्रस्तुत । पर नैरुक्तपक्षे पुरुषविधानामेव देवाना कर्मरूपत्वेन बहूनामपुरुषविधाना देवत्ववर्णना, यथा यज्ञो यजमानस्य ।

अथ किं नाम देवत्वम् ? तत्र दीपनाद् वा द्योतनाद् वा देवा । ये दीप्यन्ते दीपयन्ति वा । दीव्यन्ति यच्छन्ति वा । तत्र के ते देवा ? मीमासका मन्त्रगतानेव शब्दान् देवत्वेन स्वीकुर्वते । याज्ञिका आहूयमानत्वेनेष्टा शक्तीरेव देवत्वेन व्यवहरन्ति, तेषा पक्ष पुराणानुकूल एव । नैरुक्ताना मत प्राय आधिभौतिकमेव । एतच्च वृत्रेण सहेन्द्रस्य युद्धवर्णनप्रसगे यास्केनैव प्रतिपादितम्— तत्कोऽस्य वृत्र ? मेघ इति नैरुक्ता, त्वाष्ट्रोऽसुर इत्यैतिहासिका, समानकर्मणा युद्धवर्णनानि भवन्ति, इति । अत्र च श्रुतिरपि भवति—

यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु ।
मायेत्सा ते यानि युद्धान्याहुर्नाद्यशत्रु नु पुरा विवित्से ॥ (ऋ० १०।५४।२)

शतपथ ब्राह्मणे तु देवानामसुराणा चोत्पत्तिरेव वर्णिता—

"स आस्येनैव देवानसृजत, ते देवा दिवमभिसृज्यन्त तस्मै ससृजानाय दिवे वास तद्देव देवानान्देवत्वम्, अथ योऽयमवाङ् प्राण । तेनासुरानसृजत इमामेव पृथिवीमभिपद्यासृज्जयन्त तस्मै ससृजानाय तम इवास । साऽवेत् पाप्मान वाऽसृक्षि यस्मै मे ससृजानाय तम इवाभूदिति, तास्तत एव पराभवँस्तस्मादाहुर्नैतदस्ति यद्देवासुरम्, यदिदमन्वास्याने त्वदुद्यत इतिहासे त्वत्ततो ह्येव तान्प्रजापति पाप्मनाऽविद्धचन्त तत एव पराभवन्निति । तस्मादेतदृषिणाभ्यनूक्तम्—

न त्व युयुत्से कतमच्चनाहनतेऽमित्रो मघवन्क्रच्चनास्ति ।
मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुन्न पुरा युयुत्से ॥ (श ११।१।६।१०)

एतेनोर्ध्वंगतयः प्राणा एव देवा अवाङ्मुखादचासुरा इत्युक्तं भवति । अन्यत्र वृत्र पाप्मेत्युक्तम् । यथा—

"पाप्मा वै वृत्रो यो भूतेर्वारयित्वा तिष्ठति कल्याणात्कर्मण साधोस्तमेतदिन्द्रे-णैव वृत्रच्चा पाप्मान वृत्र हन्ति ।" (श ११।१।५।७)

अनेन शुभकर्मणो निवर्तयित्री प्रवृत्तिरेवासुरत्वेन व्यपदिश्यमाना सूच्यते । असुषु रमन्ते हि ते । पर वरुणस्याप्यसुरपदेन व्यवहार, तत्र का प्रतिपत्ति ? तत्र खलु बलवत्त्वस्य प्राणदातृत्वस्य च प्रतिपादकोऽसुरशब्द । तस्यैवेय परिणतिर्यत्पारस्याना प्राचीनतमेऽवेस्ताग्रन्थे मित्रावरुणयोरर्थे मिथूशब्दस्य अहुरमज्दाशब्दस्यच प्रयोगो लभ्यते। परमुत्तरकाले केवल भोगपरायणा दानादिवर्जिता असुरपदवाच्या अभवन् । एतदपि स्पष्ट शतपथब्राह्मणे "देवाश्च वाऽसुराश्च, उभये प्राजापत्या पस्पृधिरततोऽसुरा अति मानेनैव कस्मिन्नु वयञ्जुहुयामेति स्वेष्वेवास्येषु जुह्वतश्चेरुस्तेऽतिमानेनैव पराबभूवु-स्तस्मान्नाति मन्येत पराभवस्य हैतन्मुख यदतिमान । अथ देवा अन्योऽन्यस्मिन्नेव जुह्वतश्चेरुस्तेभ्य प्रजापतिरात्मानम्प्रददौ ।" (श ११।१।७)

एतेनाप्यवतरणेनाहकारादसुराणामात्मपरताऽनन्तर्दर्शिता च स्पष्टीकृता, तेन दानादि-कर्म-रहिताना भोगपराणामसुरत्व साधितम् । परोपकारादि भावना-वन्तो देवाश्शेषाश्चासुरा । परमेतेन न समाधान मन्त्रेषु स्पष्टतो वर्णितानां देवानाम् । प्रत्येक देवस्य पृथक् कर्म यत्र तत्र वर्ण्यते । यथा—

इन्द्र आसान्नेता बृहस्पतिर्दक्षिणा यज्ञ पुर एतु सोम ।
देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतो यन्त्वग्रम् ॥

अत्रेन्द्रो बृहस्पति, सोम, यज्ञ मरुत, पृथग् वर्णिता । एवमेव—अग्नीसोमौ, इन्द्रावरुणौ अग्नाविष्णू, मित्रावरुणाविति देवताद्वन्द्ववर्णनान्नैकत्व सर्वथा स्वीकर्तुं शक्यते । बहूनि च कर्माणि पुरुषविधानि तादृशा एव चाकारास्तेषा वर्ण्यन्ते । क्वचिच्चा यदेवस्य नामान्यस्मै प्रयुक्तम् । यथा—

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य ।
सर्वन्तदिन्द्र ते वशे ।

अत्रेन्द्रशब्दस्य सूर्यार्थे प्रयोग । ऐतिहासिकानि च कथानकानि देवानां विषये यत्रतत्रोपलभ्यन्ते । यथाऽश्विनोर्विषये । पौराणिकानि च वृत्तानि भारतेऽन्य-देशेषु तुल्यानि । यथा ग्रीसदेशस्य पुराणेषु प्रोमेथियसनाम्नो जनस्य स्वर्गादग्ने-

रानयन्न वर्णितम्, वेदेषु च मातरिश्वनो मानवाना हितम स्वर्गादि वह्ने रवतारण सूचितम् । भारतीया घची च ग्रीस्य पुराणेषु साइके (Psichey) सज्ञया वर्णितया व्यक्त्या सवदते । पर यथाऽत्रत्या पौराणिकास्ता स्वर्गाधिपतेरिन्द्रस्य परनी वर्णयन्ति, वेदेषु च शक्तिरेव सा, तथैव तत्रापि तस्या निरन्तरसत्यजिज्ञासार्थं परिणतिरिति मूर्तवर्णनैरमूर्तद्योतनात्मिका प्रवृत्ति । एव च न देवतावादः स्पष्टतरो भवति ।

अस्मन्मते तु वेदस्य देवतासम्बन्धिनस्त्रय पक्षा । यत्रेतिहासस्यावरणे प्रतिपिपादयिषित विषयोऽन्तर्भावितस्तत्रतू, भूताख्यान नार्थवादादन्यत् । तत्राध्यात्मिको भौतिको वा पक्ष एव प्रतीकैर्वर्णितो बोध्य । अन्यत्र तु व्यक्तीनामेवोल्लेखोऽतीतचराणाम् । यथा चोक्त शतपथे—'मर्त्या ह वा अग्ने देवा आसु' (श १।१।२।१२)

अत केषाचिन्मर्त्यानां कर्मबलाद् देवभावमापन्नाना नराणा सा कथा भवेत् । नात्र किमप्यसभवम् । त्रिकालवृत्तवर्णित्वाद् वेदस्य नैतत्तदनित्यता साधकम् । अपरश्च पक्ष प्राकृतशक्तीनाम् । तथाहि सूर्यचन्द्रादयो वेदवर्णिता देवा स्फुट स्वमहिमान द्योतयन्ति । तत्रेन्द्रशब्देन सूर्यस्य वायोर्वा ग्रहणमित्यन्यत् । यथा पर्जन्य स्येन्द्रपदेन विद्युतश्चाप्सर सज्ञयोल्लेख । मित्रावरुणौ च युगपदुच्यमानौ विज्ञाने मोपजन (Oxygen) उदजन (Hydrogen) तत्त्वयो प्रतीके । वृत्रश्च मेघो नीहारो वा । तस्मिन्नर्थे चाश्विनावपि रात्रे क्षपयितृणौ द्वे नक्षत्रे ।

तृतीयस्त्वाध्यात्मिक पक्षो यत्र 'यत्पिण्डे तद् ब्रह्माण्डे' इत्युक्त्यनुसार सकलमपि ब्रह्माण्ड शरीर एव साध्यते । तत्रन्द्रियाण्येव देवा, आत्मैवेन्द्रस्तदधिपति । शरीरस्य मस्तिष्कभाग एव द्युलोक, मेरुदण्डस्यश्च पृथिवीलोक, तन्मध्येऽन्तरिक्षम् । प्राण प्रजापति, रेत एव सोम । तत्र सद्वृत्तीनामेवावरको वृत्र कुत्सिता वृत्तय एवासुरा, गृत्स एव प्राण, मदरूपापान, तयो प्राणापानयो समेलन महाप्राण । आत्मा चेन्द्र । 'सप्त वै शीर्षण्या प्राणा' त एव सप्त रश्मय, समिध, लोका ऋषयो वा । ता एव चेतनाधारा सप्तसिन्धव । आधुनिके शरीरशास्त्र (Anatomy) Cerebrum सज्ञयोक्तो द्युलोक, Medula oblongata middle region इत्याख्यश्चान्तरिक्षलोक, Spinal region इति पृथ्वीत्येव त्रिधा विभक्तास्ते प्राणा एकविंशति सपद्यते । तदुक्तम् ——

'सप्तास्यासन् परिधयस्त्रि सप्त समिध कृता ।'

प्राणापानावेवाश्विनौ, च्यवनशील रेत एव च्यवन, रेतसो रक्षण तदुद्भवश्चानन्द एव मधु यद्विद्या दध्यङ्ङाथर्वण्यामुपादिशत् । एष एवेन्द्र —

'इन्द्रोमायाभि. पुरुरूप ईयते इति बहुभिः कर्मभिः स्तूयते। तस्यैवाधोगामिनीनां वृत्तीनां दमनं देवासुरसंग्रामसंज्ञया प्रतिपाद्यते। इन्द्रियाणि हि बहिर्मुखानि, आत्मान्तर्मुखः—

पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्।
कश्चिद् धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्॥ (क-उ. २।१)

एष एवेन्द्रः सोमपायी, अयमात्माऽस्याध्यक्षः।

देवसंख्या—वेदेषु देवसंख्या शताधिका तेषामेकत्वप्रतिपादिका च। तत्र समन्वयार्थं बृहदारण्यके शाकलयाज्ञवल्क्यसंवादः प्रमाणम्। तदनुसारेण त्रयस्त्रिंशद् देवाः। महिमान एवैषामेते शताधिकाः। 'अष्टौ वसव एकादश रुद्रा, द्वादशादित्यास्त एकत्रिंशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशौ।' (बृ. ६।९।३) तत्र अग्निश्चपृथिवीच वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु ह्रीदं सर्वं वसु हितमेते ह्रीदं सर्वं वासयन्ते तद् यदिदं वासयन्ते तस्माद् वसव इति। पुरुषे स्थिता दश प्राणा आत्मैकादश एते रुद्राः। शरीरादुत्क्रम्य रोदयन्तीति रुद्रा इत्युच्यन्ते। संवत्सरस्य द्वादश मासा एव द्वादशादित्याः। 'एते ह्रीदं सर्वमाददानायन्ति।' 'स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिः।' अग्निः, पृथिवी, वायुः, अन्तरिक्षम्, आदित्यो द्यौश्चेति षड् देवा.। इमे त्रयो लोका एव देवाः। अन्नं प्राणश्चेति द्वौ। योऽयं पवते सोऽध्यर्द्धः। एको देवः स ब्रह्मेति क्रमश ऊनिता देव संख्या व्यवहारजगतस्तत्त्वजगत् प्रति ततश्च मूलं समन्वेति। अनेन बहुदेववादस्यैकदेववादस्य च न विवादः। 'माहाभाग्याद् देवताया एक आत्मा बहुधा स्तूयते।' तस्यैव शक्तयः सूर्यचन्द्रादयः।

तदेवाग्निस्तदादित्यस्तद् वायुस्तदु चन्द्रमाः।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः॥ (य. ३२।१)

एकं मित्र वरुणमिन्द्रमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद् विप्रा बहुधा वदन्ति, अग्नि यमं मातरिश्वानमाहुः॥ इति

इत्थ सुस्थिर एव निर्विवादो वैदिको देवासुरवाद इति शम्।

—०—

वेदोऽखिलो धर्ममूलम्

(लेखकः—श्री विद्यानिधि शास्त्री व्याकरण-साहित्याचार्यः
विश्वेश्वरानन्द वै. शो. संस्थानम्, होशियारपुरम्)

नवनीतमिवाऽवगीतमथनोपनीतममृतविन्दुस्यन्दि वचनमिदमनुपममनुपहत-मतिना मनुना मुनिनाऽऽम्नायि स्वीये धर्म-समाम्नाये। तस्य महर्षेरिदं वचो युक्तिसिद्धं बुद्ध्यविरुद्धं मनुस्मृतावुपनिबद्धं सर्वत्र प्रसिद्धमस्ति। 'यत् किंच वै मनुरवदत् तद् भेषजं भेषजतायाः' इत्याम्नानात् प्रमाणकोटिमाटीकमानं तत् न खलु टीकां च कांचनाञ्चति। अस्य सर्वानर्थकदर्थनसमर्थस्यायमर्थः—अखिलोऽपि वेदः धर्मस्य मूलम् प्रभवः उत्पत्तिस्थानमस्तीति। कोऽसौ वेद इत्याकाङ्क्षायां ब्रूम.—ऋग्यजु सामाथर्वलक्षणो विलक्षणो मन्त्रसंहिताचतुष्टयाविरोधिबोधितशाखोपशाखोपबृंहितो हितो महितो विध्यर्थवादनिषेधसहितो ब्राह्मणानुब्राह्मणाहितो विविधोल्लसत्सांगोपागोपनिषत्सूत्रारण्यकादिगण्यवरेण्यश्रुतिभेदभिन्नो महान् ज्ञानराशिर्ग्रन्थो वेद इति। किलक्षणस्य धर्मस्य मूलमिति जिज्ञासायामुच्यते—लोकत्रयधारकस्य दुःखक्षयकारकस्य सहृदयहृदयाभरणस्य पवित्राचरणस्य परिनिष्ठित-श्रेष्ठविद्वदनुष्ठितस्य सर्वार्थसाधकस्य क्रूरकुटिलकष्टचेष्टादुरदृष्टबाधकस्य सुशिक्षणदक्षविचक्षणपक्षरक्षणक्षमस्य विपक्षनृभक्षरक्षःक्षपणस्य सकलभुवनतलमंगलप्रीतिस्फीतिजननस्य दुःस्थितमनःसंवननस्य सुखशान्तिसमृद्धिवृद्ध्यानन्दैकनिधेः साक्षाद् विधेर्निदर्शितस्य त्रिवर्गकेतोः स्वर्गहेतोः पुण्यदयादानाध्ययनाग्निहोत्रादि रूपस्येति। तथा चोक्तं भगवति यजुर्वेदे पुरुषसूक्ते—"तानि धर्माणि प्रथमान्यासन्' इति। प्रथमत एव लोकव्यवहारस्य साधुसंपादनाय परमेष्ठिना प्रजापतिनाऽनादिनिधनेन ब्रह्मणाऽभ्युदयनिःश्रेयसकराणि जनतार्तिहराणि हस्तामलकानीव मंगलैकफलानि विमलमधुराण्यविनश्यन्मर्माणि तानि धर्माणि शुभकर्माणि प्रजाना योगक्षेमसाधनानि धनानीवाभिलषणीयानि वरणीयानि स्मरणीयानि रमणीयानि च निर्माय स्थिरीकृतान्यासन् सन्ति भविष्यन्ति चेत्यर्थः। वेदे सर्वकालप्रत्ययविधेरिष्टत्वाद् 'आसन्' इति भूतकालक्रिया

वर्तमानभविष्यतोरपि समन्वयमीयुः । इयमेवाशयं प्रतिपादयन्ति वाक्यान्तराण्यपि बहूनः श्रुतिषु श्रुतिशष्कुल्यवच्छिन्ने नभसि पतन्ति जगन्ति पुनन्ति विभान्ति । तद्यथा— वेदाद् धर्मो हि निर्बभौ । सर्वो धर्मो वेदादेव समुद्भूत इत्ययं: । भूतं भव्यं भविष्यच्च सर्वं वेदात् प्रसिध्यति ॥ इति च । कालत्रयवर्तिनः सर्वेऽपि भावाः सुव्यवस्थितस्वप्रभावा भगवतो वेदपुरुषादेव समुत्पादमापद्यमानाः प्राणभृतां ध्रुवं श्रेयसायालं भवन्तीति । किं च—

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥

वेद एवैतादृगप्रतिमप्रभावः प्रत्यक्षीकृतसकलवस्तुस्वभावः परमपरभागमुपेयिवानपौरुषेयो ग्रन्थविशेष इष्यते यन्नातीन्द्रियाणामप्यर्थानां साक्षाद् दर्शनं विद्यते, तच्च सूक्ष्मेक्षिकया निरीक्षणीयं परीक्षणीयं च भवतीति । अतएव बभणुः कणादाः—

तद्वचनादाम्नायस्य प्रामाण्यम् ॥ इति

तस्य धर्मस्य वचनात् प्रतिपादनात् तस्य ईश्वरस्य वा वचनाद् वाक्यत्वाद् आम्नायस्य वैदिकवाङ् मयस्य प्रामाण्यमभ्याहृतं सम्पद्यते इत्यर्थः । "शास्त्रयोनित्वात्" इति वेदान्तसूत्रेणाप्यशतोऽयमेवार्थः स्फुटीक्रियते । ऋग्वेदादिशास्त्रं ब्रह्मणः तत्प्रतिपाद्यस्य धर्मस्य च योनिः कारणमिति, ऋग्वेदादेः शास्त्रस्य तत्प्रतिपाद्यस्य धर्मस्य च ब्रह्म योनिः कारणमिति वा व्याख्याद्वयेऽपि न किंचिद् दुष्यति । सर्वथा धर्मस्य वेदमूलकत्वं सिध्यति । वेदे पुराण्यप्यक्षुण्णा कल्याणी सा वाणी, याऽद्यावध्यपि निरवद्या सकलसत्यविद्याविद्युद्द्योतद्योतिनी सद्योऽविद्यावद्यान्यवद्यतीति सत्यं प्रतीमः । एव. चैव-प्रायाभिः सद्युक्तिभिः प्रमाणैश्चैवजातीयकैर्दृढं मन्यामहे वेदोऽखिलो धममूलमिति । इदमेवात्र प्रस्तुतं वस्तु वस्तुतः सस्तुतमपि संक्षिप्य निदिदर्शयिषामः सिषाधयिषामश्च । इदं तु बोध्यम्—जगदुत्पत्तेः प्राग् वेदेतरग्रन्थाभावाद् वेदस्य चापौरुषेयवाक्यत्वाभ्युपगमात् क्लेशकर्मविपाकाशयापरामृष्टपुरुषविशेषेश्वरकृतत्वस्य च स्पष्टमिष्टत्वादत्र विषये नाण्वपि सन्देक्तव्यम् । न च शङ्कापङ्ककलङ्काङ्कुरेण वोत्पत्तव्यम् । तथाहि—

तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत ॥ इति

मृष्ट्युपक्रमे सावष्टम्भं भगवतैव स्वयं शङ्कायाः समाधानविधानात् । एवं गते सत्यपि ये पेलवधियो व्यामुह्यन्ति तान् प्रति विशेषेणायं क्रियते प्रयत्नः प्रकृतवस्तुप्रतीतिनिबन्धनम् । अतो हेतोः सम्प्रति सम्प्रतिपन्नार्थसमर्थैर्वेदवाक्यमार्थैरेव चरितार्थीक्रियमाणः साक्षाद् धर्मोपदेशः प्रस्तूयते—आदौ तावत् सर्वानुगतः सामान्यधर्मः ।

अथर्ववेदीयद्वादशकाण्डे प्रथमोऽनुवाकः पृथिवीसूक्तमित्युच्यते । तदेव राष्ट्रमुक्तं स्वराज्यसूक्तमिति व्यपदिश्यताम् । निपष्ट्या मन्त्रैस्तत्र स्वदेशभूम्या गौरवं कैः कैरभ्युपायैरव्यवायं साधु सेद्धुमर्हंतीति निरचमचमवाचि । विमृश्य दृश्यतामास्वाद्यतां चाद्यो मन्त्रः —

"सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति ।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु ॥"

अयमभिसंधिः—अस्य दृश्यमानस्य जगतः स्थितिहेतुरस्ति कश्चन धर्मो नाम पदार्थः, यः खल्विदमखिलमवनितलमविकलमविचलं च धारयतीति । सर्वेऽभिजना जना वा, समजाः समाजा वा, सर्वा व्यक्तयः शक्तयो वा, जातयो व्याप्तयो वा, सर्वाणि बलानि चलान्यचलानि वा सर्वाणि राष्ट्राणि स्वीयान्यन्यदीयानि जनकीयान्यारातीयानि दूरेत्यानि दाक्षिणात्यानि पाश्चात्यानि पौरस्त्यान्यौत्तराहाणि वाऽनवयवेन येन *ध्रियन्ते स्थिरीक्रियन्ते स एव धर्म इति मन्त्रेऽत्र प्रतिपाद्यते । यतो हि धारणाद् धर्म* इत्याहुर्धर्मो धारयते प्रजाः इति वाचोयुक्तियुक्तिमत्यनुश्रूयते । कोऽसौ धर्म इत्यालोचनायामाह—सत्यं बृहदिति । बृहदुपकारि मनोहारि सत्यं वाङ्मनःकायस्यैकात्म्यमिति, इदं प्रथमो धर्मः । 'सत्येनोत्तभिता भूमिः' इत्यृग्वेदेऽपि सूच्यते ।

सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ।
नहि सत्यात् परो धर्मो नानृतात् पातकं परम् । इति च

गुणमहिम्ना तन्नाम्नाऽप्याम्नातम्.....

श्रुत्यनुकूला स्मृतिश्च तमेवार्थं समर्थयति । ऋतमुग्रम् इति । निर्घृणरिपुगणप्राणहरणक्षमं क्षात्रं तेजः शौर्यं धैर्यं वीर्यं बलं शक्तिसम्पादनमित्यपरो धर्मः । क्षत्रशक्तिप्रशस्तिर्भूयसाऽक्षिलक्षीभवत्यन्यत्रापि । उपलक्षणं तु यथा यजुर्वेदे—

यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह ।
तं लोकं पुण्यं प्रज्ञेयं यत्र देवाः सहाग्निना ॥

अग्निहोत्रद्वारेण देवपूजका ब्राह्मणा यत्र निवसन्ति क्षत्रियाश्चात्युच्चैस्तेजः सम्पन्ना. समीचीनापराचीनाभिव्यक्तशक्तयः सहयोगिनो भूत्वा चरन्ति स लोकः पुण्यभूमिरिति प्रज्ञायते प्रख्यायते च । न हि तत्र कदाचित् पापं पदं निधत्ते लोकश्चामो नावसीदति नश्यति भ्रश्यति वा । दीक्षा विशिष्टशिष्टोद्दिष्टपवित्रव्रतनियमग्रहणम् । देहेन्द्रियमनसा संयमनाय षोडशसंस्कारविधानमिति यावत् । अयं तृतीयो धर्मः । तपो द्वन्द्वसंघातानभिघातः सोऽयं त्यागलक्षणः सेवाधर्मश्चतुर्थः । ब्रह्म वेदा-

भूतस्येति । भूतस्य शान्तस्यातिक्रान्तस्य, भव्यस्य नव्यस्य एष्यतो भविष्यतोऽव्यपदेश्यस्य चार्यसार्यस्य पत्नी, पालयित्री, साधयित्री च नो धरित्री सुचिरत्नशुचिरत्नसुवर्णवर्ण-मणिगणपरिपूर्णा सपन्नान्नमस्याद्या सती लोकलोकमशोक सालोकमुरु विस्तीर्ण-मनुच्छेदिन कृणोतु करोतीत्यर्थ । एतेनाभ्युदयापरपर्याया लौकिकैश्वर्यपरिनिष्ठा सूचिता । सूचित च सूचितकामावाप्तौ सत्या सर्वकामनात्यागस्वरूप स्वत सिद्ध मोक्षाख्य नि श्रेयसम् । अत एव महर्षि कणाद कल्याणी वाणीमभाणीत्—यतोऽभ्यु-दयनि श्रेयससिद्धि स धर्म इति । ऐहिक परम सुखमभ्युदय । आमुष्मिक च निश्चित श्रेयो नि श्रेयसम् इति तयोरुभयो सिद्धियंतो भवति स धर्म इत्यर्थ । जैमिनिना मुनि-नापि समुचित जगदे—चोदनालक्षणोऽर्थो धर्म इति । सर्व वाक्य सावधारण भवतीति न्यायाद् वेदविहित कर्मैव धर्म इत्यथ । सुखस्य मूल धर्म । धर्मस्य मूलमर्थ । अर्थस्य मूलमिन्द्रियजय । कामस्य मूल धर्मार्थावर्थधर्मौ वा इत्येव त्रिवर्गसाधन सूत्रयताऽर्थशा-स्त्रप्रणेत्रा राष्ट्रनेत्राऽऽर्यचाणक्येनापि महाविदुषा वेदानुगुणमेवावर्णि । प्रथम मुख्य-माधार धर्म विना, अर्थकामौ न कदाप्येकान्तात्यन्तिकसुखाय कल्पेते इति तस्य महा-मयस्थानाय । अतश्च धर्मार्थकाममोक्षाभिधे पुरुषार्थचतुष्टये धर्मस्य प्रथम स्थान-मिष्यते । इतरेषामाधारकत्वात् । धर्म जिज्ञासमाना च श्रुतिरेव परम प्रमाणमि-त्यसकृदाहु प्राच्यो मन्वादिराजर्षय । सत्यप्रमुखा इमेऽयर्वमन्त्रोक्ता धर्मा सामान्या अपि समान्या. सर्वेषामभिनन्दनीया अनिन्द्यनीयाश्च सन्तो न प्रामाणिकगर्हणमर्हन्ती-त्याबालवृद्धमशेषेण विशेषेण परिशीलनीया । राज्ञामाज्ञापि नैतान् व्याहन्तुमीष्ट इत्यनिच्छद्भिरप्यच्छद्मतिभि परिच्छेत्तव्यम् ।

इदानी वर्णाश्रमसमाजस्त्रीजातिराजनीतिमूलाना धर्माणा वेदोदिता दिगुदा-ह्रियते—तत्र वर्णधर्मा —

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्य कृत ।
ऊरू तदस्य यद् वैश्य पद्भ्यां शूद्रो अजायत ॥
रुचं नो धेहि ब्राह्मणेषु रुच राजसु नस्कृधि ।
रुच विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ॥

यथेमा वाच कल्याणीमावदानि जनेभ्य । ब्रह्म राजन्याभ्या शूद्राय चार्याय च स्वाय चारणाय ॥यजु ॥

अत्र ब्राह्मणो मुखबाहूरुपज्जाना ब्राह्मणक्षत्रियवैश्यशूद्राणा चतुर्णामपि वर्णाना क्रमेण लक्षणया ज्ञानबलधनसेवाधर्मा प्रोक्ता । अध्यापनमध्ययनमित्यादिवचनैर्मनुना, श्रीमगवद्गीतासु महर्षिणा व्यासेन च तेषामेव वेदोक्ताना वर्णधर्माणामन्वाख्यान व्याख्यान च कृतमिरयतिरोहित सर्वेषाम् । यथेमा वाचमिति मन्त्रेण चान्त्यज-[illegible] कल्याणीवेदवाणीवीणावदनेऽधिकारो दत्तो न तु धिक्कार ।

आश्रमधर्मा —

ब्रह्मचर्यगृहस्थवनस्थसन्यासाख्याना चतुर्णामाश्रमाणा मूल वेदे विद्यते इति तद्धर्माणामपि सुतरा विधान द्रष्टव्यम् । तद्यथा—

ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत । आचार्यो ब्रह्मचर्येण ब्रह्मचारिणम् इच्छते । आचार्य उपनयमानो ब्रह्मचारिण कृणुते गर्भमन्त ॥ इत्यादि ब्रह्मचर्यस्य,

"इहैव स्त मा वियोष्ट विश्वमायुव्यश्नुतम्, क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥

ऋग्वेद ॥

अनुव्रत पितु पुत्रो मात्रा भवतु समना ॥ अथववेद ॥
जाया पत्ये मधुमतीं वाच वदतु शन्तिवाम् ॥ इति गृहस्थस्य ॥

'दीक्षातपसोस्तनूरसि ॥ अभ्यादधामि समिधमग्ने व्रतपते त्वयि । व्रत च श्रद्धा चोपैमि, इन्धे त्वा दीक्षितो अहम् ॥

तप श्रद्ध ये ह्युपवसन्त्यरण्ये शान्ता विद्वासो भैक्षचर्यां चरन्त ॥ इत्यादि वनस्थस्य,

अकामो धीरो अमृत स्वयभू रसेन तृप्तो न कुतश्चनोन ।
तमेव विद्वान् न बिभाय मत्योरात्मान धीरमजर युवानम् ॥
यतयो ये च तुष्टुवु । भृग्वो ये च तुष्टुवु ॥ ऋग्वेद ॥

वेदान्तविज्ञानसुनिश्चितार्था सन्यासयोगाद् यतय शुद्धसत्वा ॥ इत्यादि सन्यासस्य । अत्र ब्रह्मचर्याश्रमे आचार्योपनीतत्वात् तप सपत्तिर्जितेन्द्रयतया सकलविद्या ग्रहण धर्म । गृहस्थे यथाविधि सकलसासारिकैश्वर्योपभोगो धर्म दम्पत्यो प्रेमस्थेमा चावश्यक । वनस्थे आरण्यक व्रतमाश्रित्य तपोनुष्ठानमात्मनिरीक्षण च धर्म । सन्यासे चाप्तकामस्य वीतरागस्य लोकोपकार स्वच्छन्दपरब्रह्मात्मदान दास्वादश्च धर्म ।

समाजधर्मा —

सं गच्छध्व स वदध्व स वो मनासि जानताम् ।
देवा भाग यथापूर्वे स जानाना उपासते ॥
समानी व आकूति समाना हृदयानि व ।
समानी प्रपा सह वोऽन्नभाग ॥
सहृदय सांमनस्यमविद्वेष कृणोमि व ॥
मा भ्राता भ्रातर द्विक्षन् मा स्वसारमुत स्वसा ।
सम्यञ्च सव्रता भूत्वा वाच वदत भद्रया ॥
अज्येष्ठासो अकनिष्टास एते स भ्रातरो वावृधु सौभगाय ॥

निगदव्याख्यातान्येतानि । सामाजिकं परस्परमैक्य मैत्रीभाव सघटनगुरु—लघुभावोऽभेदभावश्च न्याय्य इत्यय समाजधर्म ।

4055

स्त्रीधर्म —

स्त्री हि ब्रह्मा बभूविथ ॥
ब्रह्मचर्येण कन्या युवान विन्दते पतिम् ॥
उत त्वा स्त्री शशीयसी पुंस उ भवति वस्यसी ॥
न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता ॥
पापमाहुर्यं स्वसार निगच्छात् ॥ ऋग्वेद ॥

अत्र स्त्रीणा ब्रह्मचर्यपूर्वक विद्याध्ययन युवावस्थाया विवाहकरण विधावत्त्वेपि लज्जाशीलत्व धर्म । इतरथा शीलभङ्गाद्व्यङ्गाऽस्तङ्गमुट्टङ्केत् । अशिक्षितादानशीलाद-भगवद्भक्ताच्च पुंसोऽपि ज्यायस्त्व प्रतिपादितम् । भगिनीसगम पापमतिस्त्रीप्रसक्ति-श्च वर्जनीयेत्यगादि ।

सकलमनुष्यजातिधर्मा —

कुर्वन्नेवेह कर्माणि जिजीविषेच्छत समा ॥
मित्रस्याह चक्षुषा सर्वाणि भूतानि समीक्षे ॥ यजु ॥

शतहायनपरिमित पूर्ण पुरुषायुष यावत् प्रत्येक मनुष्येण कर्मावश्य कर्तव्य सर्वत्र च मित्रवद् व्यवहर्तव्यम् । आलस्य हि मनुष्याणा शरीरस्थो महान् रिपुरित्या-म्नातमन्यत्रापि । अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा शौचसतोषतप स्वाध्यायेश्वरप्रणि-धानानीति तु पूर्वमेव सामान्येन प्रतिपादिता धर्मा । तत्रापि विशेषेणाहिंसाया प्रमाणानि—

'द्यौ मा हिंसीद्द्विपाद पशुम् ' अत्र द्विपात् पशुर्मनुष्य ।
अहिंसयैव भूताना कार्य श्रेयोनुशासनम् ।
वाक चैव मधुरा श्लक्ष्णा प्रयोज्या भूतिमिच्छता ॥ मनु ॥
सत्यम्—सत्यमेव जयते नानृतम् । सत्य वद । धर्म चर ॥
अस्तेयम्—न स्तेयमधि मनसोदमुच्ये ॥ गृह्यसूत्रम् ॥

अपरिग्रह —तेन त्यक्तेन भुञ्जीथा । त्यागपूर्वको भोग एव धर्म इत्यर्थ मा गृध । लोभ मा कार्षी । लोभनाश एव ज्यायान् धर्म ।

इन्द्रियनिग्रह —न जातु काम कामानामुपभोगेन शाम्यति ॥
इन्द्रियाणा प्रसङ्गेन दोषमृच्छत्यसशयम् ।
सनियम्य तु तान्येव तत सिद्धि नियच्छति ॥ मनु ॥

सन्तोष —संन्तोष परम सुखम् । सतोषामृततृप्तानां यत् सुखम् इत्यादि स्वय व्याख्यातान्येतानि वाक्यानि व्याख्याभाष्य नापेक्षन्ते ।

ईश्वरभक्ति —श पद मघ रयीषिणे न कामममतो हिनोति न स्पृशद् रयिम् ॥
॥ सामवेद ॥

धनमिच्छत पुरुषस्य पूर्णशान्तिदायक भगवच्चरणमेव शरणमित्यर्थं ।

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मान ततो न विचिकित्सति ॥
यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानत' ।
तत्र को मोह क शोक एकत्वमनुपश्यत ॥यजु ॥

भूतमात्र सर्वत्र भगवद्दर्शनमेव कर्तव्यमिति निष्कृष्टोऽर्थ ।

राजधर्मा —ब्रह्मचर्येण तपसा राजा राष्ट्र विरक्षति ॥ अथर्ववेद ॥ मा त्वद्राष्ट्र-मधिभ्रशत् । इहैवधि मापच्योष्ठा पर्वत इवाविचाचलि ॥ राजा ब्रह्मचारी स्यात् तपस्वी स्यात् पर्वत इवाचलश्च सन् स्वा प्रजा परिपालयेदिति भाव । उत्क्रम महते सौभगाय ॥ क्षत्रस्य योनिरसि ॥

माभिमस्था । अहकाररहितो भवेति राजान प्रत्याशीर्वाद । शतायुष कृणुहि चीयमान । सुश्लोक सुमङ्गल सत्यराजन् ' इन्द्रो राजा जगत चर्षणीनाम् । वस्तुतो-ऽतिभवान्भगवानेव जगतो राजा त्व तु तदीय प्रतिनिधिरिति राज्ञा प्रत्यहमात्मा बोधनीय । 'धर्मोऽस्मि विशि राजा प्रतिष्ठित ।' इति ।

राजा धर्मपूर्वक प्रजा अनुशिष्यान्न कदाप्यधर्मशील स्यादिति धर्मानुगुणैव राजनीतिर्वेदे निगदिता न तु धर्मप्रत्यनीका । एव च नीतिधर्मयो शाश्वतिक विरोध प्रतिपन्ना वेदवाक्यादवसन्ना पराहृताश्च वेदितव्या ।

(ये तु ब्रुवते वेदा केवल कर्मकाण्डविधायका यज्ञप्रक्रियायामेवोपयुक्ता न लौकिक व्यवहारमुपदेष्टु प्रवृत्ता । 'यत्पर शब्द स शब्दार्थं' इति न्यायेन तत्रार्थे तात्पर्याभावादिति तेषा मतमप्येतेन प्रत्युक्त प्रतिपत्तव्यम् । वेदे स्पष्टमुपलभ्यमाने समाने निरूपमाने लौकिकधर्मविधाने कथकारमादियेत तद्विरुद्धमशुद्ध प्रतिरुद्ध च रिक्त तद्वच ।

पर्यवसाने च—

विद्यां चाविद्यां च यस्तद् वेदोभयं सह ।
अविद्यया मृत्यु तीर्त्वा विद्ययाऽमृतमश्नुते ॥ इति मन्त्रेण

अविद्यारूपसत्कर्मणा मृत्युरूपससाराणंवतरण विद्यारूपात्मज्ञानेन चामृत-पदोपलब्धिरितीत्थमित्थभूतार्थंप्रतिपादनात् निर्वासनाना ज्ञानकर्मोपासनानामविरोधेन धर्मत्वमभ्युपगतम् । अतएव मनुना—

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वय. ॥

इति वचनाद् वेदमनधीयानाना सान्वय शूद्रत्वमुद्घोषितम् ।

तत्र वय तथात्व मा प्रतिपत्स्महीतिभिया धर्मार्थंमस्माभिर्वेदा अध्येतव्या प्रत्येतव्याश्च । वेदानधीत्य नितान्त तान्तस्वान्ता भ्रान्ता अपि दान्ता शान्ता कान्ताश्च भवन्त्याप्तैकान्ता । गृहमेधिनो विषमस्था अपि शमस्था वनस्था इव पूर्णं पुरुषायुष लभमाना साभिमाना स्वात्मनि सावधानाश्च समुल्लसन्ति । दर्शपूर्ण-मासादियाग कुर्वाणोऽपि स्व निश्रेणिनिर्माणान्निर्वाण लब्धुमलकर्मीण एव सपद्यते । तदुक्त बृहदारण्यके—'तस्य तावदेव चिर यावन्न विमोक्ष्ये अथ सम्पत्स्ये' इति । तस्मादस्माकमिदमावश्यक कृत्यमस्ति यद्वय वेदोदितमुदितधियो मुदितश्रियो गुहाया निहित धर्मस्य तत्त्व सम्यगनुसन्धाय हृद्यवधाय तदुक्तसिद्धान्तशय्यामधिशय्य विरहय्य चात्यन्तीना वैयाकुली बलवद् भगवदनुग्रह वार वार स्मार स्मार पार गता स्यामापदापगानाम् इति शम् ॥

—०—

इन्द्रः

वेदेषु विशेषत ऋग्वेदे देवाना स्तुतयो वर्णिता यथाऽवसरम् । तेषु च सर्वाधिका प्रशस्तिरग्नेस्ततो न्यूनाऽन्येभ्यश्चाधिका इन्द्रस्य । सर्वेऽपि देवा इह मानवीकरणेन पुरुषाकारैर्निरूपितास्तेषु चेन्द्रस्याधिक स्पष्ट स्वरूपम् । स आर्याणा योद्धा देवः शूरत्वेन सादर स्तुत ।

स हरिश्मश्रु' सुशिप्र । वज्रायुधोऽसौ वृत्र शम्बर नमुचि वल शुष्ण रोहिण च निहन्ति । मरुतस्तस्य साहाय्य कर्तार । स विशेषेण सोम-प्रिय । तस्य मदेऽतितरा शक्तिमान् सम्पद्यते । 'वज्रमस्मै स्वयं त्वष्टा ततक्ष ।' स च विद्युद्रूपो लोहमय पाषाणकृतो वा । सशर शरासनमङ्कुशश्च तस्यान्यास्त्राणि, स शतक्रतु, शचीपति । सोऽतुलधनस्य दातेति मघवानिति स्तूयते । स्वर्णमय रथ हरिवर्णतुरगचालित रथमारोहति स । द्यौस्तस्य पिता, अग्नि पूषा च भ्रातरौ, अग्निना, विष्णुना, वरुणेन च सह समक्तिः । वायुना, सोमेन, बृहस्पतिना, पूष्णा च सह सामान्येन हविर्भाक् स निरूपित ।

स वृत्रस्य हन्ता, तस्य वर्णन वेदेषु त्रिधा लभ्यते, पुरुषाकारेण, प्राकृत-रूपेणाध्यात्मप्रकारेण वा । प्रथमस्तु यदैतिह्यासिकास्तमतीतकथानायकत्वेन व्याचक्षते । यथा

येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधर गुहाक ।
स्वघ्नीव योजिगीवाँ लक्षमाददर्यः पुष्टानि स जनास इन्द्र. ॥

पाश्चात्या अनेनानार्याणा पराजयमेव सूचित मन्यन्ते । 'यो हत्वाहिमरिणात् सप्त सिन्धून् यो गा उदाजदपधा वलस्य ।' इत्यनेनाऽपि सङ्गृहन वलेन हृतानां गवा च मोचनमभिदधति । 'म. शम्बर पर्वतेषु क्षियन्त चत्वारिंशत्या शरद्यन्वविन्दत् ।' अत्राऽपि शम्बरास्यानार्यस्य मार्गण चत्वारिंशत्या शरदा न कस्यचिद् युद्धस्य सम्भेद सूचयन्ति । देवसेनाभि सह मरुद्गणाद्यास्याभियानमपि मापु वर्णितम् । यथा —

इन्द्र आसा नेता बृहस्पतिर्दक्षिणा यज्ञ. पुर एतु सोम ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥

एव च—

आशु शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनो निमिष एक वीर शतं सेना अजयत्साकमिन्द्रः ॥

इति । अत्र महायोद्धैव स वर्णित । अतएव यास्केनाप्युट्टङ्कित निरुक्ते —'तत्को-ऽय वृत्र ? त्वाष्ट्रोऽसुर इत्यैतिहासिका । मेघ इति नैरुक्ता । उपमार्थेन युद्धवर्णनानि भवन्ति ।' इति । एव च नैरुक्ताना प्राकृत एव पक्ष । तत्रापि कतमा प्राकृती शक्तिरिन्द्रत्वेन गृह्येत ? वृष्टेर्देवत्वेन वर्ण्येत चेत् तदा पर्जन्येन तस्य को भेद ? सोऽपि हि वृष्टेर्देवता । द्यावापृथिव्योर्वा मेघयोरश्मनोरन्त स वैद्युतमग्नि जनयति । पर यदि स मेघेष्वग्नि जनयति तदा स सप्तसिन्धूना मोक्षणेन सह तस्य क सम्बन्ध ? कथ वा सगति-र्बलकृताद् रोधाद् गोमोक्षणस्य ? चत्वारिंश्या शरदि च शम्बरस्य लाभ कथमुप-पद्येत ? दासवर्णस्याधरीकरणेऽपि किमौचित्यम् । यद्यपि प्रमाणान्तरेण मेघाना पर्वतत्व वर्णितमेव, 'य ईङ्खयन्ति पर्वतान् तिर समुद्रमर्णवम् ।'

मतान्तरे चेन्द्र सूर्य. । सूर्यार्थे तस्य वर्णनमपि मन्त्रे दृश्यते । यथा—
'यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य । सर्वन्तदिन्द्र तेवशे ।'

अत्र 'वृत्रहन्' इति 'इन्द्र' इति सम्बोधन च सूर्यस्य विशेषणे । सामंज्यदेश्यो हिलेब्राण्ट-सज्ञो विद्वान् वृत्र नीहारमेव मनुते । तन्मते चेन्द्रो ग्रीष्मकालिक सूर्यो य खलु स्वप्रकाशेन तापेन च नीहार विनाश्य घनीभूत जलमुत्पयित्वा सिन्धून् प्रवाहयति । अस्मिन् मते वलवृत्रकावरोधाद् गवा मुक्तिरपि सगच्छते । तथाहि—वेष्टनार्थकाद् वल्धातोर्निर्मितो वलशब्दोऽपि प्रकाशरोधकार्थे प्रयुक्त । अतो येनाऽपि मेघेन घनी-भूतया कुहया च सूर्यस्य रश्मयो निरुद्धा आसन् ते रश्मय प्रसारार्थं मुक्ता । परमेत-स्मिन्नपि मते वर्तते काप्यनुपपत्ति । यदि सूर्य एवेन्द्र नीहारश्च वृत्रस्तर्हि शम्बरस्य चत्वारिंश्या शरदि लाभस्य कथ सगति स्यात् ? मरुतो वृष्टिकार्य इन्द्रस्य सहायका । पर पूर्वोदाहृतमन्त्रयोर्देवसेनाभियान वर्णित तस्य च कथ योजना ? किं मरुतोऽपि सूर्यस्य साहाय्यकर्तार ।

अत्र लोकमान्यस्तिलकस्त्वन्यथैव समाधत्ते । तस्य मतेनार्या पूर्वमुत्तरध्रुव-प्रदेशवास्तव्या आसन् । तत्र च षाण्मासिक दिन षाण्मासिकी निशा च भवत । अत सतत प्रवर्तमानस्य प्रकाशतमसोरय सघर्षो वृत्रेन्द्रवध रूपेण वर्ण्यते । तत्र प्रवहज्जलं च दिव्य प्रतिभाति सूर्यचन्द्रमसोर्गतिहेतुतया च प्रतीयते । यदि वृत्रो जलानि तानि रुन्ध्यात् सूर्यदिर्गतिरोधाद् हानिरेव भवेत् । अस्मिन् मते वृत्रश्च सजलोऽवग्रहजलधर. । तस्य निपातनेन नदीप्रवाह सगच्छत एव ।

ग्रीष्ममूर्यस्येन्द्रत्वमन्यथाऽपि सिद्धम् । ऐतरेयब्राह्मणे निरूपित यन्माध्यदिने सवने मरुद्भि सहेन्द्रस्य भक्तिर्वर्ण्यते । इन्द्रश्च सूर्यस्य प्रतिनिधि. यज्ञे च सोमदिन सूर्येण तुल्य लिखितम् । प्रथमे सोमदिने वर्षारम्भप्रतीके ग्रीष्मार्कस्य स्तुति. । स चेन्द्र । चत्वारिश्यामिति तूपलक्षणम् । शरच्च शरदो दिनार्ये । पर तदा 'दास वर्णंमधर गुहा क' इत्यस्य कोऽभिप्राय ? यदि वर्णशब्दस्यावरकमिति दासस्य चोपक्षपयितृ लक्षणोऽर्थो गृह्यते तदा तस्यापि समाधानम् । तदाऽपि—'दासपत्न्यो अहिगोपा अतिष्ठन्' इत्यत्र 'अहिहत्येषु' इत्यादौ चाहिहननस्य कोऽभिप्राय । प्रसिद्ध चैतद् वृत्रहननरूप कार्य-मन्यजातिष्वपि । आर्मीनियादेशस्य पुराणेषु वाहन (Vahagn) नाम लभ्यते तस्य कार्यम् अहिहन्ता (Dragon-slayer) इति शब्देन सूच्यते । अवेस्तायां च दासार्थे दाह (Daha) शब्दो वृत्रहन्नित्यर्थे च वरथ्रेगन इति नाम विजयाधिष्ठातृदेवस्य सज्ञात्वेन लभ्यते । सूर्यस्य सर्पहनन तु न समवति । अतोऽध्यात्मपक्षेऽस्य सगतिर्विधेया ।

अस्मिन् पक्षे त्विन्द्रस्तावदात्मा परमेश्वरश्च । 'इन्द्रो मायाभि पुरुरूप ईयते' इत्यादौ तु स परमेश्वर एव । तस्य त्रिविधार्थमभिलक्ष्य यास्केन स शब्दो निरुक्त —'इन्द्र इरा दृणातीति वा, इरा ददातीति वा, इरा दधातीति वा, इरा दारयत इति वा, इरा धारयत इति वा, इन्दवे द्रवत इति वा, इन्दौ रमत इति वा, इन्धे भूतानीति वा, तद् यदेन प्राणै समैन्धस्तदिन्द्रस्येन्द्रत्वमिति ह विज्ञायते । इद कारणादित्याग्रायण, इद दर्शनादित्यौ-पमन्यव, इन्दतेर्वैश्वर्यकर्मण, इन्दऽच्छत्रूणा दारयिता वा द्रावयिता वा आदरयिता वा च यज्वनाम् ।' (नि १०।१।९)

एतासु व्युत्पत्तिषु चेन्द्रशब्दस्यत्रिविधा अप्यर्था समायाता । ऐतरेयोपनि-षदि तु—'तस्मादिन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्र सन्तमिन्द्र इत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवा । (ऐ० आ० ४।३।१४) इति वाक्ये समस्तेष्विन्द्रियेषु बहि-र्मुखेषु सर्वमात्मान द्रष्टु प्राभवदितीद द्रष्टा सन् परोक्षवृत्त्येन्द्रोऽभवदिति प्रतिपादितम् । तेनात्मैव सिद्ध्यति ।

इन्द्रोऽन्तरिक्षलोकस्य देवता । 'यत्पिण्डे तद् ब्रह्माण्डे' इति मतेन शरीर एव मस्तकं तावद् द्यु स्थानम् । सर्वासा नाडीना तत्केन्द्रम् । इन्द्रियाणि देवा, तेषामात्मैव अधिपति । वीर्यं च सोम । योगिमतानुसारेण तत्र ब्रह्माण्डेऽधस्तादधोमुख कुण्ड वर्तते । ततोऽमृत स्यन्दते । आत्मा च तस्य पान करोति । तैत्तिरीयोपनिषद्यप्येतत्-सूचितम्—'स य एषोऽन्तर्हृदय आकाश तस्मिन्नय पुरुषो मनोमय । अमृतो हिरण्मय । अन्तरेण तालुके य एष स्तन इवावलम्बते सेन्द्रयोनि.'। (तै० उ० ६।१) एवमिन्द्रस्या-त्मत्वे सिद्धे न तावद्देवासुरसग्रामसिद्धि । अतएवोक्तम्—'अशत्रुरिन्द्र जज्ञिषे ।' अन्यत्र च मया—

नैतदस्ति यद्देवासुर यदिदमन्वाख्याने त्वदुद्यत इतिहासे त्वत् । ततो ह्येवैतान् प्रजापति पाप्मनाऽविध्यत्, ते तत एव पराभवन् इति । तस्मादेतद्दर्पिणाऽभ्यनुक्तम् ।

न त्व युयुत्से कतमच्च नाहनं तेऽमित्रो मघवन् कश्चनास्ति ।
माथेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रु न तु पुरायुयुत्से ॥
(श.११।१।६।१०)

एव च सर्वासामपि शङ्काना समाधानम् । अन्यत्रचोक्तम्—'वृत्रो वै पाप्मा ।' वृत्र पापमेव । अतो दुर्वृत्तय एवासुरा । सद्वृत्तयो देवा । तासा दुर्वृत्तीर्जेतु कृतमभियान वर्णित वीररसेन । तन्नात्मन शान्ति वृणोतीति शवरो मोह । सप्तरश्मय सप्त चैतन्यधारा, अहिराहन्ताऽविद्या-विकार । एव समाधान भवति ।

पर न सर्वथा प्राकृत ऐतिहासिको वा पक्षोऽसगत । मन्त्रा ह्यनेकार्थका । शतपथब्राह्मण एवोक्तम्—'मर्त्या हवै अग्रे देवा आसु ' एव मर्त्या एव देवभाव प्राप्ता आत्मानोऽत्र वर्णिता भवेयुरिति सभाव्यते । न च तदा वेदाना नित्यत्वक्षति । त्रिकालदर्शिना योगिनामिव नित्यज्ञानमयस्य वेदस्य पश्चाद्वृत्तिवत् प्रतिपादनसभवात् ।

पाश्चात्यविदुषा मतेनेन्द्रोऽयमार्याणा भारत आगमनात्पूर्वकालिको देव । प्रमाण चास्य पूर्वदर्शिता इन्द्रसमानार्थका शब्दा । अवेस्तायां च आन्द्र (Andra) शब्दस्तस्यैव परिवर्तित रूपम् । पर तत्र न स देवोऽपि तु दानव । अय च पश्चादार्याणां पारसीकाणा च प्रवृत्तस्य विरोधस्य परिणाम ।

पाश्चात्य जिमरमैन (Zimmermann) सज्ञो विद्वान् इन्द्रशब्दम् इन् धातुना इवि धातुना वा व्युत्पादयति । स्वामिदयानन्दश्चैश्वर्यार्थकादिदिधातोर्व्युत्पाद्य सूर्यवाचकमीश्वरवाचक चेम व्याचख्यौ । योगिराडरविन्दश्चेन्द्र प्राणशक्ते प्रतिनिधिं प्रज्ञाधिपतिं च न्यरूपयत् ।

—०—

वरुणः

वैदिकेषु देवेषु नितरा महद्गौरव भजन्नपि देवोऽयम् ऋग्वेदे द्वादशसु सूक्तेष्वेव स्तुत इति चित्रम् । अस्य स्वरूप साधु दर्शनीय स्पष्टतर च । स हस्तौ स्पन्दयति, रथ चालयति, इतस्ततो भ्रमति । स्वर्णमय कवच कञ्चुक वा परिदधाति '(बिभ्रद् द्रापि हिरण्मयम्) सहस्रदृगय दूरवर्तीन्यपि वस्तूनि साधु निभालयितु क्षम । अतएव सोऽन्तर्यामी, विश्वदर्शी भुवनाना चरितस्य द्रष्टा । वीरोऽधीश्वरश्चासौ क्षत्रश्री ।

"कदा क्षत्रश्रिय नरमा वरुण कामहे । मृडीकायोरुचक्षसम् (ऋ १ २५ ६)"
द्युलोके सहस्रद्वार तस्य भवन यत्र स्थित प्रजानामाचरितानि निरीक्षते ।
'सत्यानृतावपश्यन् प्रजानाम् ।'

अय सम्राट । नास्य कर्माणि कश्चिदपि भङ्क्तु समर्थ । कालकला सकला अपि जानाति । अतीतानागतवर्तमानानि प्राणिना कर्माणि वीक्षितु साध्वसौ समर्थ । शोभनकर्मा स ।

वेदमासो धृतव्रतो वरुण पस्त्यास्वा, साम्राज्याय सुक्रतु ।
अतो विश्वान्यद्भुता चिकित्वां अभि पश्यति । कृतानि या च कर्त्वा ॥
(ऋ १ २२ ११)

स यदा स्वसभाया सहस्रस्तम्भमय्या निषीदति, त परित सर्वे प्रणिधय तिष्ठन्ति । अत सर्वेषामपि कर्माणि साक्षात्करोति । नास्मात् कोऽप्यागस्कृदात्मान निह्नोतु समर्थ ।

निषसाद धृतव्रतो वरुण पस्त्यास्वा । साम्राज्याय सुक्रतु ॥
विभ्रद् द्रापि हिरण्मय वरुणो वस्तनिर्णिजम् । परि स्पशो निषेदिरे ॥
(ऋ १ २५ १३)

वरुणो द्वयो प्राणिनो रह सवादमपि श्रोतु समर्थ ।

यस्तिष्ठति चरति, यश्च वञ्चति यो निलाय चरति य प्रतङ्कम् ।
द्वो सनिषद्य यन्मन्त्रयेते राजा तद वेद वरुणस्तृतीय ॥
(अथ ४।१६)

वरुण खल्वृतस्याधिपती रक्षको नियन्ता च। ऋतस्यानेकार्थत्वेऽपि प्राय सत्यस्य पर्यायत्वेनेद गृह्णन्ति। पर नात्र तत् तात्पर्यम्। ऋत तावत्सृष्टे शाश्वतो नियमोऽनुशासन व्यवस्था च। डा० घाटे सज्ञो विद्वान् त त्रिधा निरूपयति—

1. Cosmic order The regular recurrence of natural Phenomena

2. Principles guiding and regulating the different aspects of sacrifice

3 The moral law which every rightious man must observe

तदुक्तदिशा व्यापारस्य शाश्वता नियमा यानाश्रित्य सूर्यचन्द्रादिग्रहमण्डल नक्षत्रमालाऽहोरात्र मासर्तुवत्सरचक्र च प्रवर्तते, यज्ञविधय, मानवस्याचारानुशासनानि, एतत्सर्वमभिव्याप्य शब्दस्यास्य प्रवृत्ति। वैदिकसिद्धान्तानुरोधेन ब्रह्माण्डस्योत्पत्तिरपि ऋतमूलैव। निरूपित चैतत् 'ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत इत्यादौ मन्त्र। तत्र सर्व प्रथममृतस्यैव वर्णनम्। तत्रावतंतर्षीणा महती निष्ठा। एव तावद्वरुणस्य महिमा गीत —

ऋतस्य हि शुरुध सन्ति पूर्वीऋंतस्य धीतिर्वृजिनानि हन्ति।
ऋतस्य श्लोको बधिरा ततर्द कर्णा बुधान शुचमान आयो॥

वरुण एवास्यतंस्य पालको रक्षक। अयमेवेन्द्रात्तस्य भिन्नो महिमा।

'वृत्राण्यन्य समिधेषु जिघ्नते व्रतान्यन्यो अभि रक्षते सदा।'

अतएव स प्राणिन सुपथे प्रवर्तयति। प्रार्थयत जन —

'स नो विश्वाहा सुक्रतुरादित्य सुपथा करत्। प्रण आयू पि तारिषत्।

मित्रेण सह स्तुति —वरुणस्य बहुधा मित्रेण सह स्तुतिर्वर्ण्यते। द्वावपि सामान्येन ऋतस्य पालको सत्यधर्माणौ च।

ऋतस्य गोपावधितिष्ठथो रथ सत्यधर्माणा परमे व्योमनि।
यमत्र मित्रावरुणावथो युव तस्मै वृष्टिर्मधुमत्पिन्वते दिव॥

एतौ वृष्टेरपि कारणभूताविति मन्त्रे प्रतिपादितम्। अन्यत्रापि—

'सम्राजावस्य भुवनस्य राजथ। 'वृष्टि वां राधो अमृत सभाजहे।' इति स्तुतम्। मित्रोऽपि वरुणवदेवासुर इत्युक्त। यथा—'मित्रेमिरर्भं रुपतिष्ठथो स्व या वर्षथयो असुरस्य मायया।

शुन शेपो वसिष्ठश्चास्य प्रमुखो स्तोतारो। तत्र ब्राह्मणेषु वसिष्ठ प्राण इति प्रतिपादितम्। वरुणो द्यु स्थानीयो देव आदित्यश्चोक्त। अत प्राण शुन शेपो वा कर्म बद्धो जीव· तापत्रयेण, ऋणत्रयेण वा पाशेन बद्ध आत्मनो मुक्तये वरुण प्रार्थयत इत्यपि विद्वद्भिर्वर्ण्यते। यथा—

'उदुत्तम मुमुग्धि नो वि पाश मध्यम चृत। अवाधमानि जीवसे।'

अथर्ववेदे तस्य पृश्निर्गोर्वर्णिता सा सबला च। तस्या वर्णनमृग्वेदेऽपि काम न नामत। यथा—

या गौर्वर्तनि पर्येति निष्कृत पथो दुहाना व्रतनीरवारत।
सा प्रबुवाणा वरुणाय दाशुषे देवेभ्यो दाशद्धविषा विवस्वते॥

(ऋ. १०।६५)

सा गौ प्रकृति खलु। प्रकृतिर्हि लोहितशुक्लकृष्णाऽजारूपेण वर्णिता।

'अजामेका लोहितशुक्लकृष्णा बह्वी प्रजाः सृजमाना समन्तात्।'

(श्वेता० उ० ।४।५)

एषा गौर्व्रताना नेत्री दिव्यकर्मभ्य एव स्व पय प्रयच्छति। अथर्ववेदस्य पञ्चमकाण्डस्यैकादशे सूक्ते ऽथर्वणा सह वरुणस्य सवादे वर्णित यदृतस्य पालक एवैना गा भोक्तुमर्हति य साधिकार प्रतिजानीयात्—

सत्यमह गभीर काव्येन सत्य जातेनास्मि जातवेदा.।
न मे दासो नार्यो महित्वा व्रत मीमाय यदह धरिष्ये॥

(अथ ५।११)

स्वरूपम्—वरुणस्य किं तावत्स्वरूपमित्यत्रापि नैक मतम्। द्यु स्थानीयोऽय वरुण सूर्यस्यैकोपाधिभेद उच्यत इत्यपि मतम्, 'उद्यन्त्सूर्य सविताऽस्त गच्छश्च वरुण इत्युच्यते' इति सायण। आदित्य इत्यपि तस्य सज्ञा। सूर्यस्तस्य नेत्रत्वेनोक्त। तदाऽसौ सर्वेषा कर्मसाक्षितया सूर्यस्य प्रतिनिधिरित्युच्यते, पर केचिदेन रात्र्या देवमपरे तु चन्द्रमस प्रतिनिधि वर्णयन्ति। मित्रस्य सूर्य प्रतिनिधित्वे पश्चाच्च तत्पर्यायता यातेऽपि न वरुणस्य चन्द्रप्रातिनिध्य सभवतिप्रतिपादित-धर्मबैभिद्यात्।

यास्कस्तु सर्वस्यावरकत्वेन नभ एव वरुण प्रतिपादयति। अत्र बहि साक्ष्य-मपि साक्षि भूतम्। जिमरमैन (Zimmermann) सज्ञ पाश्चात्यो विद्वान् वृधातोरा-च्छादनार्थात् साधयन् तमावरक स्वीकुवन् द्यावमेव वरुण प्रतिपादयति। तस्य मतेन नक्षत्रमण्डित नील नभ एव वरुण। अस्य बहुधा समुद्रत्वेन वर्णनादपि जलाधिपत्व

सागरनिवासश्च प्रसिद्ध स्यादिति सभाव्यते । गीतायामपि 'वरुणो यादसामहम्' इति भगवतोक्तम् । ग्रीसदेशे च आच्छादकार्थको यूरेनस् शब्द ओरोनेस इति वाऽऽवरक (Encompasser) नभ एवोच्यते पर द्याव (Zeus) तस्य च नैकत्वम् ।

अवेस्तायामयमेव वरुण 'अहुरमज्दा' इति सज्ञया लभ्यते । असुरस्यैव विकृत रूपम् 'अहुर' इति । मित्रश्च तत्र 'मिथ्र' इति रूपेण परिचीयते ।

शामेण्यदेश्य ओल्डनवर्गनामा विद्वास्तु कथयति—आर्यैर्वरुण आदित्यश्च सेमेटिकजातीयेभ्यो बाबलूनदेश्येभ्यो गृहीताविति । पर नार्यास्तादृशा विचारहीना अभूवन् । तेषा यादृशी तावदृतस्य भावना लभ्यते, तदधिपते वरुणस्य स्वरूपमपि भावयितु तेऽकल्पन्त । न तेषु देशेषु तादृश्युदात्तता वरुणस्य दृश्यते । न साधारण वस्तु ग्रहीतुमार्या परेषामधमर्णता गच्छेयु ।

योगरविन्दस्तु वरुण सत्त्वमय सच्चिदानन्दगतसदृशस्य विशुद्धस्य बृहतो लोकस्य प्रतीक निरूपयति । पश्चाद्वर्तिनि साहित्ये नास्य प्रतिष्ठा । तत्रायमष्टसु लोकपालेष्वन्यतम पश्चिमाधिपतिर्जलाधिष्ठाता च ।

अश्विनौ

द्युस्थानीयेषु, नहि नहि सर्वेष्वपि तावदिन्द्राग्निसोमव्यतिरिक्तेषु देवेषु सूक्ताधिक्येनाश्विनावेव महत्त्व भजत । पञ्चाशदधिकेषु सूक्तेषु तयोर्महिमा गीयते । लोकवद् वेदेऽपि तौ देवाना भिषजौ । यथा चोक्तमाथर्वणे—

'प्रत्यौहतामश्विना मृत्युमस्मद् देवानामाने भिषजा शचीभिः ।'

(अ० वे० ७।५३।१)

तौ खलु महता कर्मणामनुष्ठातृतया दस्रौ, एदा युवानौ, मधुमन्तौ चोच्येते । तयो रथोऽपि मधुमान् । उपकर्तृतयाऽतितमा परिचिततरौ जनस्य । तौ नरा, निचेतारा, मयोभुवा, मृडयत्तमा, अरेपसा, सुदानू, मघवाना इत्यादिभिर्नामभिर्वर्ण्येते । नासत्याविति तयोर्यथार्था सज्ञा न असत्यौ नासत्यौ नासाभवौ वेति तयो. स्वरूपमाध्यात्मिकमिति साध्नोति ।

तौ कर्मणा नेतारौ (नरौ) दर्शनीयाकारौ (दस्रौ) चैतन्याधायकौ (निचेतारा) पापरहितौ (अरेपसा) सर्वस्य सुखाय भवन्तौ (मयोभुवा) । तेषा रथ, अश्वा तन्नोदयित्री कशा च सर्वमपि मधुमत् । 'या वा कशा मधुमती', तौ नियमेन कर्मसूपतिष्ठमानौ तेषा वर्धयितारौ (ऋतावृधौ) । तौ कुशलौ शिल्पिनावपि, अश्वस्य खुरात्कुम्भान् शत सुराया असिञ्चताम् (कारू) । तयो कर्माणि विचित्राणि प्रशस्यानि च । साह्यार्थमाहूतावेव तौ शत्रुपरिवृतस्य विमदस्य भार्यां तद्गृह प्रापयताम् । तुग्रपुत्र भुज्युं सागरादरक्षताम् । तेषा नौ शतारित्रवाहिनी जले नभसि चाविहतगमना, रथश्च तयोर्महान् यत्र चक्राणा शतम् । पेदवे राज्ञे च श्वेतमश्वमयच्छताम् । आङ्गिरस कक्षीवन्त सुबुद्धि व्यधत्ताम् । अग्नितप्ते भ्राष्ट्रे क्षिप्तमग्नि विमोच्य तस्मै पुष्टिमदन्न प्रायच्छताम् । गोतमस्य पानाय कूपमेवोर्ध्वमूलमकुरुताम् । च्यवान ऋषिं च युवानमकल्पयताम् । क्लीबपत्नीवध्रिमती हिरण्यहस्तेन पुत्रेणायोजयताम् शर्यावृद्धामपि गां सदुघा कृण्वन्तौ । वृकाद् वर्तिकामोक्ष, ऋज्राश्वस्य सचक्षुष्कीकरण, जाहुषस्य मोक्षश्च तयो पुरुषार्थस्य निदानम्, "सग्रामे विश्पलायाश्छिन्ना जघा लौहमय्या जघया प्रत्यधत्ताम् । दिवोदासस्य यज्ञ गच्छतोस्तयो रथे वृषभ शिशुमारश्चायुज्येताम् ।

इत्यमनेका पुराणकथास्तयोर्विषये। प्रतियोगितायां 'सूर्यस्य दुहितर विजितवन्ताविनि चाख्यायते। दधीच शिरस्थानेऽश्वशिर सयोज्य तेन मधुविद्या श्रुत्वा पश्चात् तदीय शिरो योजयामासतुरित्यपि कथा। तत्को तावश्विनावित्यपि विचार्यते।

प्रथम यास्कस्य मतम्—'यद् व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषाऽन्य। अश्वं-रश्विनाविति यौर्णवाभ।' रसेन व्याप्नुतो ज्योतिषाचेति व्युत्पत्त्या प्राकृतयक्तिभेदावेवेति सिद्ध्यति परमौर्णवाभव्युत्पत्त्यातु देवान्तरवत् पुरुषाकारौ। पुनरनया शङ्कया विवशीकृतो यास्को मतभेद प्रदर्शयति। "द्यावापृथिव्यावित्येके, सूर्याचन्द्रमसाविति-येके, राजानौ पुण्यकृताविति नैतिहासिका। तयो काल ऊर्ध्वमर्धरात्रा प्रकाशीभावस्यानुविष्ट-म्ममनु, तमोभागो हि मध्यम, ज्योतिर्भाग आदित्य।' इति।

द्युस्थानीमावेतौ देवाविति च निश्चितम्। आधुनिका बुधास्तु तौ प्रातर्देशीयौ नक्षत्रविशेषावेव निर्णयत। देशान्तरेषु तुल्या पुराणकथाऽप्येतेन मतेन सवदते। जिमरमैन (Zimmer man) महोदय एतौ लातिकदेवस्य (Lettic god) पुत्रौ परिचिनोति। अश्विनाविति शब्देन च केवलमश्ववत्त्व तयोर्बुध्यते। एवमेवर्शसिद्धिस्तस्य देवभेदस्य पुत्रयो, 'दिवो नपाता, इति विशेषण लातिक देवस्य (Lettic) Dewa Deli इत्यस्य तथा लिथुआनिआदेशयस्य (Lithuanian) Dewo Surelei इति शब्दस्य चानुवाद इव। सूर्या वरण कथा च तत्रत्या Saules Meita सम्बन्धिनी कथा स्मारयति।

पुनश्च ग्रीकदेशस्य पुराण कथाया वर्णितौ द्याव (Zeus) पुत्रौ Dioskouroi यौ लातिन भाषाया (Latin) Caster and Pollux कास्तर एव पौलक्स इति ख्यातौ तयोर्भगिनी (Helena) हेलेना चाश्विनौ सूर्यायाच समकक्षता भजन्ते। यतस्तेषा स्वभावोऽपि नासत्ययोरिव वर्णित। लातिकदेवस्य पुत्रौ ग्रीस्यौ Diospouroi अथवा Diosseours सज्ञौ प्रकाशदेवत्वेन वर्णितौ, अश्विनौ यद्यपि सहैवोच्येते, अतो न तौ प्रभातस्य सन्ध्यायाश्च नक्षत्रविशेषाविति पार्थक्येन वक्तु शक्येते। लातिकदेश्यगीतेषु च सूर्यस्य सान्ध्येयतारात्यागपूर्वक प्रभाततारोद्वाह वर्णन गीयते, येनाश्विनौ सूर्यावरणकथा कियदपि साम्य भजति। तेनैतयोर्भारोपीय-कालता सिद्ध्यति।

पर नक्षत्र विशेषत्वे तयो कथाना किं समाधानम्? अत्र धाटे महोदयौ द्वे समाधाने पुरस्करोति १—निशान्ते सूर्योदयस्य वसन्ते दिनकरस्य चण्डता च रूपकेन वर्णिता। इद मत Dawn and Spring Theory-इत्युच्यते। २—उत्तर ध्रुव प्रदेशे दीर्घाहोरात्रयो कर्षंच रेभान्निप्रभृतिभिर्नामभिर्वर्ण्यते। जले निलीयमान एव सूर्यो रेभ। पर कालनिर्देशेन नाम्यां सन्तोष।

आध्यात्मिकदृष्ट्या तु वयोऽन्नमयेव परिणमति । प्राणश्चापानश्चेति देवावश्विनौ व्यापन शीलौ हि तौ । 'यत्पिण्डे तद् ब्रह्माण्डे' इत्युक्तेर्मूर्धभाग एव द्युस्थानम् । तयोर्नित्यमेव सायुज्यम् । एतच्च निम्नमन्त्रे प्रतिपादित भवति—

सक्रामता मा जहीतं शरीर प्राणापानौ ते सयुजाविह स्ताम् ।
शत जीव शरदो वर्धमानोऽग्निष्टे गोपा अधिपा वशिष्ठः ॥ (अथ ७।५३।२)

प्राणापानौ नासासचारिणाविति नासत्यौ, तावेव नाडीशुद्धया निर्विकारता शरीरस्य समाचरत, अनेन विनैव कष्ट रोगाणामपाकरण भवतीति प्राणविद्या देवी चिकित्सापद्धति । तनावस्थिषु नाडीषु च व्याप्त रसरूपं वाजो भवति रेत । तदेव सोम । शरीरस्य प्राणशक्तिश्च वार्धक्ये क्रमात्क्षीयते । च्यवनशीलत्वात्तस्या एव च्यवनत्वम् । प्राणापानयोर्बलेन सा वर्धिष्णु सजायते । इदमेव च्यवनस्यतरुणीकरणम् । रेतसो रक्षैवाश्विनो सोमपानम् । इत्थ सूक्ष्मतरोऽयमाध्यात्मिक पन्था अश्विनो स्वरूपनिर्धारणे ।

पुनर्जन्म-वादः

(लेखक :—श्री अमरनाथशास्त्री, व्याकरणाचार्यः, विश्वेश्वरानन्द-वैदिक-शोधसंस्थानम्, होश्यारपुरम्)

'कोऽहं कस्त्वं कुत आयातः' इति जातमात्रस्य चिकित्स्या नाम विचिकित्सा, भारतेऽस्तमितप्रायान् लौकायतिकान्, देशविदेशेषु मुहम्मदमतानुयायिन ईसामन्तव्याभिनन्दिनश्चान्तरेणाऽयं जीवनप्रश्नोऽद्यापि मानवमात्रस्य समाधानमपेक्षते। आस्तिकाश्चावकेतरा नास्तिकाश्चजन्मप्रश्नमिममेव समाधित्सवः पुरुषायुषसहस्रं क्षपितवन्तः। दर्शनशास्त्राण्यपि तदीयानि नैकधाव्याख्यानैरुपवर्णनैश्च विषयमेतमवदातवन्ति। अध्यात्मजडाना कापायवाससां रथ्यारजस्सु सन्ततमाहिण्डमानाना विमानानां प्रत्यक्षसर्वभक्षाणा भिक्षुकलक्ष्मणा तु जीवनसर्वस्वं नामैष प्रश्नः। इममेव प्रश्नं कर्णशष्कुलीषु प्रसह्य भारतीमानामास्तिकानां श्रावयन्तो मत्सरा इव जीवितव्यमात्सर्यमाचरन्ति ते। दुरूहो दुरवगमश्चायं सर्वस्य प्रश्नचिह्नाकलितो यथार्थः प्रश्नः।

"पुनरुत्पत्तिः प्रेत्यभावः" प्रेत्य मृत्वा भावः पुनर्जन्मैव पुनरुत्पत्तिलक्षणं महर्षिर्गौतमो व्याचष्ट। जीवमात्रं स्वीयैः सदसत्कर्मविपाकाशयैरुच्चावचेषु शुभाशुभयोनिष्वावर्तत इति तद्रहस्यम्। एष जीवात्माऽजरामरधर्मा परमात्मस्वरूपोऽरूपः सन्नप्यविद्यायामन्तरे वर्तमान. स्वयंधीरः पण्डितम्मन्यमानः स्वीयैरेव प्रमादैः पुनःपुनर्जायते च म्रियते च, ज्ञातास्वादश्च गरलितेष्वपि विषयफणिषु सुखं रमते न च तेभ्यो जुगुप्सते कदाचिदिति।

भारते चारुवचसा चार्वाकानामेष स्वपोषं पुष्टो विश्वासः—

"यावज्जीवेत् सुखं जीवेद् ऋणं कृत्वा घृतं पिबेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥"

अपि च—*न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः।*.....

नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः॥
अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्।
बुद्धिपौरुषहीनानां जीविका धातुनिर्मिता॥ इत्यादि।

नायमात्मा पारलौकिक, कर्मफलानुशयं परात्परेषु लोकेषु सुखदुःखाभिपङ्क्ता, स्वर्गापवर्गकल्पना बुद्धिपौरुषशून्याना जीविकाहेतु, वर्णाश्रमादिकल्पना बुद्धिजीविना कपोलकल्पितो वागाडम्बर । तस्माद् यथाशक्ति सकलितसुखसभारैश्चिरायुष्मताऽसुमता वसुमता भवितव्यम्, वित्ताऽभावेऽमर्यादितव्ययाद् वित्तक्षये वा ऋण कृत्वाऽपि घृतमवश्यपेयम्। 'आयुर्वै घृतम्' इति दीर्घायुष्यजीवातुभूतस्य घृतस्याधिकाधिकपानमेव परम पुरुषार्थ । अन्यथाऽकालमृत्युना भस्मीभूतस्य शरीरस्य पुनरागमन प्रेत्यभाव सुदुर्लभ इति। यथा किण्वादिद्रव्यै समिश्रितैर्मदिराऽनायास सपद्यते, कर्पूरादिसुगन्धिद्रव्यै समवेतैरमृतधारा निष्पद्यते, एवमेव पृथ्वी जल वायु-वह्नि-समाख्यै समवेतैश्चतुर्भिर्भूतैश्चैतन्य स्वमुपपद्यते, देहनाशे च चत्वार्यपि भूतानि स्वस्वभावेषु विलीयन्ते, कारणनाशात् कार्यस्य चैतन्यस्यापि सर्वथा लोप इति ।

'अग्निरुष्णो जल शीत शीतस्पर्शस्तथाऽनिल । केनेद चित्रित तस्मात् स्वभावात् तद्व्यवस्थिति ॥" इत्युक्तचराभिर्ग्राम्याभिर्वाचोयुक्तिभिरपि नाद्यापि चार्वाका जातमात्रस्य शिशो स्तन्यपाने स्वत प्रवृत्ति (प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात्' इतिन्यायदर्शनसूत्रमत्र परामृश्यम्) उत्पन्नमात्रस्य वानरशिशोराधारशाखावलम्ब, सजन्मनां सोदर्याणाम् अन्यतरस्य राज्याभिषेक इतरस्य च 'न बन्धुमध्ये धनहीनजीवनम्', अश्वत्थवृक्षस्यापामरेण सपर्या, अर्कवृक्षस्य च पूर्वपत्रेऽपि सशय, एक खलु घोरितकैर्गतिचापल्ये स्वार्जिते प्राज्ये राज्येश्च सर्वजनाभिनन्दित सहस्राधिकदीनारमूल्य सन्नश्व, अपर सजातीय कुलिशकठोरकशाप्रहारै प्रतिशिर निगलितशोणितधाराप्रवाहैर्मृतप्राय कदश्व इति जीवमात्रस्य जीवने प्रत्यक्षमक्षिलक्ष्यीक्रियमाणस्योत्तराधर्यस्य सन्तोषावहमुत्तर पुरस्कर्तुं न क्षमन्ते। 'समानमीहमानाना केचिदर्थैर्युज्यन्तेऽपरे न' इति व्याकरणमहाभाष्यप्रणेतुर्वचो नाऽवितथम्। इति प्रत्यक्षाभिलाषास्त प्रत्यक्ष मक्षिका असन्तोऽपि निपतन्त इव सतामसीमास्था खलु। अन्ये विधर्माण ईसानुयाया मोहम्मदाराधकाश्च मरणादूर्ध्वं त्रिमेखलेषु, सति वैभवे पर्वेष्टकचितेषु, अन्यथा मृच्चयेषु नामग्रामुत्कीर्णशीर्षण्येषु स्थण्डिलेषु कब्राभिधेषु स्वप्रमाणगर्तेषु निखाता आकयामतात् (महाप्रलयात्) खुदाबन्दकरीमस्य (स्वयभुव परमात्मन) स्वस्वकर्मानुसारिण बहिश्त (स्वर्गम्) दोजख (नरकम्) वा निश्चेतव्य शयाना प्रतीक्षन्ते। तत ऊर्ध्वमेव तद्गति । स्वर्ग-नरकौ तेषामपि समतौ। अनुक्षण व्यवहारे किस्मत मुकद्दराभिध दैवमभिक्रोशता पुनर्जन्मापि विश्वासभूमिरिति निश्चप्रचम्। दुश्चरितप्रायश्चित्तस्वरूप 'तोबा'कार मुल्ला मिश्नरीमाध्यमेन कुर्वन्नोऽपि सुखदुःखाकार सुकृतदुष्कृतकर्मविपाकफलीभूत प्रतिक्षणमूरीकुर्वाणा अपि ते यद्यन्धश्रद्धाभिभूता पुनर्जन्मसिद्धान्तात् जुगुप्सन्ते तर्हि वचनीया नाम खलु ते, नहि तत्र सचेतसा किमपि चिन्तनीय, सन्देह-

दोलान्दोलितचेतसा विचेतसामाग्रहग्रहिलाना विश्वासशैथिल्याय नहि भूमण्डले प्रभावुकमौषधम् । तस्मात्स्वान्त सुखाय पुनर्जन्मप्रत्ययात्तचेतसा सचेतसा सिद्धान्त एष सुनिपुण परीक्ष्य । वृहदारण्यकोपनिषदि वाजसनेयिन आमनन्ति—'त विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च (वृ उ ४ ४ २) इति । इदमेव तथ्य सरलया भाषयाऽऽचार्यो विष्णुमित्र पञ्चतन्त्रे प्राबध्नात् 'आयु कर्म च वित्त च विद्या निधनमेव च । पञ्चैतानि च सृज्यन्ते गर्भस्थस्यैव देहिन ।' इति

पातञ्जल योगदर्शनमपि नूनमनुभूतस्वरसमिव प्रकृत सिद्धान्त 'सति मूले तद्विपाको जात्यायुर्भोगा,' 'क्लेशमूल कर्माशयो दृष्टादृष्टजन्मवेदनीय, इत्येवकार सूत्रैरनवद्यं ग्रंथ्नाति । यथा मूलस्यैव शाखापत्रादीनि भवन्ति, न निर्मूलस्यैव जातौ केचन ब्राह्मणीगर्भाज्जनिमासादयन्त इतरेषा श्रद्धाभाजनानि भवन्त्यपरे न, आयुषि केचिच्चिरायुष इतरे स्वल्पायुष, भोगेषु सुखदु खात्मकेषु च प्रत्यक्षीक्रियमाणमौत्तराधर्य, जन्मान्तरार्जितदैवानुविद्ध एव विपाक कर्मविपाक कर्मफलमिति तदाशय ।

प्रेत्यभाव पुनर्जन्म मरणसमनन्तरमेव तत्क्षण जीव प्रतिपद्यते, आहोस्वित् कालक्रमादित्यत्र विदुषा भूयो विमर्श । अत्र ब्रूम —यथा भुक्तपरिणामोऽन्नरसस्त्रैध शरीरे विपरिणमत, १—अतिसूक्ष्मोऽशो मन , २—सूक्ष्मोऽशो मासम्, ३—स्थूलश्चांश पुरीषभावेन नि सरति । अत एव 'यादृश भक्षयेदन्न तादृशी जायते मति ' इति चरितार्थं वच । यथा पीतस्य जलस्य स्थूलोऽशो मूत्रम्, सूक्ष्म शोणितम्, अतिसूक्ष्मश्च प्राणरूप सद् विपरिणमत, घृतादि क्रमशोऽस्थि, मज्जा, वाक् च सम्पद्यते । उक्त च—'अन्नमशित त्रेधा विधीयते, तस्य य स्थविष्ठो धातुस्तत्पुरीष भवति, यो मध्यमस्तन्मास योऽणिष्ठस्तन्मन । आप पीतास्त्रेधा विधीयन्ते, तासा य स्थविष्ठो धातुस्तन्मूत्र भवति, यो मध्यमस्तल्लोहित, योऽणिष्ठ स प्राण । तेजोऽशित त्रिधा विधीयते, तस्य य स्थविष्ठो धातुस्तदस्थि भवति, यो मध्यम स मज्जा, योऽणिष्ठ सा वाक् ।"

(छा० उ० ६-५-१-३)

तथैव कृतस्य कर्मण सुचरितस्य दुष्कृतस्य वा त्रिधा परिणाम । अत्युग्रस्य विहितस्य सुकृतस्येहैव जन्मनि जानपदीषु ख्यातिरूप पदवृद्धिराजसम्मानलक्षण, स्थूलस्य च चन्द्रतारकादिलोकावाप्तिलक्षण स्वर्गरूप, अतिसूक्ष्मस्य च सुखपरिणामिजात्यायुर्भोगलक्षण पुनर्जन्मेति । 'प्राप्य पुण्यकृतांल्लोकानुषित्वा शाश्वती समा । शुचीना श्रीमता गेहे योगभ्रष्टोऽभिजायते,' इति भगवद्वचनमत्रोपोद्वलकम् । एवमेवात्युत्कटस्य पापकर्मण स्थूलो भोग इहैव जन्मनि राजदण्डादिलक्षणो मनुष्यमात्रस्य

तन्मरणं यन्मरण सोऽस्य विधाम'। इति चातिमरणं, सूक्ष्मो भोगो रौरवादिनरक-लक्षण, अतिसूक्ष्मश्च दुर्दशापन्नजात्यायुर्भोगलक्षण । अथर्ववेद इदमेव तत्त्वमाह वेद-पुरुष'—'प्रथमेन प्रमारेण मेधा विष्वङ् विगच्छति। अद एकेन गच्छत्यद एकेन गच्छ-तीहैकेन निषेवते' इति, पुण्यकर्मणाऽद स्वर्गलोक, पापेन कर्मणाऽदो विप्रकृष्ट नरकलोकं, पापपुण्येन मिश्रितेन कर्मणा चेहैव लोक निषेवत इति तत्र सायणभाष्यम्।

अत एव विष्णुमित्रस्य 'त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभि पक्षैस्त्रिभिर्दिनै । अत्युत्कटै पापपुण्यैरिहैव फलमश्नुते'इति चरितार्था भवति साध्वी वाचोयुक्ति । "तद्य इह रमणीय-चरणा अभ्याशो ह यत्ते रमणीया योनिमापद्येरन् ब्राह्मणयोनि वा क्षत्रिययोनि वा वैश्ययोनि वा। अथ य इह कपूयचरणा अभ्याशो ह यत्त कपूया योनिमापद्येरन् श्वयोनि वा शूकरयोनि वा चाण्डालयोनि वा।" इति छान्दोग्योपनिषत् (५, १०, ७) अस्मत्प्रतिपाद्यमेवार्थं विशकलयति।

'वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥'

इति भगवतोऽवदात वचोऽपि केचिदन्यथा पश्यन्ति । जीर्णवाससामिव पूर्व-देहस्य परिहाण, नवीनवाससामिव च तत्क्षणाज्जन्मान्तरस्य परिग्रह इति गीताभि-संधिरिति तदाशय । पर 'जीवितस्य कवेराशयो न वर्णनीय' इति त्रिदुषा समय । यदि स्वीय काव्य व्याख्यातुं कवि स्वयप्रभु, तर्हि तदनुवादार्थमन्यो वक्ता नापेक्ष्यो भवति, द्वितीयेऽध्याये गीतायामुक्तमेवेममभिप्राय पोषयत् षष्ठेऽध्याये 'प्राप्य पुण्यकृतांल्लोका-नुषित्वा शाश्वती समा ।' इत्यनवद्य पद्य स्वत उपोद्वलक देहत्यागानन्तर तत्क्षणा-देव श्रीमता गेहे पुण्यकृतामपि जन्म न भवति प्रत्युत पुण्यलोकेषु शाश्वती समा उषित्वैव पुनर्जन्मेति तथ्यस्य। नवमेऽध्याये च 'ते त भुक्त्वा स्वर्गलोक विशाल क्षीणे पुण्ये मर्त्य-लोक विशन्ति' इतीद वचनमुक्तस्यैवाभिसंधेर्दार्ढ्यार्थं द्विर्बद्धं सुबद्धमिव सपादयति। अतो जीर्णवस्त्राणा परित्यागेऽभिनववाससा च परिधाने नैरन्तर्यं न भगवत समीहित, मध्ये यथापेक्षं भोगान् भुक्त्वैव तु पुनर्जन्मेत्यय सृष्टे सामान्यो नियम । अघटितघटना-घटनपटीयस्या प्रकृतेरतर्कितोपनताना विलसिताना न ब्रूम । तत्र सर्वं सभाव्यते नैरन्तर्येणापि साक्षात् पुनर्जन्म प्रतिपत्तुमर्हम्। पर सोऽयवादो न विधि ।

वस्तुतो जलौकान्यायेन जीवस्य क्रमशो जन्मान्तरसक्रम । तद् यथा 'तृण-जलायुका तृणस्यान्त गत्वाऽन्यमाक्रममाक्रम्यात्मानमुपसंहरति' (बृ उ. ४, ४, ३) तथैव जीव क्रमिकमेव पुनर्जन्माऽऽदत्ते, पुनर्जन्म च कर्मायत्तम्। कर्मापि प्राधान्येन त्रिविधम। सचित, प्रारब्ध क्रियमाण चेति । यद्यद्भोगो यानि कर्माणि कुरुते तत्तत्कर्मानुरूपं

तानि क्रियमाणानि, तेष्वत्युत्कटेषु सद्य इहैव सुखदु खादिलाभ, अन्यथा दैवनिष्पत्ति' । 'पूर्वजन्मकृत कर्म तद् दैवमिति कथ्यते ।' प्रारब्धैः कर्मभिरेव मानवादिशरीरलाभ । सचितान्येव कर्माणि भवतु प्रारब्धानि कर्माणीति विविच्यन्ते । एकेनैव जन्मना कर्मणा समेषा नोपभोग इति परिशिष्टानि सचितानि भवन्ति जीवम् आ महाप्रलयात् तदूर्ध्वमपि चानन्तपार योनिसहस्रेषु सततमावर्तयन्ति । अस्य जन्ममरणावर्तस्या-ऽविद्याजनितस्य यथार्थमौषधं प्रत्यगात्मसंविद विदन्ति तद्विद । विद्ययाऽविद्याया भिद्यमानाया शनै शनै सचितकर्मक्षयाज्जीवन्मुक्त सपद्यते जीव, 'ज्ञानाग्निदग्ध-कर्माण तमाहु पण्डित बुधा ।' भूयो न स आवर्तते न स आवर्तते । यद् गत्वा न निवर्तन्ते तद्धाम परममेप्यता जीवन्मुक्तानां, पुनर्जन्मचक्रावर्तिना च भिन्ने द्वे सरणी । "द्वे सृती अश्रृणव पितृणामह देवानामुत मर्त्यानाम्" (यजु १९, ४७) "शुक्लकृष्णे गती ह्येते जगत शाश्वते मते । एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुन ।" इति गीतावचनेन शुक्लकृष्णतया तयो स्वरूपमपि प्रतिपादितम् । ज्योतिर्वर्त्मना प्रयियासता शुक्ला सृति, धूमवर्त्मना यियासता च कृष्णा सरणि । जीवन्मुक्ता हि क्षीणजरामरण-कल्मषा अन्तर्बहिर्ज्योतिर्मया, 'अग्निर्ज्योतिरह शुक्ल षण्मासा उत्तरायणम्' इत्यमुना वर्त्मना ब्रह्मणि लीयन्ते न च पुनरावर्तन्ते । 'पृथिव्या अन्तरिक्षम्, अन्तरिक्षाद् दिवम्, दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम्' (यजु १७, ६७ द्रष्टव्यम्) इत्येष पन्था वितती देवयान । अन्ये च य इमे इष्टापूर्ते दान चोपासते ते धूमाद् रात्रि कृष्ण-पक्ष षण्मासान् दक्षिणायन पितृलोकमाकाशमिति वर्त्मना चान्द्रमस लोकमभि प्रपद्यन्ते, तत्र सुकृतानि भुक्त्वा, आकाशाद् वायु धूममभ्र व्रीहियवादिक क्रमश प्रतिपन्ना रेतो भूत्वा गर्भं प्रतिपद्यन्ते (छां उ ५, १०, ३-६ द्रष्टव्या) । इतीमे द्वे एव सृती पितृणा देवानामपि च मर्त्यानाम् । अय पुनर्जन्मसिद्धान्तो भारतीयानां साक्षात्कृतधर्ममर्मणा महर्षीणा स्वार्जितान्तरज्ञानोपज्ञात । भारतीयसस्कृतिसौरभ-स्रोतसेवाय विश्वजनीन सपन्न इति वस्तुतत्त्वम् ।

अद्य पाश्चात्यदेशेष्वपि मेस्मरेज्मिवर्त्मना प्रेतैर्बन्धवै सह सम्पर्कं स्थाप-यन्त स्वर्गनरकादिवास च पुनर्जन्म च तेषा जिज्ञासन्तेऽध्यात्मश्रवणा जना । उप्त बीजमङ्कुरित यथा पुनर्नवता विधत्ते, तथा कृतानि कर्माणि जन्मान्तराङ्कुरितानि नवनवपुनर्जन्मसमुन्मेष नून कुर्वन्ति । भुक्त्वैव च क्षीयन्ते नाऽभुक्तानि । 'नाभुक्त क्षीयते कर्म कल्पकोटिशतैरपि' इति ध्रुवम् ।

तस्मात्पुनर्जन्मचक्रावर्ताद् अत्यन्तमोक्षायाऽऽचार्यैस्यैप उपदेश सतत परिशीलनीय —'यान्यस्माक सुचरितानि तानि त्वयोपास्यानि नो इतराणि' इति । 'अनेकजन्मसंसिद्धस्ततो याति परा गतिम्' इति गीतावचनामृत चानुपयम् ।

कालचक्रम् संस्कृतसाहित्ये तत्स्वरूपं च

कालस्यानन्तो महिमा जेगीयते जगति विश्वस्य स्थितिरपि यमाश्रिता। अनेन कालेनैव संसारोऽयं संसारः। प्राणिनां जीवनचक्रस्य गतिरेनमाश्रयति। पलमुहूर्तंघटीहोरादिभिरनन्तपरिमाणात्मकोऽयं नियन्ता जगद्-व्यापारस्य। अयमेव कलयति श्वासप्रश्वासानु जन्म-मृत्यु-मध्ये पातिनो येनासुमतां स्थितिः परिच्छिद्यते। ब्रह्मणः कीटावधि सकला अपि दिव्या अदिव्या; मर्त्या अमर्त्या, चेतना अचेतनाः, अणवः स्थूलाः, लघवो महान्तः, किं बहुना यदपि दृश्यमदृश्यं वा किमपि चराचरात्मकं भूतजातं जगति निभाल्यते, अनुमीयते, उपमानादिना प्रमीयते, शब्द-प्रमाणेनापि वाऽधिगम्यते, निखिलमपि तत् कालवशगम्। तस्य महिमानं युधिष्ठिर एवमुद्घोषयति—

अस्मिन् महामोहमये कटाहे, सूर्याग्निना रात्रिदिवेन्धनेन।
मासर्तुदर्वीपरिघट्टनेन भूतानि कालः पचतीति वार्ता॥

(महा० वनपर्व)

कालः कस्मात्? कलयति कालयति वा सर्वेषामपि जीवाना क्षणादिकं सृष्टिव्यापारं चेति व्युत्पत्तेः कल गतिसंख्यानयोरिति धातोः। गीतायां चायमेवार्थः—'कालः कलयतामहम्।' (गी० १०।३०) इति-वादिना कृष्णेन पिशुनितः।

सृष्टेरारम्भ एव वेदेष्वस्योत्पत्तिः संवत्सरात्मकतया सूचितैव—

"ऋतञ्च सत्यञ्चाभीद्धातपसोऽध्यजायत, ततो रात्र्यजायत ततः समुद्रो अर्णवः। समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद् विश्वस्य मिषतो वशी। सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवी चान्तरिक्ष-मथो स्वः।"

अत्र पूर्व संवत्सरस्य, ततः परं तद्विभागहेतोरहोरात्रस्य, ततश्च तयोः कारणभूतयोः सूर्याचन्द्रमसो. सृष्टिर्वर्णिता। कालापरनामा सवत्सरोऽयमादौ ऋतुत्रय एव विभक्तोऽभूदिति मन्त्रोऽय साक्षी—

बसन्तोऽस्यासीदाज्यं, ग्रीष्म इध्म', शरद्धवि:। (ऋ० १।१०।६०)

षड्वाच्चायं पञ्चर्तु: षडृतुरिति च प्रख्यात:।

कालोऽयं वेदादिषु चक्ररूपेण वर्णित:, तस्यालंघ्यश्च महिमा धर्मतया। चक्राकारस्य तस्यैव एवाराण्युच्यन्ते। प्रतीकरूपेण च बहुधा वर्णनं विधीयते। यथा—

सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा।
त्रिणाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधितस्थु: ॥ (अस्य वा. सूक्तम्)

अन्यत्र दुरत्ययता तस्य चोदिता'—

पंचारे चक्रे परिवर्तमाने तस्मिन्नातस्थुर्भुवनानि विश्वा।
तस्य नाक्षस्तप्यते भूरिभार. सनादेव न शीर्यते सनाभि' ॥ (अ. वा.)

आथर्वणे कालः खलु प्राणिनामाशाप्रदतयाऽऽनन्दहेतु.।

कालेन सर्वा नन्दन्त्यागतेन इमाः प्रजाः।
जीवनाशा धनाशा च जीर्यतोऽपि न जीर्यति ॥ (अथर्व० १५।१५।७)

श्वेताश्वतर उपनिषदि कालो जीवात्मनो वशे निगदित.। एतच्च परमस्य पुरुषस्य सर्वोपरितया जीवात्मनश्च तदभिन्नतया संगच्छते—

कालः स्वभावो नियतिर्यदृच्छा भूतानि योनि' पुरुष इति चिन्त्या।
संयोग एषां न स्वात्मभावादात्माप्यनीश. सुख-दुख-हेतो: ॥ (श्वे० १।१।२)

रामायणे तु स स्वतन्त्र एव वर्णित. सर्वोपरिशक्तिमत्तया।

न कर्ता कस्यचिदकश्चिन्नियोगे नापि चेश्वरः।
स्वभावे वर्तते कालः, कस्य कालः परायणः ॥

परं भारतीयपरम्परा कालं दुरत्ययमनीश्वरमपि योगिना वशवर्तिनं स्वैकरेतयेव। महाभारतेऽपि तस्य स्वरूपं प्रतीकात्मकतया वर्णितम्—

एकं नाभि सप्तशता अरा.श्रिताः प्रधिष्वन्या विंशतिरर्पिता अराः।
अनेमि चक्रं परिवर्ततेऽजर मायाऽश्विनौ समनक्ति चर्षणी ॥
एकं चक्रं वर्तते द्वादशारं षण्णाभिमेकाक्षमृतस्य धारणम्।
यस्मिन् देवा अधि विश्वे विषक्तास्तावश्विनौ मुञ्चतं मा विषीदतम् ॥
(म० भा० शा० प० ३ अध्याय)

अन्यत्र च सर्वव्यापाराणां नियन्ता कालस्तस्य च कर्म नियामकमित्युक्तम्। उभयोश्च परस्परं सम्बन्धः प्रतिपादितः। सर्वकर्मणां कर्ता काल इति गीतायां प्रत्यक्षम्—

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः।
(गी० ११।३२)

'निमित्तमात्रं भव सव्यसाचिन्।' (गी० ११।३३)

इति च।

नात्र विषये दर्शनैरास्तिकैर्नास्तिकैर्वा मौनमाकलितम्। वैशेषिके कालस्याकाशेन सह नव द्रव्येषु गणना क्रियते। 'तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव।' अपरत्र तस्य चिह्नानि लोकप्रमाणैरुदितानि—

अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिंगानि। (वै० सू० २।२।६)

न्यायदर्शनं न वैशेषिकाद् विभिद्यते। न्यायवार्तिकतात्पर्यटीकाया कालोऽस्ति न वेति विचारे कालमस्वीकुर्वतां मतं खण्डितं यथा—

'सूर्योदयास्तमयक्रियाप्रचयाल्पत्वबहुत्वविशिष्टात् पिंडादेव परापरत्वे भविष्यतः कृतमत्र द्रव्यान्तरेण कालेनेति चेत् न, सवितुः समवेतायाः क्रियायाः पिंडेनासम्बन्धात्।'

पुरुषायुषः समयनिर्धारणं यद्यपि सूर्यस्य गत्या भवति परं न सा मानवपिण्डेन सह सम्बध्यत इति तन्नियामकेनापरेण द्रव्येण केनचिद् भवितव्यं तच्च कालः। एतेन च व्याकरणदर्शने कालस्य पूर्वापरव्यवहारहेतुत्व स्वीकृतम्। यथा—

चिरक्षिप्र-व्यवहार-हेतुत्वम् कालत्वम् (वै० सि० म० पृ० ८४०)

न्यायमुक्तावलीटीकायां दिनकर्यां च कालस्य लक्षणमेवं कृतम्—

'कालिकसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपितमधिकरणतया निमित्तत्वं काललक्षणम्।' अन्यच्च—

'जन्यानां जनकः कालो जगतामाश्रयो मतः; परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः॥' इति जगदाधारत्वं तस्य प्रतिपादितम्।

वैशेषिके कालस्याखण्डत्वमुक्तम्। परं नागेशेनाक्षिप्यते यत् कालस्याखण्डत्वे तस्य क्षणमुहूर्तपलादिविभागो न संगच्छते। क्षणादेश्च परिमाणं खण्डपदार्थेनैव संभवति। खण्डकालस्यैवेदानी परत्वादिका उपाधयः।

दीधितिकारस्तु दिक्कालौ नेश्वरादतिरिक्तौ मन्यते। ईश्वरस्यैव सर्वहेतुतया तदाकारोपाधिभेदमात्रत्वात्। क्षणानामेव वाऽतिरिक्तत्वस्वीकारेण जगद्व्यवहारसिद्धे। पर व्यवहारजगति कालस्यास्वीकारे लोकव्यापाराणामसगति पौर्वापर्यज्ञानस्य प्रत्यक्षत्वात्। आधुनिके विज्ञानेऽपि प्रतिपदार्थं कालाख्यमपि परिमाण स्वीक्रियत एव।

साख्ये तु दिक्कालावाकाशादिभ्य। (सा० सू० २।१२)

अस्मिन्मते हि नित्य खण्डश्चेति द्वयो कालभेदयो प्रथम प्रकृतिगुणविशेष, अपरश्चाकाशादेरिति तत्रैवान्तर्भवति। पर पौर्वापर्यादिव्यवहारहेतुभूतस्य कालस्य प्रकृतिगुणत्व न सगच्छते।

योगदर्शने क्षण एव कालत्वेनाभ्युपगत। स च खण्डकाल एव उत्तरक्षणस्य पूर्वक्षणविनाशानन्तरभावित्वात्। पर पूर्वापरभावशृखलाया अनिन स्वीकार्यतया नित्यकाल सिध्यत्येव।

मीमासकास्तु काल वैशेषिकवन्नित्य विभु त्रिमत्तवत्प्रतीयमान च स्वीकुर्वन्ति। सर्वत्र ज्ञाने च कालस्य सत्तामूरीकुर्वन्ति। यथा—

'न सोऽस्ति प्रत्ययो लोके यस्मिन्कालो न भासते।'

वेदान्ते दर्शनेऽपि काल स्वीकृत किन्तु केवले व्यवहारजगति यदा जीवोऽविद्यया ग्रस्त पूर्वापरभावमनुभवति पदार्थानाम्। पर स न वैशेषिकवन्नित्योऽविद्यामात्रानुभूतत्वात्।

शैवागमेषु मायाकृते तत्त्वपचके काल प्राद्य। बौद्धास्तु क्षणवादिन कालस्यातिरिक्तपदार्थता नागीकुर्वन्ति। अशरहितत्वस्वीकारे हि कालस्य पूर्वपरत्वादभावो नोपपद्यते। तदर्थं सावयवत्व तस्याभ्युपेयमेव। तथास्वीकृतौ च कालोऽखण्डो नित्य इति मत निरस्तम्। पूर्वापरभावस्य पदार्थकृतत्वस्वीकारे च कालस्यैव स्वीकृतिर्निष्फलेति तेषा निष्कर्ष।

जैनदर्शने च कालसम्बन्धे मतद्वयम्। प्राद्य नातिदूरे वैशेषिकात्। तत्रापि कालस्य द्रव्यत्व, सृष्टिव्यापारनियामकत्व च स्वीकृतम् पर लक्षणे वर्तना, परिणाम, क्रिया पूर्वापरत्वादिभावश्चेतिचतुष्टये वर्तना नियामकत्व चेति तत्रीता धारणा।

अपरस्मिन् मते च कालस्य क्रमभावितया पार्थक्य स्वीक्रियते। यथा—प्रतिक्षण क्षणपर्याय कालो भिन्न। कालस्याखण्डत्वे हि सर्वासामपि घटनानामेकदैव बोध स्यात्। चिरक्षिप्रभावश्च प्रतिदिन बुध्यते। उपाधिकृतत्वे च भेदस्य कार्यस्यैव भेद समापतति। तेन च कालस्य भेदोऽपि सिध्यतीति स स्वीकार्य एव।

—०—

निर्दुष्टं काव्य-लक्षणम्

साहित्यक्षीरसागरमथनोपजातस्य विगलितवेद्यान्तरपरनिर्वृतिसाधनभूतस्य काव्यामृतस्य स्वरूपं निरूपयितुकामैर्विचारितविचार्यैराचार्यैर्बहुधा प्रस्तुतानि स्वदर्शनानि। तेषु केचित् काव्यं शब्दगतमपरे तन्मुख्यार्थगतमितरे चोभयगतं मन्यन्त इति विविधस्तदीयोपन्यासः। लघावपि निबन्धेऽत्र परम्परागतानि लक्षणानि क्रमशो निरूप्यन्ते।

भामह-कृतं लक्षणम्—काव्यस्य लक्षणकृतां भामह एव प्रथम आचार्यो यः खलु मेधाविरुद्रप्रभृतीन्स्वपूर्ववर्तिनो विवेचकानुल्लिखति न तु दण्डिप्रमुखानिति प्राग्वदर्यैव स तेषाम्, यद्यपि पाश्चात्या भामहं दण्डिन उत्तरकालिकमेव स्वीकुर्वते। षष्ठशताब्द्या क्षीरोदयाज्जातोऽयं काव्यलक्षणं निरूपितवान्—

'शब्दार्थौ सहितौ काव्यम्' (का. अ. १।१६)

अत्र शब्दार्थयोः साहित्यमेव काव्यत्वेन स्वीकृतम्। तेन न केवलं शब्द चमत्कारोऽर्थचमत्कारो वा काव्यशब्दवाच्योऽपितु द्वावेव मिलिताविति प्राचाम्—

'वाग्वर्धाविव संपृक्तौ' इति मतमेवानुरुध्यते। परं केवलौ शब्दार्थौ निर्विशेषौ काव्यतां नार्हत इति शब्दस्यार्थपिक्षयाश्रयत्वेन मुख्यतया विवक्षितत्वेन ततोऽर्वाचिनो दण्डी (७ शताब्दीभवः) स्वकाव्यादर्शेऽन्यथैव निरूपितवान्—'शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली।' (का. द. १।१०)

अत्र सदाणेऽर्थस्य विशेषणमात्रत्वेन विवक्षितत्वमिति शब्दस्यैव काव्यपदवाच्यत्वम्। इष्टशब्देन च चमत्कारजनकत्वमेव प्रतिपिपादयिषितम्। अनेन चमत्कारजनकार्थबोधकस्य पदसमूहस्य काव्यशरीरत्वं सिद्धम्। परं क्वचिच्छब्दस्यापरत्र चार्थस्यैव विच्छित्तिमूलतया विनिगमनाविरहात्तयं तावच्छब्दमात्रस्य काव्यत्वं स्वीक्रियेतेति विप्रतिपत्तेः स्वकाव्यालंकारे पदशब्देन 'ननु शब्दार्थौ काव्यम्' इति सदायत्ता पुनः शब्दार्थयो सामान्येन काव्यरूपमुररीकृतम्।

कवे कर्म काव्यमिति मतानुसारेण कविवर्णितपदार्थानामपि तदुपज्ञत्वात् । महाभारते निर्दिष्टचरोऽपि शकुन्तला कालिदासकल्पनया तस्य मानस्येव सृष्टिरिति तत्कृत्यर्थंगता च सेति काव्यविषयतया स्वीकर्तुं तां को विप्रतिपद्येत । एतावता कालेन च काव्ये रसाना महत्त्व स्वीकृतमासीत् । रुद्रटेनापि—'तस्मात्तत् कर्तव्यं यत्नेन महीयसा रसैर्युक्तम्' इत्युक्तम् । पर काव्यतत्त्वाना गुणालकारादीनाम-निर्देशान्निर्विशेष न सामान्यमिति सिद्धान्तानुरोधात् स्वारस्याभावात्तत्र वामनेन कृत लक्षणमुपदिश्यते—'काव्यशब्दोऽय गुणालकारसस्कृतयो शब्दार्थयोर्वर्तते, भक्त्या तु शब्दार्थमात्रवचनो गृह्यते ।'

अत्र शदार्थयोर्गुणालंकारविशिष्टयोरेव काव्यत्वमुक्तम् । आनन्दवर्धनस्तु शब्दार्थशरीर काव्य मन्वानस्तस्य जीवातुभूत रसमेव प्रतिपादयति । अस्य सिद्धान्तानुयायिन एवोत्तरकालिका मम्मटादय आचार्या । नवमशताब्दी चास्याविर्भावकाल ।

तदुत्तर सरस्वतीकण्ठाभरणकारो भोज काव्ये रीतिगुणालकारादीना समन्वय कुर्वन्—

'अदोष गुणवत्काव्यमलकारैरलकृतम् ।
रसान्वित कवि कुर्वन्कीर्ति प्रीतिञ्च विन्दति ॥

इति लक्षितवान् । अत्र साहित्य दर्पणकारो बहून्दोषानुद्भाविवानिति तत्प्रसग एव तान्निरूपयिष्याम । अत्र सर्वाण्यप्यगानि काव्यलक्षणे समाविष्टानि । पर शब्दस्यार्थस्य वा काव्यत्वमभिमतमिति विचिकित्साया विनिगमनाविरहादनिश्चये रसस्य गुणाना चार्थेनैव सम्बन्धाद् दोषाणामलकाराणा चोभयनिष्ठतया शब्दार्थयोरेव काव्यत्व तस्याभिमत प्रतीयते । पर भोजस्य ग्रन्थो दण्डिमतमनुसरतीति कृत्वा तस्यापि शब्दमात्रे काव्यत्वमभिप्रेत स्यादिति न निश्चेतु शक्यते । तस्मिन्नेव काले च वक्रोक्तिजीवितकार कुन्तकोऽपि—

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।
बन्धे व्यवस्थितौ काव्य तद्विदाह्लादकारिणि ॥ (व० जी०)

इति लक्षणेन शब्दार्थयोरेव काव्यत्वमूरीकृतवान् । आनन्ददायी काव्यबन्धश्च चमत्कारवान् स च रसगुणालकारादिभि सम्पद्यते । यद्यपि न रसगुणादयो लक्षणघटका पर वक्रकविव्यापारशालिनीत्युक्त्यैव तत्समापतति । एवमपि वक्रकविव्यापारेण किं विवक्षित लक्षयितु ? सर्वोऽप्यलकारमार्ग, विशेषेण लक्षणाश्रित वक्रे कविव्यापारेऽन्तर्भवति । रसस्यापि ध्वन्यमानतया तत्र प्रवेश समवति । पर केवले प्रहेलिकादावपि वक्रप्रकारस्य सत्त्वे केवले तस्यापि ग्रहण स्यात्, लक्ष्यानुसारेण च लक्षणानि कल्प्यन्ते । न चैतावता सर्वस्यापि लक्ष्यस्य स्पष्टतया

बोधः संभवति तथा तु 'शब्दार्थौ सहितौ काव्यम्' इति पूर्वोक्तमेव पर्याप्तं स्यात्। विवक्षितस्य वैशिष्ट्यस्यैतावताऽपि बोधाभावात्। यच्चाग्निपुराणे काव्यस्वरूपं लक्षितम्—

'संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली। काव्यम्...'

इति। अत्रापि चमत्कृति-जनकता-समर्थार्थविशिष्टपदसमूहस्यैव काव्यत्वं वर्णित यन्न दण्डिनो वक्ष्यमाणाच्च रसगंगाधरकृल्लक्षणादतीव भिन्नम्। अत्रापि पूर्वोट्टंकिता शब्दकाव्यत्ववादिना लक्षणे प्रस्तुतापत्ति यथापूर्वं स्थितैव।

ततश्च काव्यप्रकाशकृतो मम्मटस्य विस्तृत लक्षण विचारणीयं भवति—

'तददोषौ शब्दार्थौ सगुणावनलकृती पुनः क्वापि'।

अत्र गोविन्दठक्कुरकृतव्याख्यानानुसारेण दोषरहितौ गुणसहितौ धर्मिरसधर्मभूतमाधुर्यादिगुणविशिष्टौ सर्वत्र सालकारौ क्वचिदस्फुटालकारवन्तावपि शब्दार्थौ काव्यम् इति विवक्षितम्।

एतदवधेय यदेतत्कालावधि काव्यस्य पुरुषरूपेण कल्पना बहुभिः स्वीकृताऽऽसीत्। रसप्राधान्यवादिना तु सिद्धान्त एव तदाश्रित.। मम्मटेन च न यद्यपि लक्षणे रसस्य सन्निवेश कृतः परम्—

'मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद् वाच्य.'

इति कथनेन रसस्य काव्यात्मत्वं गुणाना च—

'ये रसस्याङ्गिनो धर्मा शौर्यादय इवात्मन'।

इति कथनानुसारेण रसधर्मत्व साधु स्वीकृतमेव, परं लक्षणे रसशब्दस्यानुपादानेऽपि माधुर्यादिगुणसहितत्वस्य स्पष्ट लक्षितत्वात्परम्परया ग्रहणमेव तेषाम्। ध्वन्यादेश्च प्रकारविशेषतया लक्षितव्याभावात् तत्र नोल्लेख.। परमत्र 'अनलङ्कृती' इति लक्षणाश हृष्ट्वा "कथं नीरसस्याप्यनलङ्कृतस्य काव्यत्व स्वीक्रियेत। न च ननोऽस्फुटाभिप्रायमीषदर्थं गृहीत्वा क्वचिदस्फुटालकारावपि शब्दार्थौ काव्यमित्याशय इति वाच्यम्, आत्मभूतरसविरहे चमत्कारकारणे चालकारेऽप्यस्फुटे लोकोत्तरानन्दप्रदत्वाभावात् किं मूल काव्यत्व तत्र स्यादिति गोविन्दठक्कुराणामरुचि। अत एव चन्द्रालोककार पीयूषवर्षोपाधिधारी जयदेव. काव्य लक्षयन् पूर्णं लक्षणमाह—

निर्दोषा लक्षणवती सरीतिर्गुणभूषिता।
सालकाररसानेकवृत्तिर्वाक्काव्यनामभाक्॥

असौरीति-गुणादिसम्पन्नामेव कृति काव्यं स्वीकुर्वाणोऽलकारान् काव्येऽपरिहार्यानिव मनुते। काव्य-प्रकाशकारस्य लक्षणेऽनलङ्कृती इति पदं स्पष्टमाक्षिपन्नाह—

अंगीकरोति य' काव्य शब्दार्थावनलंकृती ।
असौ न मन्यते कस्मादनुष्णमनलकृती ।।

परमेतदुपेक्ष्यम् केवल शोभावधंकतत्त्वस्य स्वरूपघटकत्वेनास्वीकार्यत्वात् । अन्यथा रसास्वादवति ध्वन्यात्मकेऽपि काव्येऽलकाराभावे काव्यत्वमव्याप्त स्यात् सम्प्रदायविरोधश्चतेन प्रसज्जेत । अथ रसमेव काव्यरूपघटक मन्यमानो विश्वनाथ साहित्यदर्पणे 'वाक्य रसात्मक काव्यम्' इति काव्य लक्षयन् मम्मटकृतलक्षणे प्रति-पद दूषणान्युपन्यास्यत् । तस्य विचारेण सर्वथा दोषरहितस्य काव्यस्यासभवेन, दोषे सत्यपि रसास्वादेऽक्षते काव्यत्वस्वीकाराददोषाविति पदम्, शब्दार्थधर्मबोधभ्रमात् सगुणाविति पद स्फुटालकारवत्त्वेऽप्यस्फुटालकारत्वेनोदाहरणसगतेरभावादनलकृती इति पदमपि सदूषणमेव । पर रस काव्यात्मतया मन्वानोऽसौ कथ तमेव काव्यलक्षणघटकत्वेन प्रस्तौति ? आत्मा खलु सर्वेषा प्राणिना समानो धर्म , तेन मानवे लक्षणीये सात्मवच्छरीर-वत्त्व मानवत्वमिति लक्षण किं निर्दुष्ट स्वीक्रियेत ? रसशब्देन पारदस्यापि कटवम्लादि-भोज्यास्वादस्यापि च ग्रहणीयतया किमायुर्वेदगतपारदवर्णनपर मधुरादिरसविश्ले-षणात्मक वा वाक्यमपि काव्य स्यादिति सामान्यधर्मेणा शरीरस्वरूपविधातृणामनि-र्देशे कथ पूर्ण निर्दुष्ट च लक्षणमिति न विभावयाम । सैन्धवादिपदवत् प्रसगेन नायुर्वेदादिगतपारदादिबोधो भविष्यतीति चेत् कथ पूर्वनिर्दिष्टाऽतिव्याप्तिरपाक्रियेत । रसस्य प्राधान्ये तु न कस्यापि विप्रतिपत्ति ।

अन्ये च रसगगाधरकृता जगन्नाथस्य 'रमणीयार्थ प्रतिपादक शब्द काव्यम्' इति लक्षण शब्दगतमेव काव्यत्व निरूपयति । परमास्वादोद्बोधवता खलु काव्य-प्रयोजनम्, तद् येन सिध्यति तदेव काव्यपदवाच्यम्, वाक्येऽपि क्वचित्प्रहेलिकादौ खड्गबन्धादौ च शब्दमात्रे चमत्कार, अपरमानुप्रासविरहिण्यपि व्यग्यानुभूतिमयेऽर्थे वैचित्र्यमिति चमत्कृतिजनकताया शब्दमात्रगतत्वविरहात् काव्य श्रुत काव्य बुद्ध-मिति व्यवहारस्य शब्दार्थोभयविषयगतत्वात् कथवार केवलस्य शब्दस्य काव्यत्व ग्राह्य-स्यात् ।

मानवस्य रसाभिलाषितया, दोषरहितस्य च वाक्यस्य तदर्थस्य च विशेषेणानन्द-प्रदत्वसभवात् काव्यस्य निर्दोषत्व सर्वस्यापीष्टम् । अतो लक्षणे दोषरहितत्व तूपन्यस-नीयमेव भवति । यथा 'हतवृत्तो हतो नर' इति वचने 'धर्मेण हीना. पशुभि समाना' इत्यादौ च न हतपशुशब्दयोर्मुख्या वृत्ति-। सदृशया स्वरूपेणाऽज्ञातेऽपि नरस्य नरत्वे गुणादिदृष्ट्यैव तदभावस्य विवक्षितत्वम् । एवमेव निर्दोषत्व काव्यस्य सर्वेषाम-पीष्ट तत्खलु परमरमणीय स्यात् । दुष्ट काव्यमिति व्यवहारस्तु लोके दुष्टो मानव

इतिवत क्व न लभ्यते । परमसभवति सर्वथा दोषरहिते मानवे स्वरूपघातकत्वेनादुष्टत्वस्य किं दोषयुक्तत्व मानवत्वमिति लक्षण भवतोऽभिप्रेत स्यात् ? एवमेव काव्यप्रकाशकारस्य लक्षणे सगुणाविति पदे दर्शिताऽनुपपत्तिरपि न सगच्छते । गुणाना रसधर्मत्वे विवक्षितेऽपि व्यवहारे तदुद्बोधकशब्दार्थगतत्वेनैव प्रतीते स्वरूपघटकता तेषामेव न तु रसस्य । 'नहि गौ स्वरूपेण गौर्नाप्यगौर्गोत्वाभिसम्बन्धात्तु गौरिति' पातञ्जलोक्तदिशा गो स्वरूपाधायक गोत्व तच्च सास्नालागूलादिमत्त्व न त्वात्मवत्त्वम् । तथाहि 'मृतो गौ' इति वाक्ये गतात्मनो गो शरीर एव गोत्वव्यवहारो न तु धर्मिणि । हस्तपादाद्याकारविशिष्ट एव मानवो भवति न केवल आत्मा स्वतस्तस्य शुद्ध-निरुपाधि-रूपत्वात् । एव च गुणैर्माधुर्यादिभि समन्वितौ शब्दार्थौ काव्यमिति स्वीकारे को दोष. ? अलकारस्याऽस्फुटत्वे सर्वथाभावेऽपि वा माधुर्यादिमत्त्वाद् रसवत्त्वेन तस्मादास्वादस्याक्षति । न हि कोऽपि सौन्दर्यौदार्यादिबाह्याभ्यन्तरगुणविशिष्टोऽक्षतपाणिपादवान् जनो भूषणविहीन सन् मानवधर्मतोऽवहीयते । तथा सति धनिका एव कतिपये वेशप्रिया वा लोका मनुजपदवाच्या भवेयु । यच्च विश्वनाथेन 'य कौमार हर' इति पद्ये विभावनाविशेषोक्त्यो स्फुटत्वसिद्धये भावमुखेन तयोरुक्ति समार्थ्यत, तत्समर्थनमेवा नयोरलकारयोरस्फुटत्वे बीजम् । अभावमुखेन वक्तव्यस्यार्थस्य भावमुखेन प्रतिपादनात् । अत काव्यप्रकाशकृतो लक्षणमेव साधीयो निर्दुष्टत्वात् ।

—o—

काव्येऽलंकाराणां स्थानम्

विश्वस्मिन्नपि जगति चेतनम्, चेतने मानवः, मानवे वाणी, वाण्यां भाषा, भाषाया साहित्यम् तत्रापि काव्यम् सारः। तद्धि महतो वाङ्मयाम्बुधेर्निर्मथ्यमानादमृतमिवोद्भूतं नवनीतमिव दध्नः। काव्यस्य साहित्यसारत्वं च प्रतिपादितचरं विल्हणेन—

साहित्य-पायोनिधि-मन्थनोत्थं
काव्यामृतं रक्षत हे कवीन्द्राः।
यत्तस्य दैत्या इव लुण्ठनाय
काव्यार्थचौराः प्रगुणीभवन्ति॥
गृह्णन्तु सर्वे यदि वा यथेष्टं
नास्ति क्षतिः क्वापि कवीश्वराणाम्।
रत्नेषु सर्वेषु हृतेष्वमर्त्यैः
क्वापि रत्नाकर एव सिन्धुः॥ (वि. च)

एवं सारभूतेऽपि काव्ये किं तावत्सारमिति विचिकित्सायां केचिदाचार्या अलंकारान्, केचिद् रसान्, अपरे गुणान्, इतरे रीतीः, अन्ये च भणितिभंगीविशेषानु सर्वोपजीव्यं तत्त्वमंगीकुर्वते। अलंकारात्मवादिनः काव्यस्य विशेषोत्कर्षाधायकानलंकारान् मन्वानास्तद्भाववतीरुक्तीर्वार्ता एव कथयन्ति। तथाहि—

गतोऽस्तमर्कः भातीन्दुर्यान्ति वासाय पक्षिणः।
इत्येवमादि किं काव्यं वार्तामिनां प्रचक्षते॥ (भा. का. प्र.)

आदौ च काव्येऽलंकाराणामेव प्राधान्यमासीत्। न यतस्तदवधि रसवादस्य प्रतिष्ठा जाता। भामहादयोऽलंकारवादिनो रसं रसवदलंकारतयैव स्वीकुर्वते। एवं च रसस्याप्यलंकारतयैव ग्राह्यत्वेनालंकाराणामेव प्राधान्यमापतति न तेषां मतेऽलंकारहीना कविता कविता, सत्यपि सा विधत्वेव न विराजते। उदाहृतं च—

न कान्तमपि निर्भूषं विभाति वनितानन्नम् । (भामह)

अलकाराश्च चमत्कृतिपूर्णोक्ति —

वक्राभिधेयशब्दोक्तिरिष्टावाचामलकृति । (भामह)

अलकारेषु चार्थस्यैव महिमातिशय इति अर्थालकारा एव मुख्यत्वेन स्वीक्रियन्ते । अलकाराश्च न वक्रोक्तिम्—भणिति-वैचित्र्यमन्तरा साधु सम्पद्यन्ते । तथाहि—

'न नितान्तादिमात्रेण जायते चारुता गिराम् ।'
संपा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते ।।

यत्नोऽस्या कविना कार्यं कोऽलकारोऽनया विना । (भा.

दण्डी च तानेव काव्ये महत्तमान् मन्यते, तैरेव शोभाया सम्पादनात् ।

काव्यशोभाकरान् धर्मानलकारान् प्रचक्षते । (काव्या०)

तदुत्तर काव्यालकारसूत्रकारो वामनो रीतीरेव काव्यात्मतया स्वीकुर्वाणोऽलकारान् काव्यस्य शोभाधायकान् गुणाश्चापरिहार्यान् प्रतिपादयति । 'रीति काव्यस्यात्मा', 'काव्य ग्राह्यमलकारात्', काव्यशोभाया कर्तारो गुणा, तदतिशयहेतवस्त्वलकारा' इति । एव तस्य मते च रीति, गुणा, अलकारा इति पूर्वपूर्वभावेन प्राधान्यम् । नवम्या शताब्द्या च रुद्रटेनालकारान् विवेचयताऽपि रसस्यापरिहार्यता स्वीकृता, 'तस्मात्तत् (काव्यम्) कर्तव्य यत्नेन महीयसा रसयुक्तम्' इति ।

अस्मिन् काले ध्वनिसम्प्रदायस्य महत्त्व रसस्य च ध्वन्यात्मकत्व ध्वनिविषयस्य रसस्य काव्ये मुख्यत्व च साधितमासीत् । ध्वनिवादिभिरपि न स्वीकृतोऽलकाराणा विशेष, पर रसाद्यपेक्षया तेषा गौणमेव स्थानम् । ध्वनिसिद्धान्त स्वीकुर्वन्तो मम्मटादयो रसमेव प्रथम स्वीकुर्वाणाश्चमत्कारावहतयाऽलकारान्कङ्कणादिरूपेणैव काव्यस्य शोभाधायकान् मन्वते, तत्प्रधानस्य च काव्यस्याधमत्वमेव स्थापयन्ति । अनलकृती पुन क्वापीति वदता मम्मटेन स्फुटमेतन्निरणायि । विश्वनाथादयोऽपि तस्यैव पक्षमनुसरन्ति । ते हि काव्यपुरुषस्य शब्दार्थौ शरीरम्, रस आत्मा, माधुर्यादयो गुणा सौन्दर्यादिवत्, रीतयोऽवयवसस्थानरूपिण्य, अलकाराश्च हारादिवत्, इत्येव प्रतिष्ठापयन्ति ।

'उपकुर्वन्ति त सन्त येऽङ्गद्वारेण जातुचित् ।
हारादिवदलकारास्तेऽनुप्रासोपमादय ।।' (का० प्र०)

इति यद्यपि तत परमपि जयदेवोऽप्पय्यदीक्षितश्चालकारानेव विशेषेण काव्यशोभाकरान् मन्वाते पर रसस्यैव प्राधान्य तदा बहुसम्मतमभूत् । जगन्नाथस्तु 'रमणीयार्थप्रतिपादक शब्द काव्यम्' इति काव्य लक्षयन् तन्नालकारानपरिहार्यानेव

स्वीकरोति । वक्रोक्तिजीवितकारः कुन्तकः, औचित्यप्रतिष्ठापकः क्षेमेन्द्रश्च न तत्सम्बन्ध उदासाते । कामम्लंकारा आत्मतया शोभाधानमूलतया वा स्वीक्रियेरन्, काव्ये तेषां स्थितिरुत्कर्षाधायकत्वेन नानादरास्पदम् । न वस्तुत एतानु विनोक्तिश्चारुतामावहति । प्रथमं सृष्टिकाव्यं वेदा अपि तान् प्रयुञ्जत एव ।

"अभ्रातेव पुंस एति प्रतीची, गर्तारुगिव सनये धनानाम् ।
जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः ॥"

अत्रोषोवर्णने उपमालंकारस्य साधीयान् प्रयोगः । 'अनेजदेकं मनसो जवीय.' इति विरोधालंकारः, 'अपाणिपादो जवनो ग्रहीता' इति विभावनालंकारश्च साधुप्रयोगावर्थमुपकुरुत एव ।

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति, अनश्नन्नन्यो अभिचाकशीति ।

अस्यामृचि रूपकातिशयोक्तिनं कथमपि साधारणी ।

रामायणे, महाभारते च काव्यतयाऽलंकाराणा यत्रतत्र प्रयोगोऽयंवंशद्वाय वृत्त एव । कवेर्भावो न तावन्तरा रोचकतया स्फुटीभवति । बहुधाऽमूर्तभावैरुपमितः पदार्थः प्रत्यक्षायते । यथा सुन्दरकाण्डे सीतावर्णने—

आयतीमिव विच्छिन्नामाज्ञामिव विलोपिताम् ।
तां बुद्धिमिव संदिग्धामृद्धिं निष्पतितामिव ।
विहतामिव च श्रद्धाम् आशां प्रतिहतामिव ।
सोपसर्गां मया सिद्धिं बुद्धिं सत्क्रियामिव ॥ (बा. रा.)

एतासु पंक्तिषूपमितायाः सीतायाः विरहदशा साधु व्यज्यते ।

शब्दालंकारा अपि यथास्थानं योजिता नादसौन्दर्यं जनयन्तः कविताया हृद्यतामापादयन्त्येवेति निश्चप्रचम् । अतएव पण्डितराजस्य काव्यमतिशयेन काव्यरसिकानु रसयति रसम् ।

श्रुतिपदः परिणीता गीता च हन्त मतिपथं नीता ।
तदपि न हा विधुवदना मानससदनाद् बहिर्याति ॥

इत्यत्र

येनामन्दमरन्दे दलदरविन्दे दिनान्यनाविषत ।
कुटजे पलु तेनेहा तेने हा मधुकरेण कृपम् ॥ (मा. वि.)

अस्मिन् पद्ये च शब्दानुप्रासेनार्थ-सौन्दर्यसहकारिणी नादभक्तिरतितमा प्रमोदमावहति । आंग्लभाषायामपि काव्ये निडंम्बरतया स्वीकृतेऽपि उपमां (Simile) रूपकम् (Metaphor) शब्दनाद (Onomatopoeia) मानवीकरणम् (Personification) विशेषणविपर्यय (Transferred Epithet) आदयोऽलकारा (Figures of Speech) इतिनाम्ना व्यवह्रियन्त एव । स्वच्छन्दतावादघात्याऽऽन्दोलितेऽपि हिन्दीकाव्ये भावाभिव्यक्तिसौकर्याय कवयो यत्र तत्राऽलकारानवश्यमेव स्वीकुर्वन्ति, न तेषा छायावादसम्बन्धिनी कविता समासोक्त्या रूपकेण वा परिहीयते ।

यथा सुमित्रानन्दनकवे 'परिवर्तन' कवितायाम्—

'सरल भौंहों का शरदाकाश घेर लेते घन घिर गम्भीर'

अत्र पद्यार्श एकदेशविवर्तिनो रूपकस्य साधीयसी योजना ।

अद्यत्वे काव्येऽलकाराणा प्रयोगविषये महान्विवाद । बहवो जना एतान् भावाभिव्यञ्जनाया मार्गे बाधकानु गडुभूतानेव मन्वते । अपरे च तान् विना काव्यस्य सत्त्वमपि न स्वीकुर्वते । एतादृशी विप्रतिपत्तिस्तु नाद्यतन्येव । पुराऽपि तेषा प्रयोगो निन्दित समर्थितश्च । 'मुण्डे मुण्डे मतिर्भिन्ना' हि । परं कैस्तावदेतेषा सर्वथा वर्जन कृतम् । लोकेऽपि भूषणाना धारणमनावश्यक मन्वाना अपि प्रेयसी लावण्यचाकचिक्याधित चक्षुर्विधित्सव के न तानि निर्मापयन्ति । कथ तानि निध्यागारेषु (Banks) निक्षिपन्ति ? चिरन्तन्येव मानवस्य सौन्दर्यग्रहग्रहिला प्रवृत्ति । कविताया कामिनीत्वेनोपन्यासे कामनीयकमस्या एधयितुकामास्तामपि मधुरपदझकारिणी, मृदुभावाभिरामा हृदयाश्लेषकृतरोमहर्षा कामयन्ते कवय । पर नात्र सन्देहो यद् भूषणानि भूषणान्येव भावाश्च भावा । जीवनप्रतिबिम्बायिते मनोवेगमूलायिते काव्ये तस्याऽऽधारशिला भावसम्पदेव, न तु शब्दयोजना । जीवन्त्येव हि रमणी रमयति रमणीयमसृणस्वनवरणत्किङ्किणी-झणझणायितमञ्जीरमञ्जुपदक्रमै । मृतायास्तु भीषणतामेव जनयन्तिते । एन सौन्दर्यमात्रनिर्वाहकतया प्रयुक्ता अलकारा अलकारा । स्वभावोपनत भावगरिमाण प्रतिच्छादयन्तस्तु तस्या नैसर्गिकमपि सौन्दर्य नाशयन्त्येवेति शोभासाधनतया प्रयुज्यमाना काव्यस्यालकरण सम्पादयन्त एव ते शोभना । तादृशे तेषा प्रयोगे न कस्यापि वैमत्य भवेदिति शम् ।

काव्ये रसाः

सकलमपि जगदिद प्रमेयात्मक भूत भविष्यद् वा ब्रह्मैव, 'द्वावेव ब्रह्मणो रूपे मूतँ चामूतँ च ।' ब्रह्मार्थ सत् चित् आनन्दघनश्च, सर्वानन्दमयत्वाद् विलक्षण-रमणीयतामय पदे पदे नवनवरहस्यवश्य विश्वमिद चराचरात्मक तस्य काव्य यन्न क्षीयते, न च जीर्णता व्रजति ।

'पश्य देवस्य काव्य न ममार न जीर्यति,'

तदेव दृश्यते चक्षुरादिभि, अनुभूयते हृदयेन, चिन्त्यते मनीषया, रसयिता रसिता च स्वयमेव जीवभूत । सोऽपि रस रसते दृश्यते च साक्षात्कर्तृभि । 'रसो वै स रस लब्ध्वैवायमानन्दी भवति ।' इति छान्दोगा । तस्यैव प्रतिकृति शब्दब्रह्मणा ग्रन्थाकारेण पुरत स्थाप्यते प्रस्तूयते, विधीयते च रसमयी । आनन्दो जीवधर्म । न रस आनन्दाद् व्यतिरिच्यते दृश्यत आस्वाद्यत इति व्युत्पत्त । सकलोऽपि व्यापार प्राणिना रसाभिलाषमूल । न केवल काव्यजगति, व्यवहारजगत्यपि च प्राणवता रसमभिलक्ष्यैवाहारविहारादिप्रवृत्ति । आनन्दमुद्दिश्यैव हि विषयेष्वभिनिवेश । अतएव काव्यजनित आस्वादोऽपि रस एव । तस्य स्वरूप हि न ब्रह्मणो रूपाद भिद्यते—

'सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मय ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदर ॥
लोकोत्तरचमत्कारप्राण कैश्चित्प्रमातृभि ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रस ॥" सा द ३ ।

तदथमेव काव्यरचनायामभिरुचि । अविद्यापतितस्यापि हि जीवनस्य काव्यास्वादद्वारेण स्वचिन्मयस्वरूप-सुलभ मानन्दे काम । काव्यस्य प्रयोजन ह्युक्तम् ।

काव्य यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्य परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥ (का० प्र० १।२ ॥)

'सद्यः परनिर्वृतिरेव हि काव्यस्य जीवातुभूतो रसः। तदर्थमेवं काव्यं श्रूयते, पठ्यते, बुध्यते दृश्यते च सामाजिकैः। एतदेवाभिप्रेत्य चोक्तं भरतेनापि—

'न हि रसादृते कश्चिदर्थः प्रवर्तते।'

कथं तावत्तस्यानुभूतिः, नानाद्वन्द्वात्मकेऽनभिमतघटनाकटुकायिते हि जीवने क्वतस्तादृशस्य चरमसुखस्योपलब्धिः? सिताऽपि हि, मधुरमधुरा मिश्रितवंशच्छेदा विरसी भवति, क्षिनत्ति च रसनां स्वदमानस्य, इह तु जगति प्रत्यहं, प्रतिघटि, प्रतिमुहूर्तं प्रतिक्षणं च विषमविषमा परितोऽवसादयन्ति दशापरिणामाः। उच्यते, भवति सा भावोदयात्। मूलं हि सकलस्याऽपि व्यापारचक्रस्य य एते मनोभावा हर्षशोकादयः। वशीकृतास्तरलिता नुन्नास्तावदेभिर्वयं प्रवर्तामहे नैकविधासु क्रियासु। न हि तावदेतद्विधोज्झनः कोऽपि यं न स्पृशन्ति ते। काव्य च वर्णयतीतिहासमन्तर्जगतो बहिर्जगन्मुखेन। विश्वमिदं हि निभालयत उद्यन्ति चेतसि विविधा वृत्तयः। काश्चिदनुभूतिपर्यवसायिन्योऽपराश्च पाकावसाना इति भेदात् स्थायिता सचारितां च प्रतिपद्यन्ते। वृत्तीर्जागरयत् पदार्थजात चालम्बनं तद्वर्धकं तूद्दीपनम्। उभये च विभावा विशेषेण भावयन्ति रसान् यतः। उदितासु च तासु वृत्तिषु न स्थूला प्रतिपत्तिरिति विविधाभिरेव चेष्टाभिर्लक्ष्यन्तेऽतोऽनुभावास्ता उदिताः। एव स्थायिन एव भावा विभावादिसहकारेण रसेषु विपरिणमन्ति। उक्तं च भरतेन—

"विभावानुभावसंचारिसंयोगाद्रसनिष्पत्तिः" इति। तथा च—

'यथाहि गुडादिभिर्द्रव्यैर्व्यञ्जनैरोषधिभिश्च षाडवादयो रसा निर्वर्तन्ते, तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति।' भ. ना. शा. ७

रसस्य परिणतिविषये च मम्मटस्य विश्लेषणमभिनवोक्तं हृद्यतमं विशदं च—

"लोके प्रमदादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्त्वादलौकिकविभावादिशब्दव्यवहार्यैर्ममैवैते, शत्रोरेवैते, न ममैवैते, न शत्रोरेवैते, न तटस्थस्यैवैते इति सम्बन्धविशेषस्वीकारपरिहारनियमानध्यवसायात्साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणीकरणबलात्तत्कालविगलितपरिमितप्रमातृभाववशोन्मिषितनवेद्यान्तरसंपर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृतश्चर्व्यमाणैकप्राणो विभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीणमिवालिङ्गन्नन्यत्सर्वमिव तिरोदधद् ब्रह्मानन्दास्वादमिवानुभावयन्नलौकिकचमत्कारकारी शृंगारादिको रसः।'

आत्मा हि शुद्धो बुद्धिचिन्मयः, सत्त्वमयः, प्रकाशमयः, ज्ञानमयश्च निर्विकल्पः, उपाधिरहितः। तदवस्थतामनुप्रपन्नो हि सामाजिको द्वन्द्वमूल कटुकमनुभवं सर्वं जहाति। 'सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्।' अविद्यापदपतितस्यापि च जीवस्य नैसर्गिकोऽभिलाषः स्वपदप्राप्तौ। काव्यरसन-काले, कामं न द्राघीयसी परं भवत्येव स्वरूपानुभूतिस्तस्य। महानयं लाभो रसयितुः।

रसोऽयं स्थायिभेदेन बहुविधतामापद्यते। स्त्रीपुंसोरनुरागरूपिणी रतिः विभावादिसहकृता रसरूपेण परिणता शृंगारसंज्ञया व्यवहरन्ति। एवमिष्ट-नाश-विपत्तिकृतविषादरूपः शोक एव करुणरूपे, विकृतवाक्चेष्टावेषादिदर्शनोद्भवो हासश्च हास्ये, शत्रुविजयादिगत उत्साहो वीरे, अपराधदर्शनानुभवोद्भूतक्रोधाख्यो भावो रौद्रे, मलमूत्रादिकुत्सितवस्तुवीक्षणजो जुगुप्साभिधश्च बीभत्से, कौतुकजननहेतुरपूर्वपदार्थ-दर्शनादिकृतो विस्मयोऽद्भुते जगदनित्यतानुभवतत्त्वज्ञानादिकृतनिर्वेदाकारः शमः शान्ते परिणमति। रौद्रस्य च फलं भयानको नीचपात्राश्रयः।

क्वचिच्च शुद्धोऽपि, स्थायी स्वाद्यते। तत्राप्यालम्बनादिसहकृतोऽनुभवः। काव्यस्य जीवातुभूततया रसस्य न किमपि तादृशं वस्तूपन्यास्यं येन मुख्यतत्त्वस्य प्रतीति-र्व्याहन्यते। अत एव च माधुर्यौज प्रसादाख्यास्त्रयो गुणा वैदर्भ्याद्या रीतयश्च निरूपिता आचार्यैः। रसोचितैव हि पदावली गुणादिमुखेनेष्टं रसं प्रत्याययति। यथा शृंगारे करुणे च ललितललिता समासरहितैव पदावली विशेषेण प्रभवति।

क्षपिता सचिवेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान्।
दयिता दयितानना‌म्बुजं दृगमोलन्नयना निरीक्षते॥ (र. गं.)

वीरे, रौद्रे, भयानके च संयुक्तवर्णानां टवर्गप्रायाणां प्राचुर्यं समस्तानाम-समस्तानां वा प्रभवति तदुद्बोधे। यथा—

चक्रवद्भुजभ्रमितचण्डगदाभिघात-
संचूर्णितोरुयुगलस्य सुयोधनस्य।
स्नानं करिष्यति कचांस्तव देवि भीमः॥ (वे. सं.१)

रसोऽप्ययं पूर्वैरलंकारवादिभिराचार्यैः रसवत्प्रेय ऊर्जस्विरूपालंकारेण स्वी-कृत आनन्दवर्धनादिभिश्च ध्वनिवादिभिः काव्यात्मतया प्राधान्यं नीतः। स एव काव्यस्य मुख्योऽर्थः। यथा—

(क्र. पृ. ११)

व्यञ्जना व्यापारः, तस्य स्वरूपं परम्परा च

ध्वनिप्रस्थापकैरानन्दवर्धनाचार्यैः प्रधानस्य काव्यायंस्य द्वौ भेदावुदितौ—

अयं सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः ।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥

तत्र वाच्योऽभिधाबोध्यः शब्दार्थः । प्रतीयमानस्तु ततो विलक्षणः—

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥ (ध्वन्या०)

यथा कामिनीशरीरे हस्तपादादिर्भाति वर्णादिव्यतिरिक्तः काऽपिच्छायारमिव हृदयान्याक्षिपति तद्वदेव काव्येऽपि शब्दार्थव्यतिरिक्तः सुन्दरतमोऽन्य एवार्थः प्रतिभाति येन कवीनां वाणी निरतिशयाह्लादजनकं कमपि विशेषं पुष्णाति । तथाहि—

सरस्वती स्वादु तदर्थवस्तु निष्यन्दमाना महतां कवीनाम् ।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ॥ (ध्वन्या०)

यथा कालिदासस्य शकुन्तला दृष्ट्वा 'अहो, लब्धं नेत्रनिर्वाणम्' इति कथने शकुन्तलादर्शनोपजातोल्लासानिरायानुभूतिः मूच्यते, सा च न शब्दस्यार्थः, सामर्थ्यादेव तु मूच्यते । यथा 'गतोऽस्तमर्कः' इत्यत्राशब्दार्थोऽपि कस्यचिन्महापुरुषस्य मृत्युः प्रतीयते । काम न सा बुध्येत स्थूलमतिभिः, रसिकाना तु मुखेन बोध्य एव । अत एवोक्तम्—

तद्व्यत्सचेतसां सोऽर्थो व्यापारविमुखात्मनाम् ।
बुद्धौ तत्त्वार्थदर्शिन्यां भटित्येवावभासते ॥ (ध्वन्या०)

अयमेव विलक्षणोऽर्थो व्यङ्ग्यः, तद्बोधकः शब्दो व्यञ्जकः, तस्य वृत्तिर्व्यञ्जना चेति वक्ष्यमाणग्रन्थेषु । अस्मिन्नेवार्थे च ध्वनिशब्दः प्रयुज्यते । परः स व्युत्पत्ति भेदेन वाच्यवाचको, व्यङ्ग्यव्यञ्जको वृत्ती च प्रतिपादयति । यदाहुरभिनवगुप्ताचार्याः—

'तेन वाच्योऽपि ध्वनिः, वाचकोऽपि शब्दो ध्वनिः, द्वयोरपि व्यञ्जकत्वं ध्वनतीति कृत्वा । गम्यिष्यते विभावानुभावसंलक्षणयेति व्यङ्ग्योऽपि ध्वनिः, ध्वन्यत इति कृत्वा ।

शब्दनं शब्दः शब्दव्यापारः, न चासावभिधादिरूपः, अपि त्वात्मभूतः, सोऽपि ध्वननं ध्वनिः'। काव्यमिति व्यपदेश्यश्च योऽर्थः सोऽपि ध्वनिरुक्तप्रकारध्वनिचतुष्टयमयत्वात्।' तस्य निरूपणं ध्वन्यालोके ध्वनिरूपेण काव्यप्रकाशादिषु च व्यञ्जनाव्यापारं प्रमुखीकृत्य कृतम्। ध्वन्यालोके हि तमर्थमधिकृत्यैव लक्षणम्—

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेष स ध्वनिरिति सूरिभिः कथितः॥ (ध्वन्या०)

अत्र समुदायेन काव्यस्यैव ध्वनित्वमुक्तम्। परमुक्तव्युत्पत्त्या व्यापारोऽप्यायातेव।

विवक्षितान्यपरवाच्यासु यत्रार्थो बोध्यतेऽपरैः।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥ (सा. द.)

इति साहित्यदर्पणलक्षणं व्यञ्जनाया एव। *अभिधाऽपि* किन्तु न तत्रैवं निरूपणम्। क्वचिदप्रकारमुखेनान्यत्र च स्वरूपमुखेनेति न कश्चिद् विशेषः। अग्रे ऽप्यानन्दवर्धनेनायंमुखेनैव तद्विवेचनं विहितम्, आचार्यैरन्यैश्च वृत्तिमुखेनैव। सोऽयं ध्वनिः अभिधामूलो लक्षणामूलश्च। लक्षणामूलोऽपि तावदविवक्षितवाच्योऽभिधामूलश्च विवक्षितान्यपरवाच्य इति वर्ण्यते। प्रथमोऽजहल्लक्षणामूलो जहल्लक्षणामूलश्चेति कृत्वा पुनर्द्विविधः। आद्य स्वार्थमजहदेवार्थान्तरं द्योतयतीति अत्यन्ततिरस्कृतवाच्य इत्युच्यते। इतरस्तु सर्वथा स्वार्थं परित्यज्यान्यत्र पर्यवस्यन्नत्यन्ततिरस्कृतवाच्य इत्यभिधां वहति। यथा—

(तावच्छाद्यन्ते गुणा यावत्ते सहृदयैर्न हृद्यन्ते।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि॥) (ध्वन्या०)

अत्र द्वितीयकमलशब्दः स्वार्थमपरित्यजन्नेव सौरसौभाग्यादिविशेषवत्त्वं द्योतयति। अन्यस्तु—

रवि-संक्रान्ततोभाग्यस्तुषारावृतमण्डलः।
निश्वासान्ध इवादर्शः कष्टमा न प्रकाशते॥ (वा. रा. वि)

अत्राप्यायं चेतनधर्मतयाऽचेतने आदर्शेऽनाश्वासप्रतिबिम्बग्रहणासामर्थ्ये पर्यवस्यन् तेजोहीनत्वदौर्भाग्यातिशयत्वादयं द्योतयति।

अभिधामूला च शब्दशक्तिमात्रमूला वस्तुरूपम्, अलंकाररूपं रसादिरूपं च व्यङ्ग्यं सहृदयसंवेद्यातिशयरूपसम्बन्धा चेति द्विधा। तत्राद्यस्य स्वार्थसहायोऽर्थान्तरं द्योतयतीति द्वितीयस्य स्वार्थसहितमूलस्येति द्विधा। तत्र शब्दशक्तिमूलो यथा—

"अन्तरे कुसुमसमययुगमुपसंहरन्नजृम्भत ग्रीष्माभिधानः फुल्लमल्लिकाधवलाट्टहासो महाकालः।"

अत्र शब्दवैशिष्ट्याद् युगोपसंहारकारी महाकालाख्यः शक्तिविशेष उज्जृम्भमाणः प्रतीयते। सा च प्रतीतिः शब्दावेतावाश्रयतीति शब्दशक्तिमूला। अत्र वस्तुनो बोधाद् वस्तुध्वनिः। अत्रैव च प्रसक्ते ग्रीष्मवर्णनेऽप्रसक्तस्य महाकालस्य बोधादसम्बद्धार्थाभिधायित्वं मा प्रसाङ्क्षीदिति महाकाल इव महाकाल इत्याकारक उपमानोपमेयभावो द्वयोः सूच्यत इत्युपमालंकारध्वनिः।

अलक्ष्यक्रमव्यंग्यस्तु रस-भाव-रसाभास-भावाभास-भावोदय-भावशान्तिभावसंधि-भावशबलतारूपी विभावानुभावादिबोधसहकारापेक्षः क्रमे सत्यपि वाच्यार्थप्रतीतिसमकालमेव तत्पिण्डीभावपरिणतः सहृदयैरवबुध्यत इति न लक्ष्योऽनुभवितुं शक्योऽर्थबोधक्रमो यत्र स इति व्युत्पत्त्या तथोच्यते। यस्य च भावानामानन्त्यादेकस्यापि रसस्य विविधानुभावमुखेन प्रतीतेर्न विभाजनं सम्भवतीत्येकविध एव।

एष च यत्र परस्याङ्गतामापद्यते तत्र रसवत्, प्रेय., उर्जस्वि, समाहितम् इत्याख्या अलंकाराः सम्पद्यन्ते। यत्र चैते स्फुटायन्ते तत्र गुणीभूतव्यंग्यतैव तेषाम्।

घण्टानुरणनरूपो वाच्येऽर्थे पर्यवसितेऽपि स्वसामर्थ्यमहिम्ना प्रतीयमानोऽर्थो यत्र सोऽर्थशक्तिमूलो ध्वनिर्वस्त्वलंकाररूपः स्वतः सम्भवी, कविप्रौढोक्तिसिद्धः, कविनिबद्धवक्तृप्रौढोक्तिसिद्धश्चेति त्रिविधः। यथापूर्वोदाहृते 'गतोऽस्तमर्कं, इत्यादौ शब्देष्वेकार्थेष्वपि वक्तृबोद्धव्यादिवैशिष्ट्यान्महापुरुषदेहावसानरूपो विपरिणामग्रहात्मको वाऽर्थो बोध्यते। कविप्रौढोक्तिसिद्धो यथा—

सज्जयति मुरभिमासो न तावदर्पयति युवतिजनलक्ष्यमुखान्।
अभिनवसहकारमुखान् नवपल्लवपत्रलानङ्गस्य शरान्॥

अत्र वसन्तारम्भदशा कविकल्पनासिद्धा। एवमेव कविनिबद्धवक्तृप्रौढोक्तिसिद्धोऽपि भवति। एषोऽनुरणनरूपो व्यंग्यः शब्दार्थोभयशक्त्युत्थोऽपि।

अत्र काश्चिन्नवा मान्यता.। तथाहि मम्मटादीनामाचार्याणां मतेन शब्द-शक्तिमूलो वस्तुध्वनिस्तत्रैव भवति यत्र शब्दस्यानेकार्थस्य प्रकरणादिवशादेकस्मिन्नर्थे नियमनेऽभिधायास्तत्र विरतत्वात्तद्भिन्नोऽन्योर्थः कथं बोध्य.। शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव इति नयेनाभिधया पुनर्नार्थान्तरबोधः। तत्र व्यञ्जनैव सहकारिणी भवति यथा 'अन्तरे' इत्यादौ। एतस्मिन् विषये जगन्नाथस्य मतं भिद्यते। तथाहि—अनेकार्थेषु शब्देषु प्रकरणादिबलादभिधायामेवान्यार्थे नियताया पुनस्तदन्यस्यार्थस्य कथं नाभिधया बोध. संभवति तदबोधकपदस्य विद्यमानत्वात्। यथा पयो रमणीयमित्यादौ

पांसुरपादाः प्रथमं प्रसंगेन पयसो जलमेवार्थं गृह्णन्ति पश्चाच्च दुग्धगतं तात्पर्यं-वुध्यन्ते। प्रकरणज्ञानेनान्यार्थ-बोधप्रतिवन्धे सति जलाभावेऽपि तत्र जलग्रहणं न सभवेत्।

अतस्तन्मते योगरूढस्यलेऽभिधया रूढार्थविबोधे सति योगजार्थस्य न व्यञ्जना विना बोधः सभवति। यथा—

अबलानां श्रियं हृत्वा वारिवाहैः सहानिशम्।
निष्ठन्ति चपला यत्र स कालः समुपस्थितः॥

अत्राबला-वारिवाह्-चपला-शब्दाः स्त्रीमेघविद्युत्सु योगरूढा इति न केवलं योगशक्त्याऽशक्तानां धनमपहृत्य जलवाहकैः पुरुषैः सह पुंश्चल्यो रमन्त इति विशेषार्थस्यबोध. संभवति। अतो रूढार्थस्याभिधया बोधे सति द्वितीयस्य यौगिकार्थस्य व्यञ्जनया बोधः।

अन्यच्च। जगन्नाथो रसभावादीन् लक्ष्यक्रमव्यंग्यानपि मनुते यत्र तेषां प्रतीतिः विभावादिपर्यालोचनसापेक्षा भवति, परं तत्र वस्तुरूप एव ध्वनिः।

यथा— एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती॥

अत्र कुमारीस्वाभाव्यादन्यथाऽपि लीलापत्रगणनस्य संभवात् पर्यालोचन-सापेक्षा अनुभावाश्रिता लज्जाहर्षप्रतीतिरिति वाच्यार्थापेक्षया व्यंग्यस्य स्पष्टः पूर्वपश्चाद्भावितारः क्रम.। परं तस्य वस्तुव्यंग्यतास्वीकारे न रसादीनां लक्ष्यक्रमत्वं सिध्यति।

इतिहास—ध्वनेर्बीजानि रामायणादौ प्राचीनकाव्येऽपि वर्तमानान्यपि नाचार्यै-निरूपितान्यासन्। तथाहि—'रविसंक्रान्त०' इत्यादौ पद्येऽत्यन्ततिरस्कृतवाच्यस्य ध्वनेः सत्त्वं पूर्वं दर्शितमेव। महाभारते च—

धृतिः क्षमा दया शौचं कारुण्य वागनिष्ठुरा।
मित्राणां चानभिद्रोहः सप्तैता. समिधः श्रिय॰॥

अत्र समिच्छब्देऽत्यन्ततिरस्कृतवाच्यो ध्वनि॰। भामहादिभिराचार्यैस्तु वक्रोक्तिलक्षणप्रसंगे संकेतितोऽपि न स प्रस्तुत॰। यथा स सन्देहालंकार-प्रस्तावे 'तस्याः पाणिरयं न मारुतचलत्पत्राङ्गुलिः पल्लव' इत्यादौ। अत्र संशयस्योपम्यमूलत्वेनोपमालंकारस्य व्यंग्यतया तत्स्वीकरणमेव, परं न तैरा-चार्यैरस्यार्थस्य विवेचनं व्यधायीति ध्वनिकार एव प्रथम एषा व्यग्यता साधु साधितवान्। स ध्वनिं काव्यस्य मुख्यतम तत्त्वं स्वीकृत्य रसाना व्यग्यता गुणीभावे च तेषां रसवदाद्यलंकारता स्थापितवान्। तस्य सहृदयालोकोप-

नाम्नो ध्वन्यालोकस्य व्याख्या लोचनाख्या निर्मायाभिनवगुप्तो ध्वनिविरोधिना मतानि खण्डयित्वा ध्वनिसिद्धान्त साध्वपूपुषत् ।

पर कतिपये परम्परावादिन आचार्यास्तत्र विप्रतिपद्यन्ते । ध्वनिसिद्धान्तस्य मूल वैयाकरणाना स्फोटवादे सर्वप्रथम दृश्यते । तदनुसारेण प्रथम शब्द. पश्चाच्च घण्टानुरणनाकारेण तदुद्भवोऽर्थोऽपि ध्वनित्वेन स्वीक्रियते । यथाह भर्तृहरि-र्वाक्यपदीये—

'यः संयोगवियोगाभ्यां करणैरुपजन्यते ।
स स्फोट शब्दजाश्शब्दा ध्वनयोऽन्ये सदाहृता ॥'

स स्फोटस्त्वन्त्यबुद्धिनिर्ग्राह्य एव । तद्व्यञ्जका वर्णा अपि ध्वनयः । तदुच्चारणे क्रियमाणे द्रुतविलम्बितादिवृत्तिभेदोऽपि ध्वनिपदवाच्य । एतत्सर्वं वाक्यपदीये—

प्रत्ययैरनुपाख्येयैर्ग्रहणानु गुणैस्तया ।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥
अल्पीयसापि यत्नेन शब्दमुच्चारित मति ।
यदि वा नैव गृह्णाति वर्णं वा सकल स्फुटम् ॥
शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृता ।
ध्वनय समुपोह्यन्ते स्फोटात्मा तैर्न भिद्यते ॥

इत्यादिना वर्णितम् । इत्थ भर्तृहरिणा स्वीकृतेऽपि व्यग्यव्यञ्जकभावे नागेशमन्तरा सर्वेऽपि वैयाकरणास्तत्रोदासत । पर नागेशभट्टेन निरूपितोऽय पक्ष 'मुख्यार्थबाधनिरपेक्षबोधजनको मुख्यार्थसबन्धासबन्धसाधारण प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्ध सस्कारविशेषो व्यञ्जना ' ' (परमलघुमञ्जूषा) इत्यादिना । एव व्याकरणोपन्नोऽप्यय ध्वनिवाद सहृदयालोकादेव प्रवृत्त ।

अस्य विरोधिनस्तु नैयायिका, मीमासका वेदान्तिनश्च । तेषु नैयायिकास्त्रिविधालिगलिगिज्ञानाद् व्यग्यत्वेन निरूपितस्यार्थस्य बोध मन्यते । पर तन्मतेऽनुमाने व्याप्तिज्ञानस्यावश्यकत्वेन व्यग्येऽर्थे च तस्य व्यभिचरिततया न तद्बोध सभवति । यथा 'गतोऽस्तमर्क.' इत्यादौ वक्तृबोद्धव्यादिवैशिष्ट्यवृत्तोऽर्थबोध वय व्याप्त्या सभवति तस्यापदार्थत्वात् । अनुमितोऽप्यसौ सर्वान् प्रत्येवधैव भवेन्न तु प्रतिव्यक्तिभिन्न । महिमभट्टोऽभीषामनुमानवादिना मुख्यो व्यक्तिविवेककार । पश्चाच्च गुणवृत्त्यैव व्यग्यार्थबोध स्वीकुर्वाणा लक्षणाया व्यञ्जनाया अन्तर्भावमकुर्वन्नैयायिका । जयन्तभट्टस्तु काव्यनगतो विलक्षणता स्वीकुर्वन् तस्या अभावे विवादमेव—

'अथवा नेदृशी चर्चा कविभि सह शोभते ।'
'परमगहनस्तर्कज्ञानामभूमिरय नय ॥' इत्याद्युक्त्वा त्यक्तवान् ।

मीमासकाश्चाभिधायामेव व्यजनामन्तर्भावयन्ति । तेष्वभिहितान्वयवादिनोऽन्वयार्थबोधेऽपि तात्पर्याख्या चतुर्थी वृत्ति स्वीकुर्वते निमित्तेन । अन्विताभिधानवादिना वाक्यार्थ एव सकेतज्ञान मन्वानाना मते च पदार्थोऽपि नाभिधाविषयस्तर्हि चतुर्थकक्षागतस्यार्थस्य तया बोध इति नोपपद्यते । वेदान्तिनोऽपि निर्विकल्पकज्ञानेनाखण्डबुद्धिना 'सत्य ज्ञानमनन्त ब्रह्म' इत्यादावखण्डमेव वाक्यार्थं बुद्धिविषय तदर्थं चाभिधामेव समर्थां स्वीकुर्वते । पर सविकल्पकज्ञानदशायामविद्याग्रस्तैस्तैरपि पदपदार्थकल्पना विधेया । तदा च सर्व व्यग्यत्वेनेष्टस्यार्थस्याभिधया प्रतीति स्यात् ।

इत्थ सर्वेषामेतेषा मतानि निरस्तदय ध्वनिसिद्धान्त प्रस्थापितवान् मम्मट । परमाश्चर्यमत्र यद् वक्रोक्तावेव व्यञ्जना स्वीकुर्वाणस्य मुन्तवस्य न चर्चा कुत्राऽपि साहित्यदर्पणाहते । तत्रतांऽपि स्वोपजीव्यस्य काव्यप्रकाशस्यैव खण्डने बद्धपरिकरो वाक्यमयमुक्त्वा विरराम ध्वनिं स्वीकुर्वन्नपि । जगन्नाथस्य तु ग्रन्थ एवापूर्ण इति किं वक्तव्यम् । एव साधीयान् व्यञ्जनामार्ग ।

—०—

भावा हृदयसरोवर्तिन सलिलमिव जीवनमुद्वेल्लयन्ति । प्रभवति च तेषामुद्रेक परीवाहाय । सोऽपि वाचा चेष्टाभिश्च सभवतीति जनसम्मुख तेषा प्रकाशन वाण्या मुख्य प्रयोजनम् । साऽपि ,जाह्नवीव गिरिकुहराज्जनमुखान्नि सरन्ती यथोत्तर पटुप्रवाहा सम्पद्यते महानद्या इव साहित्या स्वरूपमासादयतीति न कस्याप्यविदितम् । साहिती च वैचित्र्याधायिपदार्थनिर्भरा तारुण्यविलासविलासितलावण्यसातिशयकामनीयका कमनीया कामिनीव रसिकाना रसातिरेकान्मनो मदयति । वैचित्र्य च लोकोत्तरमार्गानुसरणेन वैदग्ध्यभगीभणितया । यथा कस्यचिद् गेहेनर्दिन परपराभवगौरोर्भीरुता प्रकटयितु 'ग्रामसिंहोऽयम्' इति प्रयोग । ग्रामसिंहश्च कुक्कुरो य खलु ग्रामेऽकुतोभय स्वबन्धुनरस्त्राञ्जनाश्च दृष्ट्वा वर्धितोत्साहो भपते, पर लगुडहस्ते, प्रबले वा समापतति दन्तानेव दर्शयति, लागूलमेव चालयति । तथाविधा वृत्तिर्नरस्य यथाऽनेन शब्देन द्योत्यते न तथा कुक्कुरशब्दप्रयोगेण । इयमेव वक्रता वचासि रोधयति, चेतश्चमत्करोति, भाव प्रसादयति ।

नात्र शब्दस्य प्रचलितोऽर्थश्चित्ते विश्रान्ति लभत इति तेन लक्षितस्य तत्सम्बन्धिनो भिन्नार्थस्य लक्षणादिय वक्रता लक्षणा वृत्तिरिति प्रसिद्धा । अस्या स्वरूपनिर्वाहाय तत्त्वत्रयमावश्यकम्—मुख्ये सकेतितेऽर्थे बाधोऽसगति , लक्ष्यमाणस्यान्यार्थस्य शक्यार्थेन सह सम्बन्ध , रूढिरन्यार्थसूचनाकार प्रयोजन वा निमित्तम् । तदेवोक्तम्—

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणाऽऽरोपिता क्रिया ॥

अत्रारोपिता क्रियेति विशेषणार्थम् । आरोपस्तयाऽवर्तमानस्य पदार्थस्य तथा वर्तमानेन सहाभेदीकरणम् । यथा सर्वथा भिन्नयोर्मुखचन्द्रयो सादृश्यातिशयमहिम्नाऽभेदीकरण मुख चन्द्र इति । अय चाभेदारोप परस्परसम्बन्धसापेक्ष । सम्बन्धश्चानेकविध, तादर्थ्यात् समवायात् आश्रयाश्रयिभावेन, अङ्गाङ्गिभावेन, स्वस्वामिभावेन, कार्यकारणभावेन सादृश्येन च । यथा चाग्निपुराण उक्तम्—

अभिधेयेन सम्बन्धात् सामीप्यात्समवायतः ।
वैपरीत्यात् क्रियायोगाल्लक्षणा पञ्चधा मता ॥

एषु च सम्बन्धेषु यत्र सादृश्यकृत सम्बन्ध स एव गुणकृतस्तदाश्रिता च गौणी लक्षणेत्युच्यते, तद्व्यतिरिक्ता तु शुद्धा । यथा 'सिंहो माणवक' अत्र मानुष्यकमूल सिंहेन सहानुपपन्नोऽभेदान्वयो माणवकस्य सिंहवत्तिसाहसनिर्भीकत्वादिगुणविशिष्टता लक्षयति, गुणकृतोऽयमारोप । एतदतिरिक्ताश्चान्ये सम्बन्धा यत्र भवन्ति सा शुद्धा लक्षणा,यथा— करशाखविषये 'करोऽयम्' इति प्रयोग । यथा वा 'गगाया घोष' इत्यत्र सामीप्यसम्बन्धात् गगाशब्दस्य तीरपदे लक्षणा ।

एषा च क्वचित् सकेतितमर्थमपरित्यज्यैवार्थान्तरबोधनस्थले भवति, परत्र च यदा शब्द. स्वार्थं सर्वथा परित्यज्यान्यार्थं प्रकटयति । यथा—

स्निग्धश्यामलकान्तिलिप्तविषतो वेल्लद्बलाका घना
वाता शीकरिण पयोदसुहृदामानन्दकेका कला ।
काम सन्तु, दृढ कठोरहृदयो रामोऽस्मि सर्वं सहे,
वैदेही तु कथ भविष्यति हहा हा देवि धीरा भव ॥

अत्र वक्तु रामस्य स्वविषये 'रामोऽस्मी'ति कथन न सगच्छत इति सीतानिर्वासनवनवासक्लिष्टसहिष्णुत्वादिविशिष्टरामत्वे लक्षणा । अत्र रामशब्दो न स्वमर्थं जहातीति साऽजहल्लक्षणा, उपादानलक्षणा वा कथ्यते । स्वार्थं सर्वथा परित्यज्यार्थान्तर प्रकटयति शब्दे तु जहल्लक्षणा लक्षणलक्षणा वा भवति । यथाऽत्यन्तमपकारिणि प्रति—

उपकृत बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे सुखितमास्स्व सत शरदां शतम् ॥

अत्रापकारिणि न घटतेऽयमर्थ इति नितरामपकृत त्वया मम कि वक्तव्य तवौदार्यस्य विषये । न त्वादृशा जीवनार्हा इति विपरीतोऽर्थोऽत्र बोध्यते ।

एषा लक्षणा स्वचन लक्ष्ये लक्षिते च शब्देन गृहीतेऽन्यत्र च लक्षिते लक्ष्येण ग्रस्ते भवति । तदा पूर्वास्मिन् स्थले विषयविषयिणो सत्वे सारोपा, परस्मिन् च साध्यवसाना । यथा—'आयुर्घृतम्' । अत्रायुष्कारणे घृतमित्यर्थे द्वयोरभेदेनेति । घृतस्यायुषा निगरणे तु सैव साध्यवसाना ।

लक्षणा च रूढे प्रयोजनाद् वा भवति । रूढौ यथा 'वदति विसिनीपत्रप्रयनम्' इत्यादौ वदति क्रिया चेतनधर्मेणि रूढा विसिनीपत्रशयनयोऽचेतनेऽसगच्छमाना बोधयत्यासि सदामति । यत्र तु किमपि प्रयोजन प्रकटयितु लक्षणोपास्यते तत्र प्रयोजनवती ।

यथा पूर्वोदाहृते 'स्निग्धश्यामलकान्ति' इत्यादौ रामोऽस्मीति लक्षकशब्दस्य प्रयोगो हृदयस्य कठोरतातिशयं व्यनक्ति । प्रयोजनञ्चेदं व्यञ्जनयैव बोध्यम् । यथा—

लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम् ।
यया प्रत्याय्यते सा स्याद् व्यञ्जना लक्षणाश्रया ॥ (सा. द. २)

न चेदं पुनर्लक्षणया बोध्येत, शब्दबुद्धिकर्मणा विरम्य व्यापाराभावात् । अस्तु नाम वादिसन्तोषः । परं न तत्र लक्षणाया प्रसक्ति । यतो नात्र मुख्यार्थे बाधः; न च रूढिप्रयोजनयोरन्यतरन्निमित्तम् । नापि प्रयोजन-विशिष्टे लक्षणा, तदापि प्रयोजनान्तरमपेक्षितं स्यात् । तद्विशिष्टेऽपि लक्षणास्वीकारे पुन. प्रयोजनमिति नितराम-नवस्थाप्रसगः । अत एवोक्तम्—

लक्ष्यं न मुख्यं नाप्यत्र बाधो योग. फलेन नो ।
एवमप्यनवस्था स्यात् सा मूलक्षयकारिणी ॥ (का. प्र. २)

प्रयोजनवत्यपि व्यंग्यस्य गूढत्वागूढत्वेन द्विविधा । एवं मम्मटोक्तानुसारेण-लक्षणा प्रथमं रूढा प्रयोजनवतीति द्विविधा । द्वितीयाऽपि शुद्धा गौणी चेति द्विविधा । गौणी च सारोपा, साध्यवसानेति पुनर्द्विधा । शुद्धा स्वरूपादानलक्षणा लक्षण-लक्षणेति च द्विप्रकारा सती पुनः सारोपा साध्यवसाना चेति द्विविधा । एवं षट् प्रयोजनवत्या एकश्च रूढ्या इति सप्तसु भेदेषु पुनः प्रयोजनवत्या गूढव्यग्यत्वेनागूढव्यग्यत्वेन च द्वौ भेदौ । एवं सपीड्य प्रयोजनवती द्वादशधा, रूढा त्वेकविधैवेति लक्षणा त्रयोदश-विधा । विश्वनाथस्तु लक्षणा गौणी शुद्धा चेति द्विविधा पुनारूढा प्रयोजनवतीति कृत्वा चतुर्धा, तत उपादानलक्षणा लक्षणलक्षणा चेति साऽष्टधा । ततः सारोपा साध्यवसाना चेति षोडशधा । पुनः प्रयोजनवत्या व्यग्यस्य गूढत्वागूढत्वाभ्या द्वौ भेदा-विति सा षोडशधा । प्रयोजनस्य धर्मगतत्वेन धर्मिगतत्वेन च द्वैविध्यमिति द्वात्रिंशत्-प्रकारा तदाश्रया । रूढाया अष्टाभिर्भेदैः सह मिलित्वा चत्वारिंशद् भेदाः । पुनर्लक्ष-णायाः पदवाक्यगतत्वेनऽशीतिधा सा इति स्वीकरोति ।

केचिच्च लक्षणाया. जहदजहत्स्वार्थाख्यं तृतीयं भेदमपि स्वीकुर्वन्ति । क्वचिदशे-ऽर्थत्यागः क्वचिन्नेति तस्य मूलम् । परं नैतत्स्वीकारस्यावश्यकता । जहत्स्वार्थायामेव तस्य अन्तर्भावात् ।

लक्षणाया. स्वरूपविषयेऽपि त्रिविधा विप्रतिपत्तयो विदुषाम् । तथाहि तत्र प्राचां मते लक्षणायाः परिभाषा—

शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता ।
अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते ॥ (अभिधावृत्तिमातृका)

इति । अन्येषां च लक्षणंश वयसम्बन्धेनाशक्यप्रतिपत्तिरिति । कुमारिलभट्टस्य लक्षणं तु—मानान्तरविरोधे तु मुख्यार्थस्य परिग्रहे ।

अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते ॥ इत्यस्ति ।

केचित्तु शक्ये शक्यतावच्छेदकारोपमेव लक्षणां स्वीकुर्वन्ति । अन्ये च वक्तुस्तात्पर्यमेव । अन्वयानुपपत्तिः तात्पर्यानुपपत्तिर्वा लक्षणेत्यपि मतम् । परमस्ति किमप्यत्रारस्यम् । तथाहि—

यदि वाच्यार्थसम्बन्धेनान्यार्थस्य स्मरणमेव लक्षणेत्युच्यते, तत्तु नोचितम् । तथाहि स्मरणं स्वयमपि ज्ञानम् । अर्थबोधस्य कारणं न ज्ञानमपि तु वृत्तिः । सा च सम्बन्धविशेषः ।

कुमारिलस्य लक्षणेऽपि च वाच्यार्थस्याविनाभावेनान्यार्थज्ञानमेव लक्षणेति स्वीकृतम् । अतस्तत्रापि पूर्ववदिलेवापत्तिः । शक्यतावच्छेदकस्यारोपोऽपि न तावल्लक्षणा । तादृशारोपस्वीकारे हि—

कचतस्त्रस्यति वदनं वदनात् कुचकुड्मलं विभेति ।
मध्याद् बिभेति नयनं नयनादधरः समुद्विजति ॥

अत्र न लक्षणाया उपयोगः । तथाहि पद्येऽस्मिन् कचानां राहो, मुखस्य चन्द्रे, कुचकुड्मलस्य कमले, मध्यस्य सिंहे, नयनस्य मृगे, अधरस्य च पल्लवार्थे लक्षणा । आरोपे चारोपणीयेन सहारोपितस्याभेदप्रतीतिर्भवति, सत्यां चाभेदप्रतीतौ लक्षिता राहुप्रभृतयः केशाद्यभिन्ना एव भवेयुः । ततः प्रस्तुतं तात्पर्यमेवापह्न्येत ।

नापि तात्पर्यं लक्षणा, वक्ष्यमाणे हि मते तात्पर्यानुपपत्तिरपि लक्षणाया कारणत्वेन मता । परं स्वयं तात्पर्ये लक्षणारूपेण स्वीकृतेऽनुपपत्तेर्मूलमेवोपहन्येत । मुख्यार्थस्य बाधोऽपि लक्षणाया मूलत्वेन स्वीकर्तुं न शक्यः 'काकेभ्यो दधि रक्ष्यताम्' अनाव्याप्तेः । अत्र हि न तावद् वाच्यार्थबोधे कोऽपि बाधः । परं वक्तुस्तात्पर्यं न सिध्यति । दध्युपघातकेभ्यो हि दध्नोऽत्र रक्षणमभीष्टम् । तात्पर्यानुपपत्तिश्चात्र विद्यत एव ।

परं तात्पर्यानुपपत्तिः किरूपा ? वाच्यार्थधर्मस्तात्पर्यान्वयविषयीभूतो वा धर्मो यत्र पृथक् स्यादथवा मुख्यार्थत्वविशिष्टस्याभावो भवेत् । तत्र नाद्यः, तथा सति न लक्षणायाः प्रयोजनम्, गंगायां घोष इत्यादौ गंगाशब्दस्य मुख्यार्थधर्मो गंगात्वम्, तस्य तात्पर्यविषयीभूतोऽन्वयः प्रवाहादिना स्यादेव । एवं च गंगातटस्थ घोषस्य घाधाराधेयसम्बन्धवत्त्वातयोरन्वयः, स धर्मश्च तटे वर्तते, तद्विशिष्टं च गंगात्वम्, तत्र हि शैत्यं पावनत्वं च तिष्ठतः । एवं गंगायां तात्पर्यविषयान्वयित्वविशिष्टत्वं गंगापदे वर्तत एव । एवं मुख्यार्थतावच्छेदकरूपेण तात्पर्यानुपपत्तावेव लक्षणेति सिद्धम् ।

यथा गंगायां घोष इत्यत्र मुख्यार्थो गंगा तद्धर्मो गंगात्वम्, तस्य विशेषणं च तटः। घोषस्य तेन सम्बन्धेन न गंगापदेन सहाधाराधेयसम्बन्धाकारकोऽन्वय इति तात्पर्यानुपपत्तिः। अतो नान्वयानुपपत्तिर्लक्षणाबीजम्, मीनशैवालप्रभृतिभिः सहापि गंगापदस्यान्वयसम्बन्धात्। न च केवलं तात्पर्यानुपपत्तिरेव लक्षणा बीजम्, तमाहि वक्त्रा किमपि कथिते यत्र कुत्राऽपि तात्पर्याभावे लक्षणा स्यादिति रूढि-प्रयोजनयोरेकतरस्यावश्यमपेक्षितत्वम्। अतः शक्यसम्बन्धो लक्षणेति लक्षणं सगतम्। तस्याशयः—शक्येन मुख्यार्थेन सह सम्बन्धे सत्यशक्यार्थप्रतीतिर्यदा भवति, स व्यापारो लक्षणा। इदं जगन्नाथस्य मतम्। विश्वनाथस्य लक्षणमपि नासंगतम्। यथा—

मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद् वासौ लक्षणा शक्तिरर्पिता॥ (सा. द.)

एतदनुसारेण मुख्यार्थे वाच्यार्थेऽविश्रान्तिमूले बाधे तेन चलज्जलप्रवाहरूपेण गंगापदेन सह सामीप्यसम्बन्धेन युक्तोऽन्योऽर्थस्तटाकारको लक्षणया बोध्यते। तात्पर्यानुपपत्तिश्चात्र लक्षणाया मूलम्। एवं लक्षणाभिधावबोधितेऽर्थे तात्पर्यानधिगतावेव भवतीति साऽभिधापुच्छभूतैव। तस्याः प्रयोगं च भाक्तं गुणवृत्तिं वदन्त्याचार्याः। परं भक्तिर्गुणवृत्तिर्वा विशेषेण सादृश्यमूलाया लक्षणायां भवति। सा च रूपकालंकारस्यातिशयोक्तेश्च मूलम्। शुद्धा लक्षणा तु प्रयोजनवती ध्वनेरविवक्षितवाच्यस्य बीजम्। अतः काव्यकृद्भिः सततं सोपयुज्यते चमत्कारि च तदन्वितं काव्यं सम्पद्यते।

—०—

काव्येषु नाटकं रम्यम्

यथा मानवस्य भौतिकमुदन्तजातमितिहासः स्फुटीकरोति, 'तथैव तदीयान् नहि नहि, समेषामपि प्राणिनां मानसान् व्यापारान् विशकलयति साहित्ती। तस्यां हि स्थूल-कार्याणां मूलभूता भावा एवं प्रकाश्यन्ते। साहित्ये च विशालवाङ्मयाभिन्ने नव-नीतमिव दुग्धस्य काव्यं तस्य सारः। तद्धि रम्यतमं मनोवृत्तीरुपाश्रयति। तत्रापि नाटकं रूपकमिति यावत्, सर्वाधिकं रमणीयमुच्यते। काव्यस्य हि दृश्यश्रव्यत्वेन द्वैविध्ये दृश्यं रूपकम् तत्र नटेऽनुकार्यवस्तुन आरोपात्।तथाहि—

'तद्रूपारोपात्तु रूपकम्'। (सा. द.)

वस्तु, नेता रसश्चेति त्रयाणां तत्त्वानामुभयत्र सामान्येन स्थितावपि चतुर्थमभि-नयात्मकं तत्राधिकम्। अभिनयश्च तावदवस्थानुकारः। लोके मानवस्य परिस्थिति-विशेषेषु यादृशी स्थितिः संभवति सा रूपके दर्शकाणां पुरतः प्रस्तुता सती व्यतीतमपि वृत्तं प्रत्यक्षं कारयति। प्रकृतिसिद्धं चैतत्। घटितपूर्वा शब्दजालेन वर्णिता रोचिका-ऽपि घटना न तथा वशीकरोति मनो यथा स्वल्पमपि पुरस्ताद् वृत्ता। दिने दिने स्वभा-वोपनता घटना न जनेन लक्ष्यते न च समष्टिरूपेण तथा गण्यते। परं सैव यदा रंग-पीठेऽनुकर्तृभिस्तथैव प्रस्तूयते विविधभावव्यंजनाभिः सह, प्रत्यक्षायिता कामप्यपूर्वां सविदं वेदयति सामाजिकान्, निमज्जयति परमानन्दमहोदधौ, विस्मारयति स्वपर-संविभागस्य, लुम्पति यथार्थजीवनस्य द्वन्द्वान्।

सर्वव्यापिन आनन्दमयस्य प्रकाशात्मनो ब्रह्मण एवांशो लोकाधिकरणो जीव इति वेदरुपनिषद्भिश्चोदितम्।

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरेकः पिप्पलं स्वाद्वत्ति, अनश्नन्नन्यो अभिचाकशीति॥

अयं कर्मफलभोक्ता जीव इन्द्रियाणि समनास्यधिष्ठाय जगति विद्यमानोऽपि न परमानन्दमयीं स्वस्थितिं सर्वथा विमुञ्चति। तां लब्धुमेव निरन्तरं प्रयतते। कलानां

विकासेन, सौन्दर्योपासनेन, ऐन्द्रियोपभोगेन, विविधैर्विलासराशिभिरानन्दमेवायमनुबुभूषति। तत एवोक्तम्—

'रसो वै सः। रस ह्येवायं लब्ध्वाऽऽनन्दी भवति'।

अतएव स मनो रञ्जयितुं विविधानि साधनानि समन्तादन्वेषयति। एतां प्रवृत्तिमभिजानद्भिर्विपश्चिद्भिराचार्यैः काव्ये नाटके विशेषतो रसपरिपाको मुख्यत्वेन स्वीकृतः। स एव प्रधानं प्रयोजन परनिर्वृतिरूपम्। नाटके च तस्य साधु समास्वादो भवति विविधस्य लोकवृत्तस्य तत्र परिचयः। देवा मानवा अमानवास्तिर्यञ्चः सर्वेऽप्यनेन रसाप्लुता: क्रियन्ते। कालिदासस्तावदस्य महत्त्वं साधु गीतवान्—

देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरं स्वाङ्गे विभक्तं द्विधा।
श्रैगुण्योद्भवमत्र लोकचरितं नाना रसं दृश्यते
नाट्य भिन्नरुचेर्जनस्य बहुधाऽप्येकं समाराधनम्॥ (माल० १।४)

कीदृशमुदात्तस्वरूपमुपवर्णितमत्र कविना नाट्यस्य! नाटकं च तस्यैव प्रकार इति न तावद्विद्यते। रूपकमेव तस्याभिप्रायः।

आर्याणां संस्कृतिर्वेदमूला। सर्वा अपि प्रेरणास्तत एव गृह्यन्ते तैः। अत एव नाट्यमपि तत एवोद्भूतमिति प्रतिपादित भरतेन—

"जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि'॥१।१॥

पञ्चमवेदत्वेन चास्य नाट्यस्य महिमा गीतः। सर्वप्रथममिन्द्रध्वजमहोत्सवे तस्य प्रयोग इति नाट्यशास्त्रे वर्णनम्—

अयं ध्वजमहः श्रीमान्महेन्द्रस्य प्रवर्तते।
अत्रेदानीमयं वेदो नाट्यसंज्ञः प्रयुज्यताम्॥ (ना० शा० १।२१)

लोकवृत्तसारसंग्रहस्य विद्यमानतया न किमपि परिहीयतेऽत्र। ब्रह्मण उक्तिरेवेदं साधयति—

भवतां देवतानां च शुभाशुभविकल्पकः।
कर्मनाट्यमयापेक्षो नाट्यवेदो मया कृतः॥
नैकान्ततोऽत्र भवतां देवानां चापि भावनम्।
त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्॥ (ना. शा. १।७२-७३)

यत्किमपि लोके दृश्यतेऽनुभूयते, श्रूयते वा, तदखिलमपि प्रत्यक्षतामापद्यते सामाजिकानामिति कथ न भवेत्तपा परितोषः। अत्र हि क्वापि द्वन्द्वः, क्वचित्क्रीडा, क्वाऽपि व्यवहाराः, क्वापि साम्यम्, कुत्रापि परिहासोऽन्यत्र युद्धम्, इतो विनयोऽत्र वधः

प्रदर्श्यते। धर्मिणा धर्माचरण, कामिना च कामेष्वासक्ति (१।७३ ७४) विविधभावाना जीवनस्य दशाना ज्ञापक लोकस्य वृत्तस्य यथावदनुकरणमेतस्मिन् (१।७) न केवलमवस्या-प्रत्यक्षीकरणमत्र, सन्मार्गप्रवर्तन धृतिप्रदान चार्तानाम्। गरीयसा लघीयसा मध्य-माना च मनोरमणद्वारेण शिक्षाप्रदम्, सर्वेषामपि दु खिना वा विश्रान्तिदम्। शास्त्रम्, शिल्पम्, सकला अपि विद्या, निखिला अपि कला, योग, कर्म वाऽत्रोप तत्र निबध्यते। (१८-८२) नेद स्वोपज्ञ तावत्, लोकस्य प्रवृत्तिरेव याथार्थ्येनात्र सुखदु खमयी साभिनया नाट्ये प्रस्तूयते। अतएव प्रकृतिरत्र वर्ण्या लोकधर्मी नाट्यधर्मीति च द्वैविध्येन वर्णिता। सा च याथार्थ्येनाविसवादिनी लोकधर्मीति कलाविन्यासेन रुचिरीकृता च नाट्यधर्मीति प्रतिपादिता। तेनैव हि रसप्रतिपत्ति।

जीवन नैकधा सर्वेषाम्, उत्थान पतन च, सुख दु खम् च, हासो रोदन च, प्रेम घृणाऽपि, रोष प्रसादश्च, हर्ष शोकोऽपीति वैविध्य तत्र। एकस्यैव जीवने ता सकला अप्यवस्था, यथाकाल समापतन्ति। तेन न तावन्नाट्य केवलमानन्दमय सभवति। अत क्वाऽपि शृगारस्य, क्वापि करुणस्य, आरभ्य च वीरस्यैव परिपाक क्रियते। न च करुणे प्रधाने सामाजिकाना शोकोदयान्न तत्रानन्दानुभूति, पूर्ववृत्तस्यैव प्रस्तुतीकरणात्, अनुकार्यस्य तत्राविद्यमानतया, नटे च कस्यापि भावस्यासत्त्वात् शोकोदयाप्रसगात्। अभिनयस्य च दर्शनाच्छ्रवणाच्च वासनाकारो भाव सामाजिकाना सहसोद्भावितो हृदय द्रावयन् कामपि परामानन्दमयीमवस्थामनुभावयति। तदा लोक किल विस्मृतान्यानुभवश्चिन्मयी निर्वृतिं परमामास्वादयति।

कटुप्राय खल्वनुभवो जीवनस्य। दैनिके व्यवहारे बहुधा वय जीवितेऽपि खेद भजामस्तद्व्यतिरिक्त च किमपि दिदृक्षाम। अनवसितश्रमश्रान्ता क्षणमप्येक विश्रामसुखमनुबुभूषाम। नेय पलायनात्मिका प्रवृत्तिर्जीवितमुपेक्ष्य, अपितु द्विगुण बलमेवाधीयतेऽनेन। 'मुग्धे चित्ते बुद्धय सस्फुरन्ति'हि। विश्रामार्थिना च मनोरजनस्य साधन किमप्यन्विष्यते। नाट्य च साधिष्ठ उपाय। अनेन तस्य वृत्तिस्तुष्यति। एक श्रमिकोऽपि परिहितराजाहंवस्त्रस्तस्य भूमिका भजन् अनुकुर्वाणस्तस्यावस्था पर तोषमनुभवति परिचिनोति चावस्थान्तरम्। एव स्वात्मविस्तार सपद्यते, हीनता भावना च लुप्यते। व्यग्यात्मकानि रूपकाणि दृष्ट्वा च गृहा धनिकाश्च स्वस्खलितानि साधु विभावयितु क्षमा। विविधैर्दृश्यै कृता विस्मयसृष्टिर्विकासयति लोकस्य चेत।

भावानुसारेणैव करुणप्रधानानि (Tragedies) हास्यप्रधानानि प्रहसनानि (Comedies) एकाकानि (one act plays) व्यग्यरूपकाणि भाणारचै-तामेव प्रवृत्तिमनुरुध्य विहिता। पाश्चात्येषु नाटकेषु सग्रामो वधो भोजन चुम्बनालिग-नानि च रगमचे प्रस्तूयन्ते। पर सस्कृतनाटकाना परम्परा नैतत् साधु मन्यते।

कामं तेषां लोके प्रतिदिनमनुभवः परं समाजः खलु किमपि वैशिष्ट्यमभिकामयते स्वविस्मरणाय। सितां रसयितुमभिलषन् कटुकदूनः पुनस्तस्यैवोपस्थितो खिद्यत एव।

अधुना चलचित्राणि सर्वतः प्रचलितानि येषु गानं क्रीडा, संग्रामः, वधः, दूरादुत्प्लवनं, वायुयानयुद्धम्, पोतभ्रंशः, सेतुध्वंसः, यानपतनम् किंबहुना प्रत्यूतु परिवर्तमानानि प्राकृतदृश्यान्यपि यथाप्येन दृश्यन्ते। कौतूहलस्य मनोरमणस्य च साधीयसी पूर्तिस्तैः सम्पद्यते इति नात्र विवादलेशः। परं न जनो विस्मरति कदापि मच्चित्रमिदम्। न नाटकस्य व्यर्थता तस्यास्तित्वेन साध्यते। परं स्वयमेव मन्दादरा जना नाटकेषु। शोभने सुलभसंसाधने रंगमंचे कुशला अभिनेतारः पटीयसी कृतिमभिनयेयुश्चेत् स्मरेदपि न लोकश्चलचित्रस्य। स्वजीवनस्य प्रत्यक्षायितं यथा नाटकेन न तथा चित्रैः। गानं नृत्यमातोद्यमभिनयश्च चत्वार्यंगानि निपुणं प्रयुक्तानि तिरश्चोऽपि रंजयन्ति का कथा मानवानाम्? अतः साध्विदमुक्तम्—

'काव्येषु नाटकं रम्यम्' इति ।

आदि-कविर्वाल्मीकिः

कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।
आरुह्य कविता शाखा वन्दे वाल्मीकि कोकिलम् ॥

अहो परमकारुणिकस्य स्वप्रतिभाप्रवर्तितकाव्यपीयूषप्रवाहस्य भगवतो वाल्मीकेर्महिमा यस्याद्यापि चरमपरिपाका सरलाऽपि भावगहना, ऋजुरपि नाना-वृत्तकुटिला,वर्णितभुवनाभिरामरामाऽपि योजितोचितविरामा शोभना मृद्वीकापाक-स्फीतरसा कविता वर्षाणामनेकसाहस्र्यामतीतायामपि जगन्मानस स्वरसं सरसी-करोति । निन्दन्तु नाम केऽप्यप्रमाणयन्तो महर्षि पर खिद्यते विश्वोपकारकरणाना तादृशाना प्रतिभाप्रभाकराणामुदन्तमनुपलभ्य । सर्वत्र द्विजोत्तमत्वेन वर्णितोऽप्ययं महर्षिः प्रामाणिकोदन्तालाभादद्य महत्तराणामेव (मेहतर) पूर्वजत्वेन ख्याप्यते इति महतो विस्मयस्य विषय ।

यथानुश्रुति पूर्वमय रत्नाकरनामा विप्रवरभूषणोऽपि दुर्दैववशात् पाटच्चर-वृत्तिमाश्रयन् मार्गकण्टकीभूय पान्थानवलुण्ठ्य तदेव धनमुपजीवतिस्म । कदाचित्तस्य बन्धनमुपगतो देवर्षिर्नारद 'किमिति स्वार्थ-निरतेऽपि परिजने नृशसामुमपराधमाचरसि। तव धनस्य भागमिच्छन्त एते न त्वत्कृतस्य पापफलस्याशभागिन । कथ स्वपरलोक क्लेशयसि पापाचार' इति बोधित कौटुम्बिकैश्च न्यवकृतस्तमेव कारुणिकमूर्षि शरणमगात् । देवर्षिस्तु सकल दुरितापनोदक्षम मन्त्रराज तस्मा उपदिश्य 'कल्याण तेऽस्तु' इत्याशीर्भिस्त नियुज्यायात् । रत्नाकरश्चोन्मुद्रितहृदयचक्षुष्को विरागस्तत्रैव निरुद्धाखिलवृत्तिर्नितरा सयतो रामेति मन्त्रमजपत् । तपोनिलीनस्य तस्य कायो वल्मी-भिरात्मसात्कृतो वल्मीकभावमापेदे । तेन वल्मीकादुत्थित इति वाल्मीकिसज्ञया व्यप-दिष्टो लोकेनेति ।

महर्षित्वमापन्नस्यास्याश्रमपद तमसायाः (टोस) सरितस्तीरेऽवर्तंतेति प्रसिद्धम्। भारतीय-परम्परा प्रथममेन सस्कृतस्य कविं वर्णयति। नात पूर्वं लोके पद्यमुपायुज्यत

देदेप्येव तस्य वृत्ते । तप कठोराणामपि तादृशामृषीणा वीततामस मानस मृदुतम भवतीति विरोधिनी विस्मयजननी च वृत्ति । कदाचित्कुशसमिदाद्यानयनाय वन गतो विहरत क्रौञ्च (बगुला) मिथुनस्य मध्याद् व्याधेन निहत प्रिय क्रौञ्ची च विरहविधुरा करुणकरुण विलपन्ती निभाल्य करुणा—तरलित मना सहसैव शापव-ज्ञायमाणमपि सरसमिद पद्यमुज्जगार—

मा निषाद प्रतिष्ठा त्वमगम शाश्वती समा ।
यत्क्रौञ्चमिथुनादेकमवधी काममोहितम् ॥

अभूच्चायमनुष्टुभ प्रथम श्लोको जगति । तत परमेष्ठिना चोदितो नार-दोदित वृत्तमाश्रित्य स्वोपज्ञ रामायणमापकाव्यमरीरचत् ।

कथेय पश्चाद्वर्तिभि कविभिर्बहुश सूचिता । ध्वन्यालोककृदानन्दवर्धन स्वप्रन्थे व्यग्यार्थं वर्णयन्नलिखत्—

काव्यस्यात्मा स एवार्थस्तथा चादिकवे पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थ शोक श्लोकत्वमागत ॥

भवभूतिरपि स्वनाटक उत्तररामचरिते वृत्तमिद सचिकेत, महाकवि कालिदासश्च सीतात्यागप्रसग उदाहरत्—

तामभ्यगच्छद् रुदितानुसारी मुनि कुशेध्माहरणाय यान ।
निषाद विद्धाण्डज दर्शनोत्थ श्लोकत्वमापद्यत यस्य शोक ॥ (र व)

अय हेतुर्यदसौ सस्कृत आदिकविपद सभाजयति ।

महर्षेरस्य कृति काण्डत्रयनिबद्धा, रामकथाया जगति प्रवर्तिका, रामायणा-भिधाऽऽदिकाव्यसम्मानभागिनी परमरमणीया । बुद्धिवादाकुल आधुनिके जगति यत्र न जन स्वपितयपि विश्वसिति तत्रापि न विश्वसितु कोऽर्हति शाऽस्यादि-काव्यत्वे पर सरससरसया मधुरमधुरया सरलसरलया भावतरलया सहज प्रसृतया *लयाऽऽसमाकृतिमव-धकरोद्ये हृतसहृदयजनमनोमन्थनया रचनया, स्वाभाविकेन* प्रसादादिभिर्गुणै रमणीयतामेवाहति । परिनिष्ठितगेय शैली वल्मीकजन्मनोऽस्मा त्प्रवृत्ता व्यासमपि कृतार्थयन्ती कालिदासकाव्याम्बुधौ समाविशत् । न तत्र पर दृश्यते लाहद्य रामनीयक भजन्तीति विवासवादानुगामिनोऽद्यतनानाह्वयते । रागवद्याऽत्र प्रचा रिता रारम विधाय देशमिम पावयन्ती मानवमानसानि कूलकपव देशान्तराण्यपि पावयामास । चतुर्पु दिक्ष्वपि येन केनापि यथा स्यात्तिमितय यथा भारतीया सस्कृति-मपि तत्र तत्र समादिशदिति महानुपकारोऽनया कृत आर्याणामिति विभावनीय सधीभि ।

बुद्धिवादोपहता पण्डितम्मन्या अनेके जना अद्य रामकथा कपोलकल्पना वाल्मीकिं च शशश्व गायमाण काव्य च खीष्टाब्दारम्भकालिकमेव स्वीकुर्वते । तत्र च—

"यथा हि चोर स तथाहि बुद्धस्तथागत नास्तिकमत्र विद्धि" इत्यादि श्लोके बुद्धनाम्नो दर्शनात्तदुत्तरकालिक केचिन्मन्वते । प्रक्षेपपाठे शाखाबाहुल्येन च रामायणमाकुलता गतमिति नास्ति सन्देह । पर महाभारते रामकथा विस्तरशो वर्णिता, वाल्मीकेर्नाम[1] च तत्रोल्लिखितमिति ततोऽपि पूर्वकृतत्वे रामायणस्य कुत सशय । तेनाऽपि सुतरामस्य प्राचीनता सिध्यत्येव ।

रामायणे रामस्य कथाऽविकला वर्णितेति महाकाव्यकोटिं स्पृशदपि प्रणीततर्पिणाऽऽख्यानपदमेव भजते । उपलभामहे च सकलान्यपि महाकाव्योचितानि तत्त्वानि तत्र । भारतीय साहित्य शास्त्रानुमतानि पाश्चात्यालोचककृतानि च महाकाव्यलक्षणानि तत्र सघटन्त इति चित्रम् । सुनिर्मल, सुबन्धश्च कथा-प्रवाह, पात्राणा चारित्र-वैशद्यम्, निसर्गमधुरा सवादा, युगानुकूला आदर्शा, प्रसादमधुरा भावबन्धुरा नाना-वृत्त-मनोहरा, निर्डम्बरा, निष्कार्ठिन्या च शैलीति कस्य न प्रसादयन्ति चेत इमे गुणा । नारदवर्णितस्य महामानवस्य चारित्र देवभावेऽपि तथा प्रस्तुत यथा लीलामानवोऽय विशिष्ट गुण शील सपन्नोऽस्माक सनिकृष्ट एव प्रतिभातीत्यहो कौशल काव्यबन्धे । न काचिदेतादृशी वृत्तिर्याऽत्र न वर्णिता भवेत् सरला घोरा वा पावनी अपावनी वा । आदर्शे दृष्टिर्न च यथार्थस्य विस्मरति । वस्तुवर्णनेऽतिनैपुण्य महाकवे । अयोध्याया लकायाश्च वर्णनयोर्न मुञ्चति भव्यता किमपि । लकावर्णन यथा—

कैलासशिखरप्रख्याम् आलिखन्तीमिवाम्बरम् ।
दीप्यमानामिवाकाशे काञ्चनैर्भवनोत्तमै ॥
सपूर्णां राक्षसैर्घोरैर्नागैर भोगवतीमिव ।
वप्रप्राकारजघनां विपुलाम्बुधराम्बराम् ॥
शतघ्नीशूलकेशा ताम् अट्टालकवतसकाम् ।
अचिन्तां सुकृतस्पर्शां कुबेराध्युषितां पुरीम् ॥ (सु २ अ)

लकाया अपूर्वा महिम्न विस्मयावहा—

जाम्बूनदमयैर्जालैर् वैडूर्यकृतवेदिकं । मणिस्फाटिकमुक्ताभि प्रवालकृत भूमिभि ॥
तप्तहाटकनिर्यूहै रजतामलपांडुरं । वैडूर्यतलसोपानैर् हाटकान्तरतोरणं ॥
(सु २ अ)

विरह विधुराया सीताया वर्णन मूर्तमप्यमूर्तोपमानै सूक्ष्मायितम् ।

---

१ वन० ८५।३७६ तीर्थयात्रापर्व ।

"कुर्वंती प्रभया देवी सर्वा मितिमिरा दिश ।
ता नीलकेशीं बिम्बोष्ठीं सुमध्या सुप्रतिष्ठिताम् ॥
पीनांचितगुरुश्रोणीं वृत्तोरु सहतस्तनीम् ।
सीतां पद्मपलाशाक्षीं मन्मथस्य रतीमिव ॥

× × ×

तां बुद्धिमिव सदिग्धामृद्धिं निष्पतितामिव । विहृतामिव च श्रद्धामाशां प्रतिहतामिव ॥
(सु १० श्र)

हिमहत-नलिनीव नष्टशोभा व्यसनपरपरयाऽनुगम्यमाना ।
सहचररहितेव चक्रवाकी जनकसुता कृपणा दशा प्रपन्ना ॥

कथ न द्रावा रोदितु न वा दलतु वज्रस्य हृदय वर्णनमिद पठित्वा ? विरागोऽपि महर्षिरय न निरपेक्ष कोमलानुभूतिषु । वियुक्ताया सीताया लक्ष्मणमूर्च्छा जनितसतापस्य रामस्य च विलाप सुतरा ममभित्"। यथा—

हा राम हा लक्ष्मण हा सुमित्रे हा राममात सह मे जनन्या ।
एषा विपद्ये भृशमल्पपुण्या महाऽर्णवे नौरिव वायुनुन्ना ॥
हा राम सत्यव्रत, दीर्घबाहो, हा पूर्णचन्द्रप्रतिमानवक्त्र ।
हा जीवलोकस्य हित प्रिया स्वा वध्या न मा वेत्स्यसि राक्षसानाम् ॥
(सु २२ श्र)

यथा वा—

एष रावणवेगेन लक्ष्मण पतितो भुवि ।
सर्पवच्चेष्टते वीरो मम शोकमुदीरयन् ॥
भ्रातर निहत दृष्ट्वा लक्ष्मण पासु गुण्ठितम ।
किं मे युद्धेन किं प्राणैंपुंद्धकार्यं न विद्यते ।
हा भ्रातर् मनुजश्रेष्ठ शूराणां प्रवर प्रभु ।
एकाकी कृत्य मां त्यक्त्वा परलोकाय गच्छसि ॥

भोजोभूयिष्ठाऽप्युक्तिर्न परिहीयतेऽस्य । युद्धकाण्ड सर्वमप्युत्साहपूर्णम् । वीररौद्रबीभत्सादभुतानामसाधारणी व्यजनाऽत्र । रामस्योत्साहमय श्लोक साधु व्यनक्ति—

अस्मिन् मुहूर्ते न चिर सत्य प्रतिश्रृणोमि व । अरावणमराम वा जगद द्रक्ष्यथ वानरा ।
राज्यनाश वने वास दण्डके परिसर्पणम् । वैदेह्याश्च परामर्श रक्षोभिश्च समागमम् ।
एतद् दुःख महाघोर वलेश च निरामयम् । त्यजयामि सयमेयाऽह हत्वेम राक्षस रणे ।
(यु ८०।८-९)

प्रकृतेर्वर्णने वाल्मीकिरप्रतिम एव। तस्य वर्षर्तुवर्णन सश्लिष्टं सजीव च।

यथा—

रविसंक्रान्तसौभाग्यस्तुषारावृत-मण्डल ।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते॥
स्निग्धैरभ्रायत-च्छेदैर्बन्धु-प्राणमिवाम्बरम् ।
कशाभिरिव हैमीभिर्विद्युद्भिरिव ताडितम् ॥
मत्ता गजेन्द्रा मुदिता गवेन्द्रा वनेषु विश्रान्ततरा मृगेन्द्रा ।
रम्या नगेन्द्रा निभृता नरेन्द्रा. प्रक्रीडिता वारिधरैः सुरेन्द्राः ॥
क्वचित्प्रकाश क्वचिदप्रकाश नभः प्रकीर्णाम्बुधर विभाति ।
क्वचित् क्वचित् पर्वतसन्निरुद्ध रूप यथा शान्तमहार्णवस्य ॥ (रा कि.)

एवमेव शरदृतुवर्णनमपि कमनीयतरम्—

स्निग्ध-गम्भीर-निर्घोषा शैलद्रुम-पुरोगमान् ।
पूरयित्वा महामेघा प्रतिशान्ता महाद्युते ॥
दर्शयन्ति शरन्नद्यः पुलिनानि शनैः शनैः ।
नवसंगमसव्रीडा जघनानीव योषितः ॥
शरत्काले तु काशानां मञ्जर्यो मारुतेरिता ।
धरासवमदक्षीबा विलोला इव योषितः ॥ (रा कि)

चन्द्रवर्णनमपि प्रकृष्टम्—

ततोऽरुण परिस्पन्द मन्दीकृत-वपुः शशी ।
दधे काम परिक्षाम-कामिनी गण्डपाण्डुताम् ॥
या भाति लक्ष्मीर्भुवि मन्दरस्था तथा प्रदोषेषु च सागरस्था ।
तथैव तोयेषु च पुष्करस्था रराज सा चारु निशाकरस्था ॥
हंसो यथा राजति पुष्करस्थ सिंहो यथा सुन्दर-कन्दरस्थः ।
वीरो यथा दर्पित-कुञ्जरस्थश्चन्द्रो विभ्राज तथाम्बरस्थ ॥

वाल्मीकेः प्रभाव—रामायणस्य परममहिम-मूल न केवल काव्यचारुताऽपि तु तस्या प्रभावोऽपि। कति न कवय धृतास्तेन स्ववस्तुसंभारानुकरणे ? रामकथां तत उपादाय कति न काव्यानि दृश्यानि श्रव्याणि च रचितानि ? देशे विदेशे च सर्वत्रादिकवेस्तस्य कीर्ति कथयानया सह प्रसृताऽद्यापि श्रूयते। कविता-विलासिनी-विलास कालिदासस्तु स्फुटमेवास्याधमर्णः। रघुवंशे, कुमारसंभवे मेघदूते च भूमानुभाव कवेः प्रत्यक्ष दृश्य। हनूमतो दौत्यान्मेघदूतस्य कल्पनोदेतिति सिध्यत्यनेन पद्यमात्रेण। तथाहि—

'इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा।' (उ. मे)

एवच—'खिन्न खिन्न शिखरिषु पद न्यस्य गन्तासि यत्र'।

अत्र-'महत्सु शू गेषु महीधराणा विश्रम्य विश्रम्य पुन प्रयान्ति।'

अस्य पद्यांशस्य स्फुट प्रभाव ।

न स सकुचित पन्था येन वाली हतो गत । वचने तिष्ठ सुग्रीव मा वालिपथमन्वगा ॥

अन्यापि—

एकेनैव रणे वाली शरेणाभिहतो मया । समये तिष्ठ सुग्रीव मा वालिपथमन्वगा ॥

इत्यस्यानुकरणम् । अतो धन्योऽयमाद्योऽपि सदा नव सर्वेषा प्रेरणाप्रद कवयता मूर्धन्यो महर्षिर्वाल्मीकिर्यस्यामृतसरसया वाण्या वयमद्याप्यात्मान पुनीमह। काम कालदोषकृता प्रक्षेपास्तस्य कृति सलिलमिव क्षीरे क्षिपन्ति मिश्रणाम्बुधौ तथापि स्वरूपतस्तस्य महिमाऽक्षत एवेति शम्।

कालिदासस्य काव्यसौष्ठवम्

केनापि कविनोक्तमासीत्—

पुरा कवीना गणनाप्रसगे कनिष्ठिकाधिष्ठितकालिदासा।
अद्यापि तत्तुल्य-कवेरभावादनामिका सार्थवती बभूव ॥

एवभूतस्य कविताविलासस्य कालिदासस्य जीवनादिविषये न वय किमपि प्रमाणपुरस्सर जानीम इति महत खेदस्य विषय । भारतीया परम्परा विक्रमसवत्सर-प्रवर्तकस्य शकारातेर्विक्रमादित्यस्य पारिपद्यमेन मनुते। एव च तस्य काल खीष्टजन्मत पटपञ्चाशद्वर्षपूर्व निर्णयते। परमैतिह्यासिका विद्वास नैवविध कचन विक्रम जात-चर स्वीकुर्वते । तेषा मते शकोच्छेत्ता विक्रमादित्योपाधिधारी द्वितीयश्चन्द्रगुप्त एव। एव च कालिदास खीष्टाब्दस्य चतुर्थ्यां शताब्द्या सन्त प्रतिपद्यन्ते । तेषा विचारेण रघुवशे वर्णिताना रघुवश्याना भूपाना मिषेण गुप्तवश्या एव नरपतयो वर्णिता । मातृ-गुप्त इति च तस्य वास्तविक नामेति साधयन्ति । राजबली पाण्डेयस्तु तर्कैरनेकै खीष्टाब्दात्प्राचीन कालिदास स्वीकरोति। कवे रचनासु शैवतत्त्वस्य वर्णनप्राचुर्मात्केचन काश्मीरकमपरे वगभव प्रतिपादयन्ति । तस्य मृत्युविषयेऽपि च विविधा प्रवादा। पाश्चात्यविदुषो वेन्दालस्य मतेन सिंहले कस्याश्चिच्छम्भल्या पडयन्त्रेणास्य कविशि-रोमणेरन्तोऽभूत्। भोजस्य समकालिकमप्येन स्वीकुर्वते जना ।

अस्य कृति-विषयेऽपि मतभेद एव। यद्यपि रघुवशम्, कुमारसम्भवम्, ऋतुसहार, शाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, मेघदूतम् इति सप्त तस्य प्रसिद्धतमा सर्वसम्मताश्च रचना, तथाऽपि श्यामलादण्डकम्, गगाष्टकम्, ज्योतिर्विदा-भरणम्, श्रुतबोध, नलोदयचम्पू, पुष्पबाणविलासश्चेत्येता कृतयोऽपि तत्कर्तृकत्वेन व्यपदिश्यन्ते। केषाचिन्मते समुद्रगुप्तप्रशस्तिर्हरिषेणनाम्ना, प्रवरसेनापदेशेन च सेतुबन्धकाव्य वस्तुत कालिदासेनैव कृते इति विवादस्यैवास्पदम्। क्षेमेन्द्रस्यौचित्य-

विचारचर्चाया कुन्तलेश्वरदौत्य कालिदासकृतमिति लिखितम्। केचित्तु शाकुन्तलस्यैकम्, मालविकादेर्ग्रन्थपट्कस्य द्वितीय ज्योतिर्विदाभरणादिकाव्यवर्गस्य रचयितार च तृतीय स्वीकुर्वन्ति। इत्थ प्रतिव्यक्ति विचारभेदाद् दुश्कोऽस्य कालस्य जीवनादेश्च निर्णय इति विरम्यतेऽस्मात् प्रयासात्। 'वाचो विग्लापन हि तत्' स्यात्। अतस्तस्य काव्यगता कादिचद् विशेषता एवेह प्रस्तूयन्ते।

पूर्वमुल्लिखितमेव यत् कालिदासस्याद्य कृतिसप्तक तत्कृतत्वेन बहुसम्मतम्। तत्र पूर्वास्तिस्र चरम च श्रव्यकाव्यानि।

तत्र ऋतुसहार कवेराद्या कृति। अत्र प्रसादमरसं श्लोकं पढ्त्वा वर्णेन सुन्दर पर न पश्चाद्वर्तिनी प्रौढि भजति। रघुवश कुमारसभवञ्च द्वे अपि भावाना काव्यगुणाना च गौरवेण प्रशस्यतमे रचने। पूर्वस्या लभ्यतेऽपूर्व गाम्भीर्यमादर्शाना बाहुल्य भावानामुदात्तता, वस्तुवर्णनस्य चारुत्व च। व्याम समासरभेत्युभयविधे शैल्यावत्र दर्शनीये एव।

रावणस्यापि रामास्तो भित्त्वा हृदयमाशुग।
विवेश भुवमाप्यातुमुरगेभ्य इव प्रियम्॥ (र व १२।९१)

अत्र कविनाऽल्पीयसाऽनुष्टुभा रावणे प्रहार तज्जन्यो लोकाना प्रमोदश्च वर्णित। महाकाव्ये कथकार वस्तुवर्णनेन, कथाविकासेन चरित्रचित्रणेन च भवितव्यमिति द्रष्टव्य रघुवशे। नात्र कालिदासो भारविवत् माघ इव वा प्रकृतिचित्रणासक्तमना मुख्य कथानक विस्मरति। कुमारसभवेऽपि आदौ षष्ठे सर्गे च हिमाचलस्य वर्णन प्रसगानुपक्तमेव। वसन्तोदयस्य निरूपणमपि प्रकृतस्यकामकृतसम्भुजयोद्योगस्यैवागमिति न स्वतन्त्रम्। मेघदूते तु प्रकृति स्वय चेतनीभूता कथानकस्य पात्रता च गीता।

कवेरस्य कृतय मोद्देश्या एव न तु निरुद्देश्या। कुमारसभवे—'धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ।' इति प्रतिपाद्य जगज्जननीजनकविवाह निरूप्य तत्फल देवसेनापते स्कन्दस्य जन्म वर्णयन् शिवेनैव जगत्कण्टकोद्धरणरूपकार्य भवतीति सूचितम्। रघुवशेऽपि चादर्शप्रतिष्ठाहेतोर्दिलीपादारभ्योत्तरोत्तर रामावधि महामानवाना चित्रण पश्चाच्च क्रमेण ह्रास। राघवभूपच्छलेन प्रस्तुतायामेकावल्या रामचरित नायकायते। तत्र दिलीपस्य रघोश्च चरिते विश्व साहित्येऽपि सर्वथाऽसाधारणे एव।

तस्य नाटकेष्वपि हृदयत्वश्रव्यत्वयोर्गुणा असाधारणीं शोभा पुष्णन्ति। शाकुन्तलस्य विषये कियद्भि समालोचकैर्न प्रदर्शित मादरातिरेक? मालविकाग्नि-

मित्रे विक्रमोर्वशीये च काम ततो न्यूना पर वर्तते काचिदभिनवैव च्छटा। स खलु सौन्दर्यस्य प्रेम्णश्च कवि । तस्य रूपवर्णनान्युदात्तानि । रतेरुद्रेकश्च हृदयानन्दद । कोमलासु भावनासु सुतरा रमते तस्य वृत्ति । तथाऽपि नान्यरसव्यक्तौ भजत्यूनता कस्माच्चिदपि। सर्वेऽपि रसा यथायथ व्यक्ता एव यत्र तत्र ।

तस्य शैल्या भाषायाश्च विषये पर्याप्तमुक्त विद्वद्भि । तस्य वैदर्भी रीति ।

'वैदर्भी कविता स्वय वृतवती श्रीकालिदास वरम् ।'

इति च तत्र विदुषा प्रतिपत्ति । 'श्लेष प्रसाद समता, माधुर्य सुकुमारता। अर्थ-व्यक्तिरुदारत्वमोज -कान्ति समाधय । इति वैदर्भमार्गस्य प्राणा दश गुणा स्मृता' इति दण्ड्युक्तदिशा सर्वेऽपि काव्यगुणास्तस्य कृतिषु लभ्यन्ते । श्लेषादौ शब्दक्रीडाया च न तस्य मनो रमतेऽत एव क्वचिदनुप्रासादीन् विहाय न शाब्दचमत्कारे स कृतादरो दृश्यते । 'सुवशा कालिदासस्य मन्दाक्रान्ता प्रवलगति' इत्येवविधास्तस्यच्छन्दोविषये रसिकानामुक्तय ।

कालिदास खलु भारतीयसस्कृतवैतालिक । न काऽपि रचना तस्यास्तत्त्वानि जहाति । तस्य पात्राणि मूर्तिमन्त आदर्शा । नाटकेषु प्रथमे मालविकाग्निमित्रे काव्य-गुणै सह नाटकीयता समन्वेति । हासस्तु तत्रत्योऽद्वितीय । शृगारोऽस्य सर्वस्वम् ।

विक्रमोर्वशीये चोर्वशीपुरूरवसो प्रेमच्छलेन मन्ये कवि पृथिव्या स्वर्गस्य च सम्मेलन चिकीर्षति । त्रोटकाख्योऽय रूपकविशेषो नातिशय प्रदर्शयति क्वापि। पर वलात्मक वैशिष्ट्य तत्रावश्य लक्ष्यम् । विलासपरोऽस्य नायको मालविकाग्निमित्र-स्येव प्रकृतिकार्य उदासीन इवेति न तस्य चारित्र चारुतमम् । अभिज्ञानशाकुन्तल च कवेरपूर्वा सृष्टिरिति सर्वेषा विदुषा मतम् । शकुन्तलारूपेण कविना नवैवापूर्वा स्त्री-रत्नसृष्टि कृता । प्रभवति चात्र श्लोक —

शाकुन्तले जगति ते कविता विधात ?
शालोदरी प्रणय-भूतल-सप्रतिष्ठा ।
भावातिरेकविहिता नवनाकसृष्टि
सत्य प्रजापतिपद सुकवेर्विधत्ते ॥

नवकुसुमलोभनीय सहज-रमणीय वपु, वनवासगुनमो मुग्धभाव, विकसित-वयो जनितावयवारुण्य तारुण्यम्, अवसरोपसर्पिणेववादरो मन्मथविकार, निसर्ग-शालीनप्रकृतिवधुर गभीरत्व तस्या अनुपम चारित्र गृजन्तितमाम् । हरिणसहचर्यास्तस्या प्रकृत्या सह यया तादात्म्यमदर्शि कविना नान्यत्र तत्सुलभम् ।

सत्यमेताः कृतयः सरसाः सनैपुण्याः सोदारभावाः परं न केवलं ताभि. कालिदासस्य गौरवम्। कांश्चिद् विशेषतास्तस्यानन्यसाधारणयः सन्ति यास्तं सकल-कविमूर्धन्यं साधयन्ति। यथा —

अपूर्वोल्लासदा कविता—कालिदासस्य कविता सौन्दर्यसृष्ट्या पाठकान् उल्लासस्य परा भूमिमधिरोहयति। आनन्दश्चासौ सात्त्विको न भौतिक। यथा शाकुन्तले शुद्धे वासना-प्रायश्चित्तात्मकतपसा विरहाकारेण परमानन्दानुभूतिः। रघुवंशाहते सर्वासामपि कृतीनामानन्द एव विश्रान्तिः।

प्रेम्णः सौन्दर्यस्य च कविः —कालिदास. प्रेम्णोऽद्भुतः कविः। प्रणयस्य ताहशी सवित् केवल भवभूतावेव लभ्यते। परं स दाम्पत्यप्रेम्णश्चित्रणे दक्ष.। कालिदासस्य पूर्वरागोऽपि महत्तर. । उद्रिक्तो यदपि वासनासंपुटेन कालुष्यमयते परं तपसैव तस्य शुद्धतां स्वीकरोति कवि.। मेघदूतमस्य परतरं प्रमाणम्। न शुद्धः प्रणयो मानवं कर्तव्यपथाच्च्यावयति। विरहविकलोऽपि दुष्यन्तः प्रकृतिकार्यं करोत्येव। सौन्दर्यस्य तु सोऽपूर्वः स्रष्टा । न केवलं शकुन्तला, मालविका, उर्वशी, इन्दुमती, पार्वती, यक्षगृहिणी सर्वा अप्येता असाधारणसौन्दर्यशालिन्य.।

तन्वी, श्यामा, शिखरिदशना, पक्वबिम्बाधरोष्ठी,
मध्येक्षामा, चकितहरिणीप्रेक्षणा निम्ननाभिः।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः॥ (मे. दू उ. २१)

यक्षपत्न्याः सकलमपि कामनीयकमत्र पद्ये निबद्धम्। पुरुषपात्राण्यपि ताहशानि।

व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।
आत्मकर्मक्षम देहं क्षात्रो धर्म इवाश्रितः॥ (र. व. १.१३)

अनेन श्लोकेन दिलीपस्य भव्याऽऽकृतिरक्ष्णोः समक्षमाविर्भवति।

शकुन्तला च—अनाघ्रातं पुष्पं, किसलयमलूनं कररुहै—

'रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्ड पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तार कमिह समुपस्थास्यति विधि॥ (शा. २.१०)

अस्ति कस्यचिदेताहशी रूपसृष्टिः? अस्यैव प्रेम्णः प्रभावेणोदारभावानु जनयति सुजनमनःसु महाकवेः कविता।

आदर्शं प्रियोऽपि यथायं वर्णयिता—कालिदास आदर्शप्रिय इति तस्य कृतय स्पष्ट व्यञ्जयन्ति । राज्ञा प्रकृतिपालकत्व स्त्रीणा पातिव्रत, धनिना वदान्यत्वम्, कर्म-पराणा कर्तव्यपरायणत्व सोऽपरिहार्यं मन्यते । तस्य नायकास्तादृशा एव । रघुवशोऽप्यस्य निदर्शनम् । 'सोऽहमाजन्म शुद्धानाम्' इति प्रक्रान्त कवि स्त्रैणे कर्तव्य-पराङ्मुखेऽग्निवर्णे मृते काव्य समाप्नोति । तस्य नायका मानवानामादर्शभूता । दिलीपस्य शासन कवि सुनन्दामुखेन प्रशसति—

यस्मिन् महीं शासति वाणिनीना निद्रा विहारार्धपथे गतानाम् ।
वातोऽपि नासंसयदशुकानि को लम्बयेदाहरणाय हस्तम् ॥ (र व ६७५)

अस्त्यद्यतनाना शासकनामीदृग राज्यम् ? सर्वस्वदाता रघु, प्रजारजनाय प्राण-प्रियामपि त्यजन् राम, विरहविक्लोऽपि प्रजाना प्रेतप्रियबन्धुस्थान आत्मान स्थापयन् दुष्यन्त सर्वेऽपि निदर्शनानि। अग्निमित्र पुरूरवाश्च यदपि न वा भूमि स्पृशत ,पर शाकुन्तले मालविकाग्निमित्रे च यायातथ्य वर्णयत्येव स । राज्ञा प्रकृतिकार्यपरता सर्वदाशसते—

'प्रवर्ततां प्रकृतिहिताय पार्थिव'

तप. समन्वितस्य भोगस्य समर्थक —न स केवल भोगवादस्य समर्थक इति शृंगारप्रियतयाऽनुमेयम् । दुष्यन्त शकुन्तलयोर्वासनात्मकस्य प्रणयस्य दुरन्त दर्शयित्वा तपोऽन्वितमेव सुख विधिनष्टि स । यक्षस्य वियोगोऽपि तादृश एव ।

राष्ट्रीय कवि —भारतस्यैकता तस्यादर्श ।

रथेनानुद्घातस्तिमितगतिना सोर्णजलधि
पुरा सप्तद्वीपा जयति वसुधामप्रतिरथ ॥ (शा ७ ३३)

'आ समुद्रक्षितीशानामानाकरथवर्त्मनाम्' इति च तस्य भावना ।

श्रेष्ठतमो वैदर्भो मार्ग —कालिदासकविता वैदर्भं मार्गमनुसरति नव-नवालकारसज्जिता, कल्पनाविलसिता, प्रसादमरमा, भव्योपमा प्रणयप्रवणाऽपि क्लेशरहिता, इन्द्रवज्रादिचारुवृत्तशालिनी, मनोविज्ञानानुबन्धिनी च यस्य नाह्लादयति हृदयम् । व्यञ्जना-प्रधाना तस्य शैली क्वचिद् व्यासरूपाऽपरत्र च समासरूपा वहति कामप्यसाधारणताम् ।

वर्णनकौशलम्—कविरय यत्किमपि वर्णयति चित्रमिव पुरत स्थापयति । इन्दुमतीस्वयवरस्य, पार्वतीलावण्यस्य, पुराकृतजलविहारस्य, हिमाचलस्य च वर्णनम्, रघुवशे च सागरचित्रणम् कामपि श्रीं वहन्ति ।

प्रकृतिचित्रणम्—न केवलमन्तर्गतायां, भौतिक्या अपि प्रकृतेश्चित्रणे कालिदासोऽनुपमान । वाल्मीकेः परस्तात्तस्यैव काव्य तया वर्णिता प्रकृति । शाकुन्तले तु शकुन्तलाया प्रकृत्या सह सायुज्यमेव कृतमिति चित्रम् ।

सार्वकालिको विश्वजनीन. कवि—कालिदासो न पर भारतीयोऽपि तु विश्व-जनीन कवि । तस्य काव्याना प्रभाव यत्र न दृश्यते । मध्यएशियाभागस्य दण्डिन ओलेवस्थानेऽजन्तास्थगुहामन्दिराणामव भित्ति चित्राणा रघुवशसम्बन्धिना सत्ताऽस्य प्रमाणम् । फ्रेडरिक स्वर्टं (शिलर) नामाऽऽङ्गलकवि स्वकाव्ये 'मेरी स्टुअर्ट' नाम्नि मेघदूताद् भावानाजहारेति समीक्षकाना मतम् । के न प्रशसन्ति तम् । के एस्. रामस्वामी शास्त्री स्वग्रन्थे कालिदासम्—

"Poet of all times and climes and of all minds and moods" इति निर्दिशति । विनयकुमारसरकारनामाऽऽलोचकश्च लिखति—'No body understands Asia who does not understand Kali-dasa—the spirit of Asia.'

(प्राच्यदेशानामात्मभूत कालिदास यो न बुध्यते, न स क्षमस्तेषा प्रकृतिमपि बोद्धुम् ।)

कालिदासादुत्तरकालिकै कविभिर्भारविप्रभृतिभि स्वकाव्येषु स्वयवरादि-वर्णने प्रेरणा गृहीता पर ते निसर्ग-मधुर प्रसाद प्रवण मार्गमुज्झित्वा चमत्कार-प्रिया अजायन्तेति कृत्रिमता तेषा कृतिषु प्रधानतया विलसति । तस्य मेघदूतमनु-कृत्य कानि न दूतकाव्यान्यरच्यन्त, पर कोऽलभत तस्य प्रकृति मरस द्राक्षापाक-सज्ञया विदित नैपुण्यम् । धन्योऽसौ कवि, तस्यैव कविता धन्या या खलु—

शान्ता प्रसाद सुमुखी, रतिलालनीया, भावाभिलोभिनरता, सुरतोत्सुका च ।
श्लक्ष्णा मनक्षणकराधिगुणैश्च मन्दाक्रान्ताञ्चित स्थिर-पदध्वनि-लोभनीया ॥
सूते पुनश्चरति मानस-जन्मनो या भावामृतं शिव विलोचनलोपितस्य ।
आस्वादिताऽपि सतत रसिकैस्तदीय राग समर्धयति नित्य-नवस्वरूपा ॥
सल्लक्षणा मधुर कान्ति विलक्षणा च श्लेष प्रभाव विकला सकलाकलापा ।
सा कालिदास कविता वनितेव भव्या चेतो न रञ्जयतु कस्य रसाभिरामा ॥

—o—

नाटककृत् कालिदासः

कालिदास कविता-विलासो न केवल सरस-काव्यरचना-सौष्ठवेन भारते संस्कृत-कवीना मूर्धन्यता गत, नाप्युत्कृष्टस्य गीत-काव्यस्य मेघदूतस्य कर्तृतया चरमस्य यशसो भाजनम्, नाटककारतयाऽपि स सर्वानपि नाट्यकृतोऽतिशेते। तस्य वस्तूपन्यासकौशल, चरित्रचित्रण, सवादा, देशकालनिबन्धन, शैली, रस परिपाक, अभिनय तत्त्वानि च सर्वाण्यपि निरुपमस्य नैपुण्यस्य निदर्शनम्।

मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तल चेति तस्य नाटक-क्रम। आद्यमन्त्य च द्वे नाटके, द्वितीय च त्रोटक रूपक-भेद। तत्र प्रथममैतिहासिक मिश्र कथानक श्रूयते। शुग वश शासन स्थापकस्य सेनापते पुष्यमित्रस्य पुत्रोऽग्नि-मित्रोऽस्य नायक। मुख्या कथा प्रीति प्रधाना मालविका सम्बन्धिनी सा चाधिकारिकी। वैदर्भस्य यज्ञसेनस्य प्रसग, मिलिन्दस्य यवनेश्वरस्य चाक्रमण वसुमित्रसकाशात्तस्य राजयश्चेति प्रासगिक्य कथा। विदूषक-करे सर्पदशादि-कथा च प्रकरी। राज्ञ्या धारिण्या समीपस्थे चित्रे मालविका समीक्ष्य राज्ञोऽग्निमित्रस्य तस्यामनुराग, विदूषक पद्मनेण साक्षात्करणम्, मिथोदर्शनेन च रते पल्लवनम्, मालविकाया निग्रह, दोलाया पतिन्या धारिण्या पादस्य सहजत्वात् तामेव तपनीमाशोकदोहद-कार्ये नियुङ्क्ते, तस्या पाद-प्रहारेण च शीघ्रमशोकस्य पुष्पितत्व ज्ञात्वा स्वय राज्ञो तामग्निमित्र परिग्राहयति। अस्मिन् काव्ये प्रणयकथा कविकल्पना-प्रसूता अन्या चैतिह्य सम्बन्धिनीति द्वयोर्मिश्रणम्। शृगारस्य प्राधान्येन कौतूहलस्य च रक्षायै कविर्मिलिन्दाक्रान्तिकथामन्ते वैदर्भनिग्रहा-योजन च प्रथम एवाङ्के निरूपितवान्। लक्ष्यमत्र वस्तु योजन पाटव तस्य। विदूषक-रेमुपीकौशल च कथानके द्वन्द्व जनयति वस्तु च जटिलता गमयति। घटनाचक्र च कथाया स्वाभाविके विन्यासे रमयति सामाजिकान्। कथाया पल्लवन प्रीति विपाको-पयोगितयैव कृतमिति समागमोपयिका एव विवर्ता अत्र लभ्यन्ते। प्रथमेऽङ्के दर्शनो-पयुक्त आरम्भो मुख-सन्धिश्च। द्वितीयेऽपि स एव। तृतीये तु यत्नावस्था प्रतिमुख-सन्धिश्च। अशोक-पादाघातन मनोरथपूर्त्या च प्राप्त्याशा। परमिरावरणागमनेन

विघ्नो नयिकाया निग्रहश्च गर्भसंधि योजयति। चतुर्थेऽङ्के चैवैव स्थिति । परं विदूषक-पाटवेन मोक्षे समागमाशा पुनरिरावती प्राप्त्या विघ्न इति जाटिल्यम् । अन्ते चोद्यान-पालिकायास्तपनीयाशोक पुष्पित दृष्ट्वा विस्मय प्राप्ति निश्चिता सभावयति । पञ्च-मेऽङ्के आरम्भ एव तपनीयाशोकदर्शनायामन्थरा नियताप्ति विमर्शसंधि च सपादयति। अन्ते च मालविकाया परिचय-प्राप्तिर्वसुमित्र-विजय समाचाराधिगतेरुल्लासातिशय' । तादृशे हर्षमये वातावरणे मालविका-परिग्रहेण नाटकस्यान्त इति परस्परानुबन्धिनी घटना-परम्परा। एव वस्तु-योजना नाटकोपयोगिन्येव।

पात्रेषु नायकस्याग्निमित्रस्य चरित्र नात्युदात्त धीरोदात्तस्य धीरललितस्य च कोटिं स्पृशति । नृत्यसगीताद्यभिज्ञतया कलाविदय विशेषेण शृगार-निरत.। पर न सर्वथा कार्यभार मन्त्रिषु विसृजतीति न पूर्णतया तस्य सीमान प्रविशति। तथापि धारिण्या 'यदि राजकार्येष्वपीहृश्युपायनिपुणतार्यपुत्रस्य तत शोभन भवेत्' इति कथन तस्य धीरललितोपयोगिता द्रढयति। स दक्षिणो नायकोऽपि शठतामवलम्बते, स्त्रैणोऽपि प्रताप धारयति, विलासपरोऽपि राजकार्यमपेक्षते, अन्यसक्रान्तहृदयोऽपि देवीं बहु मानयति। एव मिश्र तच्चरित्रमादर्शकोटिं स्पृशदपि न याथार्थ्यं परित्यजति। मालविका खलु मुग्धा नायिका नातिविकसितस्वरूपा। तदपेक्षयेरावती स्पष्टव्यक्तित्व-शालिनी, मानवती, प्रगल्भा। धारिणी च धीराऽतिशयोदात्तरूपा। विदूषकश्चास्य नाटकस्य परिहास-निपुणो भोजन-प्रियोऽपि न तन्मात्र-सीमित पाटव प्रत्युत्पन्नमति। नैतद्विधो विदूषकोऽन्यस्मिन् सस्कृत नाटके। सवादास्तु सक्षिप्ता, व्यग्यमया सरसा-श्च। देशकालस्य विधान चावसरोचितमेव। चरित्र चित्रणे मनोविज्ञानस्य प्रयोग साधीयान्।

शैली—नाटकस्यास्य भाषा निर्माणकौशल च सर्वथा रूपकोपयोगिनी स्वरू-पस्य, भावाना स्थितेश्च यथावस्थान साधयत । आभाणकैर्भाषाऽस्य व्यवहार लघु । यथा—'बन्धन-भ्रष्टो गृह कपोतश्चिल्लाया मुखे निपतित,' 'मुग्धे भ्रमर-सबाध इति वसन्तावतारसर्वस्व किं न चूत प्रसवोऽवतसयितव्य,' 'विमर्द-सुरभि-बकुलावलिका खल्वहम्' इत्यादीनि वाक्यानि निदर्शनानि। नाटकीयता च नास्य कथमपि परिहीयते।

अभिनय—नाटकेऽस्मिन्न खल्वदर्शनीयानि दृश्यानि। पञ्चैव चाङ्का, न बहूना प्रावरण सख्या। पद्यापेक्षया गद्यस्याधिक्यं, सरलो वाक्यविन्यास, कथनापेक्षया चेष्टाना प्राधान्य चाभिनययोग्यतामस्य साधयन्ति।

रस—शृगारोऽत्र प्रधानो रस। पर यत्र-तत्र वीरस्य हास्यस्य, अद्भुतस्य, रौद्ररय, करुणस्य चाभिव्यञ्जना वर्तत एव। हास्यमत्रान्य-नाटकापेक्षयाऽति पटीय इति नाटकस्य वैशिष्ट्यम्। मन्ये, युक्तमेवात्मनि विक्रमन् कवि साधिकारमस्य विषये कथयति—

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते मूढ परप्रत्ययनेय बुद्धिः ॥

विक्रमोर्वशीयम्—

त्रोटकाख्येऽस्मिन्नपि रूपके सैव शृंगारकथा । परमत्र रतिर्न केवल रूपावलोकनसमुद्भवाऽपि तु धीर्यानुभववृत्ततोपमूला नायिकायाम् 'पूर्वं वाच्य स्त्रिया राग पुंस परचात्तदिङ्गितं, इति वचनात् । नायकस्य तु सौन्दर्यवीक्षणभवैव । इलाया चन्द्रपुत्राद् बुधाज्जात पुरूरवा नृप केशिना हृता नारायण-तपो निर्मितामुर्वशी नामाप्सरस मोचयतीति सा तस्मिन्ननुरज्यते । राजाऽपि तल्लावण्य-पण्य-हृदय सम्पद्यते । राज्ञ्या त्रौशीनर्या भर्तृ-प्रसादन व्रतद्वारा तस्या उर्वश्या स्वच्छन्दोपभोगाय नायकोऽनुमन्यते । तया सह विहरन् गन्धमादने स्त्रीवर्जित कुमारवन प्रविष्टाया लतारूपेण परिणतायां तस्यां प्रियाया विरह-विधुरो नृप प्रमत्त चेष्टितानि कृत्वा सगमनीय मणि करे कृत्वा पुन प्रेयसी लभते । पश्चात् कुमारस्यायुष प्राप्त्या नाटकस्यान्त । कथेयमैतरेयब्राह्मणे, पुराणेषु, महाभारते च वर्णिता पर स्वप्रतिभया कालिदास स्वोपज्ञामेव ता कल्पयति । केशिनो दानवान्मोचितोर्वशी न केवल रूपेणापि तु पराक्रमेण निर्जित-हृदया जायते । 'दिनाद्दिन परिवर्धमानोऽसौ प्रणयो महेन्द्र-साह्याव्यात्पर पोषमानीतो राज्ञ्यौशीनर्य्यां समागमाय परिकल्प्यते । अत्रापि पञ्चस्वङ्केषु क्रमशोऽवस्थाना सधीनाञ्च योजना विहितेति नाटकावलोकनेन परिज्ञायते । वस्तु चात्र देशकालापेक्षया व्यापकम् । प्रथमेऽङ्के हेमकूटपर्वतो घटनास्थलम्, द्वितीये तृतीये च प्रतिष्ठानपुरे राजभवनम्, चतुर्थे पुनर्गन्धमादनवनम्, पञ्चमे च पुन प्रतिष्ठान-पुरम्, इति नैक-देशव्याप्त कथानकम्, कालोऽपि बहीयानतिवर्तते ।

अस्य पात्रेषु चरित्र चित्रण दृष्ट्या नातीवोज्ज्वल पक्ष । धीरोदात्तोऽपि नायक केवल स्व-प्रणय-व्यापारे लीन इव लक्ष्यते । इन्द्रेण साहाय्यायार्थितस्यास्य महानुभावता यदपि सूचिता पर तस्य लोक रञ्जकपक्षे नितरामुदास्ते कविरिति खेदस्य विषय । स्त्री पात्रेषु चारित्र गौरवेण राज्ञ्येव तावत्सर्वानतिशेते । उर्वशी तु प्रगल्भा नायिका वारागनेव सहजविश्रम्भा पतिविरहभीरुतया जातमपि पुत्र च्यवनाश्रमे निभृत निक्षिपति । वात्सल्य विरुद्धमेतत्कृत्य न जननी-हृदयसवादि । विदूषकस्तु मूढ एवास्य चपलो भोजन प्रियश्च । भूर्जपत्रलोपनमन्तरा न स कथानकस्य किमप्युपकुरुते । परिकल्पना दृष्ट्या खलु महत्त्व विक्रमोर्वशीयस्य । त्रोटकस्यास्य दिव्य-मानुष-मश्रयतया मिश्र चारित्रता नाट्य विधान च पार्थक्यमेव भजेते । चतुर्थेऽङ्के विविधाना जम्भलिकाऽऽक्षिप्तिकाचर्चरिकादीना गीतीना योजना नाट्यशास्त्रानुसार चित्रमेव वृत्तादि सूचने मनो-दशा वर्णने च सौकर्यमाचरति । पाठ्यापेक्षयाऽङ्किकाभिनयस्यात्र बाहुल्यमिति

विशेषेऽपि दिव्यादिव्योभयदृश्योपयोगिनी रङ्गशालाऽपेक्षयते प्रयोगायेति दुष्करताऽभिनये। रसराजस्य परिपाकस्तु प्रकृत्यानुबन्धी वात्सल्य चित्रित परा प्रौढि भजति। परिनिष्ठितस्यापभ्रशस्य योगोऽत्र कालिदास-काले तस्य पूर्णं विकास सूचयति। भाषा तु सुतरा रसोपयोगिनीति न कथनस्यावश्यकता।

अभिज्ञान-शाकुन्तलम्

अत्र तावत्कालिदासस्य कला परमुत्कर्षं व्रजन्ती लक्ष्यते। नादसीया शकुन्तला महाभारतीयेव प्रगल्भा केवल फलाद्याहरणाय याते पितरि स्वजन्मोदन्त स्वयमेव श्रावयति, पुनराज्यप्राप्तिनिष्क्रयेण च रहसंसर्गमाचरन्ती जनक न प्रतीक्षते। न चासौ वाक्कीलवत्सभाया राजान धर्माचरणमुपदिशति। नाऽप्यस्य दुष्यन्तस्चौरो वा महाभारतीय इव सहसा दर्शनसमकाल समागम प्रार्थयते। सभायामागतायाः चाभिजानन्नपि सुत द्वितीया ता कलङ्कभयात्प्रत्याचष्ट। सर्वथा विसवादिनीं सा कथा स्व प्रतिभाया स्वर्णोपलेन लोहमय्यपि काञ्चनायिता। प्रथमेऽङ्के चक्षूरागो दर्शने, वृत्तान्त श्रवणे च चित्तासग सकल्पश्च। अनेवारम्भ कार्यस्य बीजोत्पत्तिश्च। द्वितीयेऽङ्के सैन्यप्रेषणेन यत्न, विदूषकाय वृत्तान्तश्रावणेनाश्रमवासनिमन्त्रणेन च प्रतिमुखसन्धि। तृतीये च द्वयो प्रजागरादि-कृता कामदशा, समागमश्चेति प्राप्त्याशा, भावि-दुर्वास शापेन च वियोग-सभावनया गर्भसन्धि, पचमाङ्कावधि स एव सन्धि। मुद्रिकालाभेन षष्ठेऽङ्के नियताप्तिविमर्श-सन्धिश्च। सप्तमे च फलागमो निर्वहण च। एव कथानकस्य क्रमिको विकास प्रणयस्य स्वाभाविक परिपाक सम्पादयति, सहसा भाविता (चट्ट रोटी पट दाल) तु विघ्नाकाक्षिणी। अत एव तृतीयाङ्क-गत समागमस्यानन्तर पुनर्वियाग पश्चात्तापेन च शुद्धि।

अत्र पात्राणा चरित्र सर्वातिशायि। नायको नायिका चोभे अप्यसामान्ये स्वरूप। नायकश्चेदहंता प्राग्रसरस्तर्हि नायिका मूर्तिमती सहिष्णुता। सा यदि मुनिकन्या तर्हि दुष्यन्तो राजर्षि। सा तपोवन वर्धिता, अभावेऽपि सर्वभोग्य गृहस्थाश्रम मधितिष्ठति। शकुन्तला प्रकृति सात्त्विकता प्रमाणम् दुष्यन्तस्तु छलदम्भपरायणाया नागरसभ्यताया प्रतिनिधि। साध्वीय तुलना विषादीकृता पञ्चमेऽङ्के दारुणं रवेण—

> आजन्मन शाठयमशिक्षितोयस्तस्याप्रमाण वचन जनस्य।
> पराभिसधानमधीयते यैर्विश्वसिति ते सन्तु किलाप्तवाच ॥ (५।२५)

एतादृशी कटुभर्त्सना नान्यत्र सुलभा।

प्रियवदानुसूये च स्वभाव विषमे अपि नायिकाया व्यक्तित्वस्यैवांशाविव यत्र प्रीति प्रतिभा च सहैव विलसत। जी पी भट्टाचार्यस्य वचनमत्र द्रष्टव्यमेव—

"Priyamvada & Anasuya were but the two Shades of her own character—tenderness, imagination and innocence, as moulded by nature amidst her ever charming environments of an isolate hermitage."

"किमत्र चित्र यदि विशाखे शशाङ्कलेखामनुवर्तते" । शकुन्तलाऽत्र प्रकृति-कन्या "A true child of nature" तस्यास्तादात्म्यमेव लताभिर्वल्लरीभिर्वनवासिभिस्तिर्यग्भिश्च । तदेव ते प्रस्थानावसरे वासोऽलकाराणि च प्रयच्छन्ति, वियोगाश्रूणि च मुञ्चन्ति । पालक कण्वोऽपि न केवल होम कषाय-नयनोऽरण्यवासजड श्रोत्रिय, पर निश्छलवात्सल्य निर्भर प्रकृति, गौतमी च तादृशी नैष्ठिकी ब्रह्मचारिण्यपि वत्सलैव । शार्ङ्गरव शारद्वतश्च तापस-युवानौ तपस्तेजसोद्दामस्वभावौ, प्रगल्भौ । तावपि न समप्रकृती, शारद्वतो मितभाषी गम्भीरश्च पर शार्ङ्गरव क्रोधनो घर्षकश्च, पुरोहितो राजकुल सहवासार्जित-नागर धर्मा व्यवहारनिपुण समयज्ञश्च । नात्र नायक पूर्वनाटक द्वय इव केवल भोग परायण कर्तव्य विमुखो वा । दान्त, शान्तो गम्भीर, प्रगल्भ, महानुभाव, धृष्णुरपि विनत, मधुकर-वृत्तिरपि प्रणयनिष्ठ, असन्ततिरपि सहज वात्सल्य, शठोऽपि दक्षिण, मोहग्रस्तोऽपि सतत जागरूक, चपलोऽपि धीरवृत्ति ।

शकुन्तला तु मुग्धा नायिका । भाव प्रवणा सहजशालीना मानिन्यपि परवती, तरलिताऽपि धीरा, भोगोत्सुकाऽपि तापसी, प्रणयमूढाऽपि विवेकिनी, ह्रीमन्थराऽपि सहजाततेजस्विनी, वासना कलुषिताऽपि निसर्गपूता ।

सवादा अत्रापि चारित्रस्य प्रसगस्य चानुकूला व्यञ्जनामया सक्षिप्तारच । गद्यापेक्षयाऽत्र पद्यस्य बाहुल्यम् । देशकाल सम्बन्धिन्येकता तु नात्राऽपि । कण्वाश्रम, हस्तिनापुरम् हेमकूटपर्वतश्चेति त्रीण्यस्य घटना स्थानानि । कालकृत च व्यवधान न स्वल्पम् । भाषाऽत्रोत्कृष्टतमा परिमार्जिता च । भावना कल्पना चानुकूले, अभिनयस्तु मालविकाग्निमित्रापेक्षयाऽस्य दुष्कर एव । रथचालन हस्ये, सिह शिशुना सह क्रीडन चातिकठिनम् । आकाशगमनस्य स्वरूप कथमभिनेय स्यात् ? पुरा भवतु नाम तादृशी व्यवस्था परमद्य तु चलचित्र एव सा राभाव्यते ।

रसश्चात्रापि शृङ्गार एव । अन्ये तु यथास्थान पोषका एवाङ्गत्वेन व्यज्यन्ते । इत्थ नाटकत्रयस्य स्वरूपे सामान्येन विवेचिते सति कानिचिद् वैशिष्ट्यानि तस्य नाट्यकारतया सर्वोत्कृष्टता-मूलानि । तथाहि—

विश्व जनीन कवि —कालिदास स्वकल्पनया विश्वमात्रसभवानामनुभूतीनां व्यञ्जनां चरति या कस्यापि हृदये समाव्यन्ते । परिस्थितय काम भारत एव

संभवन्ति । क्षीयमहोदस्य कथनानुसारेण स प्रेमानुभूतेः करुणायाश्चासाधारणः कविः । मंकडानलमहोदय स्वेतिहासे लिखति—

'The richness of creating fancy which he displays in his plays and his skill in the expression of tender feeling, assign him a high place among the dramatists of the world.

प्रेमानुभूतेर्मनोवैज्ञानिक विश्लेषण स करोति चतुर्थेऽङ्के शाकुन्तलस्य—

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्पर्युत्सुकी भवति यत्सुखितोऽपि जन्तु ।
तच्चेतसा स्मरति नूनमबोधपूर्वं भावस्थिराणि जननान्तरसौहृदानि ॥
(शा ५।२)

सौन्दर्यस्य चित्रकार. —सौन्दर्य-वर्णने न कोऽपि तमतिशेते । विक्रमोर्वशीये राजोर्वशी दृष्ट्वा विस्मयते—

अस्याः सर्गविधौ प्रजापतिरभूत् चन्द्रो नु कान्ति-प्रद.
शृ गारैकरस. स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजड. कथं नु विषय-व्यावृत्त कौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूप पुराणो मुनि ॥ (विक्र. १।१०)

मालविकाया सौन्दर्येऽपि तस्य शब्दाश्चित्रमिव पुरत स्थापयन्ति । शकुन्तलाया. स्वरूपे तु तस्य कल्पना खगीव लोकान्तर गच्छति सभार-समाहरणाय—

चित्ते निवेश्य परिकल्पित-सत्व-योगाद्
रूपोच्चयेन मनसा विधिना कृता नु ।
स्त्रीरत्न-सृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्या ॥ (शा. २।६)

भोगे योगस्य समर्थक —शृ गार-प्रियोऽपि कविस्तपःपूतमेव भोग समर्थयते । 'धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ।' अयमेव तस्य सिद्धान्त । उपाध्यायस्य भगवच्चरणस्य मतेन प्रथम परिणयोऽत्र वासना मय इति दुर्वासश्छलेन दण्ड एव प्रकृत्या प्रत्याख्यान रूपो निपात्यते । तपोरूपेण पश्चात्तापेन च प्रेम्ण शुद्धौ पुनर्मेलन भवति । मालविकाया विक्रमोर्वशीये च विरह-साधना तदर्थमेव । सतति विवाहस्य परिणाम स्वीकुर्वन् शकुन्तलाया उर्वश्याश्च प्रणय कुमार-भरतयोर्जन्मना सफल दर्शयति । तस्य कला मानवमनस्युत्तमभावजागरण विदधती शाश्वत आनन्द एव नयति जनम् । तस्य लक्ष्य हि—

'ममापि च क्षपयतु नीललोहितः पुनर्भव परिगतशक्तिरात्मभूः ।' (शा भ. वा)

कर्तव्य-प्रिय —न कालिदास स्वपात्राणि कर्तव्य विस्मरन्ति द्रष्टु शक्त । राज्ञो हितञ्च प्रजाना रञ्जने । मालविकायामग्निमित्रस्तत्रोपेक्षावानिव दृश्यते, न यद्यपि मण्डलशासने । विक्रमोर्वशीये भुवनराज्याधिपतेर्नास्ति प्रभुत्व कृत कोऽपि तोष । पर त्रुटिरिय न शाकुन्तले । अत्र राजा विरह विक्लवोऽपि राजकार्य पश्यति, स्वाभाव-दु खेन परस्य कष्टान्यनुमिमीते, आत्मान प्रकृतीना परेतबन्धुस्थाने गणयति, 'अहमिव सतति दु खेन दु खितस्तपस्वी' 'गर्भं पित्र्य रिक्थमर्हति' 'अनिर्वर्णनीय पर-कलत्रम्' इति तस्योदार दर्शनम् । नेदृशी प्रतिपत्ति कस्याप्यन्यस्य दृश्यते । धर्मारण्य प्रति तस्यादर । तपस्विना प्रतिष्ठा, तेषा व्रत लोपप्रतिरोधचिन्ता, आर्तत्राणाय शस्त्रो-द्यमनम् । साधूच्यते—

'कुतो धर्म क्रिया विघ्न सता रक्षितरि त्वयि ।' (शा ५)

कण्वस्य वात्सल्य-पूर्णोक्ति स्ववैकल्य-वर्णन च सर्वस्मिन्नपि सस्कृत-साहित्ये दुर्लभे ।

यास्यत्यद्य शकुन्तलेति हृदय सस्पृष्टमुत्कण्ठया
कण्ठ स्तम्भित-वाष्पवृत्ति कलुषश्चिन्ता जड दर्शनम् ।
वैक्लव्य मम तावदीदृशमिद स्नेहादरण्यौकस
पीड्यन्ते गृहिण कथ न तनयाविश्लेषदु खैर्नवै ॥ (शा ४।६)

शाश्वत सत्यमिह निहित कविना कस्यापि कन्यापितुर्हृदयेन मन्त्रयितव्य विशेषत आर्याणाम् ।

प्रकृतेरुपासक—चेतनेवाचेतनाऽपि नियतिरियमस्माक चिर-सगिनी । कथ तादृश कविस्ता विस्मरेत् । अतस्तस्य पात्राणि तस्या एवाङ्के निर्वृति लभन्ते । विक्रमोर्वशीये नदी प्रणय कुपिता प्रियेव—

तरग-भ्रूभगा क्षुभित विहग-श्रेणि रशना
विकर्षं तो फेन वसनमिव सरम्भ शिथिलम् ।
पदाविद्ध यान्ती स्खलितमभिसन्धाय बहुशो
नदीरूपेणेय ध्रुवमसहना सा परिणता ॥ (विक्र ४।५२)

शकुन्तलायास्तु तया सहात्मीयतैव । सा स्वयमपि लतायिता—

अधर किसलय राग कोमल विटपानुकारिणौ बाहू ।
कुसुममिव लोभनीय यौवनमङ्गेषु सन्नद्धम् ॥ (शा १।२१)

पतिगृहाय प्रस्थास्यमानायै वृक्षा एव वस्त्राभरणान्युपहरन्ति, पिकोऽनुमनुते, मयूरा नृत्य जहति, मृगशिशुर्वस्त्राञ्चे कर्षति, भाविनीं विपद सूचयन्तोऽपि वृक्षा आशीरक्षीन् विसृजन्ति । न ता विना शकुन्तलाया पूर्णता । अतएव दुष्यन्त शकुन्तला-

चित्रे हिमाचलस्य पादाना वर्णन समाचरति । अत एवोक्तमचेतनानपि चेतनीकृतान् पदार्थान् दृष्ट्वा केनाऽपि—

'भावानचेतनानपि चेतनवच्चेतनान्यचेतनवत् ।
व्यवहारयति यथेच्छम्,'

व्यग्यमयी प्रवृत्ति —प्रेम्ण पावनता दर्शयितुकामोऽङ्कत्रये नायकनायिकयो स्खलन दर्शयति, तेन 'The Shakuntalam is Tragedy of errors' (स्खलिताना दु खान्तता) इति कथन सत्यम् । चतुर्थेऽङ्के चन्द्रास्तमन राज्ञोऽहकृतेर्ध्वंस । पचमे च दुष्यन्तो मानवस्यार्विचित्करता (Human Vainity) सूचयति । दिव्ये मारीचाश्रमे तप कृता सफलता ।

शाश्वतान·दे लक्ष्यम्—धर्माविरुद्ध काम भुक्त्वाऽपि स्वपदप्राप्तिरेव जीवस्य लक्ष्यभूता ।

'प्रवर्तता प्रकृतिहिताय पार्थिव सरस्वती श्रुतिमहती महीयताम् ।
ममापि च क्षपयतु नील-लोहित पुनर्भव परिगत शक्तिरात्मभू ।। (शा भ वा)

अतएव भोगेऽपि योग ससाध्य नित्यानन्दमुपदिशत शंवदर्शनस्य सर्वत्र व्यञ्जना ।

कलाना सरक्षणम्—न कालिदास केवल पद्य योजना पटु कवि । चित्र-कलायां, सगीते, नृत्ये च स गृहीतक्षण शाकुन्तले हसवत्या नट्याश्च गीती, विक्रमोर्वशीये चतुर्थेऽङ्के तद्बाहुल्यम्, मालविकाया नृत्यस्य सगीतस्य वर्णन च पुन शाकुन्तले चित्रकर्म तस्य रुचि व्यञ्जयन्ति । मालविकाया इद पद्य नादमाधुर्येण मृदगमिव वाद्यमानमनुभावयति—

जीमूतस्तनितविशङ्कभिर्मयूरैरुद्प्रीवैरनुरसितस्य पुष्करस्य ।
निर्ह्रादिन्युपहितमध्यमस्वरोत्था मायूरी मदयति मार्जना मनांसि ।। (मा ल)

अस्मिन्नाटके तस्य नृत्यनाट्यसगीतादिविषये पारदृश्वता स्फुटतामापद्यते ।

सार्वभौमराष्ट्रस्य चित्रम्—कालिदासोऽखण्डभारतस्य भक्त । इय राष्ट्रप्रियता तस्य कृतिषु गूढा लभ्यते । 'आसमुद्रक्षितीशानाम्' इत्यादर्शस्तस्य । अतएव मारीच —

रथेनानुद्घातस्तिमितगतिना तीर्णजलधि
पुरा सप्तद्वीपा जयति वसुधामप्रतिरथ ।
इहाय सत्त्वाना प्रसभदमनात्सर्वदमन
पुनर्यास्यस्याख्यां भरत इति लोकस्य भरणात् ।। (शा. ७।३३)
इति भरतवाक्ये ।

भूमिस्वर्गयोर्मेलनम्—कालिदासो भूमि स्वर्गेण सख्यभाज दिदृक्षु । अतएव विक्रमोर्वशीये दिव्यादिव्ययो प्रीति शाकुन्तले च स्वर्गभूमौ प्रेम्ण साफल्य देवमानुप-सहयोग यज्ञसस्कृते फल दर्शयति । नहि नहि, देवा एव मानवसहयोगाकाक्षिण प्रदर्शयन्ते । अतएव स्वर्गामिनोऽपि दुष्यन्तस्य पृथिवी प्रत्युदारोक्ति —

शैलानामवरोहतीव शिखरादुन्मज्जता मेदिनी,
पर्णाभ्यन्तरलीनता विजहति स्कन्धोदयात् पादपा ।
सनानात् तनुभावनष्टसलिला ऽर्पोक्ति भजन्त्यापगा
केना युत्क्षिपतेव पश्य भुवन मत्पार्श्वमानीयते ॥ (शा० ७।८)

दूरारोहिणीय कल्पना । कि कालिदासेनापि कदाचिदन्तरिक्षयानमारूढ भवेत् ? 'तव भवतु विडौजा प्राज्यवृष्टि प्रजासु, त्वमपि वितनुयज्ञ स्वर्गिण प्रीणयस्व,' इत्युक्त्या च स 'परस्पर भावयन्त श्रेय परमवाप्स्यथ' इति गीतावचनमेवानुमरति । पर स्मरन् 'क्षीणे पुण्ये मर्त्यलोक विशन्ति' इति कथन पुनर्भव-पणमेवात्यन्तिक श्रेय कामयते ।

कि बहुना, विपुलेनापि प्रबन्धेन न शक्यन्ते गणयितु कालिदासीयनाटकगरि-माण कि तावदेतेन क्षुद्रेण निबन्धेन । स भारतस्य चित्रकार, प्राणदाता, सस्कृते-रुज्जीवयिता । केवल तस्य नाटकानि पठन्ति रस चास्वादयन्ति रसिका । न तत्र निहित शाश्वत जीवनमव समकालिक राष्ट्रस्य व्यापक चित्रच लक्षयितु पारयन्ते । आदर्शमुखी यथार्थ प्रिया च तस्य दृष्टि । अतएव शाकुन्तले पात्रवैविध्य दृश्यते । षष्ठेऽङ्के नगर-रक्षिणोर्नागरस्य च चरित्र धीवरस्य स्वाभिमानपूर्णोक्तिरक्षिणी विस्फार्य पठनीये । न वृथैव कृता समालोचकैरस्य कवेर्भूयसी प्रशसा ।

कालिदास शेक्सपीयरश्च—आग्लभाषाया श्रेष्ठो नाटककार शेक्स पीयरो ऽपि कालिदासवदेव जीवनस्य यथार्थं स्वरूप प्रस्तौति, अन्तर्द्वन्द्व बहिर्द्वन्द्व च, समाज-कृतानि स्खलितानि, अन्यायाश्च, मानुषप्रकृतिसुलभा दुर्बलता साधु निरूपयति, पर स जीवने शश्वदनुभूतचरा अपि तास्तथैव प्रस्थापयन् वेदनामेव मनसि मुञ्चति न कालिदासवत्सुपरिणामदर्शनेन शाश्वतानन्दे रागाब्धिमज्जयितु क्षम । अनेन न स कालिदासस्य साम्य भजते ।

कालिदासो भवभूतिश्च—सस्कृतसाहित्ये नाटककृता बाहुल्येऽपि भवभूतिरेव सरस्वतीविलासेन कालिदासेन सह स्पर्धते । सत्य तस्योत्तररामचरित सुन्दरतर करुण-रसपूरप्लावितम्, मज्जयति तन्नापि शृगारतरगिणी रसिक-मनांसि तरगयति तदपि जन-मनस्स्वनुभूतिरीतिवताम्, पर वर्तते द्वयोर्महद् वैषम्यम् । जी० पी० भट्टाचार्यस्य मतेन

कालिदासः संस्कृते भारतीयकाव्ये चातुर्यं भव्यतां सौन्दर्यं च, भवभूतिरपि तत्रापूर्वां दिव्यतामुदात्ततां च समचारयत्। तस्यैव शब्देषु च—

'As kalidasa is an ideal poet of nature, So Bhavbhuti is an ideal poet of human mind. kalidasa's art is suggestive and graceful like the evernew dawn and that of Bhavbhuti is expressive and eloquent glowing with everflowing solendour like the mid-day sun.'

वस्तुतो भवभूतिर्दाम्पत्यस्य प्रेम्ण. कवि., कालिदासस्तु व्यापकस्य प्रेमतत्त्वस्य। कालिदासो व्यञ्जनाप्रियः, भवभूतिरभिधापटुः। कालिदासः परमरमणीया प्रकृतिमेव वर्णयति, भवभूतिः सौम्या घोरां च। कालिदासो वैदर्भमार्गस्य, भवभूतिर्गौडमार्गस्य कविः। कालिदासस्य वृत्तिषु नवनवा रमणीयता, कलायाश्चरमो विकासो भवभूतेः रचनासु च भावानामुदात्तत्व मनुभूतीना तीव्रता च विद्यत इति द्वयोर्वैभिन्नम्।

सन्ति कालिदासे ऽपि स्खलितानि; स्पृशति तस्य रतिर्वासनाकालुष्यम्, पतन्ति पात्राणि स्वोदात्ततायाः, पद्यबाहुल्येनाभिनये वाचिकत्वव्याप्तिः, समयविभागोपेक्षा, अलौकिकाना (Supernatural) दृश्याना बाहुल्यं च। न चैतानि सूक्ष्मेक्षिकया समीक्षितेषु नाटकेषु तिरोदधति, पर रसपरिपाकेन विस्मरन्त्येव लोकास्तेषामिति शक्तिकृता एव ते दोषाः। अतः सत्यमेव कालिदासो महान् नाटककारः। धन्या मन सुरभारती, धन्येय भारतभूमिरतस्य प्रसूः, धन्याश्च तत्कृतिरसमाधुरीलम्पटा रसिकचञ्चरीका इति शम्।

तावद् भा भारवेर्भाति यावन्माघस्य नोदयः ।
उदिते नैषधेकाव्ये क्व माघः क्व च भारविः ॥

आदिकवेर्वाल्मीकेर्व्यासाच्चोत्तर कालिदास एव काव्यकार्मणज्ञोऽभूदिति समालोचकाना निष्प्रत्यूहा मति ।, तदवधि कवीना कौशल प्रसादामलं कतिपयै शब्दै प्रचुरतरस्य चमत्कारवतश्चार्थस्य प्रकाशने सविशेषम् । व्यञ्जनामयी तेषा वृत्तिर्नातिगूढैर्नातिस्फुटै सरसतमैर्भावै काव्यरस रसयति । श्लेषे, चित्ररचनायाम्, निर्मूलासु कल्पनासु च न तेषा प्रवृत्ति । ध्वनिमयास्तेषा सदुत्तयश्चीनाशुकावगुण्ठितमिव कामिनीवदनमभिनवा कामप्यपूर्वा भावच्छटामभिव्यनक्ति । तदुत्तरकालिका· कवयस्तु विहाय तादृशी प्रवृत्तिमसाधारणीषु कल्पनासु पाण्डित्यप्रदर्शने, बहिरङ्गचमत्कारचणकृतिषु श्लेषाद्यलकारबन्धेष्वतिप्रसक्तवर्णनेषु च सविशेष प्रवर्तन्ते । अस्या परम्पराया आदिम कविर्भारविर्यस्य किरातार्जुनीयनामके महाकाव्येऽर्जुनस्य पाशुपतास्त्रलिप्सोरिन्द्रकीलपर्वतमभि गमन, घोर तप, तुष्टेन छद्मकिरातेन शकरेण सह युद्ध वरप्राप्तिश्चेतीयन्मात्र कथानकमेवाष्टादशभि सर्गैर्विस्तरेण वर्णितम् ।

भारविरय केषाचिन्मते काञ्चीपतेर्विष्णुवर्धनस्य पारिषद्य पश्चाद्वर्तिनो दण्डिनश्च पितामह । तस्य कालश्च खीष्टाब्दस्य षष्ठशतकमित्यैहोलस्थित रविकीर्त्तेः शिलालेखे—

येनायोजि न वेश्म स्थिरमर्थविधौ विवेकिना जिनवेश्म ।
स विजयतां रविकीर्त्ति कविताश्रितकालिदासभारवि कीर्त्ति ॥

इति पद्ये तस्य नाम्न उल्लेखात् सिध्यति । शिलालेखस्य च समय ६३४ तम खीष्टाब्दम् ।

अस्य महाकवे किरातार्जुनीयमित्येकमेव काव्य बृहत्त्रय्यामन्यतम गण्यते। अस्य कथा विश्वकोषात् महाभारताद् गृहीतेति न कस्यापि विवाद ।

अस्यारम्भ कौरवैद्यूतच्छलेन हृतसर्वस्वस्य यथासमयमतिवाहयतो वनवासकाल द्वैतवने निवसत पाण्डवोत्तमस्य युधिष्ठिरस्य पार्श्वे दुर्योधनशासने प्रणिहितस्य वनेचरस्य विदितवेद्यस्य प्रतिनिवृत्तेर्भवति। गते च तस्मिन् निवेदित-रहस्ये निकारस्मृतिकलुषनयना याज्ञसेनी परुष शमशीलता निन्दन्ती शोचन्ती च तस्यारण्यवास दुर्गतिनिवर्तनाय पौरुषावलम्बनाय च नृपति प्रेरितवती। मध्यमपाण्डवश्च वृकोदर ऊर्जस्वलै शब्दैस्तस्या एव वचन समर्थितवान्। तदा नृपो धर्मात्मज. कोपपरीत-मानसमनुज सान्त्वयन् नयाश्रयणात्मक पक्ष पोषयन् सहसा समुपस्थितेन व्यासेन भीष्मादीना प्रतिरयाना पराक्रम प्रकाश्य शिवतोषणायेन्द्रादीना चोपास्त्यै वीरमर्जुन प्रेषयितु समादिष्ट। इन्द्रकील पर्वत गत्वा च घोर तपश्चरति कौन्तेये सहसा माया-किरातोऽरण्यकोलानुसारी प्रादुरास। तन्निमित्ते महासगरे तद्वीर्यतोषितेन शिवेनास्त्र-प्रदानेन सभाजितोऽर्जुन ।

'जय जय रिपुलोक' पादपद्मानत सन् गदित इति शिवेन श्लाघितो देवसघै ।
निजगृहमय गत्वा सादर पाण्डुपुत्रो धृतगुरुजयलक्ष्मीर्धर्मसूनु ननाम ॥

श्रीशब्देन समारब्ध काव्यमिद प्रतिसर्गे लक्ष्मीशब्देनैव समाप्यते। एवंव लघीयसी कथा वर्णनपाटवेन भारविणाष्टादशभि सर्गाणा वर्णितेति कलाप्रियता कवे स्फुट प्रतिभासते। महाकाव्यमिति कृत्वेह सूर्यचन्द्रादिवर्णनानि कृतानि परमति-पल्लवनात् मूल कथाविषय मन्यरयन्ति काव्ये गडूयन्ते ।

लघुराज्यबहुल तस्मिन् युगे राजसरक्षिताना कवीना विदुषा च वैदुष्य-प्रदर्शनमत्यभिमतमभूदिति भारविरपि तस्य. प्रवृत्तेर्वशवद । द्वितीये सर्गे तस्य राजनीतिपाटव दृश्यते। नवनवाना कल्पनाना कविताऽप्रासगिकविषयाश्रिता। अन्तिमे सर्गे च चित्रकाव्यस्य प्रवृत्ति पराकाष्ठा स्पृशति यत्रैकाक्षरादिश्लोका बाहुल्येन वर्तन्ते। यथा—

स सासि सासुसू सासो येया येया यया मय ।
ललौ लोला ललोऽलोल शशी शशि शुशी शशत् ॥

कल्पनाया अलौकिकत्व च यथा—

उत्फुल्लस्यलनलिनीवनादमुष्माद्बुद्भूत सरसिजसभव पराग ।
वात्याभिर्विय ति विवर्तित समन्तादाधत्ते कनकमयातपत्रलक्ष्मीम् ॥

भारवेरर्थगौरव प्रसिद्धम् । याज्ञसेनीकृतमुद्बोधनमतितमामोजोमयम्। तस्या इयमुक्तिरतिश्रयसी—

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः ।
परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥ (१ स.)

श्लेषस्य तु भारवेः काव्ये प्राचुर्यमेव । पदे-पदे भावाभिव्यक्तये कविस्तमाश्रयते । उदाहृत एव पद्ये गरीयसी श्लिष्टोपमा । नादसौन्दर्यमपि न सर्वथा न वर्तते । यथा युद्धप्रसंगे—

उन्मज्जन्मकर इवामरापगाया वेगेन प्रतिमुखमेत्य वाणनद्याः ।
गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने त्रिपथविलोचनस्य वक्षः ॥

इति पद्ये नारिकेलफलसमिते भारवेर्वचसि रसिकानां गरीयसी साधनाऽपेक्ष्यते । न तस्य काव्यमेकपद एव श्लिष्टमिति कृत्वा त्याज्यम् । बोधयति च स्वयं महाकविः—

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥

तदनन्तरं शिशुपाल-वधकर्त्ता माघः समायाति यो बलभीपतेः सभासदः श्रीधरस्य पौत्र इत्येव ज्ञातः । अतः सप्तमशताब्दीभव म प्रतिपदं भारविमनुकुर्वाणोऽपि तमतिशेतुं चेष्टते । स खलु तदीयमर्थगौरवं भजन्नपि शब्दसौन्दर्यमवगाहते । ततोऽप्यधिकं सबन्धविषयचुम्बि पाण्डित्यं प्रदर्शयति । तस्य वर्णनच्छटा चित्राऽपि न प्रसेदुषी । सोऽपि श्रीशब्देन काव्यमारभमाणः प्रतिसर्गं श्रीशब्दमन्ते प्रयुङ्क्ते । सोऽप्यर्थबोधाय श्लेषालंकारमालम्बते—

अनुरणुत्रखन्यासा सवृत्ति. सन्नियन्धना ।
शब्दविद्येव नो भाति राजनीतिरपस्पशा ।

भारवेरिवास्यापि काव्यस्य द्वितीये सर्गे राजनीतितत्त्वानां विस्तरशो विवेचनम् । यनेचर इव नारदोऽत्र सन्देशहरः, भीम इव बलभद्रोऽत्र सग्रामैकप्रिय. । यनादिवर्णनमिवात्रापि कथा रैवतकपर्वतवर्तियात्राविश्रामे विलम्बते ।

इन्द्रप्रदिष्टं शिशुपालवधप्रायनं राजसूयविषयया युधिष्ठिरप्राप्तं निमन्त्रणं च समकालमधिगत्य विकल्पद्वये मन्त्रिणं उद्धवस्य सम्मत्या श्रीकृष्ण इन्द्रप्रस्थं प्रति प्रातिष्ठत, गत्वा च तत्र प्रवृत्ते यज्ञे पाण्डवेन च प्रदत्ते प्रथमसत्कारे मत्सरी शिशुपालः श्रीकृष्णं बहुशोऽधिक्षिप्य पश्चाच्चानेकवीरपरस्परे संग्रामे तेन यदुवीरेण हतकण्ठो मृतः । इत्येव सर्गो यया दीर्घविलम्बितविरचया सर्गाणां वर्णिता । अतिसन्धरेयं गतिर्यस्तुनो न प्रबन्धकाव्यरंगं स्यादपि । किंतु च सर्गे भारविनोऽपि विशिष्टं चित्रकाव्यनैपुण्यं मायेन प्रदर्शितम् । सदृशबन्धादपोऽनेके बन्धास्तत्र सम्पन्ने । समानेऽर्थगौरवेऽविषमे चित्रादिनैपुण्ये माघो वस्तुवैचित्र्येण पादशब्दयोजनया च भारविं समति-

शेते । तस्य ऋतुवर्णनम्, वनविहार, जलविहार. क्षपाविलसित च सुतरा रोचकानि । नादसौ दर्यं तत्रानिश्लक्ष्णम् । यथा—

मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृतासरमुज्जगे ॥

द्वारकाया इन्द्रप्रस्थस्य च वर्णन नागरिकविभूति तद्गत च माघस्य वैशारद्यमभिव्यनक्ति । यत्र तत्र गजतुरगरासभादिपशुपक्षिप्रकृतिचित्रण तद्विषय च कवेर्जान स्फुटता स्पृशति । पर सकलमिद कौशल न भारवेर्गाम्भीर्यं भजति । तत्र विलक्षणैव कृत्रिमताऽऽयासकृता प्रत्यक्षायत समालोचकानाम् । अत ताहशोऽनैसर्गिक-काव्यनिर्माणे सत्यमेव माघो भारविमतिक्रामति । यद्यपि न सहजा प्रातिस्विकी न स्पृशति प्रतिभाम् । तस्य प्रभातवर्णने प्रकान्त —

कुमुदवनमपश्रि श्रीमदम्भोजखण्ड,
त्यजति मुदमुलूक प्रीतिमांश्चक्रवाकः ।
उदयमहिमरश्मिर्याति चास्त हिमांशु-
र्नविधिलसितानां ही विचित्रो विपाक ॥

इति श्लोको रत्नायते सस्कृतकाव्ये । कल्पनाक्षेत्रेऽपि न माघो भारवे कथम-प्यून । तस्य—

उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् ।
वहति गिरिरय विलम्बिघण्टाद्वयपरिवारितसवारण द्वयीलाम् ॥

इति विशदकल्पनामय पद्य त घटापथमाघ साधयति । तदुत्तर महाकवि श्रीहर्ष कालिदासोत्तरकालिनीं चित्रकाव्यमयी प्रवृत्ति चरम रूपं नयन् तदनुसारिणा कवीना चूडामणीयते । सङ्गबन्धादिषु न स ताहशीं रुचिं भजते यथा श्लेषादिषु क्लिष्टकल्पनासु वा । नैसर्गिकी काव्यसुषमा नास्यापि कृतिषु सुलभा सत्यामपि विल-क्षणाया प्रतिभायाम् ।

अय खलु कान्यकुब्जेशस्य जयन्तचन्द्रस्य सभ्य कविरिति द्वादशशताब्दी तस्य काल इति मतमनवद्यम् । स्वय च तेनोक्तम्—

'ताम्बूलद्वयमासन च लभते य कान्यकुब्जेश्वरात् ।'

अय न केवल कवि परमतार्किको ब्रह्मविद्याविशारदश्चेति—

'य साक्षात्कुरुते समाधिसमये ब्रह्मप्रमोदाणवम ।'

वाक्यमिद प्रकटयति । अस्यादृशुता प्रतिभा स्वाश्रयभूत राजानमधिकृत्य पठितेनानेन श्लोकेन स्फुटीभवति—

गोविन्दनन्दनतया च वपुश्रिया च माऽस्मिन्नृपे कुरुत कामधिय तरुण्य ।
अस्त्री करोति जगतां विजये स्मर स्त्रीरत्नो जन· पुनरनेन विधीयते स्त्री ॥

अस्य कृतय नैषधीयचरितम्, गौडोर्वीशकुलप्रशस्ति·, स्थैर्यविचारप्रकरणम्, नवसाहसाङ्कचरितचम्पू·, विजयप्रशस्ति, शिवशक्तिसिद्धि, खण्डनखण्डखाद्यम् इति विशेषेण प्रसिद्धा । तत्र नैषधम् चिन्तामणिमन्त्रजपफलमिति कविना स्वयमुक्तम् । अत्र कवे पाण्डित्यप्रदर्शने रुचि पराकाष्ठा भजते । श्लेष (परीरम्भक्रीडा) यत्र तत्र बाहुल्येन प्रयुज्यते यस्य चरमसीमा त्रयोदशे सर्गे दृश्यते । इन्द्रवरुणयमानलाना नलस्य च युगपद् वर्णन तत्रैव लभ्यते यस्येदमुदाहरणम्—

देव पतिर्विदुषि नैषधराजगत्या निर्णीयते न किमु न ब्रियते भवत्या ।
नाय नल खलु तथातिमहानलाभो यद्येनमुज्झसि वर. कतर परस्ते ॥
(नै १३।३४)

नैषधस्य रचना निषधाधिपस्य नलस्य वैदर्भ्या दमयन्त्या सह प्रणय पश्चात्परिणय चाधिकृत्य विहिता । न तत्र सम्पूर्णा कथा दृश्यते । द्वाविंशतिसर्गेषु नलस्य प्रणयो हसस्य दमयन्तीसमीपे गमनम्, तदागमज्ञानम्, दमयन्तीविरहवर्णनम्, स्वयंवर, परिणये प्रथमसमागम इत्येतावती कथा विस्तरेण वर्णिता । अय सर्ग स्वयंवरमेव निबध्नतीति वैभिद्यम । दमयन्तीसौन्दर्यं चानेकवार वर्ण्यते मर्यादा च तत्र परिहीयते । स्थाने स्थाने कवि स्वपाण्डित्य प्रकटयति ।

अस्या मुनीनामपि मोहमूहे भृगुर्महान् यत्कुचशैलशीली ।
नानारदाऽऽह्लादिमुख स्थितोरुर्व्यासो महाभारतसंगयोय ॥ (नै ७।८६)

न नैषध प्रसादगुणगुम्फित कालिदासकृतिवत् । स्वतोऽपि कठिने कविना विद्वच्छेमुषीनिकषायिता काश्चन ग्रन्थयस्तत्र गूढ निहिता इति स्वयमुद्घोषयति—

ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्नया ।
प्राज्ञमन्यमना हठेन पठितो माऽस्मिन् खल खेलतु ॥ (२२।३)

अल्पज्ञा न तस्य रसने समर्था इति श्रीहर्षस्य तोषप्रदम्—

यथा यूनस्तद्वत् परमरमणीयाऽपि रमणी ।
कुमाराणामन्तःकरणहरण नैव कुरुते ।
अवश्यितश्चेदन्तर्मदयति सुधीभूय सुधिय,
किमस्या नाम स्यादरसपुरुषानादरभरं ॥ (२२।१४२)

श्रीहर्षं शास्त्रविदास्तावित्रानेव रसिकत्वेन स्वीकरोति । मन्ये, एवंप्रवृत्तिस्त्र विरहवर्णनेऽपि परपण्डितानुमानसाधने नियोजयति यदसौ पाणिनिमूनाणि परिशीलयत्र-तत्र निवेशयति ।

श्रीहर्षकाव्य चमत्कारवादिनां कृतिषु मुख्यतमम्। अतएव तस्य वर्णनेषु न रसिकजनसुलदा सुकुमारता। न तस्योत्प्रेक्षा सहृदय हृदयसङ्गिनी। न तस्यातिशयोक्तयो यथार्थ्यलेशविद । विभिन्नशास्त्रप्रावीण्यप्रकाशनविषये प्रयतेन काव्यमिद शास्त्रीकृतम्।

कथानक महाभारताद् गृहीतमिति तस्य प्रभाव स्पष्ट एव। पर माघभारविरत्नाकरादिचमत्कारवादिना प्रवृत्तिस्तत्र स्फुटा वर्तते। वर्णनेऽतिप्रसक्तिरेव वस्तुत प्रवाहमवरुन्धे।

नवरसाना परिपाके प्रयत्नशीलोऽपि कवि शृङ्गारे गृहीतक्षण। सयोगे विप्रलम्भे च तस्य तुल्या प्रवृत्तिरित्युभयत्राप्यलकारक्रीडा तनोति। दमयन्तीविरहवर्णने काश्चित्कल्पना अतिसरसा। यथा—

> अवणपूरतमालदलाङ्कुर शशिकुरगमुखे सखि निक्षिप।
> किमपि तुन्दिलित स्वगयितुं सपदि तेन तदुच्छ्वसिमि क्षणम्॥ (४।५६)

शशिकरपीडिता मुकुरस्थस्य तस्य चूर्णनाय सखी निर्दिशति दमयन्ती। स्वचकोरशिशु मृगस्य शिष्यता ग्राहयिष्यति सा। शृङ्गारे विशेषतो विप्रलम्भे श्रुतिकटुत्वस्य प्रतिकूलत्वेऽपि कविर्नितरामुदास्ते। अतएव—

> वृणुपहृत्यपमृत्युविरूपता शमयतेऽपर-निर्जर-सेविता।
> अतिशयाग्र्यवपु क्षतिपाण्डुता स्मर भवन्ति भवन्तमुपासितु॥ (४।८५)

अत्र तवारयकारसयोगोऽनेकदाऽगत कर्णयोरतीवाह्लुद। हास्यो निबद्धोऽपि श्रीहर्षस्य न मर्यादासह। तथापि बहुशोऽय गम्भीरानपि स्मेराननानाचरति—

> उभयो प्रकृति कामे सज्जेदिति मुनेर्मन।
> अपवर्गे तृतीयेति भणत पाणिनेरपि॥ (१७।७०)

श्रीहर्षो वैदर्भी रीतिमनुसरतीति तत्कृते पद्यमिदमुदाहरन्ति—

> धन्याऽसि वैदर्भि गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि।
> इत स्तुति का खलु चन्द्रिकाया यदम्बिमप्युत्तरलीकरोति॥ (३।११६)

पर न तस्य वैदर्भी कालिदासरचनेव मसृणता बिभर्ति। बहुशो गौडी प्रधानतामाकलयति, तत्र कवे प्रतिभा सुतरा प्रतिभाति। पर कानिचित्स्थलानि सर्वथा मार्मिकाणीति न सन्देह। यथा—

> सवर्यसदेशमृणालमन्थर प्रिय किपद्दूर इति त्वयोदिते।
> विलोकयन्त्या ह्रदतोऽस्य पक्षिण प्रिये से कीदृग्भविता सख क्षण॥ (१।११७)

पदलालित्यकृते सत्यैव नैषधख्याति.। नास्ति तत्र कतमदपि पद्यमनुप्रास-विरहितम् ।

उडुगमंगलमृदगनिनादभगीसर्यानुवादविधिबोधितसाधुबोधा.।
सोधव्रज. प्लुतवताकृतयाभिनिन्युमंन्ये जनेषु निजताण्डवपण्डितत्वम् ।। (११।६)

अत्र पद-झकृतिरतिशयेन कर्णयो सुखदा।

इत्थं विमर्शनिष्कर्षं एतावान् यदखिलाः कवय कालिदासादवर्त्तिनाश्चमत्कार-यादिता काव्यसौष्ठवायावश्यकत्वेनामन्यन्त । राजससदा प्रभावोऽपि तेषा विशेष-दिग्ग्रहणहेतु । तेन सत्यामपि विलक्षणाया प्रतिभाया विद्यमानेऽपि कवित्वकौशले न प्रभवन् ते कवय आत्मान निरोद्धुम् पाण्डित्यप्रदर्शनात् । ततस्तदा कृत्रिमतामयं काव्य कर्तुमेव ते प्रायतन्त । तेषु च श्रीहर्षकाव्य सर्वोत्तमम् । अत एवोक्तम् ।

'उदिते नैषधे काव्ये क्व माघ क्व च भारविः ।'

महाकविर्भवभूतिः

कालिदासादनन्तर भवभूतिरेव सर्वोत्तमो नाटकवार । असौ प्रेम्णि, प्रकृति-वर्णने, मानव हृदयस्य स्फोरणे, नाट्यकौशले च साटोप कवीनाह्वयते । कालिदास प्रशसासु रसिकेषु करुणरसप्रसगे प्रतिपादितमेव केनचित्—

'उत्तरे रामचरिते भवभूतिर्विशिष्यते' ।
नात्र काविदप्यतिशयोक्तिरिति हृदयवृत्त्यभिज्ञाना मतम् ।

समप्य —भवभूति क कुत्र वा बभूव, किमस्य सत्य नामेति विचिकित्सायां निराशे मनसि लभ्यते स्वल्पोऽपि तदुदित एवोदन्त उत्तररामचरितप्रस्तावनायम्—

अस्ति खलु तत्र भवान्काश्यप श्रीकण्ठपदलाञ्छन पदवाक्यप्रमाणज्ञो भवभूति-र्नाम जातुकर्णीपुत्र ।" (उ च प्र)

अयमौदुम्बरगोत्र, पद्मपुराभिजन, तैत्तिरीयशाखाध्यायी, नीलकण्ठस्य जातुकर्ण्याश्च पुत्र श्रीकण्ठलाञ्छन, कान्यकुब्जेश्वरस्य यशोवर्मण परिषद-मलञ्चकारेति तस्यैव कृतिभिर्ज्ञायते । तस्यैव राज्ञोऽन्य सभ्य कविर्वाक्पतिर्भवभूति स्वकाव्ये 'गउडवहो'सज्ञे स्मरति, काव्यालकारकर्ता वामनश्च सर्वप्रथम-स्तमुल्लिखतीति खीष्टाब्दस्य ७३६ समीपे काश्मीरेण मुक्तापीडललितादित्येन पराजितो यशोवर्मेति कल्हण रचिताया राजतरगिण्या लेखादष्टमशताब्द्या जातोऽयमिति सिध्यति ।

अस्योपाध्याय केचित्कुमारिल कथयन्ति । भवभूतिरिति तस्योपाधिरेवेत्यनु-श्रुति

तपस्वी कां गतोऽवस्थामिति स्मेराननाविव ।
गिरिजाया स्तनौ वन्दे भवभूतिसिताननौ ॥

इति श्लोकमूला । अय पद वाक्य प्रमाणज्ञो वेदेषु, व्याकरणे, न्याये, काम-शास्त्रे च पारदृश्वा । काव्येऽप्यय सिद्धवागिति स्वयमेवोदाहरति—

यं ब्रह्माणमियं देवी वाग्वश्येवानुवर्तते ।
उत्तर रामचरित तत्प्रणीत प्रयुज्यते ॥ (उ. च. प्र)

भोज-प्रबन्धेऽप्य भोजसभासत्कालिदास प्रति स्पर्धमानश्च वर्णितस्तस्यैवाय श्लोकश्च यथित —

हठावाकृष्टानां कतिपयपदानां रचयिता
जन स्पर्धालुश्चेदहह कविना बश्यवचसा ।
भवेदद्य श्वो वा प्रकृति-कुटिले पाणिनि कलौ
पदानां निर्मातुस्त्रिभुवनविधातुश्च कलह' ॥ इति ।

पर न भोजप्रबन्धो विश्वासार्हो यत्र प्राक्तना अर्वाक्तनाश्च सर्वेऽपि कवय एकत्र वर्णिता समकालिकतया ।

कविरय तथा प्रतिभावानपि नाप प्रतिष्ठां स्वकाल इति तस्य—

ये नाम केचिदिह न प्रथयन्त्यवज्ञां
जानन्ति ते किमपि, तान्प्रति नैष यत्न ।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥
अनेन श्लोकेन प्रमाणीक्रियते ।

कृतय —त्रीणि रूपकाण्येवाद्यत्वे भवभूतेर्मन्यन्ते— महावीरचरितम्, उत्तर-राम चरितम्, मालतीमाधवञ्च । तत्राद्ये नाटके तृतीयं तु प्रकरणम् । प्रथमे रामस्य जन्मत प्रभृति लकाविजयावधि द्वितीये च सीतापरित्यागसम्बन्धिनी कथा वर्णिता । मालतीमाधवे तु भूरिवसुपुत्र्या मालत्या विदर्भमन्त्रिपुत्रस्य-माधवस्य च प्रणय-वर्णनम् । महावीरचरिते कथा रामायणोपज्ञाऽपि कवे कल्पनया नवीकृता । न तत्र सीताहरणस्य मूल शूर्पणखाया नासाच्छेदमात्रम् । ताडकावधप्रसगेन शिवधनुश्छेदे जानकीवरणा-त्प्रभृत्येव प्रवृत्त रामस्य रावणस्य च मिथो वैरम् । लकेशकृतेनाभिसन्धिना रामस्य वनवासो वैदेही-हरण वालि-वधश्च । रावणकुलनाशानन्तर साकेते रामाभिषेकेनैव नाटकस्य समाप्ति । अस्मिन्नाटके वीररसो मुख्योऽन्ये च गौणा । नाट्यशास्त्रस्य मर्यादाना साधु पालनम् । कथाया परिवर्तने कवे कल्पना साधु प्रभवति ।

पर दिव्यैर्दृश्यैरभिनेयता नाटकस्यावहीयते । गौडी वृत्तिमावहच्च दुर्बोधतामा-चरति सामाजिकानाम् । ओजोरूपिणी शैली चौद्धृणा तु प्रमोदावहैव । तावान् कथा-भारो विस्तृतोऽपि सप्तस्वङ्केषु निवेशित । नाटके वर्णितं षड्यन्त्रं कवे राजकीया कूटनीतय. साधु परिचिता लक्ष्यन्ते । वालिनो रावणेन सहाभिसन्धिस्तत्कथनेन च राम

हन्तुमुद्योग परिणतौ व्यापत्तिश्च नायकस्य चिरप्रवृत्त प्रच्छन्नवधसङ्ग परिसाप्ति परमय दु सहो रसभगदोषो नेतृचरित्र आघातश्च यत् परशुरामेण सह प्रवृत्ते समर-निमन्त्रके परा प्रौढिमागते विवादे रामस्य कथन मद्भुणमोचनाय गच्छामीति तस्या-मसरापसर्पणशीलता द्योतयति । तेन च रणकातरत्व तस्य सूच्यते ।

उत्तरे रामचरितेऽपि कथा रामायणोक्तैव सीता-परित्याग-सम्बन्धिनी । पर छायासीतादर्शन कवे. प्रतिभाया उर्वरता प्रकटयति । अनेन रामस्य जानकीं प्रति गाढा प्रीतिपरायणता स्पष्टनामाग्रादिना । अनेव च वासन्त्या सह सवादेन करुणस्य परा प्रौढि कृता । परमादितो गर्भसलिला सरस्वतीव शृ गारधारा यावदन्त प्रवहति तस्यामेव च सीता-पुन -प्राप्त्या शृ गारस्यैव प्राधान्यम् । अतो मध्यगत करुणविप्र-लम्भ एव मन्तव्यो न तु शुद्ध करुण । यद्यपि कविर्यत्र तत्र तस्यैव प्राधान्य ध्वनयति स्वय प्रतिपादयति च 'एको रस करुण एव' इत्यादिना । सप्तमेऽङ्के मेलापकेन नव्यता प्रापितो रामायणीय कथा सन्दर्भ सुखान्तीकृत च नाटकम् ।

मालतीमाधवे वस्तुनि समवेत कविलोकप्रवृत्ता कथैव रूपान्तरीकृतेति विविक्तिमते कीथमहोदय । परमातादृशकथानकोपलब्धि वृत्तस्य कव्युपज्ञतैव स्वी-कार्या भवत् । प्रमाण विना हि तादृशी कल्पनाऽग्रहोपुरुषिकामात्रम् । प्रकरणे च कथानकस्य मौलिकत्व नाट्याचार्ये प्रतिपादितचरम् ।

पद्मावती-सचिवस्य भूरिवसो पुत्र्या मालत्या वैदर्भमन्त्रिणो देवरातस्य पुत्रेण माधवेन सह परिणये राज्ञो नर्मसचिवस्य नन्दनस्य प्रतियोगिताच्छलेन कविर्वस्तु नायकनायिकयो प्रेमाण च रोमाचक (Romantic) समाचरति । मकरन्दस्य मालतीवेषधारण मदयन्तिकारक्षण च, माधवस्य नैराश्ये महामासविक्रय कालीमन्दिरे चाघोरघण्टसकाशान्मालत्या मोक्ष, कपालकुण्डलाया प्रतिशोधयत्न, सर्वैरप्येतै प्रसगै-वस्तुनि बाह्यस्यान्तरङ्गस्य च द्वन्द्वस्य, जटिलतायां, हास्यस्य कौतूहलस्य च सृष्टिवि-धीयते । प्रणयोऽपि नायकनायिकयोर्मकरन्दमदयन्तिकयोश्च साधु परिपाक भजत्येतेन । नाटकीया कामन्दकी मालविकाग्निमित्रस्य कौशिकया सवदते । अघोरघण्टवृत्तस्तात्का-लिकी वाममार्गस्य प्रबलतां व्यञ्जयति । शृ गारप्रधानेऽङ्के धीरप्रशान्तो नायक, अन्येऽपि रसा माधु परिपाक भजन्ति ।

नाटककार सर्वास्वपि रचनासु लौकिकतत्त्वानि (Supernatural elements) यत्र तत्र समावेशयति । इदानीतनी विचारसरणिमनुसृत्य काम तानि न रोचेरन् समालोचकेभ्य पर प्राक्तनी भारतीया परम्परा तु विश्वसित्येव तेषु । तेन नात्र क्वचिद् विप्रवादिता । नाद्यतनो हि भवभूति ।

कवेः शैली—कविरयमभिधाप्रधानोऽनुभूतीर्विस्तरेण वर्णयति । न स कालिदासवत् 'मनोरथानामतटप्रपाता.' इति वदन् पाठकैर्दशंकैर्वा स्वयमनुभवनीयं किमपि विसृजति । प्रमसविदमपि विस्तरशो निरूपयति । यथा—

इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दन-रस. ।
अयं कण्ठे बाहु शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥ (उ. च. १)

कीथमहोदय. कालिदासेन तुलयन् भवभूतिं लिखति—

"of the sweetness and charm of kalidasa he has as little as of the power of suggestion displayed by his predicessor, but he excels in drawing with a few strokes the typical features of a situation or emotion. He Seeks propriety in his characters' utterances"

(कीथः स. ड्रा. पृ० २०२)

(भवभूतौ न कालिदासकृतिवन्माधुर्यं व्यञ्जकत्व च पर कतिपयाभिरेव रेखाभिः दशा भावाश्च वर्णयन् सोऽतिशेते । पात्रैरेव सकलमपि वस्तु स्फोरयति स.) मानसवृत्तीना निरूपणे कुशलो भवभूति ; चन्द्रकेतुर्लव स च त दृष्ट्वाऽन्तर्वृत्त्याऽऽकृष्टो मनसि सविस्मय मन्त्रयते—

यदृच्छासम्पातः किमु गुणगणानामतिशय ,
पुराणो वा जन्मान्तरनिबिडबन्ध परिचयः ।
निजो वा सम्बन्धः किमु विधिवशादेकोऽप्यतिशय
ममैतस्मिन्दृष्टे हृदयमवधान रचयति ॥(उ. च. ५।१६)

प्रेमाकुलयोर्मालतीमाधवयोर्दशाऽस्मिन्पद्येऽतितरा स्फुटा—

भूयोभूयः सविधनगरीरथ्यया पर्यटन्तं
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था ।
साक्षात्काम नवमिव रतिर्मालती माधव च
गाढोत्कण्ठाकुलितललुलितैरङ्गकैस्ताम्यतीति ॥ (मा. मा. १।१८)

गौडी रीतिं प्रति भवभूतेरत्याग्रह । समासबहुल. पदबन्ध. सर्वेष्वपि नाटकेषु प्रायो दृश्यते । वीरचरिते तस्यातिशय. । शिवधनुर्भङ्गज ध्वनिं वर्णयति सः—

बोदंण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत--
टटकारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिम ।
द्राक्पर्यंस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति ।

हास्यवर्णने न भवभूते प्रवृत्ति । उत्तररामचरितस्य चतुर्थेऽङ्के दर्शितमस्ति-फल्य तेन । वात्सल्यस्याभिव्यक्तिरपि साध्वी । लव दृष्ट्वा रामपुत्रत्वेन सदिह्यानस्य सुमन्त्रस्य सीतापरित्याग स्मृत्वा वचन कारुण्ये पर्यवस्यति—

मनोरथस्य यद् बीज तद्दैवेनादितो हृतम् ।
लताया पूर्वसूनाया प्रसवस्योदभव कुत ॥ (उ च ५।२०)

क्वचित्क्वचि शब्दचित्राण्यपि साधु प्रस्तौति । मयूर नर्तयन्त्या सीताया यथा—

भ्रमिपु कृतपुटान्तमंण्डलावृत्तिचक्षु प्रचलितचटुलभ्रूताण्डवंमंण्डयन्त्या ।
कर-किसलय-तालैर्मुग्धया नर्त्यमानं सुतमिव मनसा त्वा वत्सलेन स्मरामि ॥
(उ च ३।१६)

दाम्पत्यप्रेम्ण स्वरूप भवभूतिरेव वर्णयितु शक्त—

अद्वैत सुखदुःखयोरनुगत सर्वास्ववस्थासु यत्
विश्रामो हृदयस्य यत्र, जरसा यस्मिन्नहार्यो रस ।
कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितम्
भद्र तस्य सुमानुषस्य कथमप्येक हि तत्प्राप्यते ॥ (उ च १)

भवभूति कालिदासवत्प्रकृतिप्रिय पर न केवल रम्येषु भीषणेष्वपि तस्या रूपेषु दृष्टिरामज्जतऽस्य , साऽपि विशेषेण भावान् प्रबोधयति । यथा—

स्निग्धश्यामा क्वचिदपरतो भीषणाभोगदक्षा
स्थाने स्थाने मुखरककुभो झाकृतैर्निर्झराणाम् ।
एते तीर्थाश्रमगिरिसरिद्गर्तकान्तारनिर्या
सलक्ष्यन्ते परिचित भुवो दण्डकारण्यभागा ॥ (उ च २।१४)

भीषण दृश्य च यथा—

निष्कूजस्तिमिता क्वचित्क्वचिदपि प्रोच्चण्डसत्त्वस्वना
स्वेच्छासुप्तगभीरघोरभुजगश्वासप्रदीप्तानल ।
सोमान प्रदरोदरेषु विलसत्स्थलाम्भसो वास्वय

न केवलं भौतिकवृत्तिर्मानस्यपि स्पष्टं विश्लिष्यतेऽनुभावमुखेन संविन्मुखेन वा, उभयोरपि हृदयविलेखनी तीव्रता । यथा मालत्याम्—

वारं वारं तिरयति दृशोरुद्गमं वाष्पपूरः
सत्संकल्पयोपहितजडिमा स्तम्भभम्येति गात्रम् ।
सद्यः स्विद्यन्नयमविरतोत्कम्पलोलांगुलीकः
पाणिर्लेखाविधिषु नितरां वा रते किं करोमि ॥ (मा. मा. १।३८)

अपरतश्च विरहस्य तीव्र आवेगः—

हा हा देवि स्फुटति हृदयं ध्वंसते देहबन्धः
शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ् मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥ (उ. ३।३८)

मनोवैज्ञानिकं विश्लेषणं चात्र लघुन्यपि पद्ये—

पूरोत्पीडे तटाकस्य परीवाहः प्रतिक्रिया ।
शोकक्षोभे च हृदयं प्रलापैरेव यायते ॥ (उ. च. ३।२६)

अयं तावन्निष्कर्षः । भवभूतिर्मानवहृदयस्य निपुणो व्याख्याता, प्रेम्णः कारुण्यस्य च सफलो वर्णयिता । परं वैदिकः प्रभावो गौडौ प्रति मोहश्च तस्य कृतीः काठिन्यं नयतः। तस्य प्रेमा विशुद्धस्तीव्रानुभूतिमयश्चेति वासनामयीं प्रीतिं वर्णयन्तं कालिदासमसावतिशेते । मानसीनां वृत्तीनां साहजं भव्यं स्वरूपं न तत्र वर्तते । अगवन्त्यत्र शीर्षमहोदयस्य टिप्पण्यः—

'Bhavabhuti on his part, recognized wirh a truer insight sharpened perhaps by the obvious inferiority of his fortunes and failure to enjoy substantial royal favour, the difficulties and sorrows of life. His theme is not joys of a plealsure-loving great king.....but the bitter woes of Rama and Sita, who have for us the reality of manhood.' (*Sanskrit Drama* 197)

भवभूतिः स्वकटुफलानुभवाना यावया गूढतरामन्तर्दृष्टिमवाप । न तावत् स कालिदासवत् सुखं प्राप राजाश्रयात् । अतस्तस्य नायको विलासी नृपो न, अत एव न करुणे रसे मुख्यतमं मन्यो सर्वानुभूतिमूलम्—

एको रसः करुण एव निमित्तभेदाद् भिन्नः पृथक् पृथगिवाश्रयते विवर्तान् ।
आवर्तबुद्बुदतरंगमयान् विकारानम्भो यथा सलिलमेव हि तत्समग्रम् ॥

बाणोच्छिष्टं जगत्सर्वम्

धन्यास्ते महाकवयोऽन्तर्दृष्ट्या येऽतीन्द्रियमपि योगिनामपि दुराप वस्तु निभालयन्ति । प्रभातकल्पाया शर्वर्यास्तारा इव विरेजिरे अगुलीषु विरला एव ते सहजाप्रतिहतप्रतिभा । तेषु बाण स्वकाव्यपाटवेन, वर्णनशक्त्या, कल्पना-वैचित्र्येण, सकलजगद्व्यापारसाक्षात्कारक्षमचेतसीप्रभावेणासाधारण गौरव भजते । कवयोऽन्ये हि पद्यबन्धमात्रसीमितकौशला, कतिपये च गद्येऽपि चालयन्तो लेखनीं कृत्रिमतासमावेशनिहितदृष्टय सुबन्धुसदृशा श्लेषयमकादिविनष्टालकृति-चित्रगद्यबन्धे साभिनिवेशा विस्मरन्ति स्वकर्तव्यम् । पद्येऽपि यदा कवयोऽपि वस्तु-वर्णनाग्रहग्रहिला सन्तरत्यवन्ते समुद्दिष्टात्पथ का कथा कान्तारसदृशे मुक्तसीमनि गद्यप्रसगे यत्र वर्ण्यं विस्मरन् कवयन् दूरमेव व्रजेच्च्युतलक्ष्य इव शर । अत एव घोषित सूदमधीभिरालोचकै —

'गद्यं कवीनां निकष वदन्ति'

तस्मिन्नभ्रष्टसन्धानश्च्योतयन् रसधारा रसिकहृदयेषु, मदयन् काव्यामृत सम्पटान्, प्रत्यक्षयन् विश्वमपि विश्व विश्वरूपधारी नारायण इव, मञ्जूषामिव नव-नवालकारच्छुरितान्तराम्, विलासिनीमिव पटुश्लेषाम् कादम्बिनीमिव प्रवृष्ट-रस-पूरा-माम्रवणीमिव रसालशोभनाम्, शारदी सुषमामिव पुण्डरीकानुपक्तमहाश्वेताम्, हरमालसोमामिव हृद्यचन्द्रापीडाम्, बहुलपक्षनिशामिव वृद्धतारापीडाम् वर्धनकुल-राजलक्ष्मीमिव प्ररूढोच्छ्वासमयहर्षचरिताम् कथामिव विविधप्रसगसगिनीम्, प्रणयिनीमिव रतिप्रगल्भभावाम् पटीयसीम्, गरीयसी पद्यच्छुरितामराधारणीं कृति कुर्वन् बाण इव मर्मभेदनपटुर्बाण पञ्चाननायते ।

हर्षचरिते कादम्बर्यां चानेन विस्तरशो वर्णित एव स्ववृत्तान्त इति नायासाय विदुषां तस्य जीवनकथा । वात्स्यायनगोत्रजोऽय चित्रभानो पुत्रो मोखरिभूजितादू-भत्सोविद्यामनवद्यां सिन्धोरिव पीयूषमाजहारेति स्फुटमेव । बाल्य एवाधिगतसकल-

शैव पैतृकेन धनेन सम सह विविधाचारविचारैर्वयस्यै प्रान्तेष्वनेकेषु भ्रमैर्लोक-साक्षात्कारेण जगदप्यनुभवाक्षिलक्ष्यीचकार । उपारूढयौवनश्च स्थाण्वीश्वराधीशस्य हर्षवर्धनस्य पारिषद्यता भेज इति तस्य हर्षचरितात्स्फुटम् । अतस्तस्य कालनिर्धारणमपि सुशकमेव खीष्टस्य सप्तम्या शताब्द्या पूर्वार्धमिति कीथमहोदयस्य मतम् ।

अय बाण सर्वशास्त्रविशारदो विद्वदभिजनो लोकस्य राजकुलस्य च सकल-व्यवहाराभिज्ञ प्राकृतव्यापाराणा सूक्ष्मेक्षिकया निरीक्षक, मानसशास्त्रस्य विशेषज्ञ सिद्धवाक् । कादम्बरी, हर्षचरितम् इति द्वे गद्यकाव्ये तस्य यश स्तम्भभूते । मुकुट-ताडितकभाण, पार्वतीपरिणयश्चण्डीशतक चेति त्रीणि पुस्तकान्यपि तत्कृतान्युच्यन्ते । पर वामनभट्टबाणोऽपि तत्कर्ता सभवति । केचित्तु हर्षकृता रत्नावलीमपि वस्तुतस्तद्र-चितामेव मन्यन्ते । पर बाणस्यासाधारणी प्रतिभा न तत्र स्फुरतीति नादरणीय तन्मतम् । धावकनाम्नाऽपि तीव्रगत्या धावन् बाण एवौपम्यार्थेनोच्यत इत्यपि प्रवाद । बाल्येऽपि विशेषेण प्रतिभावानयमध्येतु कस्यचित्सम्बन्धिनो गृहे वसन् प्रसगादागतेन मातुलेन तद्वैदुष्यचमत्कृतेन 'किमश्नासि' इति पृष्टोऽय पद्यार्धमिदमनुप्रास-पूर्णमुत्तरयश्चमच्चकार तम्—

'अशेषशेमुषीमोष माषमश्नामि मातुल ।'

इति अस्य हर्षचरितमैतिहासिककाव्यतया स्वीक्रियते । आख्यायिकात्वेन परिगणित तदष्टोच्छ्वासपरिमित वर्धनवशभूषणस्य राज्ञो हर्षवर्धनस्य वृत्त वर्णयति । आद्यौ तृतीयस्य चोच्छ्वासस्यार्धं कवेरात्मवृत्त प्रस्तुवन्ति । तत. पुष्पभूते कुले प्रभाकरवर्ध-नस्योदय, राज्यश्रिया विवाह, राज्ञो मृत्यु, ज्यष्ठपुत्रस्य हूणविजयाय गतस्य राज्यवर्धनस्य प्रत्यागमनम्, मालव पतेराक्रमण राज्यश्रियो निग्रह च श्रुत्वा तस्य शत्रुविनाशाय प्रस्थानम्, कुन्तलस्य गौडाधिपेन छलेन राज्यवर्धनस्य वधोदन्ताहरणम्, हर्षस्य प्रतीकारप्रतिज्ञा, गौडेशोन्मूलनानन्तर राज्यश्रियोऽन्वेषणम्, एतावदेव वृत्तमत्र वर्णितम् । इतिहासेन सबद्धमपि घटनाचक्रवर्णनदृष्ट्या नैतत्तथा महत्त्वपूर्णम् । तात्कालिकसामाजिकाचाराणा देशावस्थायाश्च साधुनिदर्शनमिति तु न कस्यापि विवादास्पदम् । पुलकेशिकृतपराभवेणैव दिग्विजयोत्साहो हृतो हर्षस्येत्यपि सभाव्यते-ऽयुक्तं कारणम् । कादम्बरीत पूर्वमस्य रचनति तु काव्यशैल्या स्फुटम् ।

कादम्बरी तु कथा । अवोज्जयिनी-पतेस्तारापीडस्य चन्द्रापीडाख्यसुतोत्पत्ति, विद्याग्रहणानन्तर च योवराज्येऽभिषेक, दिग्विजयाय प्रस्थानम्, तत्प्रसगेनाच्छोदसरो-दर्शन महाश्वेतया च परिचय, गन्धर्वलोक हेमकूट गत्वा कादम्बरीसाक्षात्कार, राजधानीं प्रति प्रत्यावर्तनम्, मन्त्रिसुते वैशम्पायने सैन्यभारमारोप्य राजधानीप्राप्ति,

पत्रलेखामुखेन च नायिकाया वृत्तोपलब्धिरित्येतावती कथा पूर्वार्धे वर्णिता । उत्तरार्धं च तत्सूनुना पुलिन्देन भूषणभट्टेन वा कृतम् । कथाविच्छेदहेतुश्च बाणस्य मृत्युरेवेति 'यातेदिव पितरि' इति कथनेन सिद्धयति । पश्चाद् वैशम्पायने सैन्येन सह नायाति चन्द्रापीडस्य तदानयनाय गमनम्, महाश्वेतासकाशात्तन्मृत्यूदन्त, ततश्च चन्द्रापीड-स्यापि हृदयभेदेन मृत्यु, कादम्बर्या आकाशवाणी श्रुत्वा तच्छरीररक्षण पुन पति-प्राप्तिश्चेति तत्र वर्णितम् ।

इय कथा च पूर्वं शूद्रक प्रति शुकेन पश्चाच्च जाबालिमुनिना स्वशिष्येभ्य श्राव्यत इति त्रिधा कथाया आरम्भ । मूलकथा च न कविना स्वय कल्पिताऽपि तु पूर्वं बृहत्कथाऽऽश्रिते कथासरित्सागरे बृहत्कथामञ्जर्यां च वर्णितेति स्पष्टमेव । पर बाणेन स्वप्रतिभावैशद्येनोर्वरया कल्पनाशक्त्या च नवीकृता तत्प्रतिभातेव प्रतिभाति । कथानके विविधप्रसगासगेन भूयसी जटिलता कौतूहलस्य च साधीयसी रक्षा तया सपद्यते । लोकोत्तरतत्त्वाना (Super Natural elements) बाहुल्य तत्र विस्मयस्य सृष्टिं साधयति । दीर्घतरेणैनेयंथापि यत्र तत्र कथा विच्छिद्यते पर न सर्वथा कौतूहलोच्छेदाय प्रभवति ।

असाधारणो रसपरिपाक, वस्तुवर्णनवैशिष्ट्यम्, प्रकृते सूक्ष्म प्रसगानुकूल च वर्णनम्, अविच्छिन्ना भावशृ खला च पाठकान् तथा रमयति यथा ते विस्मरन्ति सकलमपि कार्यम् । अत एव 'कादम्बरीरसज्ञानामाहारोऽपि न रोचते', इत्याभाणकम् ।

वैदेशिका कीथ-वेबर-प्रभृतयोऽप्रभवन्तो बाणस्य ग्रन्थमवबोद्धु निन्दन्ति तम् । वेबरस्तु तस्य कृतिषु घन शब्दकान्तार वर्णयति । उपपन्न चैतत्तया कृते यथाहि न तत्रत्यभाषासु प्राय सामासिकी वृत्ति । बाणस्य तु काव्यबन्धे गद्यस्यादर्श एव भिन्नोऽभूदिति हर्षचरितश्लोकाज्ज्ञायते । तथाहि—

नवोऽर्थो जातिरग्राम्या, श्लेषोऽक्लिष्ट स्फुटो रस ।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुष्करम् ॥

न च तस्य गद्य सर्वमेव दीर्घसमासक्लिष्टम् । प्रसगानुकूला हि वृत्ति । हर्षचरिते खलु वीररसप्राये लक्ष्यते तद्बाहुल्यम् । पर शृङ्गारप्रसगेषु भवादेषु च सन्ति लघूनि स्फुटतराणि च वाक्यानि । समासस्योज्जोबहुलमेव निदर्शनञ्च—
"कुलिशशिखरस्खलनोच्छलत्प्रचण्डचपेटाघातपाटितमत्तमातङ्गोत्तमाङ्गोच्छलितचारुकेसर-भारभास्वरमुखे केसरिणि ।'

अत्र सिंह-वर्णनेऽतीवानुकूल्य भजत्येतादृशो बन्ध । नवनवकल्पनासृष्टि शब्दरत्नभास्वरा कवियशोहेतुं स मन्यते । यथा—

अन्यवर्णंरराघृत्या बन्धचिह्ननिगूहनैः ।
अनाख्यात सतां मध्ये कविश्चौरो विभाव्यते ॥
सुखप्रबोधललिता सुवर्णघटनोज्ज्वलैः ।
शब्दैराख्यायिका भाति शब्दयेव प्रतिपादकैः ॥

परमधिगतवाग्रहस्थाना सकलकाव्यतत्त्वपारदृश्वनामेव सा रचना सुख-प्रबोधा सभवति न तु कतिपयपुस्तकाधीतिना भाषाशास्त्रसहकारमात्रेण सस्कृत-मधिचिकीर्षूणामस्पृष्टशास्त्राणाम् ।

बाणस्य कृतिषु रसस्याजस्रप्रवाहो, भूयसी कल्पना शक्तिरसाधारण वर्णनानैपुण्यमिति न लेखनस्यावश्यकता । महाश्वेताया प्रथमप्रणये कादम्बरीसाक्षात्कारावसरे च भावानुभावाना याहृग्युदात्ता सृष्टिस्तत्र विद्यते न साऽन्यत्र सुलभा । कादम्बर्यां हर्षचरिते च तदीया प्रकृती रोदिति हसति च पात्रै सह । पात्राणि तस्य सजीवानि, व्यक्तित्व तेषा विशिष्टम्, सवादा सरसा स्वाभाविकाश्च । मानसवृत्तीना सूक्ष्म विश्लेषणम् । हर्षचरितेऽरक्तवक्त्राणामपूर्वा व्यञ्जकता तीव्रा सविद जनयति ।

बाण पाञ्चाली रीतिं साधिकार प्रयुङ्क्ते । तस्य गद्यबन्ध उत्कलिका-प्रायश्चूर्णकबहुलश्च । अलकाराणा च परम्परा परस्परानुबन्धिनी । श्लेषे तस्य विशेषेण रुचि । हर्षचरितस्यारम्भश्लोका अपि श्लिष्टा पर विविध-कवि काव्यनैपुण्य-ख्यापका इति भृशमुपकारका । तस्य प्रेष्ठा अलकारास्तु—श्लेष, परिसख्या, विरोधाभास, उत्प्रेक्षा उपमा, समासोक्ति, रूपक चेति । तेषा परम्परा प्रावृषि धारासार इव निरन्तरमितरेतरानुबन्धिनी । न चास्थाने तेषा प्रयोग । तत्र रसानोष-माया सुन्दरमेक निदर्शनम्—

'क्रमेण च वृत्त मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव मदेन नवयौवनेन पदम् ।'

पद्यविषये, 'याहृग्गद्यविधौ बाण पद्यबन्धे न तादृश' इति प्रसिद्धावपि न सर्वथा परिहीयते । हर्षचरितस्यारम्भगता कादम्बरीमुखस्थाश्च श्लोका सरसा सलिताश्च ।

निष्कर्षे च बाणस्य दूरगामिनी कल्पनाशक्तिर्पञ्चेन्द्रियानपि विषयानायत्तयति स्वप्रत्यक्षतामितान् । साधारणमपि वस्तु तत्र भव्यायितम् । किं नाम परिहीयेत तस्य

सिद्धवाचो दृष्टेः । भूमण्डलार्तिकपुरुषवर्णं यावत्तेन कथासंत्रोक्तो देशः । अदृष्टमश्रुतमचिन्तितं च पदार्थजातं चिरपरिचितमिव रमणीयतरमिव प्रतीयते । सन्ति यद्यपि कानिचित् स्खलितानि परं न तान्यशक्तिकृतान्यव्युत्पत्तिमूलानि वा, रसस्याविच्छिन्ने प्रवाहे विस्मृतिं व्रजन्ति । न केवलं कल्पना, बुद्धिमप्युत्तेजयन्ति कानिचित् स्थलानि यथा शुकनासोपदेशः । न लभ्येत लक्ष्म्या राजमदस्य च तादृशं विवेचनं यथा कादम्बर्याम् । हर्षचरिते दाहज्वरग्रस्तस्य प्रभाकरवर्धनस्य मृत्युवर्णनमतीव मार्मिकम् । सरसा परुषप्राया चोभयविधाऽपि शैली तत्र तस्य कृतिषु दृश्यते । पक्वणस्य, शूद्रकस्नानस्य, चाण्डालकन्यायाश्च रूपस्य, जरद्द्रविडधार्मिकस्यापि निरूपणं बीभत्सविस्मयहासजनकं वैलक्षण्यमेव भजते । तस्यैतादृशीं सूक्ष्मां दृष्टिमेवाभिलक्ष्योदितं केनापि—'बाणोच्छिष्टं जगत्सर्वम्' इति ।

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्ने. ।
आ प्रा द्यावा पृथिवी अन्तरिक्ष सूर्य आत्मा जगतस्तस्थुषश्च ॥

एतावानुल्लासो वैदिकस्य कवे. । कथ न नृत्यतु भाकृत: ?

आदिकवेर्वाल्मीकेर्वाणी च न श्राम्यति प्रकृतिमुपरलोकयन्ती । अनेकधा तत्र तस्या निसर्गरमणीया शोभोपवर्णिता कविना । सा च क्वचिदुल्लासमयी क्वचन च प्रसगागतक्षोभसहचरी दूयमानेवेति सत्य सहगामिनी जीवनस्य । यथा प्रावृड्वर्णने—

रविसक्रान्तसौभाग्यस्तुषारावृतमण्डल ।
नि श्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥
स्निग्धैरश्रायतश्चेदैर्बन्धुप्राणमिवाम्बरम् ।
कशाभिरिव हैमीभिरविद्युद्भिरिव ताडितम् ॥
मेघकृष्णाजिनधराधारा यज्ञोपवीतिन ।
अन्त स्तनितनिर्घोषा सवेदनमिवाम्बरम् ॥
क्वचित्प्रकाश क्वचिदप्रकाश नभ. प्रकीर्णाम्बुधर विभाति ।
क्वचित्क्वचित् पर्वतसनिरुद्ध रूपं यथा शान्तमहार्णवस्य ॥
मत्ता गजेन्द्रा मुदिता गवेन्द्रा वनेषु विश्रान्ततरा मृगेन्द्रा ।
रम्या नगेन्द्रा निभृता नरेन्द्रा. प्रक्रीडिता वारिधरै. सुरेन्द्रा. ॥

वियोगदूयमाना वृशाङ्गी सीता पश्यतो हनूमतश्चन्द्रस्य स्वरूपमपि तादृशमेव क्षामक्षामम्—

ततोऽरुणपरिस्पन्दमन्दीकृतवपु शशी ।
दधे कामपरिक्षामकामिनीगण्डपाण्डुताम् ॥ (रा. सु १ । २०)

रात्रो गगनाजिरे विहरतस्तारापतेरतिशयरामणीयका शोभाऽतितमा हारिणी—

या भाति लक्ष्मीर्भुवि मन्दरस्था, तथा प्रदोषेषु च सागरस्था ।
तथैव तोयेषु च पुष्करस्था रराज सा चारु निशाकरस्था ॥
हसो यथा राजति पुष्करस्थ. सिंहो यथा सुन्दरकन्दरस्थ ।
धोरो यथा दर्पितकुञ्जरस्थ चन्द्रो विबभ्राज तथाम्बरस्थ ॥
स्थित ककुद्मानिव तीक्ष्णशृङ्गो महाचल इवेत इवोच्चशृङ्ग. ।
हस्तीव जाम्बूनदबद्ध-शृङ्गो विभाति चन्द्र: परिपूर्णबिम्ब: ॥

वाल्मीकेरुत्तर महर्षेर्व्यासस्य महाभारत पदोजसाऽसहशम् । तत्राऽपि प्राकृतानां पदार्थाना सुन्दराणि चित्राणि सुलभानि । प्रस्तुते सागरवर्णननिदर्शनम्—

तिमिगिलझषाकीर्णं मकरैरावृत सदा ॥
सत्त्वैश्च बहुसाहस्रैर्नानाख्यै. समावृतम् ।
उग्रैर्नित्यमनाधृष्य क्रूरैग्राहसमाकुलम् ॥
शुभ दिव्यममर्त्यानाममृतस्याकर परम् ।
अप्रमेयमचिन्त्य च सुपुण्यजनमद्भुतम् ॥
घोर जलचरारावरौद्रं भैरवनिस्वनम् ।
गम्भीरावर्तकलिल सर्वभूतभयंकरम् ॥
वेलादोलानिलचल क्षोभोद्वेगसमुत्थितम् ।
वीचीहस्तै प्रचलितैर्नृत्यन्तमिव सर्वश ॥
गभीर तिमिनकरोग्रसकुल त गर्जन्त जलचररावरौद्रनादं ।
विस्तीर्णं दृष्ट्वानुत्तरप्रकाश सेऽगाध निधिमुदमम्भसामनन्तम् ।

एतयो पश्चाद् कालिदास एव प्रकृतिवर्णने सर्वनिविशेते । यदपि मासोऽस्माद् प्राचीन स्वनाटकेषु साधु वर्णयति ताम् —

कपाले मार्जारी पय इति करांल्लेढि शशिन-
स्तदच्छिद्रप्रोतान्विसमिति करी सकलयति ।
रतान्ते तल्पस्थान्हरति वनिता ऽप्यशुकमिति
प्रभातस्तच्चन्द्रो जगदिदमहो विप्लवयति ॥

अत्र पद्ये शशिरश्मीना सरला स्वाभाविकी च वर्णना ।

कालिदासस्य प्रकृति प्रति विशेष एव मोहोऽभिलक्ष्यते । तस्य पात्राणि प्राय स्वकार्यनिरतानि अपि तस्या कामनीयक प्रति कृताग्रहाणि । कविरयाय समासेन व्यासेन च यथावसर ता वर्णयति । शाकुन्तलस्य प्रस्तावनायामेकेनैव पद्येन स ग्रीष्मस्य स्वरूप प्रत्यक्षीकरोति—

सुभगसलिलावगाहा पाटलसंसर्गसुरभिवनवाता ।
प्रच्छायसुलभनिद्रा दिवसा परिणामरमणीया ॥ (शा १।३)

अयमेवनूं ऋतुसंहारे विस्तरशो निरूपित । हिमाचलस्य कुमारसभवे, वसन्तागमस्यापि तत्रैव शाकुन्तले च, ग्रीष्मस्य च रघुवशे चारुचित्रणम् । विक्रमोर्वशीये सनथोरतिरमणीया । मेघदूते तु प्रकृतिरचेतनतामापादितेति किं वक्तव्यम् । शाकुन्तले शकुन्तलया सह तादात्म्य भजन्ती प्रकृति तस्या विरहे रोदितीव ।

उद्गिण्ण-दर्भ-कवला मिग्ध-परिच्चत्त-रोमन्थणा मोरी ।
ओसरिअ-पाण्डुपत्ता सुअन्ति अस्सू दिअ लदाओ ॥ (४।१२)

तत्रैव चतुर्थेऽङ्के प्रभातवर्णनं रमणीयतमम्—

कर्कन्धनामुपरि पटलं रञ्जयत्यग्रसन्ध्या
ध्वान्तं मुञ्चत्युटज-पटलं वीत-निद्रो मयूरः ।
वेदिप्रान्तात्खुर-विलिखिताद्दुत्थितश्चैष सद्यः
पश्चादुच्चैर्भवति हरिणः स्वाङ्गमायच्छमानः ॥ (४।४)

पश्चाद्वर्तिनां कवीनां प्रकृतिचित्रणानि प्रायशोऽलंकृतानि । न तेऽलंकार-क्रीडां जातु विस्मरन्ति । प्रस्तुवन्ति नियतिं तां तयैव शैल्या । भारविः किरातार्जुनीये—

अंशुपाणिभिरतीव पिपासुः पद्मजं मधु भृशं रसयित्वा ।
क्लीबतामिव गतः क्षितिमेष्यल्लोहितं वपुरुवाह पतङ्गः ॥

अत्र पद्येऽस्तं गच्छतः सूर्यस्य सुषमां साधु वर्णयति । माघश्च शिशुपालवधे बहुभिरच्छन्दोभिः प्रकृतिं वर्णयति :—

धूमाकारं वहति पुरः सौधवं वर्णेनाग्नेः सदृशि पुरः पश्यामी ।
श्यामीभूताः कुसुमसमूहैर्म्लानां लीनामालीमिह तरवो बिभ्राणाः ॥

अत्र भ्रमराकलितायास्तरुमालिकायाश्चार्वी शोभा प्रस्तुता ।

कुमुदवनमपश्रि श्रीमदम्भोजखण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।
उदयमहिमरश्मिर्याति यावत्तं हिमांशु-
र्हन्त विधि-लसितानां ही विचित्रो विपाकः ॥

प्रभातवर्णनस्येदं सुन्दरतमं निदर्शनम् । वसन्तस्य च—

मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मृदुरुग्मदध्वनिभृता निभृताक्षरमुज्जगे ॥

अत्र शोभनं रूपम् ।

प्राकृतवर्णने भवभूतिरतितमां सम्मानार्हः । न स केवलं सुकुमारं भीषणमपि रूपं साधु वर्णयति । अत्र मानवी संविन्निहिता वर्तते या कालिदास बाणं च परित्य-क्त्वान्यत्र दुर्लभा ।

स्निग्ध-श्यामाः क्वचिदपरतो भीषणाभोगदृश्याः
स्थाने-स्थाने मुखरककुभो भ्राजितं निर्झराणाम् ।

एते तीर्थश्रमगिरिसरिद्गर्तैकान्तारमिश्रा.
संहृश्यन्ते परिचितभुवो दण्डकारण्यभागाः ॥

इदं पद्यं रभसादस्मान् दण्डकारण्यं प्रत्यामन्त्रयति ।

निष्कूजस्तिमिताः क्वचित्क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः
स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः ।
सीमानः प्रदरोदरेषु विलसत्स्वल्पाम्भसो यास्वयं
तुष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते ॥

अत्र भीषणहृद्यं साधु प्रस्थापितम् । एवं च—

'अर्थैतानि मदकलमयूरकण्ठकोमलच्छविभिरवकीर्णानि पर्यन्तेरविरलनिविष्ट-नीलबहलच्छायतरुणतरुषण्डमण्डितान्यसम्भ्रान्तविविधमृगयूथानि पश्यतु महानुभावः प्रशान्तगम्भीराणि मध्यमारण्यकानि ।'

अत्र सुकुमाररमणीयं रूपं प्रस्तुतम् ।

उदितमेव पूर्वं यत्कालिदासानन्तरं व्यापिनी प्रकृतिनिरीक्षणशक्तिर्वाण-भट्टस्यैव । अलंकारप्रायाऽपि तस्य शैली स्पृशतीव तस्या आत्मानम्, प्रत्यक्षीकरोति तत्स्वरूपम् ।

त्रैविध्येन संस्कृतकविभिर्वर्ण्यते प्रकृतिः । प्रातिस्विकतया, उद्दीपनतया उपमानतया च । क्वचिदप्रसंगानुपातिप्रभावोद्भावनाय । कादम्बर्यां च चतुर्विधा अपि प्रकारा लक्ष्यन्ते यथावसरम् । नोऽप्यत्र सर्वेऽप्युदाहर्तुं शक्यन्त इति एकमेव प्रस्तूयते । यथा—

'क्षयमुपगतायां सन्ध्यायां तद्विनाशदुःखिता कृष्णाजिनमिव विभावरी तिमिरोद्गममभिनवमवहत् । अपहाय मुनिहृदयानि सर्वमन्यदन्धकारतां तिमिरमनयत् । क्रमेण च रविरस्तं गत इत्युदन्तमुपलभ्य जातवैराग्यो धौतदुकूलवल्कलधवलाम्बरः सतारान्तःपुरपर्यन्तस्थिततनुस्तिमिरतमालवृक्षलेखं सप्तर्षिमण्डलाध्युषितमरुंधतीसंचरण-पूतमुपहितापाढमालक्ष्यमाणमूलमेकान्तस्थितचारुतारकामृगममरलोकाश्रममिव गगन-तलममृतदीधितिरध्यतिष्ठत् ।'

(का. जाबालिवर्णने)

अत्रावतरणे कविरलंकृतमार्गेण चन्द्रोदयं प्रस्तौति । एवमेव हर्षचरिते प्रभाकरवर्धनमृत्युप्रसंगे हृद्यं प्रत्यूषवर्णनमवसरानुरूपं विषादमयं गाम्भीर्यं व्यनक्ति ।

यथा—

"ततः शुचेव मुक्तकण्ठमारटत्सु कृतवाकुकुलेषु, गृहगिरितरुशिखरेभ्यः पातयत्स्वात्मानं मन्दिरमयूरेषु, परित्यक्तनिजनिवासेषु च वनाय प्रस्थितेषु पत्ररथेषु, सद्यस्तनभूते ताम्यति तमसि, मन्दीभूतात्मस्नेहेष्वमावमभिलषत्सु प्रदीपेषु, स्फुरदरुण-किरणबलकलप्रावृतवपुषि प्रव्रज्यामिव प्रतिपन्ने नभसि, प्रभात समयेन समुत्तीर्यमाणासु पायित्वास्यिशकलास्विव कलविङ्ककन्धरानुसरासु तारकासु, भूमृद्धातुगर्भकुम्भ-धारिषु विविधसरःसरित्तीर्थाभिमुखेषु प्रस्थितेषु वनकरिकुलेषु, शारदशुचिसिकय-पटलपाण्डुरे पिण्ड इवापर-पयोनिधिपुलिनपरिसरे पात्यमाने शशिनि ·····चचाल घोपस्नानाय देवो हर्षः।" (ह. ५उ.)

एवंविधानि प्रसंगोचितानि वर्णनानि न सर्वत्रोपलभ्यन्ते। परस्तादवर्तिभिः कविभीरूढिपालनायैव प्रायो व्यधीयत प्रकृति-चित्रणम्। तत्र न लभ्यते हृदय-स्पर्शिनी सवित्। यथा हरविजयकर्तुं राजानकरत्नाकरस्य सागरवर्णनं रघुवश-गतस्य जलधिस्वरूपस्य कलामपि न स्पृशति। यथाहि—

लीलाविलोलकलकण्ठविहंगकेलिकोलाहलाकुलकुलायकुलामलाङ्के।
करकोलकन्दकदलीलवलीलवगलीलाललामवलमञ्जुलकूलकच्छे॥

इदं भाषासमालंकारमेव साधयति पद्यं न तु वर्ण्यस्य स्वरूपं चारु प्रत्यक्षी-करोति। अस्मात्तु माघकृतमेव वर्णनं समुद्रस्य सुन्दरतरम्। यथा—

आश्लिष्टभूमि रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरंगम्।
फेनायमान पतिमरुतामसावपस्मारिणमाशशङ्के॥ (शि. व. ३)

श्रीहर्षस्य वर्णनमपि प्रकृतिस्वरूपापेक्षयाऽलंकारकौतुकमेव पूरयति। यथा प्रभात-वर्णने—

तिमिर-विरहात्याप्लूयन्ते दिशः कृश-तारकाः,
कमलहसितैः श्वेतीवोन्नीयते सरसी न का।
शरणमिलितध्वान्तध्वंसि प्रभाऽऽदरधारणाद्,
गगनशिखरं नीलत्येकं निजैरयशोभरैः (नै. १६।३१)॥

एतादृशान्येव वर्णनानि दृश्यन्ते प्रायः पश्चात्तनानां कवीनाम्। लभ्येत नाम क्वचित् काचित् सरसा कल्पना सर्वथा तस्या अविरहात्। पर प्रवृत्तिरेव न तादृशी शिष्टा। प्राकृतव्यापाराणां न तथा सूक्ष्मेक्षिकया निरीक्षणं तैर्विहितं यथा कालि-दासादिभिः। अद्यतना काव्यकृतस्तु नवभावनोपेताः प्रयतन्तेऽभावमिममपाकर्तुम्। अस्ति तेषां वर्णने यायार्थ्यम्। प्रशस्या तावदेषा प्रवृत्तिः।

साहित्ये कामभावना

'प्रायो दृश्यते सर्वासामपि भाषाणां साहित्येषु कामभावनायाः प्राधान्यम्। गद्ये, पद्ये, नाटकेषु, गल्पेषु च तस्या. स्वरूपं प्रत्यक्षतोऽप्रत्यक्षतो वा लक्ष्यत एव। जीवनस्य विश्लेषणे न सा कथमपि परिहातुं शक्या। आब्रह्मस्तम्बपर्यन्तं सर्वत्रा-ऽपि चेतनेऽचेतने च यथाकथंचिदीक्ष्यत एवास्याः सत्त्वम्। कं नैषा खिलीकरोति सति सामर्थ्ये निरिन्द्रियाणां हतौजसां व्यापारान्तरप्रसक्तिविस्मृतात्मनां वा कामं भवेदितो विरतिर्न तु सर्वस्य'।

कुशः, काणः, खञ्जः, श्रवणरहितः, पुच्छ-विकलः,
क्षुधाक्षामो रूक्षः पिठरकपालार्पितगलः।
व्रणैः पूतिक्लिन्नैः कृमिभिरिव भूतैराकुततनुः
क्षुनीमग्वेति श्वा तमपि मदयत्येव मदनः॥ (मौ. वि. च.)

काम एव वासना-संज्ञया व्यवह्रियते यां विना न मानवो रसं रसितुं क्षमः।

सवासनानां सभ्यानां रसस्यास्वादनं भवेत्।
निर्वासनास्तु रंगाग्नः काष्ठकुड्याश्मसन्निभाः॥ (सा. द. ३)

वासना नात्र लोकप्रचलितार्थे प्रयुज्यतेऽपि तु सूक्ष्मरूपेण हृदयसंनिहितामा
इच्छायां मामृते नहि प्रभवति जनः किमपि कर्तुम्। सैवोद्दिश्य विरसमपि जीवितं
सरसयति। क्व न खलु सा? गतासौ लोष्ठपिण्डे!

कामस्तदग्रे समवर्तताधि, मनसो रेतः प्रथमं यदासीत्।
सतो बन्धुमसति निरविन्दन्, हृदि प्रतीष्या कवयो मनीषा॥
(ऋ. १०।१२९।४)

कामोऽत्र 'बहु स्यां बहु प्रजायेय' इत्याकाराऽऽत्मविस्तारकामनैव, यया प्रेरितो न स्वस्मिन्नेव निलीयमानो जनोऽनुरागद्वारेण परैः सह सम्बध्नाति तांश्च स्वामिन्नाद्

करोति । अत एव पति पत्नी च 'देहो भिन्नस्तत्रात्मारवभिन्न' इति कृत्वा मिथो-ऽर्धाङ्गतां भजत । महत्यपि कुटुम्बे सम्बन्धविस्तारेण सा सर्वानपि सदस्याम् व्याप्नु-वत्यभिन्नता तानैक्यसूत्रेण ग्रथ्नाति ।

परमस्यैव संकल्पात्मकस्यैक रूप स्त्री पुरुषयो समागमविषय विशेषत कामशब्देन प्राधान्येन व्यपदिश्यते । सा च यौनभावना (sex) माऽनुरागरहिता सती कुत्सामेव धारयति । तामेव प्रणयसरसा नानयन्ती समाजे कटुकता विशृंखलता च···

'धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ।'

इति स्वीकृतवान् गीताया तत्रभवान् कृष्ण ।

जीवनस्य पुरुषार्थचतुष्टये कामस्य तृतीय स्थानम् । तेषा च परस्परानुबन्धि-नोत्तरोत्तर प्राधान्य च । यथा जीवनस्य प्रथम लक्ष्य धर्म तन्मूलस्त्वार्थ । धर्म-सहकारेणोपार्जितोऽर्थोऽनिन्दितो भवति । एव च धर्मोऽर्थस्य साधनता गतस्तदपेक्षया गौणतामेव भजति, ताभ्या च सस्कृतपुरुषकारो जन काममुपभुङ्क्तं इति तयो काम साधनताऽऽपतति न च स एव चरम प्रयोजन जीवितस्येति मोक्षप्राप्तिस्तदन्ते प्रधान-लक्ष्यत्वेन वर्णिता ।

निवृत्तिमार्गपरा सर्वपैव ता कामप्रवृत्ति निन्दन्ति जीवस्य बन्धकारिणीति कृत्वा निषेधन्ति च । परमविद्याग्रस्ता लोके तयाऽऽकृष्यन्त एव । एव सा जीवनस्य स्वा-भाविकी वृत्तिरिति जीवितप्रतिबिम्बायिते साहित्ये निरूपणीयैव ।

ए पाश्चात्यो विचारक फ्रायडनामा काव्यस्य मूलकारण कामभावनामिमा स्वीकरोति । तस्य कथनेन वृत्तिरिय जीविते प्राबल्य भजन्त्यपि सामाजिकैर्धार्मिकै-रार्थिकैर्या बन्धनैर्विफलीकृता कुण्ठिता सती कलास्वभिव्यज्यते । दृश्यते चेय प्रवृत्ति-र्लोके यत् स्ववाञ्छितमलभमानो नर काव्ये, चित्रे, सगीते वा मनोरथ स्फुटीकरोति । मेघदूतस्येद पद्य समर्थयति चैतत् ।

त्वामालिख्य प्रणयकुपितां धातुरागै शिलाया-
मात्मान ते चरणपतित यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सगम नौ कृतान्त ॥ (मे उ ४४)

अस्मिन् पक्षवाक्ये सर्वेषामपि विहतमनोरथाना कलितमौनानां प्रत्यक्ष वा रुदतां प्रणयिना करुणकरुणा कथा स्फुटीकृता । अतो वृत्तेरस्याश्चित्रण स्वाभा-विकमेव । पर केवल वासनारूपेण तस्या वर्णन न स्वास्थ्यावह समाजस्य । नग्नताया'

पशुप्रायतया न सा मानवेषु संगच्छते । अत एव प्रणयरूपेण तत्परिपाकेण च विवाहे परिणता सा सकला मर्यादिता च संपद्यते ।

काव्ये कामभावनायाश्चित्रणेन मानवजीवनस्य चित्रणं व्यक्तित्वस्य च निरूपणं साधु सम्पद्यते । केवल स्वरूपाख्याने न तथा संवित् संभवतीति कृत्वा तस्या रसरूपेणैव वृत्तिर्निरूपिताऽऽचार्यैः । इदमेव कारणं यत् काव्ये शृङ्गारस्य प्राधान्यं सर्वत्र लक्ष्यते । अनेन प्रणयवृत्तेश्चारुता परिणतिश्चानन्दमयी जायते । न काव्यं वीतरागाणां श्रोत्रियाणां वा कृते ये समलोष्टाश्मकाञ्चना. शुष्कहृदया वा । लोकस्थितौ वर्तमानास्तेऽपि शृंगारतरंगिण्यां निमज्जन्त्येवेति तैरपि दुस्त्यजेयं कामवृत्तिः । तया काव्यजगत् सत्यमेव रसमय भवति यत्र मग्नं मानवीय मनो द्रुतं सत् तेनैव रसेनैकतामिव व्रजति । तामेव चमत्कृतिं वीक्ष्योक्तमानन्दवर्धनेन—

अपारे काव्यसंसारे कविरेक. प्रजापतिः ।
यथास्मै रोचते विश्वं तथा तत्परिवर्तते ।।
शृङ्गारी चेत्कविः काव्ये, जातं रसमयं जगत् ।
स एव वीतरागश्चेन्नीरस सर्वमेवतत् ।।

तस्मादेव कालिदासादयः श्रेष्ठाः कवयः काव्ये शृंगारमेव प्रमुखतया व्यरूपयन् । न तस्याश्रयाः केवल मानवा अपि तु तिर्यञ्चोऽपि तत्तरलिता वर्णितास्तैः । यथा कुमारसंभवे—

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः ।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ।। (कु३।३६)

अत्र तिर्यग्गतोऽप्यनुरागः परां सरसतामातनोति परिस्थितेः ।

ध्रुवेरगुप्ता दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समय विलंघ्य ।
दिग्दक्षिणा गन्धवहं मुखेन व्यलीकनिश्वासमिवोत्ससर्ज ।। (कु. सं ३।२५)

अत्र स्वयं प्रकृतिरपि प्रणयतरंगिणीमवगाहमाना दृश्यते ।

पर्याप्तपुष्पस्तबकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः ।
लताबधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ।। (कु सं. ३।३६)

देवा अपि वृत्याऽनया विलंघ्यन्ते, न केवलं मानवा.—

हरस्तु किंचित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ।।
(कु. सं. ३।६७)

अथवा—

पशुपतिरपि तान्यहानि कृच्छ्रादगमयदद्रिसुतासमागमोत्क ।
कमपरमवश न विप्रकुर्युर्विभुमपि त मदमी स्पृशन्ति भावा ॥

(कुमा ६।९५)

तदेव कारण यज्जीवनस्य मूलभूततया प्रणयस्य तन्मूलतया च शृङ्गारस्य भोज शृगारमेव रसराज प्राधान्येनैक सर्वेषा रसान्तराणामाश्रय च स्वीचकार। स हि स्वर्णोपलो यस्य स्पर्शेन वीरादयोऽपि रसा पोषातिशय वहन्ति। तथाहि—

कपोले जानक्या करिकलभदन्तद्युतिमुषि
स्मरस्मेरस्फारोड्डमरपुलक यक्त्र कमलम्
मुहु पश्यन् शृण्वन् रजनिचरसेना कलकल
जटाजूटग्रन्थ प्रयमति रघूणां परिषद ॥

रामस्य रणोत्साहवर्णनेऽस्यानुरागस्य सपुट शोभातिशय पोषयति। शृ गारस्य कामवृत्तेर्वा जीवने तादृश महत्व समीक्ष्यैव वीतरागैरपि वाल्मीकि-व्यासादिभिर्यत्र तत्र तस्या प्रतिपादन कृतम्। तत्कृते न ते दूष्या। अन्यभाषाकाव्येष्वपि कामवृत्तेरस्या प्राधान्य वर्तत एव।

आधुनिके युगे साहित्येषु विविधा अतिवाद स्पृशन्त्य प्रवृतयो लक्ष्यन्ते। यथार्थवादस्यादर्शवादस्य च विवाद पर वैषम्य तत्रानयति,। जीवितस्य यथार्थं चित्रण काव्यस्य मन्वानास्तन्निषेण कामवृत्तीस्तथातिरेकेण वर्णयन्ति यया ता जुगुप्सा जनयन्ति। 'चीनाशुकावगुण्ठनान्तरेण नि सरणपरमुपमानिर्झर रमणी मुखमिव व्यञ्जयित कामवर्णनमेव सविशेष रुचिपोष तोषयति रसिकान्। तथा चोक्तम्—

नाभ्रौ पयोधर इयातितरां प्रकाशो नो गुजंरी-स्तन इवानितरां निगूढ ।
यद्यो गिरामपिहित पिहितश्च कश्चित्सौभाग्यमेति मरहट्टवधूकुचाभ ॥

अपरे तु काव्यस्य चरममुद्देश्य रुचिपरिष्कारेण जीवनस्यादर्शीकरणमेव मन्वते। आदर्शवादस्य भक्तास्ते काव्यमुपदेशमय कृत्वा शुष्कमेव तत्वयते। पर न काव्य स्मृति-ग्रन्थोऽपि तु कान्तासम्मित शब्दैरेव शिक्षा ददाति गुडजिह्विकया। तदेव कारण यदस्यषोपस्य बुद्धचरितापेक्षया सौन्दरनन्दमेव चारुतरम्। तत्र हि सुदर्शा नन्दस्य च प्रणयातिशयवर्णनेन प्रचुरा सरसता वर्तत एव।

वस्तुत स्त्रिया पुरुषस्य च प्रणय पुरुषप्रकृत्योरेव मिथोऽनुराग। तत एव सृष्टेर्विकास समवति। अस्य वशेन नर किं न करोति, महत्तर साहस समाचरति। नारी प्रेरणैव नरस्य। तयोर्मिथ ऐक्य ब्रह्मण एव मायया सयोग। आनन्दमयस्य च

ब्रह्मांशभूतस्य जीवस्य पुनः स्वकीयानन्दमयस्वरूपप्राप्तिरेव पुरुषार्थः । माया-रूपिण्या स्त्रिया सह संगतोऽर्धनारीश्वरतां व्रजन् तमेवानन्दमधिगच्छति । 'रसो वै सः रसं लब्ध्वैवायमानन्दीभवतीति ।'

यच्चामावग्रस्तेऽपि जगति, दारिद्र्यज्वरग्रस्तजीवोल्लाघाय पुरुषार्थे कर्तव्ये न शृंगारस्यावसर इत्युच्यते, तदपि नातिचारुतमम् । देशकालातीतस्यैव काव्यस्य सर्वोत्तमत्व विश्वजनीनभावनमेव । युगविशेषापेक्षया कृतं च काव्यं न सर्वदा महीयते । कामवृत्तिश्च शाश्वती । अत एवोक्तं लोलम्बराजेन—

येषां न चेतो ललनासु लग्नं मग्नं न साहित्यसुधासमुद्रे ।
ज्ञास्यन्ति ते किं हि मम प्रयासमन्या यया शारदधूविलासम् ॥

अतो नेयं कामवृत्तिः सर्वथा निन्दनीया ।

'एको रसः करुण एव निमित्तभेदाद् ...'

" जीवनमस्माक विविधभावान्दोलितम् । क्वचित् प्रेमाऽन्यदा घृणा, अधुना हर्षस्तदा च शोक, क्वाऽपि रागोऽपरत्र विरागः । इत्थ विविधानुभूतिचित्रिते जीविते विशेषेण प्रभविष्णुर्भाव शोको यस्य परिपाक करुणो रस आलङ्कारिकाणाम् । अय यथा विषयभेदादेकोऽपि भिद्यते तथैवानुभावमुखेनाभिव्यक्तिप्रकारभेदाच्च बहुविधतामाकलयति, आलम्बनभेदादाश्रयभेदाच्च वैचित्र्यमावहन्नय नैकधा द्रावयति हृदयम्, पितापुत्रयोर्भ्रातृभगिन्योर्मातापुत्रयोर्दम्पत्यो सख्योर्वा परस्परवियोगकृतोऽय विवर्तभिदा आकलयन् प्राणिना मनास्याकुलयति । इमामेव प्रवणतामाश्रित्य महाकविना भवभूतिना प्रतिपादितम् उत्तररामचरिते—

एको रस करुण एव निमित्तभेदाद्भिन्न पृथक्पृथगिवाश्रयते विवर्तान् ।
आवर्तबुद्बुदतरगमयान् विकारानम्भो यथा सलिलमेव तु तत्समग्रम् ॥
(उ.च ३)

यथा जलमेक भ्रमिबुद्बुदादिरूपभेदानाकलयति, तथैव करुण एव रसो वैभिन्नं भजति । स एष वियोगशृगारे, करुणविप्रलम्भे च परिणमति । तस्याभिव्यक्तिश्च तीव्रतमा सुकुमारा च सरभस ललितासु कलासु प्रादुर्भवति तासो च रसिकमनस्सु साधीयसी स्थेयसी च प्रभविष्णुता ।

भारतीया काव्यपरम्पराऽनुरुध्यते चेत्काव्यस्य मूलमयमेव करुणो रस । तथोक्त ध्वनिकारेण—

काव्यस्यात्मा स एवार्थस्तथा चादिकवे पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थ शोक श्लोकत्वमागत ॥ (ध्व. १।५)

विविधवाच्यवाचकरचनाप्रपञ्चचारुण काव्यस्य स एवार्थ सारभूत । तथा चादिकवेर्वाल्मीकेर्निहतसहचरीविरहकातरक्रौञ्चाक्रन्दजनित शोक एव श्लोकतया परिणत ।" (ध्व १)

पुनश्च—"रामायणे हि करुणो रस स्वयमादिकविना सूत्रित. 'शोक. श्लोक-त्वमागत' इत्येववादिना । निर्व्यूढश्च स एव सीतात्यन्तवियोगपर्यन्तमेव स्वप्रबन्धमुपरचयता । (ध्व. ४)

न केवल सस्कृते भाषारचनास्वपि करुणस्य तन्मूलाया व्यथाया वा काव्य-जनकत्व प्रतिपादितचरम् । यथा हिन्दी-कवे सुमित्रानन्दनपन्तस्य—

वियोगी होगा पहला कवि आह से उपजा होगा गान ।
उमड कर आँखों से चुप चाप बही होगी कविता अनजान ॥

एवमेव वच्चनोपाधिधारिणो हरवशरायस्य—

"मैं रोया, तुम कहते हो गाना ।
मैं फूट पडा तुम कहते छन्द बनाना ॥'

आग्लभाषाया शैलेकविरपि करुणभावैरेव सुन्दरतमाया कविताया उद्भव मन्यते—

'Our sweetest songs are those,
That tell of Saddest thoughts'

(Sky Lark)

अनुभवसिद्धमेवैतत्, परमाह्लादकरी प्रीतिभावनानिर्भराऽपि कविता न तथा द्रावयति मनासि रसिकाना यथा करुणाप्लाविता । अत एव शृगारस्य परिपोष कामयमानैराचार्यैर्विप्रलम्भस्य निरूपण तत्रावश्यकत्वेन निर्दिष्टम् । तथा हि—

'न विना विप्रलम्भेन सभोग पुष्टिमश्नुते ।'

भवभूतेरपि 'इय गेहे लक्ष्मी' प्रभृतिषु पद्येषु न तादृशी द्राविणी शक्तिर्यथा—

देव्या शून्यस्य जगतो द्वादश परिवत्सर ।
प्रनष्टमिव नामापि न च रामो न जीवति ॥ (उ च २।३३)
दु खसवेदनायैव रामे चैतन्यमागतम् ।
मर्मोपघातिभि प्राणैर्वज्रकीलायित हृदि ॥ (उ च, १।४७)

अनयो पद्ययो । यदा तु रसान्तरेण मिश्रिता स्यादनुभूतिस्तदाऽतितरा सम्पद्यते मर्मभित् । अत एवोक्त रामवचनैर्मुह्यन्ती सीता प्रति तमसया—

नैता प्रियतमा वाच स्नेहार्द्रा शोकदारुणा ।
एतास्ता मधुनो धाराश्च्योतन्ति सविषास्त्वयि ॥ (उ च २।४७)

अस्यैव करुणस्य प्रभावादभिज्ञानशाकुन्तलस्य चतुर्थोऽङ्कः प्रभावातिशायी यत्र—

उद्गीर्णदर्भकवला मृगी परित्यक्तनर्तना मयूरी ।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः ॥ (शा. ४।१२)

उत्तररामचरितस्य च तृतीयोऽङ्कः प्रभविष्णुतमोऽस्यानुभावाद् यत्र खलु—

'अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ।'

का कथा नवनीतसरसचेतसां रसिकानाम् । करुणपर्यवसायिनां नाटकानां विदेशेषु भूयान्प्रचारोऽस्य तीव्रतमानुभवकृतानन्दमुद्दिश्यैव ।

अयं रसः करुणविप्रलम्भेन विप्रलम्भेन च शृंगारस्य पोषकः, परिपन्थिललना-विलापपरिनिष्ठितो वीरस्य रौद्रस्य परिपाककारी । क्रन्दनातिशये कपालविस्फोटादिना बीभत्सस्यानर्थकारिणो भये सति संश्रयगतो भयानकस्यापि जनकः । आलम्बनस्मृत्यादिनाऽद्भुतस्य प्रमत्तादौ हासस्य जगतो दुःखावसानसूचनाच्छान्तस्य चोद्भावक इति सत्यमेवायं रसान्तराणां मूलम् ।

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शो नीवीविस्रंसनः करः ॥

अत्र शृंगारेण करुणस्य तीव्रताऽसाधारणी । एवं च—

क्रामन्त्यः क्षतकोमलांगुलिगलद्रक्तैः सदर्भाः स्थलीः
पादैः पातितयावकैरिव पतद्बाष्पाम्बुधौतानना: ।
भीता भर्तृकरावलम्बितकरास्त्वद्वैरिनार्योऽधुना
दावाग्निं परितो भ्रमन्ति पुनरप्युद्यद्विवाहा इव ॥

अत्र वर्ण्यवैरिनारीणां करुणदशा वैवाहिकविधिनोत्प्रेक्षिता प्रस्तुतस्य शौर्यातिशयं व्यनक्तीति स्फुटैव करुणस्य रसान्तरमूलता सर्वातिशायिनी द्रावशक्तिश्चेति शम् ।

—०—

वेदाः, सम्प्रति तदध्ययनस्योपयोगिता च

आर्याणां संस्कृतेः, धर्मस्य, दर्शनानाम्, साहित्यस्य, ज्ञानस्य, विज्ञानस्य कलानाम्, शिल्पस्य, किं बहुना, सकलस्यापि वाङ्मयस्य प्रेरणास्रोतो वेदः। नास्ति जीवनस्य कोऽपि भागः, यत्तमदपि क्षेत्रम् यत्र वेदा न प्रमाणम्। धर्मे, आचारे, संस्कारेषु, व्यवहारेषु च वैदिक्येव व्यवस्था तेषां मान्या। अदुष्टमपि प्रसिद्धमपि परिचितमपि किमपि कर्म वेदेनाप्रमाणित सदकरणीयताकोटिमेव निविशते। तस्मात् को नामार्यो नाङ्गीकुर्याद् वेदस्य माहात्म्यम् ?

किन्नाम वेदत्वमिति विचिकित्सायाम् ज्ञानार्थकाद् विद्धातो. "विदन्ति सकल-धर्मार्थं-रहस्यमनेनेति वेद." इत्येव व्युत्पाद्यतेऽभियुक्तैः। तथा चोक्तम्—

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥"

तस्मादेव स्मृतयः, सूत्राणि, दर्शनानि विषये कस्मिन्नपि विवदमानानि कमपि निर्णयं नाभ्युपगच्छन्ति वेदमेव प्रमाणत्वेनोपतिष्ठन्ते। आप्रालेयालयाद् कुमारी यावदार्याणां विवाहे, सुतजन्मोत्सवे, नामकर्मसंस्कारे, विद्यारम्भे च वेदमन्त्रैरेव सकल-कर्मणामनुष्ठानमनुष्ठीयते। अतएव सवर्णानां वेदाध्ययनमनिवार्यतामापादितमाचार्यैः। तथाहि—

१. स्वाध्यायोऽध्येतव्यः।
२. ब्राह्मणेन निष्कारणं षडङ्गो वेदोऽध्येयो ज्ञेयश्च।
३. योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥

वेदाध्ययनस्य न केवलं पुरुषार्थिकया रारटनमपेक्षितं मनुष्याणाम्। जीवन-प्रयोजनीभूतस्य पुरुषार्थचतुष्टयस्य साधनानां नानाविधयाणां साधु परिशीलनमपि

तत्रैव समाविष्टम् । वेदाश्चत्वार उपवेदा, ब्राह्मणानि, आरण्यकानि, उपनिषद', षडङ्गानि, गाथा, इतिहास, पुराणानि वेदाध्ययनकक्षाया परिगणितानि । परा अपरा चोभे अपि विद्ये वर्णितेष्वेषु समाविष्टे । वेदा हि प्रधानविषया, न तेषा परिशीलन ब्राह्मणानि, षडङ्गानि, गाथा, इतिहास पुराण चानधीत्य साधु सभवति । उक्त च—

छन्द पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयन चक्षुर्निरुक्तं श्रोत्रमुच्यते ।
शिक्षा घ्राण तु वेदस्य मुख व्याकरण स्मृतम् ॥

इत्येतेषा षण्णामप्यङ्गानामध्ययन वेदाध्ययनप्रयोजकमित्यपरिहार्यं तत्परिशीलनम् । ब्राह्मणाना तु मन्त्रब्राह्मणयोर्वेदनामधेयतया स्वग्राह्यत्वम् । वेदे तदग्राहिणा मत तु तैत्तिरीयसंहितामा ब्राह्मणस्यापि सहवर्तितया मन्त्रभागे न चाह । धनुर्वेद, गान्धर्ववेद आयुर्वेद, शिल्पवेदश्चेति चत्वार उपवेदा अपि साकल्येनासुलभा अपि पुरुषार्थयोरर्थकामयो साधका इति निर्विवादमध्येया एव । तेषु तेषु मन्त्रेषु, ब्राह्मणभागेषु चोपाख्यानादिसत्त्वाद् गाथा, इतिहास, पुराणानि च तत्परिज्ञानाया-वश्यकानि । इत्येव सप्रधार्योक्तम्—

'इतिहास-पुराणाभ्यां वेद समुपबृंहयेत्'

आरण्यकान्युपनिषदश्च पराया विद्याया अधिगमयितृतमा समंस्याऽप्यध्येया एव । परा च 'परा यया तदक्षरमधिगम्यते' इत्यभियुक्तोक्तेर्ब्रह्मविद्यैव । सा च मोक्षसाधनमिति चरमपुरुषार्थाधिगतिकारणम् । ततस्तस्या परिशीलन सकलविद्या मूर्धन्यतामाकलयति सिद्ध च तेन साङ्गस्यापि वेदस्य निखिलपुरुषार्थोपायरूपत्वमव-श्यमध्येयत्व च ।

परमिम वार्त्ता स्पृशति मुगमतीत यदा न व्यक्षिप्यत हृदयगुहाविद्योतिनी धियोदरपूरणोपायतैककोटौ । न यदाऽऽकण्ठमाकलितसरस्वतीगाढमज्जना सज्जना अधीयते स्म दास्य-मात्रैक-लक्ष्या । तदा स्वाध्यायो ज्ञानाय, सशयकलुषनिशानिरासाय नवचेतनायै, स्फूर्त्यै, धृत्यै, मत्यै, शान्त्यै, गत्यै, मोहापनोदाय, नैराश्यशोदाय चाभूत् । सप्रति तु शुका इव धान्यकणान् अशासतया बहून् विषयान् स्वदमाना परीक्षामेव दुस्तरामुत्तितीर्षव उपाधिपत्रार्थिन एव न तु विद्यार्थिन । आलोचना प्राध्यापको-पदिष्टसारसंग्रहांश्च (notes) सावधानमधीयाना न चेष्टन्ते विषयतलस्पर्शिता स्प्रष्टुम् । सगच्छते च तेषु प्रवाद —

गुरोर्गिर पञ्चदिनान्यपीरय वेदा तदास्त्राणि दिनत्रयञ्च ।
[illegible] ॥

ते खलु तमेव विषयमधीयते यस्य व्यवहारजगति भवति जीवनायोपयोगिता। कथं न ते विज्ञानमधीयेरन् येन यान्त्रिकाः, चिकित्सकाः, प्रौद्योगविदः (technician) रसायनविदः, भूगर्भशास्त्रिणो वा स्युः। कथं न वा मुखचुम्बितधूम्रवर्तिका गृहीतांग्ल-भाषावैदुष्याः पाश्चात्येषु तत्सभ्यताभावितान्तरेषु च जनेषु संगतं विधायान्तर्राष्ट्रीय-सांस्कृतिकसम्पर्कद्वारेण विदेशयात्रासौभाग्यं लभेरन्। तादृशा वैदेशिका इव वेदानजापालगीतसंग्रहानधिकान् मन्यमानाः कथं तदध्ययनाय स्पृहयेयुरिति समापतति सतर्कं प्रश्न-शतके विवक्षितं मदद्यापि वर्तत एव वेदाध्ययनस्य महत्त्वम्। तत्र कारणानि—

. वेदा विश्वस्य प्राचीनतमा ग्रन्था इति सर्वेषा मतम्। ततोऽतीतवृत्तानु-सधायकानां तदध्ययनमपरिहार्यमेव।

२. सामयिकमूल्याभावेऽपि प्राक्कालिक गौरवमनुरुध्य सुरक्षितानि विधीयन्ते वस्तूनि पुरातनानि सर्म्म.; वेदाश्च पुराणतमा इति तदुद्धारोऽपेक्षितः। स चा-ध्ययनापेक्षः।

३. मानव सभ्यतायाः संस्कृतेश्च प्रथमं वरदान वेदाः। ततोऽपि तेऽध्येया एव।

४. अधुना न सृष्टीतिहासो सहस्रचतुष्टयाब्दवर्षपरिमितोऽपि तु दीर्घतरः। तस्य च सुलभः प्रावतनतमो भागोऽनवमो वेदेषु। तदर्थमपि नोपेक्ष्यस्तेषामभ्यासः।

५. मानवजातेरैतिह्यज्ञाने भाषाशास्त्रस्य महानुपयोगः सर्वैरप्यूरीकृतो बुधैः। तच्च वैदिकभाषाध्ययनं विना पङ्गुवेवेति नितरा समर्थितं तन्महत्त्वम्।

६. आर्याणां संस्कृतेरुदसायित वेदैरिति चाध्येयास्ते स्वसंस्कृतिरक्षणार्थिभिः संस्कृतंमन्यैः। कथं न तेऽभ्यस्येरन्? तदनुशीलने विस्मृते सति तेषां विलोपो विलुप्तेषु च तेषु संस्कृतेरपि निरसनमेव विधीयेत—

'छिन्ने मूले नैव शाखा न पत्रम्।'

इति। नैतावदेव। तत्र सन्निहितः खलु महान् विज्ञानराशिः समाहितानां ज्ञानैकरसिकानामन्वेषणीयः। प्राचेतसदिशाप्रभवविबुधैः मूलेऽपि महति कार्ये मावधित प्रयोजनमद्यापि वेदानुशीलनस्येति तदुपयोगिता स्वीकार्यवेति शम्।

—•—

साहसे श्रीर्निवसति

निखिलमपि मनुजजात भुवनगत ससाधन विसाधन चेति द्विधा विभक्तम्। प्रथमे खलूपचितजीवनीयोपकरणा सुख काल यापयन्तो नरा अपरे च वञ्चिता जीवितुमपरिहार्येभ्योऽपि पदार्थसारेभ्य । नाभावभावित जगत् तेषामकिञ्चनता-निमित्तम्, पर विविधानि वस्तूनि समीहमानानामपि जनानां नास्ति प्रयत्नाहते किमपि सर्वसम्पन्नतासाधनम् । सकलेऽपि समीहिते पुरुषार्थानुरोधिनी सफलता। आत्मा-नमकिञ्चन न विभावयतामभावदोष च विलोपयितु सोद्यमाना न किमपि दुष्करम्। जीवन न केवल परिमललालितसुखास्तर कुसुमशयनम्। पदे पदेऽत्र विपद् विपद-नुबन्धिनी। तत्कातरान्तरा नवनीत-मनसोऽक्षमा समुखागतापत्प्रतीकाराय। दैव सर्वमूलत्वेन प्रमाणयता तद्विधाना दुष्कर एव पुरुषकार ।

सकलविभूतिमति जगति साहसैक-रसिका विदधतो मार्ग विशल्य विलुम्पन्तोऽमा-वदूषणानि, तिरयतोऽक्षमताकलङ्कम् अमुमेव लोक स्वर्गायितुं कल्पन्ते। आलस्यपित्त-तिक्तीकृतरसना न रसने प्रभवन्ति पुरुषार्थमाधुर्यस्य ।

केचित् फेरव इवासफलता-शम्पा-सम्पात भीरव पूर्वमेव कार्याद् विरमन्ते। तेषां सकल्पतरौ शकातकझझादोलिता विकल्पशतावतकवलीकृता स्वप्नेऽपि कृत्या-कूपार-पार-दर्शनाय नालम्। निश्चयरज्जुसदानित हृदयाना साहस-ज्योतिर्द्योतितान्त-राणा मनस्विना कृते सकल्पित न खलु न फलिनीभवति। उक्त च—

अङ्गनवेदी वसुधा, कुल्या जलधि, स्थली च पातालम्।
वल्मीकश्च सुमेरु कृतप्रतिज्ञस्य वीरस्य ॥

केचनैवात्र तादृशा गर्भोपनतस्वर्णचषका, तरलितसौभाग्य भाजना अचालितपाणिपादा इहस्था एव स्वर्गलोक दुर्लभानपि भोगान् भुञ्जते। अन्यथा स्वहस्तार्जितवीरशब्दा विवरीकृतदैवगतय सुमतयो ऽनवरतचरितोद्यमेनैव स्वभाग्य निर्मिमते। तेषा खलु विदेश स्वदेशायते, स्वदेशो नगरायते, नगर भवनायते, भवन गुहायते, विपिन निष्कुटकायते। भुज-बलाधिगतमृगाधिपपदा हि पञ्चानना.।

उक्तं च—

को देशोऽत्र मनस्विन स्वविषय को वा विदेश स्मृतो
य देश श्रयते तदेव कुरुते बाहुप्रतापार्जितम् ।
मद्दष्ट्रानखलांगुलप्रहरण सिंहो यत्र गाहते,
तस्मिन्नेव हतद्विपेन्द्रवधिरस्तृण्णां छिनत्त्यारभन ॥

पुनश्च—

सुवर्णपुष्पितां पृथ्वीं चिन्वन्ति पुरुषास्त्रय ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥

तेषां साहसमेव सफलताहेतु । सत्यपि भुवनावधीरणाय प्रभवति भुजबलेऽतुले नाल सिंहधर्षणाय मत्तमातग । दूरादेव शंकितविपद पदे पदे स्खलितपदा सपद्यन्ते हास्यास्पदानि नवनीतहृदया कातरा । ससाहसा सहसा साहसाऽऽस्फालितजङ्घातला करतलेनाह्वयन्ते स्वयमापदा । ते सोत्फालमविरतोद्वान्तज्वालामुखेषु शिखिशिखरिशिखरिषु कूर्दन्ते, गर्जद्घोरघोणिषु निनदत्केसरिकरालेषु बृहत्कुम्भिबृंहितेषु गहन गहनेषु सहेलमाहिण्डन्ते , स्फूर्जन्नक्रचक्रभीषणे चोत्तालहिल्लोल-जाले वारानिधौ निरुपप्लवम् प्लवन्ते, अनाधारेऽपि गगनागणे ज्योतिरिंगणेऽवधीरितसदागतिगतय पतत्रिचार सचरन्ति । सततोपजातश्वेतान्धकारदुर्दिनमविरत प्रवर्धमानजडिमजडितनाडीस्पन्दन प्रालेय-राशि विलोपितप्रालेयाद्रिमद ध्रुवप्रदेशमदभ्रहिमानीविलीनखनिजनिचयमनुसधित्सव स्व सचारपथीन विदधति, अनाक्रान्तपूर्वाणि विलिखितगगनमुखानि पर्वत शृंगाणि प्रियतममपि जीवित सशये जिहासत मारोढु प्रयतन्ते । तेषामेव कथन यत्—

न सशयमनारुह्य नरो भद्राणि पश्यति ।
सशय पुनरारुह्य यदि जीवति पश्यति ॥

न किमपि दुष्कर तेषाम् । साहसैकरसिकानामियं भू । नाद्य पाटच्चरतादि क्रूरसितमात्रवचन साहसशब्द । सत्त्वोत्कर्ष एव प्राणिनां तेन सूच्यते । पततु नाम जीवित सशय-सागरे । पर स एव तेषामभ्युदय गिरि शिखरश्रयणाय सम्पद्यते सोपानसरणि । तस्यैव बलात् पुरा तुरुष्का भुजबलावलेपलुप्तविवेका सोल्लुण्ठ लोठितरिपुशिर-पटलमलुण्ठन् देशान्तराणि , तेनैव प्रेरिता काका इव लघिताणंवा, गृध्रा इव दूरावलोकितवैदेशिक सपदामिषगृध्नवो देशान्तरेषु स्वराज्यानि स्थापितवन्तो हरिवर्षजा । अखिलोऽप्य साहसस्य महिमा यदद्य मानवो नवनवोन्मेषप्रयणैरभ्युपीको लोकान्तरेष्वपि शासन सिषाधयिषति । तस्मात् सत्यमुक्तमभियुक्तैः—

साहसे वसति श्री ।

'ज्वलितं हि क्षणे श्रेयो न तु धूमायितं चिरम्'

चतुरशीतिलक्षयोनिषु सर्वोत्तमा मानुषी पुण्यशतैः सौभाग्यसहस्रबलैश्चैव सुलभेति कस्य नाम नादरो भवेत् तां प्रति। परिगणिता एव श्वासा जीवितानु—बन्धिनोऽमुलभा, अपुनरावर्तिन, अचिरस्थायिनश्चेति सूचयन्ति किमपि नामासाधारणं प्रयोजनम्। सत्यपि शीतवातातपासहे चिरपरावलम्बिनि वपुषि प्रादायि नियत्याऽस्मै विवेकश्रेमुषीबलमितरदुर्लभ येनासौ दुर्धर्षां प्रकृतिमपि सुखं धर्षयति, द्विगुणौजसो हिंस्रान्पशूनपि सुतरामभिभवति, दुर्जयानपि रिपून् गतायास जयति। सत्यप्येतादृशि दुरतिक्रमे पराक्रमे कृमिकीटादिसामान्येन कलित कार्पण्यो दीन जीवन् विषीदति चेत् किं तस्य जीवनेन? अमुलभानामसूना प्रशस्यतमे कुत्रापि कर्मणि विधेयो नियोगस्तेषां साफल्यमर्जयितुकामेन।

न मानव इतरतनुमिवर इव किमप्यानयति जन्मना सह जगति जायमानो रिक्तहस्तो न वा निनीषन्नपि प्रभवति तृणमपि सहैव नेतु त्यजन् जीवितम्। स्वेनैव पौरुषेणोपार्जयति विपुल वैभव समदकटकरटिसकट सुभटानीकशतरक्षित वा साम्राज्यम्। तस्यायमसाधारणो महिमा यदजेयामपि कालस्य गरीयसी प्रभुतां तनयति। मदागतिमपि स्तिमित दहनमपि शीतल निम्नाभिमुखगामि जलमपि विपरीतयानं कर्तुं क्षमोऽसौ।

तादृशशक्तिमतो मानवस्य जीवन न कार्पण्याय, नावसादाय, नापमानाय, न श्रमनाय, न कालयापनाय, नाऽऽलस्याय, न खट्वाभङ्गनाय, न च रुदिताय। स खलु भुव शृङ्गार, प्रकृते पूर्णता, गुणानामालय, ओजसो निधानम्, कलानामालम्ब, लक्ष्म्या स्वयं वृतो भर्ता, नियते प्रतिमानम् विपदा परिपन्थी मानस्य च भाजनम्। आशास्ते तस्मात्किमपि मगलायित दीन जगत्। सिंहस्येव सप्रतापस्य, चातकस्येव दृढव्रतस्य, पयोमुच इव जीवनदस्य, गजस्येव मनस्विन, सुरभेरिव परहितरतस्य, शशिन इव ताप-हारिण, रवेरिव तेजस्विन एव तस्य जीवन जीवनम्। कुक्षिभरितामात्र-

कृत्याना कुक्कुराणामिव परपादावलुण्ठनमात्रपौरुषाणा, चाटुकारितैककौशलानामुपेक्षितस्वाभिमानाना जीवन्मृताना जनुषा रज-वलुषिततनू रोदितीव मही भार भूतानाम् । उक्त च—

येषा न विद्या न तपो न दान न चापि शील न गुणो न धर्म ।
ते मृत्युलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥

तेषामेव जीवन जीवनम्, तेषामेव प्रसू प्रभू, तैरलकृता मही, तैरेव प्रसाधित जगत्, तैरेव भूषिता मानवता यैर्नामित भुवन स्वमानेन, यै. सेविता श्रीश्चिर स्व-विभवेन, यै खिलीकृत जगत् स्वात्मगुरुतया । तथाहि—

कुसुमस्तबकस्येव द्वे गती स्तो मनस्विन ।
मूर्ध्नि वा सर्वलोकस्य विशीर्येत वनेऽथवा ॥

असाधारणेन गुणगरिम्णा, शौर्यशौण्डीर्येण, यशोनिधानेन धीरताधुरीणतया मनस्विता-प्रमाणेन परिशीलयन्ति ते निखिलमपि जगत् । पातयतु नाम विपद्वज्र विधाता, वर्षतु वा प्रसादमुखदा लक्ष्मी न ते सहजा प्रकृतिगुरुता जीवितस्यापि हेतोर्जहति, तैरेव जित जगत् सरलैरनृजुपौरुषैर्विरलैर्भुवन-बन्धुभि । तथाहि—

यस्य न सम्पदि हर्षो विपदि विषादो रणे च भीरुत्वम् ।
त भुवनत्रयतिलक जनयति जननी सुत विरलम् ॥

अतथाविधाना तु भस्त्रावदेव श्वसता मृतकल्पाना जीवित वृथैव । जननीयौवन वनच्छेदकुठारांस्तादृशान् प्रसूयापि न तेषा प्रसू प्रसविनीषु सगर्व मस्तक कर्तुं क्षमा —

गुणि-गण गणनारम्भे न पतति कठिनी ससम्भ्रमा यस्य ।
तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी भवति ॥

अपि च—

स जातो येन जातेन याति वश समुन्नतिम् ।
परिवर्तिनि ससारे मृत को वा न जायते ॥
यस्मिञ्जीवति जीवन्ति बहव सोऽत्र जीवतु ।
वयांसि किन्न कुर्वन्ति चञ्चवा स्वोदरपूरणम् ॥
एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम् ।
सहैकादशभि पुत्रैर्भार वहति गर्दभी ॥

किमेतेषा काकोदराणामिव परममंविधा वपं सहस्रजीविनामपि शुनामिव दशनोदर-प्रदर्शनाविष्कृतकार्पण्यानामुपानहामिव परचरणाश्रयणैकव्रतानामनर्जित मानानामनधिगतप्रतापानामनुपात्तयशसामलब्धशौर्यपदानामनुपश्लक्ष्णशिष्टसमाचाराणा-

मस्तित्वेन । स्वल्पमपि तेषा ससम्मानमुच्छ्वसित कल्पशतावधि जीविनादपि प्रगुणम् । न ते हि परेषामनादरभाजनतामनुभवन्ति जातुचित् ।

'उच्चलित न हिरण्यरेतस घयमास्कन्दति भस्मना जन' ।

न ते विलीक्रियन्ते जनै, नावधीयंन्ते वृषणं न वञ्च्यन्ते भुजगै, न प्रतार्यंन्ते विटै । न लोभ्यन्ते मृगमरीचिकया, नावधूयन्ते लघुजनोचितैर्दुष्कृतै, न यशोक्रियन्ते दुर्भाग्यविलसितै, नानादियन्ते धनिकै । किमेतेषा चिरजीवितेन, न प्राय एतादृशानि भागधेयानि धरण्या यत् तेषा पादरजोभिर्दीर्घं काल यावत् पावनीकृता भवेत् । पर धवलयन्ति त तावतैवानेहसा सकलमपि भुवनमवधौरितशशिकिरणरोचिषा यशसा । कृतार्थयन्ति तावद्भिरव दिनै पार्श्ववर्तिन, सभ्रमिग, भुवनवर्तिनश्च जनान् । भूषयन्ति स्वोदारचरितेन मानवताम्, स्थापयन्ति निर्मलमिव यशस्तम्भ शीतादर्शम् । धन्यास्ते विभूतिभूता भुवनस्य येषा जीवन गापयति लोक मुहुर्मुहु:—

'को न प्राणिति, तेजसा ज्वलति यस्तज्जीवित जीवितम् ।'

प्रताप शिवाजी च नाभूतां दीर्घंजीविनौ पर स्वत्यागादर्शेन गतौ जगत्यमरताम् । अभिमन्यु षोडशवर्षदेशीयोऽपि कालकवलितोऽभूत् । किन्तु दुर्धर्षंगजदुर्दलधर्षंण-व्यक्त-प्रकर्षेणातुलेन बलेन नामौ मृत । तादृशमेव जीवित श्रेयस्कर स्वस्य भुवनस्य च क्षेमायेति शम् ।

—०—

व्यतिषजति पदार्थानान्तरः कोऽपि हेतुः ।

लोकोऽय विविधप्रवृत्तिशालिना प्राणिना समवाय इव चित्रवस्तूनाम् । जीवो जीवस्य जीवनमिति घोषिते जन्तुस्वभावे रक्तपातो, हिंसनम्, परस्परवैरभावो मात्सर्यमित्येवमादीनि विरोधिता-प्रमाणानि बाहुल्येन निभाल्यन्ते लोके, तथापि दृश्यते बहुधा जडानामपि पदार्थाना मिथ स्निग्धता का कथा पुनश्चेतनानाम् । न केवल मानवास्तिर्यञ्चोऽपि बाध्यन्तेऽनया समरसया प्रीत्या । शशिनि समुदिते माद्यति जलनिधिरपि मुहुरुत्तानकल्लोलबाहुर्गाढमालेप्टुमिव पयुत्सुंकश्चिन्नरवियुक्त राकापतिं गगनमभ्युत्तिष्ठति । आच्छादयति नभोमण्डल घनाघने प्रसारितचन्द्रको मृदगध्वनीकृतस्तनितघोषो नृत्यन्न श्राम्यति शिखावल । सहजगरलकुटिल-प्रकृतिरपि भुजगमो जहात्यसून्वियोजितमणि । अचेतना अपि वीरुध सरभस-मालिलघ्यन्ति परिसरगतान् तरून् मलयजपरिमललालिते सुरभिप्रणयिनि प्रावृषेण्ये वा शीकरासारशिशिरीकृते वाति वाते । प्रखर-तेजसमपि दिनकर वृतवती वल्लभतया कमलिनी न जातुचिद् भजति राग निशापतौ । किमत्र कारण, कोऽसौ निर्बन्ध केन योजित. सम्बन्ध, किंमूलोऽयमाग्रह इति विचिकित्साया महाकवे भवभूतेरुक्ति-रिय समादधाति—

व्यतिषजति पदार्थानान्तर कोऽपि हेतु—
न खलु बहिरुपाधीन् प्रीतय सश्रयन्ते ।
विकसति हि पतगस्योदये पुण्डरीकम्
द्रवति च हिमरश्मावुद्गते चन्द्रकान्त ॥ (उ च.)

उदयगिरिभाजि तारापतौ स्फुटपटलदशना भवति स्मेरानना कुमुदिनी । ज्योत्स्नासनाथे नभोमण्डले सुधाकरकरपानमत्ता यापयति सकला निशा सभीक्षमाणो ऽमृताशुविम्ब जीवजीव । जानन्नपि तरलता वञ्चकता च तस्य न जहाति मोह सलिलस्य शफर ।

व्यवहार-क्षेत्रे भवति जनानां सकारणा प्रीति । तत्र न नामापि वस्तुत प्रेम्ण । वृत्तिकौशलमेव तल्लोकस्य । आप्रयोजनमेव च तस्या स्थिति । सत्य चेन्न प्रणय कारणान्तरमपेक्षते । दृश्यते हि सोदराणामपि समानकुलशीलशिक्षाणामपि प्राणान्तकृद् वैरम् । अनुभूयते अतिदूरवासिनामपि विपरीतरुचीनामपि विषम-कुल-शीलवतामपि सकृद्दीक्षितानामपि चिरस्थमपि सौहृदम् । जन्मान्तरेऽपि न तद् विच्छिद्यते । धर्म, पदमभिजन, जाति वा न तदन्तरयति । न सत्यप्रेम्ण उपासको गणयति प्रणयपथीनो मृत्युमपि । सहजश्च सत्प्रेमा सरसीकरोति दुर्गतमपि जीवनम् । भावयन्ति विगता अपि भावास्तदनारतम् । भवति च बागत्र कालिदासस्य सुकवे —

रूपाणि वीक्ष्य मधुराश्च निशम्य शब्दान्
पर्युत्सुको भवति यत्सुखितो ऽपि जन्तु ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ॥ (शा.)

इति—

न सहजा प्रीतिराश्रयति रूपम, अपेक्षत कुलम्, गणयति शीलम्, उदीक्षते धनम्, कारणीकरोति पदम् । प्रियस्य दोषा अपि गुणायन्ते प्रियायै । तथाहि—

न कामवृत्तिर्वचनीयमीक्षते ।

वदन्तु नाम तुल्यवयोरूपकुलशीलवता स्थिरा प्रीति नीतिविद पर न सा परीक्षित-नया हृदये पदमादधाति[1]। अथवा—

मनश्चेद् रासभीमग्न का कथा देवयोषिताम् ।

सकारणे प्रेम्णि न तादृशी पावनता स्थिरता च यादृशी सहजे । अधुनापि चारुरूपलावण्यमात्रमुग्धमनसो युवानो युवतयश्च मिथ आकृष्टचेतसो भवन्ति । पर दृष्टमात्रे ततोऽधिक हृदयहारिणि जने पटुवेशतारुण्यसुषमाया रमण्या वा नयनगोचर गताया तत्मक्रान्तमानसा शिथिलप्रेमबन्धा सम्पद्यन्ते । न तेषा हृदि भवति वस्तुत प्रीतिरपि तु वासना या जनाज्जनमभिलषति । सत्यस्य प्रेम्ण परिचयस्तु भवभूतेरेव वचास—

अद्वैत सुखदु खयोरनुगत सर्वास्ववस्थासु यत्
विश्रामो हृदयस्य यत्र, जरसा यस्मिन्न हार्या रस ।
कालेनावरणात्ययात्परिणते यस्नेहसारे स्थित
भद्र तस्य सुमानुषस्य कथमप्येक हि तत्प्राप्यते ॥ (उ च)

नात्र संशयो यत्सत्यस्य प्रेम्ण आस्पदं विरला एव जना भवन्ति । प्रीतिर्नाम साहश स्वर्णप्रस्तरो यस्य स्पर्शमात्रेण प्रियस्य सकला अपि दोषा गुणायन्ते । भवति चात्र भगवान् वेद —

'दोषा हि जारस्य चक्षुसा विभाति ।'

जाराय रोचते चेत् कुरूपापि नारी निरतिशयरूपशालिनी प्रमदैव भाति । अप्रिया चेत् सौन्दर्यापहसितमाररमणीरामणीयकापि विरूपैव सम्पद्यते । प्रीतिबलादेव दारिद्र्यातिशयपीडितावपि दम्पती साम्राज्यसौख्यमिवानुभवन्तौ जीवनमेव यापयत । स्वर्गायते तयोर्नरकमपि । कृच्छ्रशतदुर्भगाऽपि जन्मस्थली स्नेहवशादतितमा प्रेयसी भवति । सर्वस्वमिव,प्राणा इव, तनुरिव प्रतीयते प्रेमास्पद वस्तु । यथा चोक्तम् —

न किंचिदपि कुर्वाण सौख्यंदुं खान्यपोहति ।
तत्तस्य किमपि द्रव्य यो हि यस्य प्रियो जन ।' (उ च)

आंग्लसूक्तिरपि प्रभवत्यत्र—

"Love is blind"

न प्रेम्णि जायत उचितानुचितविवेक । नीतियन्त्रणा, आचारबन्धनानि, स्वार्थपातकानि न तस्य सीमान स्पृशन्ति । तस्य बलात्करोति दुष्कराण्यपि कर्माणि नर । इष्यते खल्वद्य तद् रसायन द्वेषज्वरानलदग्धस्यास्य भवस्य प्रशमाय । पर ववंताहशे स्वार्थपूर्तिदुर्विदग्धे काले तद्विधस्य सहजस्य प्रेम्ण उद्भव । सति सम्भवे विश्वमिद स्वर्गकल्प सपद्येत जनस्येति शम् ।

उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।

सभारा यदपि संसारे सर्वलानामपि विभवाना पर न निखिलमपि सर्वस्यो-पनतम् । वञ्चितोऽस्त्यत्राखिलोऽपि जनो धनेन, गुणै कलाभि, अन्नेन, पुरुषार्थेन, रूपेण वा । निराकर्तुं तमभाव प्रयतन्ते प्राणिनोऽनेकमितु स्व समीहितम् । निर्धना श्रमेण, विद्याप्रदर्शनेन, विविध जीवनोपयोपकरणरचनाभि सचिन्वन्ति धनम् । अज्ञाश्च सदा तृषितान्तरा विद्यापिपासया धनोत्सर्गेणापि वाञ्छन्ति बुधीभवितुम् । पर विशेषतोऽत्र जगति द्रव्यस्यैव महत्त्वम् सर्वारम्भमूलत्वात्तस्य । अर्थप्रधाने हि लोके द्रव्यमधिकृत्य सर्वे सव्यवहाराः । उक्त च—

"सर्वारम्भास्तण्डुलप्रस्थमूला ।" इति

शक्तिरपि द्रव्यस्य तादृशी । नास्त्यसम्भव किमपि कर्मार्थिनवतामिह । दुर्लभा अपि पदार्था सुलभास्तेषा कृते । सर्वे समाश्रयन्ति धनिन धनाशया गुणिन कलाविदो बुधाश्च प्रच्छा-यशीतलमिव तरु निदाघघर्मार्दिता । सवन्ते तमेव जना सुदोहा गामिव क्षीरार्थिन । तस्यैव बलेन प्रभवति पुमान् धर्मार्थकामाश्च सेवितुम् । इहस्थ एव स उपभुङ्क्ते सुरलोकसुलभान् भोगान । सुरूपा, दक्षा, सकलकलाविदग्धाश्च प्रमदा धनलोभवश्य-हृदया कुत्सिताङ्गवेषरूपवयोवपुष्मन्तमपि धनिन पतित्वेन वृणते । एतदेव समीक्ष्य पुरोक्त केनापि आंग्ललेखकेन—

'Money makes the mare go'

पर नैतावत् प्रयोजनमर्थस्य यत्स्वयमुपभुज्येत सचीयेत वा । न कृतार्थता तस्य पूरित चेन्निधान स्वर्णसभारै । कृपणानां धन पुष्पवत्या इव वपुर्न कस्याप्युपभोगाय । न ते स्वयमप्युपभुञ्जते सञ्चयमात्रायासिता, का कथा दानस्य । तेषा सन्ततिस्तूपेक्षि-तगुरूपदेशा मुक्तहस्त लुण्टयति तद्द्रव्य विविधव्यसनपु, ज्ञातयो वा विभजन्ते मृतेऽर्जके । तत एव केनचिदुक्त लोकभाषायामू—

"थक्कत्वैवार्जितमत्र यान्तु कृपणा, भोक्ष्यन्ति जामातर ।"

(जोड़ जोड़ मर जायेंगे, माल जवाई खायेंगे ।)

अत द्वावेव मार्गौ ज्यायासो धनस्योपयोगस्य । पात्रेपूत्सर्ग स्वय चोपभोग । येन सचित्य धन सुखित जीवन सकलसौविध्यसम्पादनं, पर्यटितो देश, पाठिता बाला, दृष्टानि दर्शनीयानि, आस्वादितानि विविधानि सरसस्वादूनि वस्तूनि, रक्षिता असहाया, पालिता निर्धना, निर्मापिता सर्वजनोपभोग्या शाला, चालिता मानसान्धकारापहरणपटवो विद्यालया, किं न कृत तै सफलीकृतजीवनै ? जित तै सकलमपि भुवनम्, 'इहैव तैर्जित स्वर्ग ।' काम ते भवन्तु दरिद्रा विसर्जितधना पात्रेषु पर कृतकृत्या उपयुज्यावश्यमपायशील द्रव्य साधु मार्गे । भवति तेषा कृतेऽय श्लोक —

सतप्त पर्वत-कुल तपनोष्मतप्तमुद्दामदावदहनानि च काननानि ।
नाना-नदी नदशतानि च पूरयित्वा रिक्तोऽसि यज्जलद सैव तवोत्तमा श्री ॥

अपुत्रा अपि मृतास्ते कल्पस्थास्नुयशसोऽमृता एव लोके ।

"कीर्तिर्यस्य स जीवति ।'

विलासादिषु च नियोजितधनोऽकृतपरहितोऽपि निन्द्यत एव जनै । न तस्य द्रव्य कस्यापि योगक्षेमाय कल्पते । तस्यैव गर्हा कृता केनाऽपि क्षारसागरव्याजेन—

आदाय वारि परित सरितां मुखेभ्य किं तावदर्जितमनेन दुरर्णवेन ।
क्षारीकृत च वडवादहने हुतञ्च, पातालकुक्षिकुहरे विनिवेशित च ॥

को लाभो देशस्य प्रजाना राष्ट्रस्य वैतेषा धनन ? दोषानेव ते प्रसारयन्ति समाजे दुर्विनीतैरात्मचेष्टितै । गर्हयन्ति ते कुल जातिमपि स्वचारित्रेण । मन्ये निशाऽपि बिभेति तेषा कलककालीकृतमुखावलोकनात् । लोके—

जीवन्तोऽपि मृता एव तद्विधा क्षुद्रजन्तव ।

अर्थस्य सर्वयोत्कर्षो दानेन यदि पात्रे सुक्षेत्रे वा युज्यते । किं तावद् दुराचारस्य कुक्षिभरितामात्रप्रयोजनस्य स्वय पूर्णस्य वा प्रदानेन ? गुप्त प्रत्यक्ष वा स्वार्थं समीक्ष्यापि कृत दान न प्रशस्तम् । तत्रापि हि न पात्राय दान दीयते । अत एव सात्त्विकदानस्यैव सर्वत्र प्रशसा यस्मिन्न प्रतिदानवाञ्छा स्यात् ।

अधत्वे दरिद्रोद्धारार्थं धनस्य, भूमे, श्रमस्य, हलादेश्च यत्किमपि निर्व्याज दीयते, तस्य कथ न प्रशसा भवेत् पर वाजश्रवस इवानुपयोगिपदार्थदातु क आशसा विदधीत । न चाभरणचौरस्य तत्प्रायश्चित्ते च सूचिकादानार्थिनोऽपि दान दानत्वेन गण्यम् । अश्रद्धया केवल यश कामनया प्रयच्छतामपि न तथा शस्त यथा श्रान्तस्य निर्धनस्य स्वपरिश्रमार्जिताद् द्रव्यात्पणमात्रमपि प्रत्तम् । धन्य खलु तेषामर्जित येन समाजस्य, देशस्य, राष्ट्रस्य विश्वस्य च श्रेयोऽनुष्ठीयते । न केवल भारते विदेशेष्वपि अनेके धनिका स्वश्रमार्जित पुष्कल सार परसेवायै समुत्सृजन्ति । न तेषां

दान घृते मेदोमिश्रणं कृत्वाऽर्जयित्वा च कोटिशो मुद्रा-शतं प्रदायैव दानवीर-पदाकाङ्क्षिणामिव दम्भदानम्। रक्तशूल (Redcross) लाञ्छना अन्तर्राष्ट्रीय-संस्था द्रव्येण, श्रमेण, चिकित्सा-सौविध्येन, मार्गनिर्माणेन, भूकम्पाद्याधिदैविकविपद्व्यसनिना वस्त्रादिप्रदानसाहाय्येन च यावन्तमुपकारं करोति कथकारं तस्य माहात्म्यं वर्ण्यते। उक्तं हि—

'परोपकाराय सतां विभूतयः।'

किं तेन कृपणधनेन न यत्स्वस्य परस्य वा किमपि श्रेय समाचरति। वृथैव तेभ्यो ददाति लोकजीवनसाधनं सारं भूतभावनः। सर्पा इव ते निधिरक्षणप्रहरिणो येषु मृतेष्वेव तद्द्रव्यमुपयुज्यते। उक्तं हि—

कृपणानां धनं, नागानां फणमणिः, केसराणि सिंहानाम्।
कुलबालिकानां स्तना कुत स्पृश्यन्ते ममृतानाम्॥

अनुपभुक्तस्य, अप्रत्तस्य तस्य विनाश एव भवति। अत एव—

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।
यस्तु ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति॥

राजान प्रजाहितार्थिनो बलिभिर्धनमाददति विङ्म्य, परमुपयुञ्जते तासामेव श्रेयसे।
रविरपि सभृतसकलसरित्सागरजलो निदाघे तपन् वर्षति सहस्रगुणं वारि प्रावृषि।
पिबन्ति नदनदी-सरोवर-सलिलं जलधरा, पयो मुञ्चन्ति च धरणीसंताप-हरणम्।
भवन्ति हि सन्तः परोपकारैक-प्रयोजन-सञ्चितधनाः।

आदानं हि विसर्गाय सतां वारि-मुचामिव।

तादृशानेव दातॄनभिलक्ष्य साधु प्रतिपादितं पण्डितराजेन—

अपि दलदरविन्द स्यन्दमान मरन्द
तव किमपि लिहन्तो मञ्जु गुञ्जन्ति भृङ्गाः।
विशि विशि निरपेक्षस्तावकीनं विवृण्वन्
परिमलमयमन्यो बान्धवो गन्धवाहः॥ (भा. वि)

—०—

हासस्य स्वरूपमुपयोगिता च

मानवानां चेतसीषु प्रवृत्तिषु हासस्यापि नोपेक्षणीयं गौरवम्। सत्यवसरे सर्वोऽपि जनो भवति विकसिताक्षो विमुदितानन्नश्च। विवाहाद्युत्साहकाले शुष्क-मुखश्चतुर्दशी-चन्द्र इव निस्तेजा हृतमिष्टान्न इव बाल., कुपितप्रणीपनी-निराकृत इव भुजंग., हृत-सर्वस्व इव कितव., व्ययितधन इव कृपण., क्षामक्षाममनुदित-बाष्पं रुदितकल्पमास्यं वहन् प्रेयानपि निमन्त्रयन्निवाशकुन नाभिनन्द्यते जनैः। गभीरोऽपि, दान्तोऽपि, मनस्व्यपि मानवो बहत्येव स्मेरौ कपोलावीषच्छुरितदन्त द्युती चाधरौ हासकाल उपसर्पति। अन्यथा-प्रवृत्तिश्चोपहस्यते सदा प्रसादसुमुखेन समाजेन।

मानसव्यापारमूलत्वेन जीवनस्यान्तर्जगद्विश्लेषणप्रवृत्तेराचार्यैश्चित्तवृत्तीना परिगणनावसरे हासस्य स्थायितया स्वीकृतिरस्तस्य माहात्म्यं द्योतयति। यद्यपि नाट्याचार्येण भरतेन—

"शृङ्गारानुकृतिर्हास.,' 'शृङ्गाराद्धि भवेद्धास्यम्"

इत्युक्तम् तथापि कार्यकारणभावानुरोधेन स्वतन्त्रविभावानुभावाद्यनु-विधायितया न तस्य स्वातन्त्र्य व्याहन्यते। उक्त च तत्स्वरूपम्—

वागादिवैकृतैश्चेतोविकासो हास इष्यते। (सा. द. ३ प.)

कोऽपि नरो वीक्ष्यास्वाभाविकं वेषादिकं श्रुत्वा चासंगता वाचो हसति। न तावत्स्वाभाविकीरुक्ती निशम्योचितानि च कार्याणि दृष्ट्वा मतिमान् स्मय करोति। तथा कुर्वन् मूर्खः क्षीब उन्मत्तो वा स मन्येत। क्वचिद् गभीरोक्तिरपि गूढव्यंग्या बोद्धृणा हास जनयति। अनेन हासेनैव हास्यरसस्य निष्पत्तिः। यथा—

विकृताकारवाग्वेषचेष्टादे कुहकाद् भवेत्।
हास्यो हासस्थायिभावः श्वेतः प्रमथ-दैवतः। (सा. द. ३ प.)

तत्रास्थानवस्तुविन्यासोऽममञ्जसचेष्टितमुपहासिन्युक्तिवच द्रष्टृणा श्रोतृणा वा हास जनयन्ति । यथा—

गुरोगिरः पञ्चदिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयं च ।
अमी समाघ्राय च तर्कवादान् समागता कुक्कुटमिश्रपादा ।

अत्र पण्डितम्मन्यस्य कस्यचिदुपहासस्तस्याल्पज्ञता सूचयति ।

असारे खलु ससारे सार श्वशुरमन्दिरम् ।
हरौ हिमालये शेते हरि शेते महोदधौ ।

अत्र हरि-हरयोरम्बुधि हिमाचल-निवासस्य श्वशुर-गृहत्व-निमित्तोपन्यासेन हासोद्भूति । अथवा—

कमला कमले शेते हर शेते हिमालये ।
हरिर्महोदधौ शेते मन्ये मत्कुणशङ्कया ।

इत्युक्तौ हरहरिकमलाना मत्कुणकृतभीतिवर्णना हास्यहेतु । हासस्य सर्वथा ललित स्वरूप नायकनायिकापरिहासे सखीना सवादे वा । तदेव नर्मसचि शृङ्गार-रचनासु स्वारस्य तनोति । शाकुन्तले प्रियवदाया उक्तय, मालविकाग्निमित्रे च बकुलावलिकायास्तादृश्य एव । उक्त च नर्मणा स्वरूप विश्वनाथेन—

वैदग्ध्यकीडितं नर्म ।(सा द ३ प)

नैसर्गिकतया सकलेष्वपि जनेषु विद्यमानोऽपि हासो विविधता वहति प्रकृति-भेदेनेति षड्विध उदित आचार्यैरुत्तममध्यमाधमश्रेणिगतत्वेन ।

तथाहि—

ज्येष्ठाना स्मितहसिते, मध्याना विहसितावहसिते च ।
नीचानामपहसित तथातिहसित तदेव षड्भेद ।

तेषु च—

ईषद्विकासिनयन स्मित स्यात्स्पन्दिताधरम् ।
किञ्चिल्लक्ष्यद्विज तत्र हसित कथित बुधै ॥
मधुरस्वर विहसित सासशिर कम्पमवहसितम् ।
अपहसित साश्रुनेत्र विक्षिप्ताङ्ग च भवत्यतिहसितम् ॥

हासस्य हि व्यापकत्वेऽपि हास्याश्रयप्रकृतिवैचित्र्यादेव वैविध्यम् । शिक्षिताना हि वाचो रसनिर्भरा शिष्टजनसमतानि च चेष्टितान्यहेपणानि । मर्यादातिक्रमे

पुराणमित्येव न साधु सर्वम्....

जगति विविधप्रवृत्तिमति मति-भेदाद् दृश्यते विचारवैविध्य जनानाम् । स्थितिर्हि विषमा विश्वस्य सततपरिवर्तनशालिनी,जीवन इव समाजे, राज्ये, देशे काले च सदैव शुभाशुभदशापरिणामोऽनुभूतप्राय । यत्राद्य फेरधूकुलाशिव-रसितस्वन एव श्रूयते , हिंस्रा प्राणिन एव स्वैरचार चरन्ति, दूर यावन्न मानुषी तनुर्दृष्टिगोचरतामायाति तत्रैव कालान्तरे गगनचुम्बिहर्म्यमालावलीढ, क्षोधूयमान-लसत्पताक निरन्तरचक्रमगणपरजनविमर्दितघण्टापथ नगर विलोक्यते । आधुनिक च ममृद्धतम त्रिदशगणस्पृहणीयवैभव नानोद्यानराजिविराजितम् पुरमपि न चिरात्पशु-गणपुरीषकरीषनिचितमरण्यस्थलमेव सम्पद्यते । अतएवोक्त भवभूतिना—

पुरा यत्र स्रोत पुलिनमधुना तत्र सरिताम्
विपर्यास यातो घनविरलभाव क्षितिरुहाम् ।
महोर्दण्ड कालादपरमिव मन्ये वनमिद
निवेश शैलानां तदिदमिति बुद्धि द्रढयति ॥ (उ च २)

स्वभाव एवाय परिवर्तनस्य, नित्य नवप्राया विचारा करणशष्कुली स्पृशन्ति, नूतना आविष्काराश्चेतो विस्मापयन्ते, अभिनवा सम्मता उदयन्ते, कर्णकिणिरया श्रुता कपोलकल्पिता इति स्वीकृता एव पदार्था अक्षिलक्ष्यीभवन्ति । अचिन्तिताश्च कला विकसन्ति, असभावितहृद्यानवद्यकल्पनाविलासतुन्दिलाश्चेतोरमा कृतय क्रियन्ते, अनालोचितपूर्ववस्तुविन्याससमन्विता ग्रन्था ग्रथ्यन्ते ।

क्रिमेतावता, प्रतिदिन जनानां वेशालकारादिप्रकारा परिवर्त्यन्ते । विदेशै सह,सपर्केण तत्रत्या वेशविशेषा [फैशन] भारतीयै सरुचि स्वीक्रियन्ते, चैनुचण्डातक (स्कर्ट] धारिण्यो वाहणेया महिलाश्च भरतदेशस्त्रीप्रियपरिधान शाटिका साग्रह गृह्णन्ति । पचनदप्रमदाना परिधेय लम्बकञ्चुक शीलवार (सिलवार) चान्यप्रान्ती-या नार्य सादर परिदधति । अद्यास्मद् शे वास्तुपद्धतिरपि पश्चिमकलामपर्कसम्पृक्ता

नवीनमेव प्रकार स्वास्थ्यानुकूल रूपमगीकरोति । अध्येयेषु विषयेषु नाधुना वेदा, पुराणानि, काव्यानि च । न धर्मशास्त्रम्, परम् आंग्लभाषा, गणितम्, भूगोलशास्त्रम्, लोकभाषासंहित्यम्, कृषिशास्त्रम्, विज्ञानम्, यन्त्रविद्या (Engineering) चिकित्साशास्त्रम् एतेषां च विषयाणां शाखा अधीयन्ते, अधीतकलाविषयाश्च कार्यक्षमतायै प्रशिक्षण (Training) लभन्ते। अर्थोपार्जनमोकर्याय प्रौद्योगिक (Technical) शिक्षा च शिक्ष्यते । दर्शनानि च भारतीयै सह पाश्चात्यान्यप्यधीयते ।

एव सम्प्रति प्राचीनताया नवीनतया सह साङ्कर्यं दृश्यते । पर द्विधा खलु मानवीया प्रवृत्ति । मुह्यति पुरातन वीक्ष्य, प्रलोभ्यते च नवीनन । अद्य मानव पश्चादवलोक्य यन्प्राचीन जीवनप्रकार परिचिनोति यत्र नगरादिकल्पना विरहिते नदीतटादिस्थले मुक्तो वास, वेदानां गानम्, पर्णकुट्य, वल्कलानि मृगचर्म चाच्छादनम्, गोयानैश्च यात्रा, उपम, दिव, सिन्धोश्च स्तुति सर्वमिद स्मारयति गतस्य युगस्य । सन्ति तदभिज्ञान चिह्नान्यपि । अद्यापि राजमार्गे ससीत्कृति धावमानाभिस्तरन्तीभिरिव तैलशकटीभि सह वृषभशकटी प्रतिस्पर्धते, शीलवारेण सह चण्डातकमपि धार्यते । वाष्पयानेन पादचारेण च यात्रा विधीयत एव ।

एतादृशे व्यतिकरे सन्ति केचित्पुराणप्रिया ये वर्तमान जीवनमाडम्बरग्राम मन्वाना नामगहं गहंन्ते । नाद्यतनी शिक्षापद्धति, नेदानीतनो जीवनप्रकार, नाधुनिको व्यवहारस्तेभ्यो रोचते । सामाजिकी स्वच्छन्दतां तु न ते कूणितेनाप्यक्षणा सोढु क्षमा । तेषां विचारेऽनुदिन ह्रास सभ्यताया, अवमाद समाजस्य, पतनमाचारस्य, उदय पापस्य, भ्रशो बुद्धे ध्वसो नीते । किं बहुना, आडम्बरप्राय आधुनिके जगति ते नि सारमेव सर्वं समारें मन्वते ।

नवसभ्यताया पथिकास्तु तान् दशगीहतकान् वार्द्धक्यदुर्विलसित-ग्रस्तमतीन् निदिचन्वन्तो न तेषा वाक्येषु श्रद्दधते । न तेभ्यो प्राचीनानि शास्त्राणि, वस्तूनि, विद्याश्च रोचन्ते । ते तु भूमण्डलमेव तथा परिणमयितु व्यवस्यन्ति न यथा तृणमात्रमपि दोषबहुलस्य मौर्ख्यपूर्णस्यासस्कृतस्यासभ्यस्य च प्राक्तनस्य जीवनस्य दोषोऽप्यवशिष्यत । ते प्रज्वलितविद्युद्दीपदीप्तिदीपितभवनेषु भूषावेषवेशयिदीपकार्चिचयायितशमपरिधाना मनोरमणो रमणीर्विलोकयन्तः, गोष्ठी-गृहेषु (क्लबे) स्वैराहारविहारैस्तामि गहारमान विनोदयन्त, छुरिकाकण्टकादिभिर्विविधरगकषायित भोजनमास्वादयन्तो न स्मर्तुमपि कामयन्ते पुरातन जीवनम् । पुराणीनानि गृहाणि तेषां कुत्र गर्भगृहाणि, वेदादीनि शास्त्राणि मुधा विश्वासभूरीणि प्रमत्तजल्पितानि, ग्रामा नरकप्राया, विचारा अविचारितप्रचारा । प्राचीनगत सर्वमभ्यज्ञान-विजृम्भितमिव तैश्चिन्त्यते ।

परम् 'मति सर्वत्र वर्जयेत्' इति नीतिकाराणा मतम्। दोषैकदृक्तया विहाय, सूक्ष्मेक्षिकया निभाल्येत चेदुभयत्राऽपि गुणा दोषाश्च सन्त्येव। अद्य विज्ञानबलात् परिस्थितय एव नव्या, यासु वय श्वसिम। तदनुकूलाय जीवनायास्माभिर्नव्या प्रकारा सग्राह्या एव। प्राचीनेषु ग्रन्थेषु, आचारेषु विचारेषु च वर्तंत एव किमप्यनुभूत सत्य तदप्यगीकार्यमेव। अन्यथा वयमप्यन्धविश्वासिन। सदा हेयवर्जं गुणग्रहण एवाग्रहो विधेय। आडम्बरप्राये निःसारतमे केवलमक्षिसुखप्रदेऽद्यतनवस्तुनिवहे सारप्राये लाभबहुले निर्डम्बरे च प्राचीनकलापरिणामे किं नास्ति विशेष? गर्भगृहनिभेषु वातप्रकाशवर्जितेषु प्राचीनेषु स्वास्थ्योपयोगिषु च नवगृहेषु न कोऽपि भेद? सर्वथा त्यक्तपक्षपातैरनाग्रहिभिरेकत्रप्रयुक्तबुद्धिविवेकैर्गुणग्राहिभिरेव भाव्यम्। न केवल नवीनत्वेन पुरातनत्वेन वा किमपि वस्तु निर्दोष विपरीत वा। गुणा दोषाश्च सर्वत्रैव भवन्ति। विदुषा पुरुषार्थस्तेषा विश्लेषणे। एतदेव समीक्ष्योक्त पुरा कालिदासेन—

पुराणमित्येव न साधु सर्वं न चापि काव्य नवमित्यवद्यम्।
सन्त परीक्ष्यान्यतरद् भजन्ते मूढ परप्रत्ययनेयबुद्धि॥

लक्ष्मीनिन्दा (बाणभट्टस्य कादम्बर्याम्)

इयं खलु मथनोत्पलवनविभ्रमभ्रमरी लक्ष्मी क्षीरसागरात्पारिजात-पल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैःश्रवसश्चञ्चलताम्, कालकूटा-न्मोहनशक्तिम्, मदिरायाः मदम्, कौस्तुभमणेर्नैष्ठुर्यम्, इत्येतानि सहवासपरिचय-वशाद्विरहविनोदचिह्नानि गृहीत्वैवोद्गता। नह्येवविधमपरिचितमिह जगति किंचिदस्ति यथेयमनार्या। लब्धाऽपि खलु दुःखेन परिपाल्यते, दृढगुणसदाननिष्पन्दी-कृताऽपि नश्यति। उद्दामदर्पभटसहस्रोल्लासितासिलतापञ्जरविधृताप्यपक्रामति। मदजलदुर्दिनान्धकारगजघटितघनघटापरिपालिताऽपि प्रपलायते। न परिचयं रक्षति, नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रममनुवर्तते। न शील पश्यति न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न लक्षणं प्रमाणीकरोति। गन्धर्वनगरलेखेव पश्यत एव नश्यति। अद्याप्यारूढमन्दर-परिवर्तविलंभ्रान्तिजनितसंस्कारेव परिभ्रमति। कमलिनीसचरणव्यतिकरलग्न-नलिननालकण्टकेव न क्वचिदपि निर्भरमावध्नाति पदम्। अतिप्रयत्नविधृताऽपि परमेश्वरगृहेषु विविधगन्धगजगण्डमधुपानमत्तेव परिस्खलति। पारुष्यमिव शिक्षितुमसिधारासु निवसति। विश्वरूपत्वमिव ग्रहीतुमाश्रिता नारायणमूर्तिम्, अप्रत्ययबहुला च दिवसान्तरभलमिव समुपचितमूलदण्डकोशमण्डलमपि मुञ्चति भूभुजम्, लतेव विटपानभ्यारोहति। गंगेव यमुनजन्यपि तरंगबुद्बुदचञ्चला, दिवसकरगतिरिव प्रकटितविविधभक्रान्ति, पातालगुहेव तमोबहुला, हिडिम्बेव भीमसाहसैकहार्यहृदया, प्रावृडिवाचिरद्युतिकारिणी, दुष्टपिशाचीव दर्शितानेक-पुरुषोच्छ्राया, स्वप्नसारत्वमुन्मत्तीकरोति। सरस्वतीपरिगृहीतमीर्ष्ययैव नालिङ्गति। जल-बुद्बुदक्षणरुचिमिव न स्मरति। उदकस्वप्नमण्डलमिव बहु मन्यते। गुणजनमतिमित्तमिव न पश्यति। अभिजातमहिमिव लघयति। धूर्तकष्टकमिव परिहरति, दातारं दुःस्वप्नमिव न स्मरति। विनीतपार्श्विनमिव नोपसर्पति, मनस्विनमुन्मत्तमिवोपहसति, परस्परविरुद्धमिन्द्रजालमिव दर्शयन्ती प्रकटयति

जगति निजं चरितम्। तथाहि, संततमूष्माणमुपजनयन्त्यपि जाड्यमुपजनयति। उन्नतिमादधानाऽपि नीचस्वभावतामाविष्करोति, तोयराशिसंभवाऽपि तृष्णां सवर्धयति। ईश्वरता दधानाऽप्यशिवप्रकृतित्वमातनोति। बलोपचयमाहरन्त्यपि लघिमानमापादयति। अमृतसहोदराऽपि कटुकविपाका, विग्रहवत्यप्यप्रत्यक्षदर्शना, पुरुषोत्तमरताऽपि खलजनप्रिया, रेणुमयीव स्वच्छमपि कलुषीकरोति। यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति। इयं हि सवर्धनवारिधारा तृष्णाविषवल्लीनाम्, व्याधगीतिरिन्द्रियमृगाणाम्, परामर्शधूमलेखा सच्चरित्रचित्राणाम्, विभ्रमशय्या मोहदीर्घनिद्राणाम्, निवासजीर्णवलभी धनमदपिशाचिकानाम्, तिमिरोद्गतिः शास्त्रदृष्टीनाम्, पुरःपताका सर्वाविनयानाम्, उत्पत्तिनिम्नगा क्रोधावेगग्राहाणाम्, आपानभूमिर्विषयमधूनाम्, संगीतशाला भ्रूविकारनाट्यानाम्; आवासदरी दोषाशीविषाणाम्, उत्सारणवेत्रलता सत्पुरुषव्यवहाराणाम्, अकालप्रावृड् गुणकलहंसकानाम्, विसर्पणभूमिर्लोकापवादविस्फोटकानाम्, प्रस्तावना कपटनाटकस्य, कदलिका कामकरिण, वध्यशाला साधुभावस्य, राहुजिह्वा धर्मेन्दुमण्डलस्य। न हि तं पश्यामि यो ह्यपरिचितयानया न निर्भरमुपगूढः यो वा न विप्रलब्धः।

जननी जन्म भूमिश्च स्वर्गादपि गरीयसी

अहो कीदृश्युदात्तभावना निहितास्मिन् पद्ये । सुव्रैकनिलयो भोगानामायतनमद्वितीय, सत्यकर्मभि सतत वाञ्छित स्वर्गलोकोऽपि ययाऽधरीकृत , लुठन्नपि भुवनस्पृहणीयाया विभूतौ, भुञ्जानोऽपि त्रिदशदुर्लभान् विलासरसान्, विहरन्नपि रामणीयकानाद्दतनन्दनाया प्रकृतिरगस्थल्या धरण्याम् विलसन्नपि सहजलावण्योपहसितदेवागनारूपगरिमभिर्लीलास्मितविलक्षिचितसुललितविभ्रमलालिताभीरमणीभिर्बलात् जनो यस्या स्मार्यते , स्तन्यमिव निसर्गसरसमतिसुखदममृतमिवापर यदीय जल पाय पाय लोको गात्रपोष पुष्णाति शरीरम्, वात्सल्यपरिमललालिते यशोयोत्सगे क्रोड क्रीड रजसैव निचिता वज्र रचितेव नो देहयष्टि , यदञ्चलसस्पर्शशीतलो वायुरपि निकाम शिशिरयति मृगतापदग्ध मनो वपुरपि , कथ न सा जन्मदा जननीव मातृभूमि स्पृहणीयता व्रजेत् ? अपितु सा जन्मदात्र्या जनन्या अपि जननीति ततोऽपि महतो गौरवस्य पात्रमिति कस्यास्ति सन्देह ?

यथा बाल पिबन्नपि काममजासुरभिप्रभृतिदुग्ध वञ्चितस्तु मातृस्तन्येन न जातु पुष्टिमातनोति वपुष ; एवमेव विदेशेषु नाना-साधनसाधितेषु वसन्नपि स्वमातृभूमर्निसर्गसस्कारसमाविष्ट बीजवशात् रक्तसम्बद्ध रजो जल समीर वा बिना न तथा स्वास्थ्यभ ग् भवति जनो यथा स्वभूमौ । प्रत्यक्षमिद बाल्ये शिशवो न तथा पर्यङ्क लालिता अङ्काद्दङ्कमारोप्यमाणा अपि साधु पुष्णन्ति स्व यथा लुठन्तो जन्मभू रजसि । मातृभूतलमपि तेषा सहजवात्सल्यरसनिर्भर जननीक्रोडायते, रजोऽपि सुमन परागायते, जलमपि क्षीरायते, क्षीरमपि-मोषधीयते, ओषधिरपि सुधायते । गमीरोऽपि, खाद्यमपि, फलान्यपि, तृणतरुलता-गुल्मसुषमाऽपि रसायनतामाचरन्तीति को नाम गणयितु क्षमस्तस्या माहात्म्यम् ? अधमर्णा वय. तस्या उपकारदातानाम् । भवेम नाम मुक्ता यज्ञादिभिर्देवर्णात् श्राद्धादिकर्मणोत्पादनादिभिः पितृणात्, स्वाध्यायादिना चर्षिऋणात्, पर न मुच्येम जातुचित् मातुर्जन्मभूमेरुच तादृशाद्दणात् । एतदेवाभिप्रेत्याभिहित पुरा मर्यादा-पुरुषोत्तमेन रामचन्द्रेण—

अपि स्वर्णमयी लङ्का न मे रोचते ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।

अनार्या. स्याम वयमुपेक्ष्य स्वजननी जननी ता करुणावात्सल्यनिर्भरा-न्तराम् । अतएव वैदिकोऽपि ऋषिर्भक्तिपूर्णं उद्घोषयति—

'माता भूमि पुत्रोऽह पृथिव्या' ।

पित्रा लालितोऽपि पोषितोऽपि, पाठितोऽपि शिशुर्न तथा सरसहृदयता व्रजति यथा मातृस्तन्यवर्धित । सैव नैसर्गिकी प्रीतिर्जन्मभूमेरपि । राष्ट्रकवेर्मैथिलीशरण स्येमा पङ्क्तय स्वर्णाक्षरैरङ्कनीया —

जिसकी रज मे लोट लोट कर बडे हुए हैं,
घुटनों के बल सरक सरक कर खडे हुए हैं
परमहस सम बाल्यकाल मे सब सुख पाए
जिसके कारण धूल भरे हीरे कहलाए ।
हम खेले कूदे हर्षयुत जिसकी प्यारी गोद मे ।
हे मातृ भूमि, तुझको निरख मग्न क्यों न हो मोद मे ॥

कश्चिदाग्ल कविरपि सश्रद्ध स्वजन्मभूमि प्रणमति—

'I vow to thee my country'

अय देशप्रेमैवाधुना राष्ट्रीयतानाम्ना व्यवह्रियते प्रशस्यते च । वस्तुत नितरामपरिहार्या मातृभक्तेर्भावना नागरिकागा मनसु । ता विना न तावद्देश-वासिन स्वकर्त्तव्ये जागरूका भवन्ति । दुर्भाग्यस्यैव विलसितमिद, यत्रत्या मानवा पुराङ्गुपन्—

समुद्रवसने देवि पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस्तुभ्य पादस्पर्शं क्षमस्व मे ॥

तत्रत्या एव नरा स्वार्थाय मातरमेव विक्रीणीयुरिति को नाम विश्वसेत् । जय-चन्देन द्वेषपराभूतेन स्वय गोराधिप शहाबदीनमाहूत स्वमातृष्वसेयस्यैव विनाशाय । मोदाल-साम्राज्य-सस्थापको बर्बरोऽपि शासकैरिहस्थैरेवेर्ष्याविलीकृतैर्विवेकाधै. मावारमिव पारतन्त्र्य स्वयमामन्त्रित । न तैरुपहृतमनिभिर्जानुचिद् विचारित यत् कीदृशीय शृखला स्वगले निधिप्यते । हतौजसामार्यनरपतीना न जान कीदृशी दुर्मतिरभूत्यद्यातिम्यो विरुध्य विदेशयाना साहाय्यमाचरताम् ।

स्वतन्त्रतानन्यभक्तस्य राजपुत्रकुलमुकुटमणे प्रतापसिंहस्यैव बन्धवस्तत्प्रतीपस्य सम्राजोऽकंबरस्याकुण्ठशस्त्रतामाचरन् । न जाने को नाम व्यामोहोऽजायतान्नरयाना मूपतीना यैर्दास्यनिगडच्छेदोद्यताना विरलानामपि विरोध एव कृत तेषामेव मूढधिया पारस्परिककलहैराग्लदेश्या प्राभवन्निम महादेश स्वायत्तीकर्तुम् । तेषा शासनकालेऽपि तादृशी राष्ट्रद्रोहिता प्रदर्शिता भारतीयैर्यां स्मार स्मार गुरुत्वपाभार-नतमुत्तमाग नोदच्यते । सप्तपञ्चाशदधिकेऽष्टादशशततमे वर्षे विष्वग्व्याप्त एव क्रान्ति-काले गोपाद्रिपतिना (ग्वालियरनरश) पञ्चनदस्थराज्याधिपतिभिश्चाग्लाना साहाय्य विधाय वैदेशिकाना नष्टप्रायमपि शासन सुदृढतामानीतम् । गौराङ्गप्रभूणामाधिपत्या-वधावपि भूपतिभिरधिकारिभिश्च स्वबन्धूनामेवोपरि के नाम नात्याचारा विहिता केवल स्वामिन प्रसादमितुम् । निजाधिकारलालसं सत्यज्यात्ममानसपद निखिलमपि कुत्सित कर्मानुष्ठितम् । भारतीयस्वाधीनतासग्रामस्येतिहासे तेषामाचरितान्याय-साक्षरैरङ्कितानि न कदापि लोप्यानि । अद्यापि राष्ट्रीमतायुगे भारतीया आत्मन कुकर्मभिर्लज्जयन्ति राष्ट्रम् । अधिकारिपूत्कोचप्रियता, मन्त्रिषु स्वार्थपरायणता कर्तव्योपेक्षा बुभुक्षिभरिता च, कर्मचारिषु नित्यमात्मपरताऽशुचिता वृत्तपराङ्-मुखता, वणिक्षु नि सीमाऽर्थलोभ , सकलमपि तन्नमाकुलयति । भारतवासिनो-ऽपि ते स्पृहयन्ति परवेषभूषाऽऽचारसस्कृतिभ्य । नित्य परकीयामेव भाषामादरेण पश्यन्ति ।

देशानुरागेऽद्य वैदेशिका एवाग्रण्यो ये स्वमातृभूमेर्गौरवार्थं सर्वस्वमपि होतु न सकुचन्ति । पर तेषा राष्ट्रीयताऽतिमवीर्णा भीषणपरिपाकक्लुप्ता चेति न सर्वथा स्पृहणीया । स्वदेश सर्वोपरि मन्यमानास्ते तस्य भूत्यै सकलमपि विश्व भस्मसात् कर्तुं मपि नित्यमुद्यता । गतमहासमरे क्षीणशक्ति फासिस्टवादो नाजीवादश्च तस्यैव भावस्य कुफलम् । साम्राज्यवाद मार्थिका प्रभावाश्च तस्या एव दुष्परिणाम ।

'उदार-चरिताना तु वसुधैव कुटुम्बकम्', इति भावना न तद्गतात्मना हृदयमपि स्पृशति कदाचित् । आवश्यकता चास्यैव सिद्धान्तस्य येन मनुष्यमात्रमपि नेतरमपि तु स्वज्ञातिभावनयैव गृह्येत । तदैव वस्तुत समतामानीय राष्ट्रोन्नतिर्भविष्यति । स्वार्थं परित्यज्य देशहितमेवात्मकर्तव्य मन्यमाना विश्वबन्धुतामाश्रयन्तो यदि जन स्वदेशार्थं शुचिताव्रत गृहीत्वा सर्वस्वमपि जुह्वुयुस्तदैव मथन साधु भवेत्—

'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।'

पुमान् पुमांसं परिपातु विश्वतः ।

जगति विविधभाववति विस्तृततमे परमे धामनि नानाचरित्रशालिना प्राणिना मानवो मानवोधमतिविवेकशीलतयाऽमुमता मूर्धनि मत सुमतिभि । आहारविहारादिषु विद्यमानाऽपि समताऽममता तेनैव गुणेन साधयति मनुसुताना यदभाववान् दानवता व्रजति मानव । तथाहि—

आहार-निद्रा-भयमैथुनानि
सामान्यमेतत्पशुभिर्नराणाम् ।
ज्ञान हि तेषामधिको विशेषो
ज्ञानेन हीना पशुभि समाना ॥

ज्ञान चेह कर्तव्याकर्तव्यविनिश्चयात्मकमभिमत यन्न मनुजस्य धर्मं विलोपयेत् । तादृश विवेकलक्षण ज्ञानमपरिहार्यमेव यदनुसृत्य नरो न पराशर्मकर कर्म समाचरेत् । यदनभिमत स्वस्य, यदरुन्तुद मानसस्य, यदुदीरित शूलायते कर्णयो, यदाचरित जनयत्यसौविध्य स्वपरकृत्यव्यूहस्य यच्चेष्टित हानिकरमात्मनस्तदेव परेषामपि मवेदनाकाक्षित विप्रिय चेति दूरत परिहरेत् । एतदेवाभिमधायाभियुक्तं रुक्तम्—
'आत्मन प्रतिकूलानि परेषा न समाचरेत् ।'

परमस्य कीदृशी स्थितिरस्य जगत । मत्स्यन्याय सर्वत्र प्रवर्तते । बलिनो निर्बलम्, सम्राज क्षुद्रराज्याधिपतीन्, धनिनो निर्धनान्, अधिकृता अधीनस्थान्, शासका शासितान् सर्वंग्रास जिग्रसिषन्ते । सकलभुवनविद्याभिगतिनिदान विज्ञानमपि विहाय लोकक्षेममार्गं लोक-धस्मराणा तेषामेवोत्पीडकाना पाचनाग्नि धमतितमाम् । विस्मृतनैर्मगिककृति प्रकृतिरपि विकृतिपरानेवानुविदधती, विरोधितामेवाचरति जगत । तथाहि शीतधर्मितया विदित सलिलमपि जनयति दहनम् । वैद्युतोऽग्निरपि समीरयति शिशिर-शिशिर समीरम् । उष्णतम जल परिणमति तुहिनतनौ ।

कलुषकलुषाण्युल्मुकान्यपि दधति हीरकताम् । अद्य हिममपि दहनायते, दहनोऽपि सलिलायते, सलिलमपि पवनायते पवनोऽपि शक्तीयते ।

ईदृशमघटितघटनापटीय प्रभापितसकलवस्तुविधान विज्ञान विधाय सहाय क्रूरकर्मोपहसितदानवो मानवोऽद्य जलौका इव, मत्कुण इव, यूकेव, ऋक्ष इव, पिशाच इव पररक्तशोषणे शमयति निजा तृषाम् । क्रव्यादिव कलितनरमुण्डमालो रुद्र इव शवावलोकनसमुजातहर्षो मृत्युरिव महासमराय स्पृहयति । तेनासख्याना नरनारीणा रक्त सिन्धून् प्रवाह्य देशान्तराणि स्वतान्त्र्य-सौख्य-भाञ्जि बलात्कारेण दासीकृत्य तत्रत्यजनता शोष शोष धनिकनिर्धनाना वर्गभेदा स्थापिता । अधुना चामीकरराशि-पूरितकोषो देवमन्योऽधनान् पीडयति, दलयति, ताडयति, दशति, समूलघात हन्ति स्वैर-त्याचारै । तेनैव धनमददुर्मदेन स्वात्याचारप्रचाराय, दुर्दमरक्तलिप्साप्रशमाय च वस्तु-सारान् सहृत्य तदणुभि सहर्तुं रूणि लोकसहारक्षमाणि पिण्डानि(Bombs) निर्मितानि । अधुना चान्तर्राष्ट्रीयप्रक्षेपास्त्रनिर्माणेन वायव्यायुध(Gas) कल्पनैश्च कल्पान्तकालो नेदिष्ठतामानीत । अतीतेषु पञ्चचत्वारिंशद्वर्षेषु द्वे विश्वव्यापिनी महायुद्धे तस्यैव मनुजकुलघस्मरया रणलिप्सया कारिते ययो महती सख्या जनानाम-काण्ड एव कालकवलिता समपद्यत । कोटिकल्पा नरा. प्रहृतप्रहरणविमुक्तविषदुष्प्र-भावाद् दुश्चिकित्स्याना रुजा भाजनानि समजायन्त । एकस्यापि नाम्राणुपिण्डस्य निर्माणे यावतो धनस्याप०यय क्रियते, तस्य सहस्रतमेऽशे प्रतिजन वितीर्णे लक्ष जना दारितदारिद्र्यदर्यं सौख्येन काल नेतु क्षमा । एतावतोन्नेयमेतत् कियानर्थव्ययोऽणुकृत-सहारकास्त्रभण्डारसज्जाया विधीयते परनाशाभिलाषिणा नरेण । आदित कालान्मनी-षिभि साक्षात्कृतमनुजप्रकृतिभिरस्या दुर्दमाधिकारलिप्साया गर्हैव सर्वत्र कृता । परमा सुरी वृत्तिर्न तेषा वचने तिष्ठति, न तेभ्य कर्णौ ददाति, न तान् परिगणयति ।

प्रसिद्धिरिय न व्याघ्रो व्याघ्र खादतीति, सकलाननविनाशोत्सुका अपि हिंस्रा श्वापदा न सगन्धेषु प्रहरन्ति । पर मानव एवेदृश कुटिलो निर्घृणश्च जीवो य आत्मीयानेव ग्रसते । स्वार्थान्धो नामो गणयति परपीडाम्, न कलयति स्वपरसविभागम्, नापेक्षते सस्कृतिम्, न स्मरति करुणाया, न परिचिनोति पापम्, न प्रतीक्षते सुजना-नुशासनम् । न श्रद्दधाति शास्त्रेषु, न विश्वसिति धर्मे, न बिभेति पापात्, न जिह्रेति लुण्टाकवृत्त्या, नापत्रपते कुकर्मणा, केवल गजनिमीलिकया सकलस्यापि शुभाकाक्षिणो जगतोऽनुरोधमुपेक्षमाण स्वपशुबलवृद्धय एवानुदिन प्रयतते । सहारसाधनसंभारान् समुच्चेतु न चिन्तयन् प्रतिवेशि-राष्ट्रहानिम्, प्रक्षीयमाणविविधघातकरोगाणुनिचयाश्चा-पश्यन् निर्मितान्याणवास्त्राणि परीक्षते । एधते च दिनाद्दिन साम्राज्य प्रसार लिप्सा, बर्बरस्वाधिवयप्रेप्साऽधिकाधिकनाशक्षमशक्ति-बुभुत्सा च तस्य । चन्द्रादिषु लोकान्तरेषु

च यानस्रापणप्रतियोगितायां मूलमियमेवाधिकार-लालसा यया वशीकृतो नरो न पृथिवी-राज्यमात्रेण तुष्यति । अस्मादेव हेतोर्वृत्त गत महासमरद्वय पाश्चात्यै प्राच्यदेशाना शोषणं च कृतम् । पुनश्चेयमासुरी पिपासा तृतीय भीषणतम सगरमामन्त्रयति यस्मिन् प्रवृत्ते कच यास्यति मानवीया सभ्यतेति केन ज्ञायते । अत इण्डोनेशियादेशस्य बाण्डुग-नगरे वृत्तायामेकस्यां प्राच्यदेशपरिषदि भारतप्रधानमन्त्रिणा जवाहरलालेन शान्तिस्था-पनायं पचशीलस्य सिद्धान्त प्रस्तुत । तथाहि—

१. परराष्ट्रेण सह विवादाना मन्त्रणाभि. समाधानम् ।
२. इतर-राष्ट्राणामान्तरिकेषु सघर्षेष्वहस्तक्षेप ।
३. अन्यसार्वभौमसत्तायां आदर ।
४. सहास्तित्वे विश्वास. ।
५. परेषामनाक्रमणनीते पालनम् ।

शक्तिशालिराष्ट्रेभ्यस्त्रस्तान्तरै स बहुमान स्वीकृता समर्थिताश्च बलिष्ठाभि शक्तिभि सिद्धान्ता इमे न प्रयोगेण सत्यापिता राष्ट्रै । मिस्रदेशोपरि फ्रासीयानामा-ग्लानाञ्चाक्रमणम्, चीनस्य तिब्बतलीलनम्, अफ्रीकाद्वीपे च पाश्चात्याना स्वाधिकार-रक्षायै दर्शित नृशसत्वम् विपरीतमेव पचशीलव्रतस्य । राष्ट्राणां परस्परद्वेषिणी नीति सम्प्रति विद्यमान शीतयुद्ध तृतीये युद्धे परिणमयितु सुक्षमा । तदा न द्रक्ष्यते सृष्टि, न मानव, न पृथिवी, न वैभवम्, न सस्कृति, न राज्यम्, न द्रव्यम्, न धरणी, न सत्ता यदर्थं जना हुडुयोध युध्यन्ते ।

सम्प्रति न केवले रूसामरीके विमनायेते, साम्यवादसमेधितोग्रभावश्चीनोऽपि शशिनमिव विधुन्तुदो निखिलमेव भुवन जिघत्सति । आक्रान्तश्च तेन मैत्री विस्रम्भ-घातिना भारतस्य पुरुतमो भाग । ईदृशमाचरण स्फुलिङ्गायमानमपि सहसैव भीषणतमे समराग्नौ परिणन्तुं क्षम येन दन्दह्यमान निखिलमपि भुवन विधातापि न त्रातु पारयत। अतोऽपेक्ष्यते धरणीतलस्य सविभवत्रा नरेण सप्रयोग, साचरण, सविश्वास, स-सकल्प, ससमर्थन, स-प्रचार सर्वतो डिण्डिमघोषोऽस्य मन्त्रस्य—'पुमानु पुमांस परिपातु विश्वत इति' ।

—०—

सर्वे भवन्तु सुखिनः (सर्वाभ्युदयवादः)

(श्रीश्रीनिवासशास्त्रिणा 'चन्द्रमहीमति' सञ्ज्ञादुपन्यासात्)

समाजो हि सहयोगिना सहकर्मिणा पारस्परिकभावपूर्णं सामञ्जस्ये सामरस्ये च समाश्रित समुदाय । परमद्य तस्मिन् केचनासहकर्माणोऽनुत्पाद्यापि सर्वाधिक विश्रमजीविनश्च भूता व्यपेत-लज्जा । एतानन्तरेण न कापि समाजे क्षति । यथा च —

(१) व्याजोपजीवी—कस्यापि शतमुद्र भूषण क्षेत्र गृह पश्वादि वा न्यस्य आवश्यकतापीडिताय पञ्चाशन्मुद्रा ददाति न्यासधर । एतस्य कुसीद दशमुद्रा प्रतिमासम् । न्यासावर्तनावधिर्मासत्रयम् । परिस्थितिपीडितो न्यासकरोऽवधिमध्ये कथमपि न्यास प्रत्यावर्तयितु न समर्थं । न्यास धरस्य कुसीद चक्रवृद्ध्या यथा प्रतिक्षणमेधते इतरस्य तथैव ह्रास । अत एव स महाजन । जनो दृश्यमानोऽप्यजन = जनेतर =मानवोचितगुणरहित, सोऽपि न सामान्योऽपि तु महान् । अथवा अज गतिक्षेपणयो —अजन, न्यासेन सह न्यासधरस्यात्मसात्करणे सस्पृह सफलश्च, सोऽपि महान् । दस्युराजस्तु सम्पन्नेभ्योऽपहरति, परमय वराकानकिञ्चनान् अभद्रभागान्, भग्नमनसो विषण्णान् खिन्नानवसादयति । अत एव प्राकृतै स 'बाबू', 'लाला' आदि पदै सम्बोध्यते ।

(२) व्यसनोपजीवी—परया व्यसनेन, कष्टेन, विपत्त्या यो लाभान्वितो भवति स । यथा याचकोलो वैद्यश्च । शान हि परेषां शर्मणो, यो शान विक्रीणानो लोकस्य विपत्त्या लाभान्वितो बुभूषति, स किं ज्ञानोपासक ? 'ते हित्वा काञ्चन राशि पाशुराशिमुपासते', स तु व्यापारी भगवत आशिष आशासानो भक्त इव "न स भक्त स वै वणिक् ।" य शूलमारोप्यमाणात् पञ्चसहस्र मुमूर्षोश्च शत जिघृक्षति । विचार्यंता स कीदृश ? 'यो मर्तुकामादपि हर्तुकाम ।'

नार्थार्थं नापि कामार्थमथ भूतदयां प्रति ।
वर्तते यश्चिकित्सा स सर्वमतिवर्तते ॥ (चरक.)

एतादृशास्तु राष्ट्रस्य गौरवम् । परमद्य कियन्तस्तादृश । अद्यत्वे चिकित्सका प्रथम रुग्ण न हि, तस्य धन दिदृक्षन्ते, स जीवतु म्रियता वा ।

(३) शुल्कोपजीवी—गृहशुल्केन शकटशुल्केन जनवाहनशुल्केन जीवति शत सहस्र वा मानवाना नियतवेतनेन नियोज्य यन्त्रादीना परिचालनेन वार्थमुपार्जयति स ।

(४) घटक —केवल वार्तावित्त उभयोपभोक्ता उभयार्थहरश्च ।

(५) समानशीलस्य धनिन पोष्यपुत्रोऽपहृतहिरण्यस्य परिरक्षको लगुडी च ।

अद्य वय सर्वाभ्युदयाय कृतसकल्पा समवेता, सर्वेण सर्वस्मै, सर्वस्मात् सर्वस्य सर्वस्मिन्नभि उदय =सर्वाभ्युदय । सर्वेषामेकाङ्गिन्युदये न मन्तुलन सभाव्यते, अत समन्तादुदयोऽस्माकमभीप्ट । स चाधिदैविकीनामाधिभौतिकीनामाध्यात्मिकीनाञ्च शक्तीनामभितो दिशामुत्कर्षं स्वभाव-बाधिकाया बाधाया अपनयनञ्च । सोऽय दरिद्राङ्ग-भगिदोषानुपगिपुञ्जवादोत्तु गभुजङ्गभङ्गी, अभिमानभीष्मोष्मग्रीष्मक्लान्तामृतस्यन्दी जगन्निर्वेदखेदच्छेदी पराभूतभूतवर्गानुकम्पी, पुञ्जवादहु कारकातरातुरहर्षवर्षी, भव-भयाग्निविविग्नामृतवर्षी समददर्पज्वरकर्षी श्रान्तरगुहागहनगेहगूहितध्वान्तविध्वसी कलकसकरशकरो मायामत्तनिजगदगदङ्कार शस्यमहसा प्रियोऽभयकरो मन्दीकृत-भीतिभृद्विपद्, जगच्छर्मकर्मी आनन्दधामा, दिग्देशकालकलननिरपक्ष क्षपितातङ्क उद्दण्डहेमरुचाम् सकल्पकर्म फलोपलम्भ, कनकवर्षघनोऽपक्षघनोऽपक्षपातम्, दीनतर्जि-धनिदग्धिलसितोष्मशमनशीतसुभगसुरभिसमीर, पुञ्जवादप्लुष्टपीयूषसारशिशिरो द्यु सिन्धुलहरीनिर्मल कीर्तितभाग्योत्कीलक, विपन्नबन्धु, समस्ततापोपेतापन्नपालन-प्रथितप्रवीण, प्रायशो विश्वजनवाङ्मनसानुमोदितो महीमहितो विश्वस्य निश्शेष-कलमलमक्षमोऽशेषजनचिन्तामणिर्नि सामान्यो वदान्यमान्यो वादमूर्धन्योऽस्माक प्राक्तन मादर्श परस्पर फलानपेक्ष स्वभाव । सर्वोऽत्र सर्वस्मै न पक्षाय, न सम्प्रदायाय, अपि तु लोकाय । 'वसुधैव कुटुम्बकम्', 'यो वै भूमा तत्सुखम्', स चाय परस्परमभेदभावेऽर्द्धते सहयोगेच प्रतिष्ठित । सम्पत्तेरप्ययमेवार्थ । सम्यक् पदनम् प्राप्ति (पदगतौ, या प्राप्ति समेम्य सम्यग् जायते सैव) सम्पत्ति, या च विशिष्टरूपेण (केवल विशिष्टेभ्य प्राप्ति) सा विपत्ति । यत्रैको निषीदति, नवनवतिश्च नराणां शते विषीदति सा विपत्ति पुञ्जवादस्य फलम् ।

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥
(ई. उ २)

अगाधोऽय जीवनाम्बुधि, अनन्ता उत्पात-वाता इव विपन्निपाताः विरलाश्च धम्मासवाता इव भवन्ति सपन्नघाता । आशयन्ति निष्पादयन्ति च कामपि जीविका जीवितुकामा यावज्जीव जीवा । सघर्षमूले हि जीविते विजेता जीवति चिर सुखेन, पराजितस्तु काम भस्त्रेव श्वसितु दीर्घतयापित कालो यथा कथचित् पर न तज्जीवन जीवनम् । तथाहि—

'काकोऽपि जीवति चिराय बलि च भुङ्क्ते ।'

अत पुरुषार्थसार्थो जन. स्वोद्योगेन लोकमिम स्वर्गायित कर्तुं कल्पते । पर महास्तत्रायासोऽनुभूयत इति कापुरुषा कातराः कर्मकृच्छ्रात् ससारमय जिहासन्ति । पर कथकार होयेत ससार सरन्त्या श्वास मरणो, धगद्धगज्ज्वलति च जाठरेऽग्नौ । ततस्त्यरा चर्मपषोऽपि गृहीततुम्बीपात्र प्रोदरिक इव गृहाद्गृह भैक्ष्यमटति । सहसा भस्मसाद् भवति क्षुधावह्निज्वालाजाले सकलोऽपि वैराग्यभाव । न एवाशाबन्ध, न एव परिग्रहेऽभिलाष, नैव कायासक्ति, तदा किं तेन त्यक्त ससार ?

'जटिलो, मुण्डी, लुञ्चितकेश, काषायाम्बरबहुकृतवेष. ।
पश्यन्नपि च न पश्यति मूढो ह्युदरनिमित्तं बहुकृतवेषम् ॥"

श्रुतशास्त्रवचा 'यदवश्यमेव भोक्तव्य कृत कर्म शुभाशुभम्' इदय चिरन्तना, कर्मबन्धादेव भूयो भूयो मरण जनन च जायेऽत न एव रमणीय इति निवृत्तिमार्गाभिमुखा भवन्ति । पर केवलेन कायाक्लेशेन गृहत्यागेन वा न साध्यते निवृत्ति । ज्ञान तदर्थमनिवार्यम्, तदपि 'ज्ञान भार क्रिया बिना' इति सिद्धान्तानुरोधात्

साधना सापेक्षम् । साधनाऽपि कीदृश्येव भवेत्, कर्म तु तत्राऽपि करणीयमेव । तर्हि कथं न स्वे प्रवृत्ति-मार्गं एव प्रवर्तेत ? उक्तं च गीतायाम्—

'स्वे स्वे कर्मण्यभिरतः ससिद्धिं लभते नरः ।'

तथा च—

'न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ॥
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥'

परं कस्तदाऽभ्युपायः संसारबन्धनिवृत्तेः ? कर्मफलाशात्यागादेवेति ब्रूमः ।

'यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ।'

संसारबन्धः खलु पुण्यपापाशया बध्नाति जीवम् । कर्तव्यभावनया कृतं चेन्न तल्लिम्पति फलेन । महदिदं कर्मक्षेत्रं योऽयं संसारः । परस्पृहा दुःखिनोऽत्रापेक्षन्ते साहाय्यं जनेभ्यः । विहायौदरिकत्वं विस्मृत्य च स्वं योगक्षेमं सुखदुःखद्वन्द्वं च, धिक्कृत्य पापपुण्यचिन्तां विधूय हिताहितभावनां सेव्यन्ते चेत्ते यथोपलब्धसाधन-संभारैः कायेन, वाचा, मनसाऽपि, जितं तेन । लाभालाभचिन्तया कृतं हि कर्म लिम्पति । 'सेवाधर्मः परमगहनो योगिनामप्यगम्यः ।' लोककल्याणाय कृतं कर्म न कर्मत्वेन मन्यते । कर्तव्यभावना त्रात्र विधेया ।

यस्मिञ्जीवति जीवन्ति बहवः सोऽत्र जीवतु ।
वयांसि किं न कुर्वन्ति चञ्चवा स्वोदर-पूरणम् ॥

तपोमूलेयं सृष्टिः । उच्चतमं लक्ष्यं कृत्वा कष्टसाधनमेव तपः । आत्मन उन्नतिरपि तपसैव । तदपि कर्मैव । नैतल्लोका अभिजानन्ति—

'किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।' (गीता)

अयमेव कर्माकर्मविवेको लोकक्षेमहेतुः । लोकाः प्रायो विघ्नाशङ्कया हानि-भीतारच कर्मणो विरमन्ति । परं नैतदुचितम् । कर्तव्य भावनया 'करणीयमेवैतत्करोमि' इति बुद्ध्या कर्मस्वासज्जते जनश्चेन्न तदा साफल्यासाफल्यचिन्ता । कर्मण्येव हि जनस्याधिकारो न फले । दुर्भिक्षाशङ्कया किं कृषको बीजमेव न वपति ? याचका भाग-मिष्यन्तीति किं भोजनमेव न पच्येत ? कस्मात्या कुर्याद् विवेकवान् ? एवमेव फलाशा विहाय कर्तव्यबुद्ध्या कर्म विधेयमेव ।

नानाश्रान्ताय श्रीरस्ति इति रोहित शुश्रुम ।
पापो नृषद्वरो जन इन्द्र इच्चरत. सखा ॥

पुष्पिण्यौ चरतो जंघे भूष्णुरात्मा फलेग्रहि ।
शेरेऽस्य सर्वे पाप्मानः श्रमेण प्रपथे हताः ॥
चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम् ।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन् ॥
चरैवेति चरैवेति । (ब्र. वे.)

'न ऋते श्रान्तस्य सख्याय देवा' इति च ।

यदा जीवनरक्षायै कर्म करणीयमेव जनेन, तदा कर्मपालनाय कथ न कुर्यात् ! कर्तव्यभावनया क्रियमाणे च कर्मणि रुचिरभियोगश्चोत्पद्यते । साधु कृत हि कर्म फलवद् भवति, अतो न तदुपेक्षया विधेयम् । 'योग· कर्मसु कौशलम् ।'

कर्मज बुद्धि-युक्ता हि फल त्यक्त्वा मनीषिणो जन्मबन्धविनिर्मुक्ता अनामय पद गच्छन्ति ।

के खलु ते महात्मान कर्मत्यागिन ? ससारत्यागस्तेषा स्वसुखनिरभिलाष·त्वेन । परार्थं तु कर्म कुर्वंतो राजानोऽपि मुक्ता अभवन् । कर्मणैव हि प्राञ्चो जनकादय ससिद्धिमास्थिता । सम्यक् साधनादेव ते हि साधव ।

'Handsome is who handsome does.'

इत्युक्तिरप्यत्र भवति ।

कर्मकरण नाम जीवनस्य धर्म । प्रवाहो नद्या, दाहो वह्ने, गमन वायो स्वाभाविक कर्म, तदेव धर्म । न खलु धर्म त्यक्त्वा तेषु नदी-वह्नि-वायुत्वव्यवहार स्यात् । एवमेव विहाय कर्म कुतो जीवस्य जीवत्वम् ? यथा च कबीर'—

हाड बडा हरि भजन कर, द्रव्य बडा कछु वेह ।
अकल बडो उपकार कर जीवन का फल येह ॥

अतो निःसगभावेन कर्म कुर्वाणेनैवात्र भवितव्यमिति शम् ।

—०—

त्यजन्त्यसूञ्शर्म च मानिनो वरं
त्यजन्ति न त्वेकमयाचितव्रतम् ।

(नैषधम् १)

ससारेऽस्मिन्नपारे वैचित्र्याधारे पठ्यन्ते श्रूयन्ते च नानाविधानि द्रव्यजातानि। पर न तानि सर्वेषा सुलभानि । विलसन्तोऽपि सुरलोकस्पृहणीयेषु रमणीयेषु भोगेषु वञ्चिता केनाऽपि वस्तुना लालायन्त एव तदर्थम् । पौरुषैकधना पुरुषकारेण तल्लिप्सन्ते । कातरास्तु सभावितानर्थं तस्मिन् पथि न प्रभवन्तश्चलितुं कुटिलेन मार्गेण तदधिगतये प्रयतन्ते । तत्रापि तस्करता मार्गेण वेत्येतावान् विकल्प । न च स्तेय सुकरम् । न खलु नवनीतहृदया (Chicken hearted fellows) क्षमास्तदाचरितुम् । साहस तत्रापेक्ष्यते । निग्रह प्राणमशयश्च सभवत । अत्यर्थं प्रियाश्च प्राणा प्राणिनाम् । सुगमतरमुपाय तेऽन्विष्यन्ति कमप्यन्यम् । म च याचनमेव ।

पर याचना सुकरा तेषां कृते निहतो यैरात्मा, न ये परिगणयन्ति पराभवम्, नानुरुन्धते ये मनस्विताम् । परताडना भर्त्सना च मुहुर्मुहुरनुभवन्तोऽपि लघयन्त्येव देहलीं परेषाम् । पर जागर्ति येषां मन, आत्मनो य माश्रवा, न क्षोदीयसि कर्मणि येषा प्रवृत्ति, न ये सोढु क्षमा परस्य कलुषनिरीक्षणम्, भिनत्ति येषा मर्माणि परिभव, वर नामालिङ्गेयुर्म्रत्यु न ते हस्त-प्रसारण कर्तुं क्षमा । मानधना हि ते । लालसालसमनस एव सतमस प्रियासव सकलमपि कर्मोचितमनुचित वा सुखेनानुतिष्ठन्ति ।

इयमुदरदरी दुरन्तपूरा यदि न भवेदभिमानभगभूमि ।
कथमपि न सहे भवादृशानां कुटिलकटाक्षनिरीक्षण नृपाणाम् ॥

मानिनस्तु न गणयन्ति प्राणान्, नापेक्षन्ते शरीरम्, न स्पृहयन्ति भोगेभ्य, न रोचते तेभ्य पराभवसहकृतो विलास । न ते क्षमा श्वान इवोदरपोषणरता गृहाद् गृहमाहिण्डमाना भर्त्स्यमानास्तर्ज्यमानास्ताड्यमानाश्च रोटिकाखण्डैरितस्ततो लब्धैरुदर पूरयन्त काल यापयितुम् । बन्धूनपि न ते समर्था याचितुम् । पराभवो महांस्तत्र—

वरं वनं व्याघ्रगजादिसेवितं जनेन हीनं बहुकण्टकावृतम् ।
तृणानि शय्या परिधानवल्कलं न बन्धुमध्ये धनहीनजीवितम् ॥

तेषामेव चोक्तिः —

"वयं नो ते विप्राः प्रतिदिवसमासाद्य कृपणान्
धनं ये याचन्ते परिगणितनक्षत्रतिथयः ॥"

महती खल्वबमानना याचकानाम् । रिक्ता हि ते लघिष्ठा जगति—

'रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ।'

तृणः खल्वसारणा निदर्शनम् ततोऽपि विशेषेणोपेक्षणीयो भवति याचकः ।

तृणाल्लघुतरस्तूलस्तूलादपि च याचकः ।
वायुना किं न्नीतोऽसौ मन्न याचेन मामिति ॥

परसम्मुखे हस्तप्रसारणसमकालमेव गलति लज्जा, देहीति कथनेन सर्वं त्यजति धीरता, दृष्ट्या सममेव नमत्यात्मा, स्थैर्येण सहैव व्रजति मानम् । सादरं दीर्घत्वेनापि जीवन्नरः परां मुदमनुभवति । अत एव तपस्विनो वनेऽवसन्न नगरेषु । तृणायामन्यन्त सम्राजोऽपि ।

सत्यामप्यनिवार्यतायां ते महत एव याचन्ते न कृपणान् । चातको लघीयान् विहगोऽपि स्वातिकणानेवार्थयते । तुल्येषु तु नैव संभवति याचने प्रवृत्तिः । सुदामा सखाऽपि कृष्णस्य गतोऽपि द्वारवतीमनुभूयाऽपि गरीयांसमतिथिसत्कारं नैवायाचत किमपि । स्वभावोऽयं मानिनाम् । न जीवनं मानहीनानां धरणी च तैर्हृणीयते । अधिकाद् याचने नानादरस्य संभव इति तान् कदाचिद् याचेरन्नपि । तथाहि—'याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा' । अतः साधूक्तं श्रीहर्षेण—

त्यजन्त्यसूञ्छमं च मानिनो वरं, त्यजन्ति न त्वेकमयाचितव्रतम् ।

—०—

सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।

इह विविधप्राणिमति प्रकृतिविचित्रिते जगति विलोक्यन्तेऽसुमता बहुविधा प्रवृत्तय । शुभा अशुभाश्च तेषा चेष्टा मानसीमवस्था सूचयन्ति सस्कृतामसस्कृता वा । देहभृता हि क्रिया भावप्रेरिता भवन्ति, भावाश्चान्त करणोद्भवा । अन्त करण च 'मनोबुद्धिरहकारश्चित्त करणमान्तरम्' इत्युक्तदिशा चतुरात्मकम् । एव भावानामुत्थानानन्तर बुद्धया तर्कवितर्काश्रयेण कृत्याकृत्यरूपेण चिन्तन सहजबुद्ध्या या खल्वन्त प्रेरणेत्युच्यते, साध्वसाधु वा बोधित चेतनाबलेन सम्पाद्यते । इत्थ प्रत्येक क्रियमाणे कार्ये मूले मानसो व्यापारो भवत्येव । मनस पूर्वं च कामस्योदयो भवति ।

अनुभूयते लोके यद् भावुका विचलितमानसाश्चास्थिरचिन्तिता भवन्ति । न तेषा सकल्पेषु दृढता विलोक्यते । ते क्षणे किमपि चिन्तयन्ति तदितरच्च विदधति । कर्तुमीहन्ते तावदन्यथैव न तु तथाऽनुतिष्ठन्ति । एतत् खलु भावाना विचाराणा चाशुचित्वेन भवति । सद्भावनाभरितान्तरा सद्बुद्धय सत्कर्माणश्च न जात्वनुचित मृषा वा समाचरन्ति, न कथयन्ति न च तथा चिन्तयन्ति । तेषा मनोवाक्कायकर्मसु न वैषम्य भवति, अतएव ते सत्यचारित्रा सत्यस्य प्रतिमूर्तय एव सिध्यन्ति । न स्पृशत्यपि तेषा हृदय कलुषम्, तदा कथ ते वदेयु कुर्युर्वा तथा, एव शुचिनि मानसे मुकुर इव मुख निखिलमपि भूत वर्तमान भविष्यद् वा लोक-वृत्त प्रतिफलति । इदमेव योगिभि प्रणिधानमुच्यते । न ते केवल तनु वर्शयन्ति, कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि वा निगृह्णन्ति, तेषा सचालक मनोऽपि वशीकृत्य लक्ष्ये नियोजयन्ति । सत्यपि विकारे न प्रभवति तदुत्पथमाश्रयितुम् । अतएव ते सदा प्रार्थयन्ते—

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठ यदजिर जविष्ठ तन्मे मन शिवसकल्पमस्तु ॥

मनोव्यापारस्य सकल्प एव निदानम् । अत एवोक्तम्—

कामस्तदग्रे समवर्तताधि मनसो रेत प्रथम यदासीत् ।'

(ऋ ना. सू)

तस्य पावनत्वे बुद्धिरपि न विक्रियते । यथा तिर्यञ्चोऽपि सन्निहितायामापदि सहजयाऽन्त प्रेरणया (Intution) प्रबोध्यन्ते सावधानाश्च सुरक्षायै प्रयतन्ते । तथैव ते सत्सकल्पा विक्रियमाणे एव मनसि तत्क्षणे निगृह्णन्ति तत् । पारद इव चपलमपि तत् वैराग्येणाभ्यासेन च नियच्छन्ति ।

"विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीरा ॥"

एव नियन्त्रित तथा मानस सानुशासन सैनिक इव सदा वशे तिष्ठति, नोच्चरते । तस्य वृत्तय एव कृत्याना चिन्तितानामौचित्येऽनौचित्ये वा प्रामाण्यमा-तिष्ठन्ति । तदनुसारिणी हि तेषा क्रिया ।

ये तु नित्य दुर्भावनाभरितान्तरा दुःसगेन, दुःपरिशीलनन, दुरभ्यसनेन नियत मलुपमेव चिन्तयन्ति, तदेव तेषा वाचि समायाति, विदधति च तथैव । पर ततोऽपि दुर्वृत्ता धर्म-वञ्चुकिनो मिथ्या चारित्रा, येषा चिन्तित, कथित विहित च सदैव विसवादितामाकलयति । विडम्बनामात्र तेषा जीवनम् ।

'अन्तश्शाक्ता बहिश्शैवा सभामध्ये च वैष्णवा ।'

त दम्भिनो विपरीतमव साधूना सदाऽनुतिष्ठन्ति । निखिलमपि तेषां जीवन-माडम्बरेण छलेन वैतथ्येन चावृत भवतीति चालितचेतसस्ते न क्वापि प्रामाण्यमर्हन्ति । रुद्धकार ते प्रमाणता गच्छेयुर्येषाम् —

'मनस्यन्यत् वचस्य-यत् कर्मण्यन्यद् दुरात्मनाम् ।'

तेषा मन, वाणी, चरितम्, आत्मा, शरीरम् सकलमपि वञ्चना-मात्रम् । ते परामात्मानञ्च वञ्चयन्ति धूर्ता ।

अतोऽन्त करण साधूनामेव प्रमाणतां याति येषां खलु—

'मनस्येक वचस्येक कर्मण्येक महात्मनाम् ।'

आत्मा हि तथा महान् जागरूक प्रहरी । पदमपि न गन्तु प्रभवति तन्मन सत्पथाद् विरुद्धम् । असत्ते कर्तव्येऽकर्तव्ये चात्मानमेवान्त करणमेव विमृशन्ति बोधयति च तत्तान् सदसद् वा सन्निधत्तमिव । असन्तो न तस्य वचने तिष्ठन्ति परिभूयन्तं आन्तर्गंतैर्बहिर्गंतैश्च दानुभि । पर तस्य निदेश परिपालयन्त सन्तो न वञ्च्यन्त केनापि । त एव च यस्कृ प्रभवत्यात्मविषय—

"सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्त करणप्रवृत्तय ॥"

भारतीय स्वतन्त्रताया लाभाः

खीष्टस्य विंशतितमा शताब्दी स्वातन्त्र्यस्य शताब्दी व्यपदिश्येत चेत् न काऽप्यतिरञ्जितता। दिशोऽनुदिशम्, कोणात्कोणम्, देशाद्देशं प्रतिवर्षं स्वाधीनता-ज्योतिरपाकुर्वदवाञ्छित दास्यतिमिरं भूमण्डलात्प्रसरतितमाम्। शिथिलाश्च नाडी साम्राज्यवादस्य, व्यथते मनो राजतन्त्रस्य, लप्टमूर्जः सामन्तवादस्य, कम्पते पदमुपनिवेश-प्रथायाः, छिद्यते शृङ्खला परतन्त्रतायाः, कालो गतः परदेशविजयस्य। नाधुना तादृशी सरला मूढा वा जनता या सभ्यताशिक्षणव्याजेन धनादिप्रलोभनैर्वा वशीक्रियेत। चिरायोपभुज्य राजतन्त्र भूयोऽपि स्वभाग्य-निर्णयाधिकार स्वयमुपभोक्तुमुद्यतो जनो ऽधुना। भवति तादृशे व्यतिकरे कथं नाम निसर्ग-भारत भारतमद्यापि वहेत वैदेशिक-कुशासन-धुराम्।

कल्याणी वत गाथेय लौकिकी प्रतिभाति मे।
एति जीवन्तमानन्दो नर वर्षशतादपि॥

इति कथनमनुसृत्यराद्धसङ्कल्पेभ्योऽब्देभ्यो ऽनन्तर पुनरपि भारत स्वातन्त्र्य-शशि-किरण-सुखमन्वभवत् खीष्टस्य सप्तचत्वारिंशदधिकैकोनविंशतिशततमे वत्सरे अगस्त-मासस्य पञ्चदशे दिने। परमेतदर्थं वियन्तोऽत्याचारा न सोढा एतद्-देश्यैः, विनानुभूतो महान् कारागारवासायासः; किं नाहृतं स्वाधीनतामहाहवमखे, प्राणाः, धनम्, सुताः, जननी, प्रेयसी, भगिनी, सर्वस्वम् चान्यविधम्। आव आवमति-रोमहर्षणानि कृत्यानि पिशाचोचितानि विदेश्यानामद्यापि वक्षोऽपि तरलायते, प्राणाऽपि द्रवायते। यतस्ततः पाशबन्ध बद्धाः, पशुघात हताः, मूलदाहं दग्धाः। चौरा इव, जारा इव, लुण्यका इव, गोघातिन इव धुष्टाहता इव निर्वासिता, सहस्रशः स्वातन्त्र्यभक्ता जनाः। परं न तेषामात्माहुतिरुपरायिता फलाधिगतये। कामं देश-विभाजनेन महार्घेयं नः स्वाधीनता पर साभिमानमद्योन्नमयन्ति शिरो भारतीयाः। न कोऽपि शिष्टमन्यो ज्ञातुं प्रभवति तान्दुराग्रहमन्तरा।

पूर्वोक्तप्रकारेण सर्वस्वहोमपणेन लब्धा स्वाधीनतेय मधुरतमा। तस्या प्रभावेण देशवासिनः स्व-भाग्य-निर्णयाधिकारिण । सार्वभौमगणतन्त्रतापदमनुभवतीद राष्ट्रम् । यथावसर, यथावकाश, यथायोग्य, यथाक्रम, यथागुण प्रत्येकमपि जन आमूलादुच्चतमपदार्हः । न तत्र कुलविशेषस्य वर्गविशेषस्यैव वा पात्रता। अनहंताऽद्य गुण योग्यता-देशभक्त्याद्यभावकृता न तु जातिहेतुकी । अधुना राष्ट्र-द्रोही अपराधो न तु राष्ट्रीयता । न सम्प्रति शासन-प्रमाद दर्शदशमपि वाचयमत्वमपेक्षते । नेदानीं वेश-भूषाविशेष-धारणेन, स्वद्रोहेण चाटुकारितया च प्रभुप्रसादनमात्र कर्तव्यम् । स्वकीय शासनम्, राष्ट्रम् जनपदो वा । सर्वस्यापि शिरसि समापतितो भारः पुनर्निर्माणस्य । आत्मनैव वयमद्य स्व-विधान-निर्मातार, भाग्य-निर्णायका, अभाव-निराकर्तारश्च । प्रत्येक जनोऽधुना शासनेन रक्षणीयो न केवलमायकरप्रदायकः ।

स्वातन्त्र्याधिगतेरनन्तर क्रान्तिरेव भारते दृश्यते । प्रयतते नव शासन दरिद्रतायाः, बुभुक्षाया, अभावानाम् अकौशलानाम्, अपटुतायाः, अशिक्षाया, अयोग्यतायाः, अनहंतायाः, अज्ञानस्य, असमानस्य, असमानतायाश्च समूलनाश विनाशाय। नैकोऽपि जनो विषीदन्नन्नकणाय क्षुधाग्निकवलितो भवेदिति प्रतिज्ञानुसार यत कुतोऽपि सुलभखाद्य वस्तुनो देशात्खाद्यपदार्थां आनाय्यन्ते । मा तावदवसरवादिना लाभ-लोलुपानां वणिजा सकाशात्कृपकाणा शोषण भूदिति जागरूके शासने न सम्प्रति पूर्ववद् विषीदन्ति दैन्यक्लान्तानना कृषीबला । स्थानात्स्थान प्रति निर्मिता यातुर्दुर्वं धूम्रशकटीना, भारवहानां द्विचक्रिकाणा च धावनयोग्या कुट्टिमतला- [illegible] योजिता राज्यामि प्रायशो ग्रामा नगरै सह । कोणे कोणे ऽधुना चिकि[illegible] विद्यालयाः, न्यायालया, रक्षि-सस्थानानि, व्यापार- केन्द्राणि च जन[illegible] दिशि दिशि महाविद्यालया, विश्वविद्यालया, शिल्प-शिक्षणालया, यन्त्र[illegible] विज्ञान-दीक्षा-सस्थानानि सस्थाप्यन्ते । नाऽधुना भारतमानीयते धूम्र यन्त्रात्सूचिका-पर्यन्त किमपि वस्तु विदेशेभ्य । स्थाने स्थाने गन्त्र पोत-वा[illegible] निर्माण-शाला स्थापिता स्थाप्यन्ते यासु लक्षाणि भारतीया आजीविका[illegible] प्रौद्योगिक-शिक्षा सस्था यथावश्यकमुद्घाट्यन्ते । सचारसाधनानि सुलभो[illegible] पन्थानो विकण्टका विधीयन्ते । नारी-जाते शाश्वत-कलक-प्रक्षालनाय[illegible] वृत्तिरुन्मूल्यते, सहकारि-कोष-स्थापनया मोच्यन्ते कृषका: कुसीद जी[illegible] श्रमिका अपि यथावसर नव-नव-नियम-विधानै सरक्षिताः । अपास्ता श्रम[illegible] स्विन्न-कृषीवलै प्रयत्नार्जिता सपद भुञ्जाना भू-स्वामिन । स्वय क्षेत्र-पालो ऽ[illegible] स्व-भूमे । जनकल्याणाय पञ्चवर्ष्या योजना आयोजिता । नास्माक सेन[illegible] पोषणाय, पराक्रमणाय च, नारक्षिण प्रजा-दमनायाद्धु-स्थापनाय वा । जन-[illegible]

मनु-निष्ठन्तीति न वस्याऽप्यविदितचरम् । सर्वोऽयं स्वाधीनतायाः प्रभावो यदद्य प्रति-नगरं, प्रति-ग्रामं, प्रति-चत्वरं च स्वैरमालोक्यते शासक-वर्गो न च प्रभवति को ऽपि तन्मुख-मुद्रणाय । प्रकारणं यान्ति आधिकारिकैः कोऽपिसमर्थंदछन्दतो न्यायालये तानभियोक्तुम् । जन-प्रतिनिधिभिः पूरिता संसदस्माकं विधायिकेति सा-ऽस्माभिर्नियन्त्र्यते । को नाम लाभो नाजितः सर्वैः वाममंशतः । आधुनिके युगे मह-तारीक्षणम् गणतन्त्र-पद्धतेः म्रियते भारते । लोक-कल्याण-राज्यमिदं विधातुं यतते ऽहर्दिव शासनम् । एका परं महती हानिस्तदवधि समजनि समाजस्य यद् राष्ट्रस्य दिनादिनं चारित्रमवहीयते । स्वातन्त्र्यस्यार्थः स्वेच्छाचारिता निरंकुशत्वं च स्वीकृते जनैः । नाद्य जनो विधानं गणयति, न शासनाद् बिभेति, न धर्मं मन्यते, न सौहार्दं संलिप्सते, न मानवतामीक्षते, न सौजन्यमाद्रियते, न पापाद् जिह्रेति चेष्टितात्, नापत्रपते ऽकार्यात् । किं बहुना, स्वयं शासका लंघितमर्यादा जलधय इव समाज मुद्वेलयन्ति । कोऽभावनाचारो यत्र तेषां न समागच्छति । उत्कोचं विना न को ऽप्यधिकृतः प्रायेण शृणोति । स्व-सुता, भगिनीं वनितां वा प्रत्यप्यं लोकाः कार्यं साधयन्ति दण्डनीयैस्तस्करैः दस्युभिर्भुजंगैश्चमैत्री । शिथिल दण्डतया तेषां शासनस्य मरक्षितमिदानी जनस्य जीवनं, धनं मानं वा । मध्यदिन पश्यतो लोकस्य लुण्टाका लुण्टन्ति धनम्, छिन्दन्ति घ्नन्ति वा मानवान्, न परं कश्चिद् वारणस्तेषामुत्पथ-गामिनाम् । दरिद्रा दरिद्रतरा धनिनश्च धनवत्तरा भवन्ति । मुमूर्षोरपि कोपीनमप्यद्य जिहीर्षन्ति निघृणाः कृपणाः पण्यजीविनः । नितरां विलासनिरतास्तृणीकृतात्ममाना वपुरपि विक्रीणन्ति रमण्यः । को नाद्य कर्तव्यच्युतो जनः । एवं कामं भौतिकी भजन्ति भारतीयाः समृद्धिं स्वातन्त्र्यलाभमूला परमात्मसंपद् विलीयते सर्वथा । अतो न भारतीयैस्तथा लब्धं यथा हारितम् । प्रजा राजानमनुसरन्तीति शासकाश्चारित्रधनाः सन्मार्गप्रवर्तकास्तीक्ष्णदण्डा, अलुब्धाः, अनृशंसाः, अपक्षपातिनः, अलूक्षाः, अस्वैरिणो भवेयुश्चेत् सपदि सम्पद्येत प्रजास्वपि तादृशी सद्वृत्तिरिति स्वातन्त्र्यस्य गरीयान् लाभो भवेत् ।

स्वतन्त्रे भारते संस्कृतस्य स्थानम्

जगति नास्ति कोऽपि देशः समाजो वा यस्य स्वकीया संस्कृतिर्न स्यात्। मानवस्य परिष्कृता मानसिकी दशा संस्कृतिरित्युच्यते। संस्कृतेरौन्नत्यमेव कस्य चित्समाजस्य विकासावास्थायाः प्रमाणम्। अतएव प्रत्येकं सभ्यजगति संस्कृतेर्विकासाय रक्षणाय च भूयान् प्रयत्नोऽनुष्ठीयतेतमाम्। भारतीया-संस्कृतिर्वैदेशिकसंस्कृतेः समक्षं पारतन्त्र्यात् परामुपेक्षामन्वभवत्, तस्या उपोद्वलकं साहित्यं संस्कृत एवेति संस्कृति-समुद्धाराय संस्कृतस्योन्नतिरपरिहार्येति निश्चप्रचम्।

संस्कृतं कदाचिद् भारतस्य लोकभाषा राज्यभाषा चाभूदितीतिहासविदाम्मतम्। गुप्तवंशजानां भूपानां शासन-काले तस्य असाधारणः सौभाग्योदयः समपद्यत। साहित्ये, दर्शने, गणिते, ज्ञाने, विज्ञाने, शिल्पे, कलासु, किंबहुना, नाभूत् कतमदपि क्षेत्रं यत्र तस्योत्कर्षोऽपह्न्येत।

अतीतायाः खीष्टाब्दस्य दशम्याः शताब्द्याम् झंझा-प्रकोपे इव तुरुष्काक्रमणेऽकाण्ड एवोत्क्षिप्ते, राजकुलेषु तत् प्रतिरोधाकुलेषु, संघ-शक्तेरभावात् प्रतिहते तेषां प्रयत्ने भारतमिदं चिराय यवनराज्यधूर्वाहतामभजत्। तदाऽपि बहवः प्रगल्भमतयः पण्डित-तल्लजा मन्दिरेषु, सरित्तटेषु, तरुलतागहनेषु गहनेषु सुदूरवर्ति-पर्वत-कन्दरासु चोपहसितसुरपति-मन्दिरासु कालक्षेपं विदधतो ग्रन्थरत्नानि प्राणैषुः। न तु तदा राजपरिषदि जनसंसदि च पुरेव प्रायुज्यत संस्कृतम्। ईदृशे दुर्दशाघननिशाकरालितेऽपि काले कश्चित् समाश्वासीत—

तावत्कोकिल विरसान् यापय दिवसान् वनान्तरे निवसन्।
यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति॥

परं हन्त भोः। 'समाश्वासनमिदं कालापलापमात्रे प्राभवत्। दुर्विलसिताद् दैवस्य मार्जार-मुखाद्भ्रष्टो गृह-कपोतश्चिल्लापा मुखे निपतितः। गोरण्डैर्भेद-शौण्डैर्हिन्दवो यवनाश्च स्वदासत्वा प्रेषिता नियोजिताश्च शासन-शकट-धूः-परिवहने। भारतीय-

मेवाध्ययनाय मुत्तरं मन्यन्ते । एवा परम्परा तथा परिणमति यथोत्तरोत्तरं संस्कृताध्यायिनां छात्राणां संख्याऽवधीयतेतमाम् ।

अधीतेऽपि संस्कृते परीक्षिता उत्तीर्णं एम्. ए. शास्त्रि-प्रभृति-परीक्षा इतो भ्रष्टस्ततो भ्रष्ट इति संस्कृतां दशां भजन्ति लोकाः । केचनैव सौभाग्यवशादधिगतोच्चपदाः स्वकीयमेव स्वार्थं साधयन्त उमाभ्यां पाणिभ्यां धनं संगृह्णन्ति; न संस्कृतज्ञानां दुरवस्था, परा प्रौढिमधुना देवभाषा भजतीति घोषयन्ति च ।

अस्तु । किन्नाम स्वातन्त्र्याधिगतेरनन्तरं भारत-सर्वकारेण कृतमिति समीक्षामेतावदेव बुध्यते यदेक आयोगः संस्कृतज्ञाना तदवस्थाऽवगतये तदुन्नयनमार्गान्वेषणाय च तेन नियुक्तः, येन वर्षद्वयं यावत् देशस्य कतिपयेषु स्थानेषु परिभ्रम्य पश्चाद् विवरणं प्रदत्तम् केचित् प्रस्तावाश्च प्रस्तुताः । अधुना तदनुसारिणा सर्वकारेणैका समितिर्नियुज्यते इति श्रूयते । प्राचीन-पद्धत्या संस्कृत पाठयन्ति संस्थानानि धनं साहाय्येन प्रोत्साहयिष्यन्ते । दिल्ली-नगरस्थया साहित्याकादमी-संज्ञया संस्थया प्रतिभानाम्नी षाण्मासिकी पत्रिका प्रकाश्यते यस्यां नूतनानां प्रतिभावतां कवीनां रचना. प्रकाश्यन्ते । सुरभारती-सेवानुरागिणः प्रवयसो मनीषिणः प्रतिवर्षमयं सहृत-सम्मान-प्रदानेन सम्मान्यन्ते । परं नैतावदेवालं तदुन्नयनं । एते खल्वकिंचित्कराः क्षुद्रतरा अनुपेक्षणीया अपि मार्गा. । केचित्प्रबला उपाया. समाश्रयणीयास्तदुन्नतये सत्यमेवोन्नमयितुं संस्कृत चेत् सर्वकारः । ते चाऽनुक्रमं प्रस्तूयन्ते—

१. संस्कृत मूलादारभ्योच्चकक्षावधि सर्वासु कक्षासु प्रधान-विषयेष्वन्यतमत्वेन निर्धारित भवेत्तत्र चोत्तीर्णंताऽनुपेक्षणीया स्यात् ।

२ संस्कृताध्यायिना पठनोत्तर साधीयानुपजीविका-प्रबन्धो निरलस विधेयः । तेषा वृत्ते च वेतनसंभाराद्यन्यभाषाविदामा वेतनादेः समकक्षमेव भवेत् । वार्धक्ये च विश्रामवेतनव्यवस्था स्यात् ।

३. नवीनपद्धत्या संस्कृत शिक्षमाणानामल्पीयसी विषये योग्यता सम्पद्यते ! तादृशा च संख्यावृद्ध्या विदुषा परिमाणमनुदिनमपचीयमानमनुभूयते । संग्रह-पुस्तकाध्यायिना तेषा न सामर्थ्यं मूलग्रन्थावबोधे । अत. प्राचीन-परिपाटीमनुसृत्य शिक्षयन्त्यः संस्था. संरक्षणीया सर्वंकारेण ।

४. नूतनाना कवीनामुत्तमा. कृतय प्रकाशिता भवेयु परीक्षादिषु च पाठयत्वेन नियोज्येरन् । प्राचीनस्य लुप्यमानस्य वाङ्मयस्य संरक्षण पुन प्रकाशन च विधेयम् ।

५. विद्वांस संस्कृत व्यवहारयोग्य वर्तमान युगीनसकलविषयोपयुक्तग्रन्थसमृद्धं च विधातुं बद्धपरिकरा. प्रयतेरन् । नव-शब्द-निर्माणे, नवतम-विषय-विषयक लेख-लेखने च दत्तावधानताऽपेक्ष्यतेतमाम् ।

६. सस्कृताध्यापकैः प्राध्यापकैश्च छात्रा. संस्कृताध्ययने साभिनिवेशा विधेयाः ।

७. स्थाने स्थाने प्राचीन-पद्धत्या नवीन-पद्धत्या च संस्कृताध्ययनस्य व्यवस्था स्यात्, प्रोत्साहनीयाश्च प्राक्तन्यः सस्थाः ।

एतैः प्रयत्नैरुपायैश्च साग्रहैरवश्यं लोक-प्रियता तस्य समेधिष्यते । ऐतिहासिक्या दृष्ट्याप्यद्यत्वे तदध्ययनं महीय. । भाषा-विज्ञान-परिशीलने देववाणी दिव्यतामेव साधयति नव नव-ग्रन्थि-समुद्घाटनेन । अतो पल्लवनाद्विरमन्तो वयम् तस्य महत्त्वं संसाध्येत्येवाशास्महे—

भवेद् देववाणी प्रिया लोकवाणी
बुधानां रसायां चिर राजताम् ।
तथा वीत-कालीन-शालीन-सत्—
साहित्यो-पीतिराशु व्यवस्थाप्यताम् ।
न च स्यादुपेक्षाऽनपेक्षा-कृता तत्र
लोकस्य चार्थो समीक्षावताम्,
निहत-सर्व-दु खयजा सेवकानां
सदा भारती मानसे भासताम् ॥

भारतीया संस्कृतिः, तस्याः प्रभावश्च

संस्कृतिर्नाम प्राचीनतमेषु भारतीय ग्रन्थेषु संस्कार-शब्द एव लभ्यते यस्याय संशोधनमेव। जन्मना जातो मणिरिव न मानव स्वयमेव सर्व गुण-सम्पन्नो जायते प्रकृति शिक्षा च द्वे कारणे तस्य। प्रकृतौ सामाजिक पैतृकश्च प्रभाव कारणम्। शिक्षया च साधारणान्दोषानपाकृत्य सुविचाराणा सक्रमण कुप्रभावाणा च निराकरण विधीयते। तदेव शाणोल्लिखितो मणिरिव 'निसर्ग-संस्कार विनीत' नर सम्पद्यते। अतएव मनुना द्विजाते संस्कारेणैव द्विजत्व प्रतिपादितम्—

'जन्मना जायते शूद्र संस्काराद् द्विज उच्यते।'

इत्युक्तवता। मानवमात्रस्य मानस्या बौद्धिकयाश्चोन्नते संस्कारा एव कारणम्।

संस्कृतेरर्थो ऽपि संशोधिता सत्युच्चता प्राप्ता जनस्य मनोऽवस्थेति। यदा नर कुक्षिभरिता विहाय सामाजिकता भजते, परित्यज्यात्मपरता, न लीन सन्नाहार विहारादिषु हिताहित कृत्याकृत्य च विचारयितु क्षम कार्यकलापे, विचारे जीवने, धर्मे, राज्यकृत्ये, कलासु च परिष्कृता रुचि धारयति, तदैव स संस्कृत इत्युच्यते। अतएव कस्यापि समाजस्य सत्योन्नति संस्कृतेरु नमन एव निहिता।

अद्यतनी भारतीया संस्कृतिर्मूलत प्राचीनतमाऽपि न स्वरूपत। तस्या मादिरूपमार्य संस्कृतिरेव या खलु काल क्रमेण विविधा बाह्यान् प्रभावानात्मसाद् विदधती समयानुरूपाणि तत्त्वानि स्वीकुर्वती बलीयस्तराऽजायत। आर्य-संस्कृति रासीत् वैदिकी संस्कृतिर्यस्या स्वरूप वेदेषु वेदाङ्गेषु रामायणे, महाभारते, पुराणेषु, दर्शनेषु, सत्कालप्रतिबिम्बेषु राजनीति ग्रन्थेषु स्मृतिषु कलासु किं बहुना सर्वेष्वपि जीवनीयादर्शेषु 'सूत्रे मणि गणा इव' सर्वत्र प्रोतम्। यस्या प्रभावोऽद्यापि तिलेषु तैलमिव, क्षीरे नवनीतमिवास्मासु निहितो लक्ष्यते। काम सा पुराऽपि नासीदेक विधा कदाचित्सूक्ष्मोपासनापरा, अन्यदा च यज्ञ मयी भवन्ती पर न तस्या मूल-तत्त्वा

म्यभिधत्त । महाभारतादनन्तर च वैदेशिकेष्वाक्रन्तृषु बंरभावनया समागतेषु तानपि जाह्नवीव सपित-सकल-कलुषा नदानिवात्मसाद् विदधती पुष्टतामयासीत् । शक-पार्थिव-कुषाण पह्लव-प्रभृतयोऽनेका जातयोऽत्रैव लीना । तासा सस्कृतीना कलामया गुणास्तयाऽप्यगृह्यन्त परमात्मा तु तासा स्वामिन्न एव व्यधीयत । प्रमाण चास्य—ग्रीस-देशस्य राजदूतेन हेलियोडोरस-नाम्ना विदिशाया (भेलसा) स्थापितो गरुडध्वज-नामा स्तम्भः ।

. श्रूयन्ते नामेति-हासेषु सौमेरवानाम् (सुमेरिया) असुर्याणाम्, (असीरिया) बाबलून्यानाम् (बेबिलोनिया) मिश्राणाम् (मिसर) च प्राचीनतराणां सस्कृतीना-माख्यानानि । क्वाद्य रक्तरक्तैतिह्यानां पश्चिमैकाधिपतीना रोमिलानाम् (रोमन) चिह्नम् ? सर्वेऽपि कालस्य दष्ट्राक्रकच चर्वितास्तस्यैवोदरसादजायन्त । पर-संघा-र्यसस्कृतिः काम रूपान्तरेण यातेष्वपि सहस्रशो लक्षाधिकेषु वर्षेषु भागीरथी-वाविरत-प्रवाहा सिन्धुवेलेवालघित-मर्यादा, रवि-प्रभेव भास्वरा, सुधा इव विगत-दोषा शाटीवानल्पगुणा कौमुदीवानुरञ्जित-निखिल-लोका वात्येव देशकालोपगतरजो-धूसरा कान्तेव कमनीय-रूपा माहिमाद्रेराकुमारि निरन्तरमनुप्राणयति भारतीयान् । अद्यापि पावनतमाः पूज्यतमा मान्यतमाः प्रामाणिकतमा अध्येयतमाश्च वेदा आर्याणाम् । इदानीमपि भजति रसना पूरयति कर्णौ, सस्करोति हृदय तेषा गायत्री-मन्त्र । अधुना ऽपि जन्मनि, चौल कर्मणि, उपनयने, विवाहे, किं बहुना अन्त्येष्ट्यां च श्रुतय एवोच्चार्यन्ते । राम, कृष्णो, बुद्धो, महावीर', शकरश्च वय न तं स्मर्यन्ते सादर सश्रद्ध च । क नाह्लादयति रामायणी महाभारतीया वा कथा ? आकृत्या, प्रकृत्या, रीत्या, नीत्या, शिक्ष्या, दीक्षया, आहारेण, विहारेण, आचारेण, विचारेण च भिन्नेष्वपि कोणात्कोण भारतीयेषु वर्तते प्रतिदेह भिन्नेष्वपि व्यापक मारमतत्त्वमिव किमपि सूत्र यत्तान् सजीव, हार इव, स्तबक इव गुम्फत्येव मिथ । प्रमाणानि चात्र प्रतिवर्षं तीर्थयायिना जनाना समूहा । तत्सूत्र सा सस्कृतिरेव यया वय स्वमिम उच्चैस्त्वसिमः प्राणिम सस्क्रियामहे, अनेकेऽप्येकी क्रियामहे । सन्ति तस्या केचिद् गुणा यैः सदानिता नौरिव कराले भीषण विवर्तवर्त-चक्रविकरालेऽपि काल-पारावारे वैदेशिकाक्रमणाभ्रंभाजर्जरिताऽपि नागाच्चिरस्मरणीयताम् । तेषु सर्वप्रथमो गुण —

सहिष्णुता—अस्माक सस्कृति. परान् स्वान् प्रति च सत्यपि वैमत्ये गुण ग्राहितामेव शिक्षयति । अतएवानेश्वरवादिभि सहानीश्वरवादीनि दर्शनान्यपि सामान्येन प्रामाण्यमभजन् । यथा साख्य पूर्वमीमासा च । वैदिकै सह वेद-विरुद्धानि जैन-बौद्ध-चार्वाकीयानि दर्शनान्यपि यथाऽन्य विकसितानि, तदपि सर्वे जानन्त्येव ।

विश्वस्मिन्नपि विधर्मिणामुपरि कृतानामत्याचाराणां विदितैव कथा प्रेमसंदेष्टु-रीशस्यानुयिभिर्मोहमदमतावलम्बिभिश्चानुष्ठितानाम् । परमत्र नास्तिका आस्तिका-श्च वेद-भक्तास्तन्निन्दकाश्च सहैव प्रतिष्ठामलभन्त ।

धर्मस्य प्राधान्यम्—भारतीया संस्कृति. सर्वेष्वपि जीवन-क्षेत्रेषु धर्मस्यैव प्राधान्यमंगीकरोति । राजनीतावपि सदसत्पक्षौ, युद्धेऽपि सामान्य-धर्मस्य पालनम्, अर्थोपार्जने च तस्य कारणता प्रमाणम् । ज्ञाने विज्ञाने, त्यागे विरागे, दर्शने साहित्ये कलासु च तस्य प्रमुखता । कामोऽप्यत्र धर्माविरुद्ध एवाङ्गीकृतः ।

समन्वय-भावना—अत्र जगतो मूलशक्तिः सर्ग-रक्षा-विलय-हेतुतया त्रिविधा गता ब्रह्म-विष्णु-महेश-नामभि. । तस्या एव माहात्म्यात् त्रयस्त्रिंशत् तावत्कोटिसंख्या-श्च देवाः स्वीकृताः । एतेनैकत्वेऽप्यनेकत्व-प्रसारई ऽन्यत्र दुर्लभः । मा तावद् विचार-भेदेन कलहोऽभूदिति कृत्वा परस्पर समन्वयात्मिका वृत्तिश्च, पुराणेष्वेकैकस्य देवस्यो-त्कृष्टत्व-वर्णनेऽयमेव हेतु. । अन्ते च 'तदेवाग्निस्तदादित्यस्तद् वायुस्तदु चन्द्रमा.' इत्युक्त्वा सर्वेषामेकस्मिन् देवे लय. । अतएव बुद्धस्य जैनतीर्थंकरस्यर्षभदेवस्य चावतारेषु गणना ।

आध्यात्मिकता—भारतीयसंस्कृतेर्जीवन तत्त्वमाध्यात्मिकतैव । आत्मनोऽ-मरता 'अनेक-जन्म-संसिद्धस्ततो याति परा गतिम्' इत्याशावाद', मोक्षं लक्ष्यीकृत्य शाश्वतानन्दे लय एव मानव-जीवनस्योद्देश्यम्, 'सर्वभूतस्थमात्मान सर्वभूतानि चात्मनि । ईक्षते योग-युक्तात्मा सर्वत्र सम-दर्शनः ।' इति सर्व-भूतात्मवाद, 'सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामया. । सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःख-भाग्भवेत् ।' इति विश्व-कल्याण-कामना, वर्णाश्रम-व्यवस्था-द्वारा मानव-जीवितस्य सम्यग्विभाजनम्, संग्राहिका शक्तिश्चेति गुणा इमामनुप्राणयन्ति । 'श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्' इति स्वकर्तव्यपालनम्, भोगेऽपि त्यागस्य वृत्ति', सर्वासां विद्यानां कलानां च परमात्मनि सायुज्यमेव चरमपुरुषार्थोपदेश इत्येतानि वैशिष्ट्यानि तस्या अमरतायाः कारणम् । अतएवात्मतत्त्वज्ञो युध्यमानोऽपि जये पराजये चानासक्त 'स्वकर्तव्यम्' इति भावनयैव युध्यते । 'हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्' इति सर्वथा कल्याणानुबन्धिन्येवाशा ।

यतः प्रभृति दृष्टिरियं विशाला त्यक्ता ऽऽर्यैः, विहायाध्यात्मिकता भौतिकता ऽऽलिङ्गिता, सत्यं रूपं धर्मस्य विस्मृत्य बाह्याचार एव तद्बुद्धिः स्थापिता, सर्व-भूतात्म-वादिता परित्यज्य स्वेष्वपि परभावना घृणा च स्वीकृता 'वृत्त मे दक्षिणे हस्ते जयो मे सव्य आहित' इति पुरुषार्थे मतिं हित्वा 'भाग्य फलति सर्वत्र न विद्या न च पौरुषम्'

इति भाग्यवाद उपाहृता ऽऽस्था, तदवध्येव तेषा पतनम्, दौर्गत्यम्, दैन्यम्, पराभूतिः, निर्वीर्यता च। स्व काञ्चनमपहाय काचे प्रणयस्तेषाम्। सिंहोऽद्य शृगालता भजते। 'हवा मनस्विता तेषाम्।' कलहपरता, गेहेशूरता, पात्रेसमितता चागीकृता तै.। अतएव विपीद त्यवसीदन्ति च।

विश्वस्मिन् लोके प्रभाव —नाभूवन्नार्या पुरा गेहेनर्दिन। 'इक्ष्वाकूणामिय पृथ्वी सशैलवनकानना।' 'रथेनानुद्घातस्तिमितगतिना तीर्ण जलधि, पुरा सप्तद्वीपा जयति वसुधामप्रतिरथ।' इत्यभूत्तेषा लक्ष्यम्। उदन्वति, आकाशे, महीधरेषु च तेषा रथस्य गतिर्नहि विजघ्ने। दूर सागरेषु तेषा पोता वाणिज्यमकुर्वन्। नासीत्तदवधि-अङ्गवगकलिगेषु सौराष्ट्र-मगधेषु च। तीर्थगात्रा विना यात पुन. सस्कारमर्हति।' इति कूपमण्डूकवाद। प्राभवस्ते ज्ञान विज्ञान च। तेषा सास्कृतिक-विजयस्य लभ्यन्ते ऽद्यापि यदा कदा प्रमाणानि। सुदूरेऽमरीकामाममरकेश्वरनाम्न शिवलिगस्याधि गति; रूस-देशे, अरबदेशे च प्राङ्मिव आर्यचिह्नानि, यवद्वीपे (जावा) स्वर्णद्वीपे (सुमात्रा) बालिद्वीपे (बाली) बरुण-द्वीपे (बोर्नियो) मलयद्वीपे (मलाया) च भारतीयाना रामायण-महाभारतादि-ग्रन्थाना कथा तत्तद्देश्यभाषासु सस्करणानि च सार्थयन्त्येतत्कथनम्। चम्पादेशे (अनाम) भारतीयब्राह्मणस्य कौण्डिन्यस्य राज्य-स्थापनम्, अकोरवाटस्य मन्दिरम्, कम्बोजेषु च बोरोबदुरस्थाने भव्य देवायतनम् किं साक्षयन्ति? स्याम-देशे चाद्यापि वैदिकः प्रभाव'। पदाधिकारिणा सस्कृते सज्ञा, राज्याभिषेकेषु वेद-मन्त्राणा प्रयोग व्यक्तीना नामानि च सूचयन्ति तत्रार्य सस्कृते-मुद्राम्। सिंहलद्वीपे भारतीय एव राजकुमार स्वशासन स्थापितवान्। अशोक स्व-पुत्र महेन्द्र कुमारी सघमित्रा च बुद्धगदेश तत्र प्रचारयितु प्राहिणोत्। तत्र विदुषो बुद्धघोषस्य सिंहल्या त्रिपिटकानुवाद, कुमारजीवशान्तिरक्षितादीना बौद्धपण्डि-ताना चीने, त्रिविष्टपे, कुरु देशे (कोरिया) जयपाणौ (जापान) च प्रवास भारतीया-नामार्याणा सास्कृतिक विजय दिशन्ति। अरबदेशे हारूँरशीदनामा शासको भारताद् विदुष आनाय्य चरक सहिताया अन्य ग्रन्थाना चानुवाद कारयामासेति प्रमाण-यन्ति नामैतिह्यविद। अद्यान्तर्भारतादवाधिगता इति तेषा हिन्दसज्ञा सत्याप-यति। नाय प्रौढिवाद। पश्चिमेन सह पुन सपर्केऽपि नाल्पीयान् प्रभावो भारतस्य तत्र। स्वामी रामतीर्थ स्वामी विवेकानन्दश्च बहुशो गतौ आर्यधर्मसदेश च श्रावया मासतु। अद्यापि हृदयन्नै तत्र महुवदो गृहीततुलसीमाला गीता-पाठ परायणा रामचरित-मानस-परिशीलन-व्यसनिनो जना। एनीबेसेण्ट नाम्नी पाश्चात्यमहिला प्रभून् परमा कृष्णे गृहीतभक्ति। भारत काम स्वय विज्ञाने पृष्ठत कृत पर पश्चिमेषु गवालामत्रत्यानां ग्रन्थाना प्रभावो ऽद्य वायुयानाना निर्माणे। मूदन्ते च भारत पुस्तकानि दामंण्यदेशे।

अद्यापि युद्ध-विभीषिकाऽऽकुलं जगत् स्मरदिवातीतं गौरवं भारताभिमुखमेव पश्यति शान्तिकामम् । तस्य पञ्चशीलस्य सिद्धान्तो जनिताशस्तेषां मनःसु । गांधेर्बुद्धस्य चाहिंसोपदेशो भूयः स्पृशति विश्वकर्णशष्कुलीम् । तादृशीयं भारत-संस्कृतिरमृता ऽमरतां संदिशन्ती चिराद् भूतजातस्य श्रेयोऽभिलाषिणी पाश्चात्यसभ्यतानादेन कलुषिता सती भौतिकतया स्पृष्टाऽपि नात्मनः प्राण-तत्त्वं जहाति । व्रजति सफलतामस्याः प्रयत्नो विश्वशान्तौ चेद् भूयोऽपि प्रभविष्यति मनोरुक्तिरियम्—

"एतद्देश-प्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वे मानवाः ॥"

"शिक्षा-पद्धतावपेक्षिताः परिष्काराः"

प्रावर्तत यदवधि भारते' स्वातन्त्र्यान्दोलनम्, यदा चालभत जनवाणी महत्त्वमनुपेक्षणीयम्, नेतृभि सर्वैरपि भूयो भूयोऽघुष्यत प्रचलितायाः शिक्षापद्धतेरवाञ्छनीयता। प्रणालीयं वैदेशिकं शासकै स्वप्रागनघुरावहनक्षम कर्मचारि-समूह प्रस्तोतु चिरस्थायिता चाधिकारस्थ सम्पादयितु प्रवर्तिता केवल लेखनी-चालनक्षमस्यासन्दीभञ्जनपटोर्वंगस्य निर्माणे समर्था। अधीत्यापि द्वादशवर्षाणि, सचित्योपाधिपत्रमुद्गदम् अपहायापुनरागामिनीमवर्जनीया दृष्टिम्, विलुप्य च सकल-भोगमूलमारोग्यमकालवृद्धा सन्तोऽपि वृत्तिहेतोर्द्वारादद्वारमटन्तोऽकृतार्था शर्म न लभन्ते जना। नेयं राष्ट्रीय-चरित्रमुन्नयच्छति, न देश भक्तिं शिक्षयति, नात्मनिर्भरतां पाठयति, न कर्मठतां ग्राहयति, नाजीविकाक्षमत्वं सम्पादयति नात्मगौरवं जनयति, न मनोबलमुत्पादयति, न धीरतां धारयति। अपि तु शिक्षिता अपि न प्रभवन्त उदरभरणाय, किं कर्तव्यविमूढा अपारयन्तो विकल्पाय नदीषु, भृगुषु घूमशकटीगर्तेषु च निपात्यात्मान घ्नन्ति। लाहौरे व्यतिकरेऽत्र हस्ते हस्तं निधाय स्थित्वा। महतीयं राष्ट्रहानिरवरोद्धव्या परिवर्तनेन शिक्षापद्धते।

परमुपशान्तोऽयं घोषः स्वतन्त्रतामधिगत्या सह। अधुनाऽपि त एव नेतारः, ता एव भारतीया प्रजा, सैव च शिक्षा प्रणाली, सर्वमपि चक्रं यथापूर्वं भ्रमति, परि-वर्तिता केवलं शासका तेषां विचाराश्च। ये नेतृगणा पूर्वमेतां प्रणालीमहर्निशमा-क्रोशन्तो नाश्राम्यन्, तस्या परिवर्तनीयत्वं डिण्डिमघोषमजूघुषन्, त एवाद्य देशस्य शासनसूत्रधारा प्रयातेऽपि दीर्घकाले त्रयोदशवर्षाणां स्वातन्त्र्यप्राप्तरुत्तरं यथावस्थामेव स्थितिमनुरुध्यते। केवलं यदाकदा यथावसरं प्रवृत्तेषु समारोहेषु, पानगोष्ठीषु सम्मेलनेषु घोषहृतमधुरतमररागुलिवासरमेकण्ठा कृतज्ञताप्रकाशनाय शिक्षापद्धते परिवर्तनीयता भेकरटितमिवारटन्ति, करतल-ध्वनिना सहैव च समाप्यते तेषामिति-कर्तव्यता। स्थापितेषु विविधेष्वायोगेषु, नियोजितासु च बहुषु समितिषु, प्रकाशितेषु सन्मतेषु—

भाग्यन्नहसितं मे वृषभो मुञ्चति न संशयं प्रभुवम्।

सत्य नाम जटिलायते वर्तमाना परीक्षा-प्रणाली, यथायथोपचीयते विषयभार पुस्तकसभारश्च पाठ्यक्रमे तथातथाऽनुदिनमपचीयते शिक्षार्थिना व्युत्पत्ति । विरला एव साधुना विद्यार्थिन । प्राधान्य खलूपाधिपत्राधिना यथाकथचित्परीक्षातरणार्थिनामुत्कोचेन देहार्पणेन वा परीक्षकानुपलोम्य परीक्षाकार्यालयकर्मचारिणो वा वशीकृत्य परीक्षास्थलेषु वा पुस्तकादिसाहाय्यमुपयुज्योद्देश्यसाधकानाम् । शिक्षणालयेषु छात्रेषु छात्रासु शिक्षकेषु च प्रसृतोऽनाचार इमामतितमा कलुषयति ।

परीक्षासमितिषु च व्याप्तो महान् भ्रष्टाचारो येन छात्रहितान्युपेक्ष्य पाठ्यक्रमेषु स्वार्थवशेन न पुस्तकाना साधु निर्वाचन भवति । प्रकाशका धनबलेन न कञ्चित् सदस्य न विलोभयन्ति । अविचार्य विद्यार्थिना बुद्धि वैभव गर्दभ इव दुर्वहो भार पुस्तकानामारोप्यते छात्रस्कन्धे य नामी वोढु क्षमा । तदुपरि महाघता कराला पिशाचीव तत्सरक्षकाणा वोष्ण रुधिर पिबन्ती न तृप्यति यन्न पारयन्ते ते शिल्पूना सञ्चिकामासिकशुल्कादिव्यय निर्वोढुम् । मुतरा व्ययसाध्यो ऽद्यतन शिक्षणप्रयासो बालानाम् । पर किं फल तस्य ? छात्रा अध्यापकाश्च दलबन्धव्यस्तमतय शान्तितयाभीप्सिता शैक्षणिकी स्थिति दूषयन्ति । अनुदिन प्रतिनगर प्रतिसस्थ च श्रूयन्तेऽनुशासनविरहिताना छात्राणामकाण्डताण्डवितानि तेषा चरममुच्छृखलत्व प्रमाणयन्ति । धार्मिकशिक्षाया: पाठ्यक्रमेऽनिवेशादुदास्यते चरित्रनिर्माण प्रति । अस्या एव शिक्षापद्धते प्रभावात्कुमारीष्वपि शालीनता विलीयते, चारित्र च लुप्यत । यासु सस्थासु प्रदीयते छात्रेभ्यो धार्मिकी शिक्षा, प्रायशस्ता. सम्प्रदायविशेषमनुबध्नन्तीति परमतानुयायिन प्रति द्वेषभावना सकीर्णता च शिक्ष्यते । नोदार-भावना विद्यार्थिना हृदयेषु पूर्यत इति धार्मिककलहस्य निदानमेव प्रस्तूयते । शिक्षणसस्थासु चानभिज्ञातरुचय शिक्षका शिक्षणाय नियुज्यन्ते ।

उद्घोषयति नेतृवर्ग सदेव साम्प्रतिकश्छात्रवर्गो राष्ट्रस्य भावी कर्णधार इति पर न चेष्टते तदनुसारम् । शिक्षैव देशोन्नतेर्मूलमिति जानन्नपि न किमपि करोतीति कीदृशी विडम्बना ? शिक्षण-क्रमे विदेश्यभाषाया अनिवार्यता छात्रमतेरनावश्यको गरीयान् भार इति नात्राया. कर्णधारा विभावयन्ति । तस्या माध्यमेनैवोच्चशिक्षाप्रदानाद् प्रतिदिन योग्यता ह्रीयत एव । केवल सैद्धान्तिकी शिक्षाऽत्र प्रदीयते न प्रायोगिकीति हेतोर्यत्किञ्चिदपि शिक्षिता न प्रभवन्ति जीवनमहासागरे स्थातुम् । प्रौद्योगिक शिक्षाप्रदानाम्ना मौलिकशिक्षणक्रमे (Basic Education) निष्प्रयोजनो भूयानर्थव्ययो विधीयते सर्वकारेण । प्रचाराय स गृहीतवाणो न वस्तुत किमपि कर्तुम् । अतो यदि सत्यमपेक्षते देशहितम् प्रस्तुत-समस्यानां समाधान च तर्हि विदेशभाषायोत्सिक्ता परित्क्रियता ।

१. शिक्षा स्वल्पव्ययसाध्याऽर्थंकरी सर्वंसुलभा च कार्या ।

२. निष्पक्षतयाऽध्यापने सरुचिमनसो जना उपयुक्तवेतनसभाजिता नियोज्याः ।

३. विषयभारापेक्षया योग्यता-संपादनप्रकार एव विशेषेणावधेयः ।

४. शिक्षाया माध्यमं छात्राणां मातृभाषैव स्यात्, आंग्लभाषा सहकारितयैव पाठ्या ।

५. छात्राणां चरित्रनिर्माणायोच्छृंखलता-विनाशाय च धार्मिकी शिक्षा पाठ्यक्रमेऽवश्यं समावेश्या, परं सोदारभावनाभरितैः पुस्तकैरेव देया यथा न साम्प्रदायिकी विरोधिता पदं लभेत ।

६. शिल्पादिशिक्षाया व्यवस्था प्रत्येकं छात्रस्य सुलभा स्यात् । कलाविभागे (Arts faculty) स्तोका एव छात्रा. स्थानं लभेरन् ।

७. आत्मनिर्भरता भृतिमात्रैकानुपजीविता च छात्रहृदयेषु संक्रामणीया ।

एते परिष्कारा द्रुतमेव प्रयोगाहिताः स्युः । अक्षमा इमे कालहरणस्य । अन्यथा देशोन्नते. सर्वेऽपि प्रयत्ना वन्ध्या एव स्युरिति निर्विवादम् ।

अनृत्या जनभाषा । शिक्षणे, शासने, व्यापारे, प्रचारे मिष सविहारे च तथाऽलभत पदमाङ्गलभाषा भारते यथा न केवल वाणी मानसमपि तन्मय भारतीयाना जातम् । न केवल कार्यालयेषु, स्वैर-गोष्ठीषु, विद्यालयेषु, गृहेषु च सैव नवशिक्षितमुखेऽश्रूयत । सस्कृतादि-प्राच्यभाषाविदोऽनधीयानास्तामध्यगच्छन् परमुपेक्षापदम् । अदृश्यत तादृशो जन प्राक्तनगौर्विदमि पशुगृहान्मुक्त आफ्रीकेयो जन्तुरिव । न तद्विधाना कृतेऽशिष्यत कृतमदपि क्षेत्रमाजीविकार्थं । ते ऽभ्राम्यन् पण्डिता अप्यपण्डिता. शिक्षिता अप्यशिक्षिता, सस्कृता अप्यसस्कृता, सभ्या अप्यसभ्या, अग्राम्या अपि ग्राम्या, अवर्बरा अपि बर्बरा अविपुरुषा अपि विपुरुषा । किं बहुना, नाऽभूत् कृतमदपि तदनादरपद यत्तेभ्यो नादीयत । सर्वतो मणिबन्धघटितघटीयन्त्राणा परचाताषिनामिव चित्रगलबन्धनिगडित-ग्रीवाणा ममंरायितोपानद्दानद्धपादाना परलोकदर्शनमिवान्तरमितु गुरुप्णीषका (हैट)-च्छन्नमूर्ध्नां वस्त्राडम्बराऽऽडम्बरितवेषधारिणामुद्धूमधूम्रवर्तिका-व्यग्र-मुखम्लेच्छायित-वचसा लेखनीघर्षकाणामेव परम्परा ऽवलोक्यत जनै । तादृशानामेव लेखनीयन्त्राणा निर्माणस्थलान्यवर्तन्त विद्यालया । अप्रगल्भ आग्ल-भाषाया वुशाग्रेमुषीकोऽपि मूषिक इवाधिगत्यापि सकलग्रन्थ न तात्पर्यं ग्रहीतुमशक्नुवन्. । निर्दय व्ययितेऽपि पुष्कले धने क्षपिते च नेत्रज्योतिषि, क्षीते चानपगामिनि गदशते न पाण्डित्यमवाप तत्र छात्रगण । प्रतिवर्षं चानुत्तीर्णस्यैधमाना छात्रवर्गस्य सख्या द्रौपदी शाटीव दुश्शासना-कृष्टा नाऽपाचीयत । उच्चशिक्षाभिलाषिणा प्रभूताना विद्यार्थिना गरीयसी सख्या नाकल्पत स्वमनोरथ सफलयितुम् । सर्वोऽप्यय दोष आग्लभाषामाध्यमस्य येन सुबोधोऽपि विषयो दुर्बोधो विधीयते ।

स्वतन्त्रे भारतेऽपि ह्रस्यमानमाग्लभाषास्थानस्तर प्रतिवर्षमेधमाना च तत्तद्विषये ऽनुत्तीर्णाना छात्राणा सख्या विलोक्य निदानान्वेषिणा विपश्चितामासन् विविधा विप्रतिपत्तय । तत्रानेकेषा विदुषा मतन सुकुमारमतीनाविद्यार्थिना मस्तिष्के बलात् पारेसमुद्र निवसता विदेश्याना भाषाया दुर्वहभारारोपण तेषा विकासपथे रोधशिलां (Stumbling stone) एवेति तस्या अनिवार्यता परिहरणीया शिक्षा-क्रमात् । विज्ञानादीनपि विषयान् यथा ते मातृ भाषाया पाठिता साधु बुद्धयन्त न तथा-ऽऽङ्गलभाषायाम् । ये केचन तस्या विशेषेण प्रगल्भा स रुचयो वा, काम तेऽमुमधीयेरन् । बहव शिक्षाविदोऽस्य विचारस्य समर्थकाः ।

इतरे तु बाल्यादेवाग्लगिरमधीयाना अुवाणा सर्वत्रतयैव व्यवहरन्तश्च सहसा न कल्पन्ते ता विना विचारयितु कृत्स्न जातस्य यथापूर्व-भाविताम् । तेषा विचारे परित्यक्ताग्लवाणीप्रयोगा भारतीया अवनति रसातले मधु निमक्ष्यन्तीति कृत्वा सर्वत्रैव तस्या अचंसाऽक्षुण्णतयैव भवितव्यम् । न ते स्वप्नेऽपि विचारयन्ति यत्

स्वतन्त्रराष्ट्रस्य कलङ्क हेतुरेव वैदेशिक्या भाषाया प्रधानता। एतन्मानस दास्य न भारतस्य गौरवाय ते तर्कयन्ति च विज्ञानप्रौद्योगादिविषयबन्धवो ग्रन्था आङ्गलभाषाया-मेव। तत्तच्छास्त्र शासन तद्वैषयिक पारिभाषिक शब्दबोधमन्तरा न सभवतीति तदध्ययनायाङ्गलभाषावैदुष्यमनिवार्यमेवेति। न शिक्षापद्धतेस्तस्या आवश्यकत्व परिहेयम्। पर प्रौढिवादोऽय नाम तपाम्। रूसजयपाण्यादिदेशा स्वभाषाया विज्ञानादि-नव-नव-विषय-शिक्षा प्रदायासाधारणी कर्तुं प्रभवन्ति समुन्नतिं चेत् कथ तर्हि भारतस्य स्वभाषाया तेषा शिक्षणेनावनति सम्भाव्यते ?

स्वीकृत चैतद् भारत-सर्वकारेण शनै शनै पाठ्यक्रमेऽनिवार्यतयाऽङ्गलभाषा-ध्यापनस्य नियममपाकर्तुम्। बहुषु प्रदेशेषु च शिक्षाविभागेन स्वीकृता सा वैकल्पिक-विषयतया ऽध्यापयितुम्। स्रोष्टानुयायिन स्वमातृ-भाषा मन्यमानास्तस्या अध्ययन मूलादेव विदधति। परमद्यापि बहु शिष्यत एतदर्थं कर्तुम्। विदुषा कर्तव्य तत्तद्-विषयकग्र-थान् स्वमातृभाषाया निर्माय लोकभाषासूक्तपुस्तकाभाव निरावर्तुम्। सर्वकारेण च विद्वासस्तद्विषयग्रन्थ रचनायै प्रोत्साहनीया। छात्रा अपि स्वभाषा-माध्यमेनाध्येतु विषयान् महचि प्रवर्तेरन्।

ये केऽपि विमल मतय प्रभवन्त्यवगाढुमाङ्गलभाषा ते काम पठन्तु ताम्। अन्ता-राष्ट्रीय-व्यवहारे तत्प्रयोगस्य सुप्रचलत्वात्, तस्या ज्ञानमपीप्यत एव। पर-मैच्छिकविषयरूपेणैव पाठ्यक्रमे सा निर्धार्येत। अद्यापि विशेषज्ञानापेक्षिणः फ्रेञ्च-जर्मनादि यथारुचि शिक्षन्त एव। राजनयिक-दृष्ट्या महत्त्वे विद्यमाने तज्ज्ञारतदाऽपि सविशेष मान्या भविष्यन्ति, तन तेषा श्रमो निष्प्रयोजनो भविष्यतीति न तैर्भेतव्यम्।

एव शिक्षाप्रसारस्य जनकल्याणस्य च विघाऽऽङ्गलभाषाया प्राधान्य शिक्षा-पद्धतिनिराकरणीयमेवेति शम्।

मानो हि महतां धनम्

जगति जीवता प्राणिना कृते भोजनादिसाधनान्तरवन्मानोऽपि नितरामनुपेक्षणीय । दुर्गतोऽपि, वयसा हीनोऽपि, विद्यादि-विकलोऽपि जनोऽनुभवति किमप्यात्मगौरवम् । तस्मिन्हन्यमाने क्षुभ्यति स, शक्तश्चेत् प्रतिकरोति कमप्यन्यमुपायं वा श्रयते ।

मानो नात्र धनादि मूल । स तु अहंकार एव य सदा निन्दितो महात्मभि । पर मानस्यात्रायमेवाभिप्रायो यन्न स्व नयेद् दैन्यम् । मनस उच्चता, परत पराजयस्यास्वीकृति । किमप्ययाचनम्, अकार्पण्यम्, अनादराननुपलम्भ, अयशसोऽभाजनता, परेषा चाटुकारिताया अभाव, दैन्येऽपि निकृष्टवृत्तेरनालम्बनम्, तिरस्कार-मिश्रस्य महतोऽपि वैभवस्य त्याग, अनादरस्यामर्षणम् इत्येते गुणा मानस्य लक्षणानि । विनय शीलोऽपि, निराडम्बरोऽपि सुशीलोऽपि, वयसा, कुलेन, पदेन, धनेन, व्यवसायेन वा हीनोऽपि शक्नोति भवितु मानी । मनस्विता न केवल सद्वृत्तनिष्ठा । दुर्वृत्ता अपि, कलक भाजनान्यपि पापाचारा अपि भवन्ति मनस्विन । रावणो दुर्योधनश्चास्य निदर्शने । मन्त्रिभिर्भ्रात्रा पत्न्या च बोध्यमानोऽपि न रावण सीता मुमोच न च रामेण सह सदवे । तस्योक्तिरिय प्रशस्यैव—

'जानामि सीता धरणी प्रसूता जानामि राम मधुसूदनोऽयम् ।
अह हि जाने स्वयमस्य वध्यस्तेनाऽऽहृता मे जनकात्मजेया ॥
न कामान् नैव च क्रोधात् त्यजामि जनकात्मजाम् ॥'
(रा० यु० का०)

धार्तराष्ट्रो दुर्योधनोऽपि 'अपि नाम भवेन्मृत्युर्न च हन्ता वृकोदर' । इत्येव सदाऽभिललाष । कृष्णेन सन्धये सम्बोध्यमानोऽपि 'सूच्यग्र नैव दास्यामि विना युद्धन केशव' इत्येवोदतीतरत् ।

न मानिन कदाचित्परोपजीविनो भवन्ति, पुरुषकारावलम्बिनस्ते । मानिषु प्रतिष्ठावानु सिंह —

'मदसिक्तमुखैर्मृगाधिप करिभिर्वर्तयते स्वय हतै ।'
न जातुचित्स क्षुधा-क्षामोऽपि घासमत्ति परहतान्पशून् वा भक्षयति ।
मानिना स्वभावोऽपि लोकोत्तर । न ते जात्वपि मानविरुद्ध स्वर्गमपि कामयन्ते ।

अत काकाना राजहसाना च प्रकृति स्वतो विभिद्यते—

कुद्धोलूक नख प्रपात विगलत्पक्षा अपि स्वाश्रयम्
ये नोज्झन्ति पुरोप पुष्ट-वपुपस्ते केचिदन्ये द्विजाः ।
ये तु स्वर्गतरगिणी विसलता सङ्गेव सर्वंसहा
गाग तोरमपि त्यजन्ति मलिन ते राजहंसा वयम् ॥

(भा० वि०)

अनादरस्तेषा कृते मृत्योरपि दुखावह । 'सभावितस्य चाकीर्तिर्मरणादतिरिच्यते ।' सभावना सा सुकमण सुपदाच्च जाता । नालस्तेऽनुचितमारभन्त ।

"वय नो ते विप्रा प्रति दिवसमासाद्य कृपणान्
धन ये याचन्ते परिगणित-नक्षत्र तिमय ॥

अतएव 'सेवा श्ववृत्तिराख्याता ।' श्वा हि लागूल चालनम् अधश्चरणाव पातमुदरप्रदर्शन च करोति । दासवृत्तावपि जनस्तथैवाचरति । स्वामिन प्रसादाय चाटुकारिता कापण्य याचना चानुतिष्ठति । पर पतनमिदमात्मन । बन्धुहि श्रेष्ठ सर्वेषामात्मा । न तस्यावज्ञातन कदापि विधेयम् । प्रतापोद्भावितयवन हृत्ताप प्रतापोऽवृणोत् कानन वास न तु यवनेश्वराधिपत्यम् । रण दुर्मदो हम्मीरश्चा कामयत राज्य भ्रश, कुलनाश च, न पर तस्याज शरणागत यवनम् । मानिन सदोत्कर्षायैव यतन्ते—

कुसुम स्तबकस्येव द्वे वृत्ती तु मनस्विन ।
मूर्ध्नि वा सर्व लोकस्य विशीर्येत वनेऽथवा ॥

साकुन्तले धीवरस्य रक्षा पुरुषा प्रति स्वाजीविका निन्दत उक्ति स्वाभिमान पुण्या—

सहज किल यद विनिन्दित न हि तत् कर्म विवर्जनीयकम् ।
पशु मारण कर्म ब्राह्मणोऽनुकम्पा मृदुकोऽपि श्रोत्रिय ॥

वस्तुतो नास्ति जीवन मान विना मानवानाम् । लघीयस्त्व मान विना । मनस्विनो महान्त इत्युच्यन्ते । मानो हि महता धनम् । अतो न मानो जीवन-सदृशे ऽप्युपेक्षणीय ।

—•—

मृत्युः

महो, कीदृश भीषणं नाम यच्छ्रुत्वैव महतामपि भटशिरोमणीना हृदय कम्पते, विषज्झञ्झावातेष्वपि निष्कम्प धैर्यं म्रियमाणमपि विगलितमाम्, चलति साहस सहस सकटाकूपारपारदृश्वनाम्। दुर्लंघ्यतेवास्य तादृशी यन्निष्ठुरोशकौक्षेयककरालकरैरखण्डमुण्डिकामण्डितस्कन्धं, भाकारध्वनिसहकारधान्तगोलकाघातनिपातितदुर्गघातशतघ्नीबलबृंहितं सैन्यदलैरावेष्टितादपि भवनाम्नानौषधिजालजटिलीकृतादपि शरीरात् पञ्जरादिव वपोत मार्जारो झटिति धरति जीव बलीयसामपि मृत्यु ।

नाय स्निह्यति धनिकेषु, न दयते दीने, न कातर कृपणे, न जिह्मेति स्त्रैणे, न रज्यते रूपे, नासज्जते यौवने, न रक्षति परिचयम्। सर्वान् यथावसर वशीकरोति। दुर्गतोऽपि, रोगातुरोऽपि, व्याधिग्रस्तोऽपि जीवो नाभिलषति मरणम्, मार्गयते मोक्ष तस्मात्। पर दुर्निवार प्रहारस्तस्य। देवा अपि याम युगपाये, भवन्ति तस्याक्षिलक्ष्या । तथाभूतोऽय दुश्चिकित्स्यो व्याधि। सृष्टेरारम्भादेवानुल्लघितशासनोऽय मर्त्यैरमर्त्यैश्च, गणुभिर्महद्भिश्च, बलिभिर्निर्बलैश्च, सुरूपै कुरूपैश्च, धनिभिर्निर्धनैश्च।

क्व न तस्य वर्णनम् ? वेदेषु, ब्राह्मणेषु, पुराणेषु, काव्येषु, दर्शने विज्ञाने च।

कथ तावन्मृत्यु ? अत्र गोपथब्राह्मणम्—'स समुद्रादमुच्यत, स मुच्युरभवत्त या एत मुच्चु सन्त मृत्युरित्याचक्षते परोक्षेण।'

शतपथे च—'एष वै मृत्युर्यत्सवत्सर। एष हि मर्त्यानामहोरात्राभ्यामायु क्षिणोत्यथ म्रियते।' (श १०।४।३।१)

अन्यत्र सूर्य एव मृत्युरिति कथित। क्वचिदशनाया (क्षुधा) मृत्युत्वेन प्रतिपादिता। मैत्रायण्या 'मृत्युस्तम' इत्युक्तम्। यजुष्षु च मृत्युर्जीवित च प्रजापतेश्छायात्वेन वर्णिते—

'यस्य च्छाया अमृत यस्य मृत्यु'।'

एव मृत्युस्तावज्जीवितस्यैवापर पक्ष। कथ तर्हि तस्माद् भीति ? अज्ञानमूलेति ब्रूम।

न हि तत्त्वज्ञास्तस्माद् भयमश्नुवन्ति। तेषामेव कथनम्—

'मृत्योर्बिभेषि किं बाल ? न स भीत विमुञ्चति।'
'अद्य वाऽब्दशताऽन्ते वा मृत्युर्वै प्राणिना ध्रुवः॥'

गीतायां तु मृत्युर्जीवस्य दशाविशेष एवोक्तः ।

'जातस्य हि ध्रुवो मृत्यु ध्रुवं जन्म मृतस्य च ।'

यथायंज्ञास्तस्यावश्यंभाविता विज्ञाय न मुह्यन्ति, अविवेकिनस्तु विस्मरन्त्येवैतत्—

'अहन्यहनि भूतानि गच्छन्तीह यमालयम् । शेषा जीवितुमिच्छन्ति, किमाश्चर्यमतः परम् ॥
रण-सुभटा अपि मृत्युञ्जयिन एव ये न तस्माद् विभ्यति स्वयं च तमामन्त्रयन्ति ।
यदि सुमरमपास्य नास्ति मृत्योर्भयमिति युक्तमितोऽग्रतः प्रयातुम् ।
अथ मरणमवश्यमेव जन्तो. किमिति मुधा मलिनं यशः कुरुध्वे ॥ (वे. सं ३)'

महाकवि कालिदासस्तु मरणं प्रकृतिं जीवं च विकृतिं मन्यते—

'मरणं प्रकृति. शरीरिणां विकृतिर्जीवनमुच्यते बुधैः ॥'

परमपुरुषस्य भक्ता अपि न मृत्युं भयदायकं मन्यन्ते, प्रियस्य परब्रह्मणो लम्भकतया स्वागत योग्य एव स. । भक्तः कबीरः कथयति—

जा मरने से जग डरे मेरे मन आनन्द ।
कब मरिहौं कब पाइहौं पूरन परमानन्द ॥

लौकभाषाया प्रसिद्धा कवयित्री महादेवी मृत्युं सुन्दरीत्वेन वर्णयति—

'हे सृष्टि-प्रलय के आलिंगन, सीमा असीम के मूक मिलन,
कहता है तुझको कौन घोर, तू चिर रहस्यमयि कोमलतर ॥
तेरे हित जलते दीप-प्राण, खिलते प्रसून, हँसते विहान ।
श्यामांगिनि, तेरे कौतुक को बनता जग मिट मिट सुन्दरतर ॥
प्रिय प्रेयसि तेरा लास्य अमर ॥"

मृत्योरनुभूतिरपि नैकविधा । केचिदतितमां पीडामनुभवन्ति मरणकाले । अपरे तु सुखेनैव तमालिंगन्ति । अतिशीतलस्तस्यानुभवो वर्णित. कैरपि । परं निश्चितमेतद् यद् भावनाकृतैव तस्य भीषणता ।

वस्तुतो जीवनसंग्रामस्य विश्राम-दशैव मृत्युरिति कथ्यते । तदाहि जीवो द्वन्द्वातीतः सकलबन्धन-मुक्तश्च सम्पद्यते । उक्तं च तावदाग्लयविना—

"All was ended now, the hope, and the fear and the sorrow; All the aching of heart, the restless unsatisfied longing. All the dull deep pain and constant anguish of patience." (longfellow)

(मृत्यौ सति सकला आपदो व्याधयश्च, माया अनुभूतयश्च विलीयन्ते)

अन्यः कविः सिनेका (Seneca) संज्ञः प्रकृति-विहितमिति कृत्वा मृत्युमभिनन्दयेव । तथाहि—

"What is death but a ceasing to be what we were before; We are kindled and put out, we die daily; Nature that begot us, expels us, and a better and a safer place is provided for us."

(अस्माकं सत्तायाः लय एव मृत्युः, प्रकृतिर्नयति हन्ति चास्मान्प्रतिपादयति च सुरक्षिततरं स्थानान्तरमस्मभ्यम् ।)

अनेन प्रकारेण न केवलं भारतायाः, परं पाश्चात्या अपि विचारकाः स्वाभाविकमवश्यंभावि च मरणं मन्यमाना न तस्माद् भयमुचित मन्यते । अज्ञानकृतं हि तद् भयम् । अन्यथा—

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तर-प्राप्तिर्धीरस्तत्र न मुह्यति ॥

इति गीतानुसारेण दशापरिणामाभिन्नादस्मात्कथं भीतिः । अतः ससाहसं स्वागतयोग्य एवासाविति विभावनीयम् ।

—०—

अहिंसाया जीवनौपयिकंत्वम्

"भगवन् मुनिरयं विश्वामित्रोऽद्यापि द्रुह्यति भवते। कथं भवान् क्षाम्यति तम्।"

"देवि, नान्यथा विभावनीयम्। महाप्रभावोऽयं राजर्षि. स्वतपसो महिम्ना जातो ऽधुना ब्रह्मर्षिपदार्ह.। केवल क्रोध एव तस्य परिपन्थी। निष्क्रोधत्वेतस्यात्, न प्रभवेत् कोऽपि तमतिशेतुम्। ब्राह्मणाना पुनः 'क्षमैव परमो धर्मः। हिंसाभावः प्रतिहिंसामेव प्रसूते।'

इत्थमासीत्सवादः कुट्या महर्षेर्वसिष्ठस्याऽरुन्धत्याश्च। बहिरतिष्ठच्च कृपाण-पाणि कौशिकः प्रतिशोध-भावनया विकलान्तरः प्रतीक्षमाणो महर्षेरेकाकिताम्। पर श्रुत्वैतानि शान्त-स्तिमित-निर्घोषाणि वचनानि तितिक्षा-सरसानि विश्वामित्रः पश्चात्ताप-सतप्त-चेता. सहसा प्रविश्या-न्तर्मुनेर्वसिष्ठस्य चरणयोः पपात। महर्षिर्मैत्रावरुणस्तु निरीक्ष्य तं प्रेम्णा 'आगच्छ, स्वागतं ब्रह्मर्षेः' इति कथयंस्तमालिलिंग। अयमासीदहिंसाया विजयः। हिंसा प्रतिहिंसा च मानवता-विरुद्धे न कदापि मंत्रौ जनयितुं क्षमे।

हृदयमिदं भावानामाधिष्ठानम्। तस्य वृत्तय एव दैवमासुर च धर्मं वहन्त्यो मानवस्य शुभाशुभकर्मणा हेतु-भूता., दैवी वृत्तिरेव गीतायां दैवी संपदिति प्रतिपादिता। तत्प्रतिकूला चासुरीति दिव्य-गुणाभि-कामैर्दैवी वृत्तिरेवानुरोद्धया। तत्र हि धर्माचरणम् धर्मस्याङ्गेषु च 'अहिंसा सत्यमस्तेयं शौचमात्मविनिग्रहः।' इति 'अहिंसा, समता, तुष्टिः' इत्यादिना च सर्वंप्रथममहिंसाया एव परिगणना। तस्येदमायूतम्।

मानवः खलु सामाजिकः प्राणी। समाजोऽपि विविधाचार-विचार-शालिनामपि परस्परसंक्षयवता जनाना संघः। लोकस्थितिस्तेषां मिथः सहयोगेन। तदर्थं परस्परानुकूलता नितरामपेक्ष्यते। सा च विद्यमानायां हिंसावृत्तौ शशशृङ्गकल्पैव। हिंसा हि द्वेष-मूला। न खलु मैत्रो विद्वेषश्च सामान्यं भजतः। अभयं परेषां तत्रापरिहार्यम्। न हि भये सम्भवति स्नेहः समादरो वा। अतोऽपि लोकस्थितिमनुरुन्धानेन स्वीकार्याऽहिंसा।

स्वार्थ-प्रायो जनः। स्वेषु स श्लिष्यति परेभ्यश्च द्रुह्यतीति राग-द्वेषाभ्यां भेदभावना। तत्र एव प्रयोजन-साधनाय नरः स्वानु रुणद्धि परांश्च जिघांसति। एव च

मत्स्य-न्याय प्रवर्तते । लोक-क्षय-कारिणः संग्रामाः, सामाजिका अत्याचाराः, परपीडनम्, धर्म-कृतो वर्ग-गतो जाति-गतश्च विरोधः सर्वे एवाशान्ति हेतवोऽस्या हिंसक-वृत्त्या उपजीवितम् । अतोऽपि विश्वस्य स्थितये ऽहिंसा ऽपेक्ष्यते ।

न हिंसा प्राणि-वध मात्रम् । परपीडनम्, मर्म-भिदा वचनानां कथनम्, इतरेषां भावनाया उपघातः, किं बहुनाऽन्येषां हृदयं येन कर्मणा व्यथते, तदेव हिंसा । अतः सर्व-प्रथम मनसो वैरभावमुत्सृज्य सर्वं भूतात्मवादं स्वीकार्यं, सर्वत्र स्व-बुद्धिरायेया । अपगत-वैरभावे, प्रबले च प्राणि-मात्र प्रति बन्धुत्वे स्वतो निहन्यते हिंसकता । 'समो ऽहं सर्व-भूतेषु न मे द्वेष्यो ऽस्ति न प्रियः' एतादृशी स्थितिर्यदि कस्यचित्स्यात् शान्तं तदा लोक-विरोधेन । त्यक्त द्विड् भावानां महात्मनां संसर्गेण प्रकृति हिंसा प्राणिनोऽपि त्यक्त-हिंसाभावा भजन्तेति श्रूयते । महात्मा गौतम क्रूर-कर्माणमंगुलि-मालं दस्युं स्व-प्रेम्णैव विजिग्ये इति ख्यातं चरम् । श्वापद-बहुले कानने तपस्यतामृषीणामासीदियं स्थितिः । सिंहा मृगाश्च व्यचरन् तेषामाश्रमेष्वकुतोभया । परं स्थितिरेषा वीत रागाणाम् ।

अत्र भवति काचिद् विप्रतिपत्तिः । शास्त्राण्युपदिशन्ति 'मा हिंस्यात् सर्व-भूतानि' इति । परं व्यवहार-क्षेत्रे नैतत्संभवति । विलोक्यते तत्र स्व परभावः, रागो द्वेषश्च । तथाहि—

मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः ।
उत्पद्यन्ते त्रयः पक्षा मित्रोदासीन शत्रवः ॥

तदा सम्मुखमागच्छति घातके ऽकृते च प्रतिविधाने स हन्यादेव । कथमहिंसया तस्य प्रतीकारः ? प्रतिघाते तु हिंसा सम्पद्येत । अतो न लोके संभवति सर्वथा ऽहिंसा । वीतरागाणामेव कृते सा । अनंतदेवोत्तरं यतस्या जीवने सामञ्जस्यं विधेयम् । प्रभवति कश्चिच्चेत्स्व हृदयादामूलमुच्छेत्तुं वैरभावम्, शान्तश्चेद् रागो द्वेषो वा, तस्य सपर्कादेव विगलति रजः परस्य घातकस्यापि । नास्ति तत् किमपि भद्र-तरम् । न संभवति चेन्न स्वार्थाय पर-पीडा कार्या । अधिक हिंसा-मयस्याचरणस्य समक्षमल्पीयो हिंसावत् कर्मणो ऽनुष्ठानम् । परस्यात्माचारादबलस्य रक्षणम्, अन्यायस्य प्रतिरोधो ऽप्यहिंसैव । सत्यपि प्रतीकार-सामर्थ्ये प्रतिविधानं हिंसायाः अप्यहिंसा । एवमहिंसा सबलस्यायुधम् । निबलस्यापि शान्त भावेन निर्वैरेण चान्याय मयणे परस्य हृदय-परिवर्तनं सम्पद्यते ।

वस्तुतः 'आत्मनः प्रतिकूलानि परेषां न समाचरेत्' इति तावदहिंसायास्तत्त्वम् । एतादृशाचरणे न कश्चिद् विरुध्येत न च हिंस्र भावो जागृयात् । स्व-मनोगता हि हिंसा प्रतिहिंसामुत्पादयति । नहि जातु बलेन संभवति हिंसा निवृत्तिः । अग्निना न शाम्य-

त्यग्निः । जलमेव तदयंमपेक्ष्यते । मैत्री च सर्वथा शीतलमुदकं यत् परिपन्थिनामपि शमयति मनांसि द्वेष-दहन-दग्धानि । एवं यथाशक्ति हिंसकता-वर्जने हिंसा-मूलानां च परित्यागे समाजस्यैव प्रति-मूर्तिः सम्पद्यते । कुतस्तदा वैरम्, क्व गमिष्यति घृणा, कुत्राश्रयं भजिष्यति हिंसेति को जानाति । अतएवोक्तं बुद्धादिभि.—

'अहिंसा परमोधर्मः ।' धर्मश्च विश्वस्यजगतः प्रतिष्ठा ।

तदयं सर्वधर्मानुयायिभिरहिंसाऽचरणं विधेयम् । स्व कर्तव्य-पालने धर्म-रूपे न हिंसा भवति, इत्यप्यवधेयम् । नहि प्रतिहिंसामुद्भावयति सा । इदमेवाहिंसायास्तत्त्वम् ।

———

वासुदेव ज़रा कष्टम् ।

'अहह ! प्रभो ! कीदृशीं दशां प्राप्तोऽस्मि ? क्वयते वक्त्र सोदन्ति नाम-सर्वांगाणि, न स्फुरतो हस्तौ कर्मणि, न प्रसरत पादौ भुवि, न गच्छति दृष्टिर्लक्ष्ये, न शृणुत शब्द कर्णौ, क्षीयते प्राणशक्ति, अपचीयते बलम्, न परिणमति भुक्तम्, एधते ऽनुदिन वायु । किं कथयानि ? अपगलित-दशन स्फुटितजलबन्दुकमिव जात श्वल्लाला-विलग्न मुखम् । उपचित-श्यामलिम कान्तारावटाग्रलेऽक्षिकूपम्, विगत-मसृणिमानो गाढगर्ता घट सर्पराघेते कपोलौ, जरत्पारावत-पक्ष धूसरे कलुषितापाङ्गे दग्धकपर्दकायेते कनीनिके, रोम सकुले घर्घरायितस्वने दृश्येते तृणजालजटिले नासिके, वली-वलयिता तिलकालकाचिता श्लथत्वक् दरदीर्णेदरा लूनावशेषकाण्डा क्षेत्रस्थलीव प्रतिभाति तनु, भग्नमेरुदण्ड कृष्टशरासन इवाभाति पृष्ठवश, शिथिलवसन-वेष्टिते शुष्क वंशयष्टी इव प्रतीयेते जघे, नटडमरूरिव नृत्यति कम्पमाना ग्रीवा । गतावपि, मतावपि, वचने ऽपि श्रवणेऽपि, स्मरणेऽपि भवति सदा स्खलनम् । नाधुना करोति कर्ण श्रुत, न सम्प्रति तिष्ठति वचने पत्नी, नेदानी सहते दर्शन स्नुषा, न परामृशति हित बन्धुवर्ग' । कौलेयकस्येव पतिखण्ड-मात्र प्रयोजनस्य न स्ति गृहे कश्चिदादर । किं करवाणि ? क्व वा गच्छानि ? क वा शरण यानि । वञ्चितोऽस्मि मृत्योरपि ।' इत्थ भवति शोचनीयावस्था जराजीर्णकलेवरस्य मनुजस्य ।

दशामिमा गमिते शरीरे क्षीयते 'सकलमपि सनिहित शक्ति-पुञ्ज परमनुदिन-मेधते तृष्णा । उक्त च—

जीर्यन्ते जीर्यत केशा दन्ता जीर्यन्ति जीर्यत ।
जीर्यतश्चक्षुषी श्रोत्रे, तृष्णैका तरुणायते ॥

तथा च—

अङ्ग गलित पलित मुण्ड, दशनविहीन जात तुण्डम् ।
वृद्धो याति गृहीत्वा दण्ड तदपि न मुञ्चत्याशा पिण्डम् ॥

प्रवाधमेधते वृद्धस्य तृष्णा, प्रगुणो भवति सुत दारेषु मोह, वार्धुषिक कुसीद-वद् वर्धते प्रतिदिन कोप, करपुटाकलितसिकतानिकर इव परिहीयते दिने दिने शक्ति, तरगिणीतरगभगीभग्नपुलिनकल्पो लघीयान् जायते ऽन्वहमादर । दशमीहतक इति, वृद्धापसद इति, जराविकलमतिरिति च सोल्लुण्ठ हस्यते वार्धक्यग्रस्तो जनेन ।

महान् यद्यपि दीर्घजीवनकृतो ऽनुभवो वृद्धस्य कल्याणाय कल्पते शिशूनाम्, तथापि न त आद्रियन्ते यौवन-मद-मत्त-मनसो वार्द्धक्य-विजृम्भितमिति वदन्तः ।

क्षीणे वयसि जीर्णे वपुषि च बहुधा श्रूयते मतिरपि प्रवयसाम् । तदा ते विस्मय-करं मौर्ख्यमनुतिष्ठन्ति । बहुधा रोगादिक्लान्तशरीरास्ते खिलीकुर्वन्ति सकलमपि परिजनं निजया विचित्रया वृत्त्या । वर्तमाने ऽशोभमाने भौतिकता-प्रधाने युगे दुरवस्थैव वृद्धानां पुत्रसाकृतार्थजातानाम् । परिणीत एव सुतः परित्यज्य पितरौ वात्सल्य-निर्भरौ पृथगेव वासं करोति पत्न्या सह । यावद् वर्तते तयोरधिकारे धनम् तावदेव संभवति शुश्रूषा । परं न सर्वे ऽपि लक्षाधीशाः पुष्कलधना वा यन्नाम स्वाधिकारे धनं रक्षेयुः । तनयानां दयामात्रमाश्रयन्त एव वृद्धा यथाकथंचित्कालं व्यत्याययन्ति । परं तामवस्थां प्राप्ता अप्यमी नोपहास-योग्याः । सेव्या एव सुताना महतो ऽनुभवान् लोकोपकाराय रक्षन्तः । परं नायमादर्शः पाल्यते जनैः । अतो जरा-जीर्ण-जनानां दुर्दशैव समाज द्वर्ति कष्टं जरा ।

कष्टं निर्धनजीवनम्

सुखदुःखमकरेऽस्मिञ्जीवने दारिद्र्य नाम वृष्टि-विरहितो दारुणो वज्रनिपात, घतापूर्वक, शल्य-प्रवेश, अयद्धि-स्पर्शो दु सहो दाह, अरसदर्शनश्चुरिकाघातः, मरण-मूयिष्ठ कुष्ठम्। कस्तावदस्मिन् जगति दौर्गत्य-खिलीकृतो म सुख जीवति ? चिन्ता-दाव-दग्ध-मनसा दरिद्राणां वस्तुतो न जीवनम् जीवनम्।

किं साध्यते तै प्रयोजनमिह विविध-सार-राशि-सरसोद्भूतेऽपि भुवने ? सर्वाण्यपि विकास-साधनानि क्रीतान्यपहृतान्यधिकृतानि च धन-पतिभि। तेषा शिशव सुरस-रसायनायिते-भोज्यपुष्टवपुष कुहिमेषु क्रीडन्ति पर निर्धनाना पृथुका मुष्टि-मित-पृथुक-कणेभ्योऽपि रुदन्त क्षुत्क्षाम-कण्ठा बाल्य एवानुभवन्ति चिरनिद्राम्। न तेषां शिक्षा नापि दीक्षा, न सस्कार कृतो मयस्कार, न परिधानम्, दूरे वेशविधानम्, नोदरपूर्ति यत्र भोगकृता स्फूर्ति। सस्कृता अपि द्रव्यबहिष्कृता न मानवोचित जीवन जीवन्ति मनहीना। सर्वाण्यपि विकास-क्षेत्राणि न तेषामाशाप्रदानि।

आयाति वसन्तः सर्वेषामुल्लासकृत्। ग्रीष्मतु नर्नादेश पर्यटनोत्सुकयमानयति, वर्षंतु रामयति ताप रवि-करजेन सह मानवमपि, शीतंतु सन्दिशति विविध-भोगायतनता वपुष उल्लाघ हेतुता च। पर निर्धनानां कृते विपद्-वज्र-पातनमेवैतत्सर्वम्। निदाघे प्रखर-कर-कर-दाहदग्धा, प्रावृषि निरन्तर-वृष्ट-जलधर-धारा सारैर्ध्वस्त-धरणा, शीते च काले शिशिरतर-समीरण-वेपमान-जडीकृतांङ्गा प्रज्वाल-जठरानल-पीत-शोणिता न जातुचित् विन्दन्ति शर्म-लेशम्। उक्त च केनचित्—

रात्रौ जानुदिवा भानु कृशानु सन्ध्ययोर्द्वयो।
एव शीत मया नीत जानु-भानु-कृशानुभि॥

दारिद्र्य-खिलीकृते जीवने स्वजना अपि द्रुह्यन्ति, मित्राण्यपि शत्रूयन्ते, ज्ञातयोऽप्यरातीयन्ते, पत्नी सपत्नीयते, माता विमातरति। तथाहि—

अम्बा तुष्यति न मया न स्नुषया साऽपि नाम्बया न मया।
अहमपि न तया न तया, वद राजन् कस्य दोषोऽयम्॥

महतोऽपि कुटुम्बस्यैकस्मिन्नल्पायेव कक्षे निवासोऽतिदु खद —

तस्मिन्नेव गृहोदरे रसयती, तत्रैव सा कण्डनी
तत्रोपस्करणानि तत्र शिशवस्तत्रैव वास स्वयम्।

सर्वं सोढवतोऽपि दु स्थगृहिण किं ब्रूमहे तां दशाम्
अद्य श्वो-जनयिष्यमाण-गृहिणो तत्रैव यत्कु थति ॥ (वैनतेय कवे)

साधनानामभावे तु तद्दारिद्र्यमतिशयेन दु ख-प्रद सम्पद्यते—

वृद्धोऽन्ध पतिरेव मञ्चक गत, स्थूणावशेष गृहम्
कालोऽम्यर्णजलागम, कुशलिनी वत्सस्य वार्तोऽपि नो ।
यत्नात्सञ्चिततंल-विन्दु घटिका भग्नेति पर्याकुला
दृष्ट्वा गर्भ-भरालसा निजवधूं श्वश्रूश्चिर रोदिति ॥

निर्धनश्चारित्रधनोऽपि सर्वै सन्दिह्यते, सर्वेऽपराधास्तत्र सभाव्यन्ते, अलीकोऽपि दूनंयारोपस्तत्र सत्यायते । न स क्वापि शान्ति लभते । नष्टप्रायता तस्य । तथाहि—

दारिद्र्याद्धि्यमेति, ह्री-परिगत सत्वात्परिभ्रश्यते,
नि सत्व परिभूयते, परिभवान्निर्वेदमापद्यते ।
निर्विण्ण शुचमेति शोकनिहतो बुद्ध्या परित्यज्यते,
निर्बुद्ध क्षयमेति, हा निधनता सर्वापदामास्पदम् ॥

अस्यैव दारिद्र्यस्य कारणात् परेषामवमानना तूष्णी सह्यते, निकृष्टमपि कर्म क्रियते, पापेऽपि चरणो निक्षिप्यते, नैष्ठुर्यमूरीक्रियते, कारुण्य धिक्रियते । पिता तिरस्करोति सुतम, भगिनी धिक्करोति सोदरम्, जननी न्यक्करोति तनयम्, पत्नी घापाक्करोति पतिम् । दृश्यते च, अनेन विवशीकृता पतिव्रता अपि पराङ्मुखता भवन्ति, सविन्नी सुत विक्रीणाति, पिता निहन्ति तनुजम् । किन्तज्जघन्यतर कृत्यमस्माद् यत्स्व-सुता भगिनी वल्लभा वा धनिना मन्मथ ज्वालाया इन्धनीक्रियते । अस्यैव पापस्य कारणाद् घृणितामपि याचना-कदर्थना परावहेलनामपि व्रजन्ति जना । न केवल जन्म-दुर्गता, अर्थवन्तोऽपि पदपदार्थं विकला मानवास्तामेव दुरवस्थामनुभवन्ति । उक्त च—

सानीन्द्रियाण्यविकलानि तदेव नाम,
सा बुद्धिरप्रतिहता, वचन तदेव ।
अर्थोज्झिता विरहित पुरुष स एव
भिन्न क्षणेन भवतीति विचित्रमेतत् ॥

पदपैल्लोकान् विविध-भोग-भाजनानि दीन स्वप्नेऽपि नाम तं सह तुलयति निजामवस्थाम्, कल्पनायामपि सभावयति तं सामान्यम्, पर न जातुचिदनुमयति फलिनताम् । सत्य एवोक्तम्—

'उरपामोत्थाय सीदते दरिद्राणां मनोरथ ।'

न लेखनी प्रभवति कृत्स्नशो वर्णयितुमस्य दौर्गत्यस्य दोषान् । सर्वथा जीवन्तो-ऽपि मृता एव जना भवन्ति खिलीकृता एतेन । तत

'Poverty is a course'

(दारिद्र्यमभिशाप एव)

इयमाङ्ग्लोक्तिरपि सगच्छते । तेन च सत्यमेव—

'कष्ट निधन-जीवनम् ।'

—०—

चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च ।

जीवनमिद तरगावर्त-बुदबुद-सकुलाम्बु सनिभ नित्य-परि-वर्तमान-सम-विषम-दशा-परिणाम-कटुक नव-नवानुभव-शबलितम् । न कोऽप्यत्र शश्वदानन्द कण्ट वाऽनु-भवति नियमेन । अद्य सुरासुर-दुर्लभान्भोगान् भुञ्जानो ऽपि, सुधा-सार-पूगायिता-न्पदार्थान् स्वदमानो ऽपि परिमल ललित-कुसुम पटल-मसृण-शय्यामधिशयानोऽपि जन श्व कथ भविताति [1] को वक्तुमीष्टे [2] महातरु-स्कन्ध-दोलान्दोलन-दुर्ललिता वात्येव घनाघनैरनारत नियतिरिय क्रीडति प्राणिना भागधेयै । भ्रूकुस इव प्राकृत-मनोरमण-निपुणा, पारदारिक-विट-वञ्चना पटीयसी योषेव विविध भूमिकावगाहिनी क न प्रतार-यति पुरुष-विशेष कमला । रजनीव चन्द्रकान्ता परिहसतीव पक्षान्तरेण रञ्जयन्त्यपि स्फुट सहसोपनत विषादा मानव श्री । चञ्चलेय रमयति नर पर कदर्थयति च कचिद-पाङ्ग-भङ्ग्या । कलित दिवस-मुखरागा सावित्रीव विभा हासाभिलक्ष्य-दन्तुर-मुखा सुदर्शना, भोगाभिराम योनिराहृत सर्वस्व राजकान्ता सैन्यव्रज-भूषणा सूदकेव परि-लक्ष्यमाणा निसर्ग प्रेम-भर-मन्थरेव च स्थिरीकृताऽपि न नियतमनपगामिनी साम्राज्य-लक्ष्मी । अचिन्तितोपगतान्यपि दैवानुकूलता प्रकटयन्त्यपि दुष्परिमेयानि लीयन्ते सहसै-वैन्द्रजालिक-क्रीडितानीव वैभवानि ।

विपरीत चास्यानुभूयते लोके । आजन्मनो ऽविज्ञात-सुखोपायय, रज कणा इव लुठन्तो जनानां पादयो, कुक्कुरा इवाहिण्डमाना द्वाराद्द्वारम्, अपारयन्त परि-पूरयितु-मुदर-दरीं विडम्बनामात्र मनुष्यताया कालान्तरे लक्षयन्ते धिक्कुर्वन्त इव कुबेर-मपरिमितविभवै ।

भूमि-तुल्यतयोपहसितो ऽद्यतनो जनो भोक्तु क्षमो भविष्यति सार्वभौम राज्यम् ।
इह भवति मुहूर्तेन राजिकाकण क्षितिधरोपम क्षितिधरश्च व्रजति राजिका-कणताम् ।

'यच्चिन्तित तदिह दूरतर प्रयाति, यच्चेतसाऽपि न गत तदिहाभ्युपैति ।।
प्रातर्भवामि वसुधाधिप चक्रवर्ती साय व्रजामि विपिन जटिलस्तपस्वी ।।"

इत्थ न कस्यचिच्छुभाऽशुभा वा दशा स्थेयसी । जीवनस्य सरसतैव सदा पर्यायेण दुःखानि सुखानि चापतेयुश्चेत् । उक्त च—

'सुख हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीप-दर्शनम् ।'

यया सङ्कृतिश्रया विरहमनुभूय सगतस्तयाऽधिका प्रीतिमनुभवति प्रेयान्। नैसर्गिकीय गति सुख-दुःखयो पर्यायेण पातिनी। अराणि यथा रथचक्रस्योच्चैरधश्च यान्ति, तथैव समा विषमाश्च दशा भवन्ति प्राणिनां जीवने। यथा भासेनोदितम्—

'कालक्रमेण जगत. परिवर्तमाना चक्रार-पङ्क्तिरिव गच्छति भाग्यपङ्क्ति'।'

(स्वप्न-वासवदत्ते)

कालिदासस्य च—

'कस्यात्यन्त सुखमुपनत दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमि-क्रमेण॥' (मेघदूते)।

लोकास्तु नेत्थं विचारयन्ति। कुल पद पुरुषार्थाधिगत विभूतय कदाचिद् यदि पतन्ति सकट महोदधौ, तरणापटव इव सहसा भवन्ति विकला न च क्षमन्ते शान्त्या त काल यापयितुम्। प्रावृषेण्या सरित इव क्षिप्र भवन्त्युद्वेला सपत्प्रसूतौ क्षामता च दधति निदाघ इव कृच्छ्रावसरे। न ते चिन्तयन्ति यन्नैकान्तिकीय स्थिति।

कल्याणी बत गायेय लौकिकी प्रतिभाति मे।
एति जीवन्तमानन्दो नर वर्षशतादपि॥ (वा. रा सु.)

न सर्वदा कस्यचिज्जीवने केवल दुःख सुख वा निहितम्। अद्य यदि सकटानि श्वो नियत सुख भविता। सघनासु घनटास्वपि विद्योतते विद्युत्।

"If winter comes, spring cannot be far behind."

(शैले)

अतो धैर्यं धनैर्भूत्वा जनैर्नं तावद् विभवेषु प्रमदितव्य न वा विपदि भेतव्यम्। सुखे दुःख दुःखे च सुख निहितमिति शृङ्खला तयो। न कस्याऽपि वैभव सदा तिष्ठति, किं मूलस्तर्हि दर्पो विधीयेत? नापि शाश्वतमत्र दुःख यद् विलोक्य व्याकुलतां भजन्ति लोका। अथवा साधूच्यते—

दीरघ सास न लेहु दुख, सुख साईंहि न भूल।
दई दई क्यों करतु है, दई दई सु कबूल॥ (बिहारीलाल)

अत सत्यमेवोक्तम्—'चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च॥"

—०—

भारतीय-संस्कृतौ स्त्रीणां स्थानम्

जीवनस्य तावद् द्वौ पक्षौ पुरुषार्थो भावना च। तत्र प्रथमस्याश्रय पुरुष अपरस्य च नारी। तयोरेक्येनैव जीवनस्य पूर्णता। सभ्यसमाजे स्वीकृताऽपीय स्थितिर्बहुत्र विसवादिनी। अतो मूलादेव विचार्यते कीदृशी सा भारतीय सस्कृतौ। किमारम्भतो गरीयसी विपरीता वा।

भारतीया सस्कृतिश्च न मूलतोऽद्यतनी। प्रथम वैदिकी पश्चाच्च सा पुराणोक्ता पद्धतिमनुसरति। पर प्राचीनतमात्कालात्तस्या नार्या स्थितौ यानि परिवर्तनान्यभूवन् तान्यत्रैकस्मिन्नेव पद्येऽभङ्गयन्तरेण वर्ण्यन्ते—

पुराऽभूवस्माक प्रथममधिभिन्ना तनुरियम्,
ततो नु त्व प्रेयान् वयमपि हताशा प्रियतमा।
इदानीं नाथस्त्व वयमपि कलत्र किमपर,
हताना प्राणाना कुलिश कठिनाना फलमिदम्॥

एतदनुसारेणादौ मानव जीवनस्य पूर्णतैव नार्याऽभवत्। यद्यपि तस्या सृष्टि सन्तति प्रसवायैवासीत्, पर तदाऽऽर्याणा वीर पुत्र प्राप्तिरेव परमाऽऽशाऽभूत्। वस्तुतस्तात्कालिक आदर्श एव सन्तत्यै दारपरिग्रह। पर नैतेन तस्या अपत्य प्रसव मात्र मूल्य बोध्यम्। साऽगृह्यत सहधर्मचारिणीत्वेन। तदानी वधूरभूत् सुमगली। न यद्यपि कन्याजन्म प्राध्यंत पर दृश्यते क्वचित् पुत्र शत समकक्षा सुता वणिता। न तया विना यज्ञस्य पूर्तिरमन्यत। लक्ष्यते च तदा पुरुषवत्तासामप्युपनयने वेदाध्ययने चाधिकार। लोपामुद्रा घोषा, विश्ववारा च मन्त्र-द्रष्ट्र्य, गार्गी च ब्रह्मवादिनी बभूव। आदौ कुलस्य गणना मातृमूलाऽभवत्। 'मातृमान् पितृमानाचार्यवान् पुरुषो वेद 'मातृदेवो भव', 'पितृदेवो भव', आचार्यदेवो भव', इत्यादौ मातृरूपेण नार्यैव प्रथममादरपदमभजत्। 'कन्यारत्न दुष्कुलादपि ग्राह्यम्' इत्यादिवचनै स्त्रियो जातिकृताऽयोग्यता न सिद्धयति। पत्युर्वरणे सा पितृप्रदेयाऽपि स्वयवराऽप्यासीत्। क्वचित प्रदाने तस्या अनुमतिरपि ग्राह्याऽभूदिति दृश्यते।

आसीत् स्त्रीणा पूर्णा शिक्षा-व्यवस्था। चतुषष्टि कला, कामशास्त्र, वेदा, वेदाङ्गानि च ता पूर्वमध्यैयत। पश्चादेव 'स्त्रीशूद्रौ नाधीयाताम् एतादृशी व्यवस्थाऽभवत्। नाभूत् पत्यु स्त्रीत्यागाधिकार। भरणपोषणार्थं च पत्या तदर्थं द्रव्य

देयमासीत् । पत्यू रुग्णत्वे, नपु सकत्वे चावतंत तस्या देवरादिवरणाहंता । आसीत्तदा गृहस्य सुखे शान्तिरच गृहिणीसौख्याश्रिते । उक्त च मनुना—

नार्यस्तु यत्र पूज्यन्ते रमन्ते तत्र देवता.।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राऽफला क्रिया ॥

स्त्रीणामासीत्पतिव्रतात्व धर्म. पर पुरुषाणामपि पत्नीव्रतत्व कृत्यमभूत् । पुराणकालेऽपि न सर्वथा परिहीणा तासा दशा । पुरुषे परब्रह्मांशतया स्वीकृते नार्यपि तस्य शक्तिरिति पूजितैव ।

'देव्य समस्तास्तव देवि भेदा स्त्रिय समस्ता सकला जगत्सु ।' तदानीमपि तासा हितरक्षण भर्तु: कर्तव्यमासीत् । शिवस्यार्ध-नारीश्वरत्वेन वर्णने स्त्री-पुरुषयोरियमेवाभिन्नता विवक्षिता । तदा यद्यपि—

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रो रक्षति वार्द्धक्ये न स्त्री स्वातन्त्र्यमर्हति ॥

एतादृशी व्यवस्थाऽविद्यत परं न नारीणा विकासस्याऽभावोऽभूदिति ध्येयम् । 'गृहिणी, सचिव सखी मिथ प्रियशिष्या ललिते कलाविधौ ।' अजस्यास्मिन् विलापे तात्कालिक नारीविषय दर्शन दृश्यते । तदानीमपि विज्जका, विकटनितम्बा वरदाम्बिकासदृश्य कवयित्र्योऽभूवन् । मध्यकाले तु नार्यो भोगस्य प्रधान साधनम-मन्यन्त । बालविवाहैस्तासा विकास एवारुध्यत । यवनानामाक्रमणैस्तासा पावन त्राऽहीयत । कालक्रमेण जातेषु जनेष्वशिक्षितेषु, ता प्रति सर्वाणि कर्तव्यानि त्यक्तानि पुरुषै । पादुकेव साऽगण्यत तैर्यथाकाम चागह्यंत । परमय प्रभावो यवनसस्कृत्या यत्र नार्या मूल्य वासनापूर्तिः सन्तानोत्पादनमात्र च—

'उपयन्तुहि दारेषु प्रभुता सर्वतोमुखी ।'
(शाकु ५)

इति भावना च विकारमेवाभजद् येन स्त्रीणा जीवनमतिशोचनीयतामगात् । एव भारतीया सस्कृतिर्वेदकालिकी पौराणिकी च न नारीणा विषय उदास्ते । न सा सिद्धान्ते तथा तिरस्करणीयोपेक्षणीया च यथा समाजे प्रवृत्तिरुपलभ्यते । अद्य शिक्षिता भारतीया स्त्री पुन स्वाधिकारं लिप्सते । सर्वेष्वपि क्षेत्रेषु तस्या प्रवेश । भिन्न भेद-कृता तस्या सत्ताऽपि अनर्हता विधानेन नाशिता, पर जागरणमिद पाश्चात्य-सभ्यतामूलम् । अत काम सा स्वकीयमपहृतप्राय गौरव पुनर्भजते पर तया प्राय पावनता स्वकीया त्यक्तैव । नाद्य सा पूर्ववच्छील गणयति ।

एव प्रवृत्तिमार्गे भारतीया सस्कृतिर्मूलतो नारी प्रति न सकीर्णा । पर सामयिक: प्रभावस्तामधोदशामनयत् । यत् सत्य सैव प्राचीना सस्कृति रक्षति । तर्हि कथ तस्या

लघीयसी स्थितिः स्वीक्रियेत । निवृत्तिमार्गावलम्बिनस्तु स्त्रियो निन्दन्त्येव । तेषां विचारेण ताः सिद्धिमार्गस्य बाधिका एव । कामास्त्रत्वेन परिगणितास्ताः स्वरूप-संपदा प्रलोभयन्ति साधकान् । ब्रह्मणो मायैवैषा या नाम स्त्री । अनया वशीकृतो न प्रभवति जनो निवर्तयितुमात्मानं विषय-प्रपञ्चात् । अत एवं तैरुक्तम्—

शम्भु-स्वयम्भु-हरयो हरिणेक्षणानां,
येनाक्रियन्त सततं गृह-कुम्भ-दासाः ।
वाचामगोचर-चरित्र-विचित्रिताय ,
तस्मै नमो भगवते मकर-ध्वजाय ॥

भर्तृहरिणा च निन्दितेयं कवयश्चोपहसिताः ।

स्तनौ मांसग्रन्थी कनक-कलशावित्युपमितौ,
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ।
स्रवन्मूत्र-क्लिन्नं करि-वर-कर-स्पर्धिजघनम्,
महो निन्द्यं रूपं कवि-जन-विशेषैर्गुरु कृतम् ॥ (वै. श. २०)

महाभारतेऽपि नारीणां महती गर्हा कृता । साऽपि ज्ञानमार्गप्रवृत्तानां वैराग्योद्बोधनाय । नीतिकारैस्तु क्वचित् प्रशंसाऽपि तन्त्र च निन्देति द्विधैव वर्णिता ।

आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामश्चाष्ट-गुणः स्मृतः ॥

"परं साहसिकाः स्त्रियः", 'मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम्' इत्यादिभिर्वचनैरितरां निन्दैव तस्या विहिता । परं गार्हस्थ्यस्याधिष्ठात्री, जीवनस्य सरसता, मूर्तिमती प्रीतिर्नारी न सर्वथाऽनपेक्षिता । सृष्टेर्निर्माणाय विकासाय च प्रादुर्भावितेयमात्मनः कला विश्वात्मना । कथं साऽनादरणीया यां विना नियतिरपि सहसा निरुन्ध्यात् स्वकार्यम् । मानवतायाः पूर्णता न तामन्तरा संभवतीति महत्व-पूर्णमेव तस्याः स्थानम् ।

आचार-प्रभवो धर्मः

भारतीय दर्शने धर्मस्य मानवजीवने निरतिशय महत्त्वम्। जीवनस्य पुरुषार्थ-चतुष्टये धर्मस्य प्रथम स्थानम्। न स केवल परलोकार्थमेवोपास्य, लोकेऽपीह तस्य नितरामपरिहार्यता। तथा हि लौकिक-जीवितेऽर्थस्तदाश्रितश्च काम सांसारिको भोगा इति यावत्, प्राणिनामिष्टौ। पर तयोरपि कारणत्वेनोक्तो धर्मो मुख्य। अस्मिन् लोके सुखमवस्थाय परलोकेऽपि सौख्यावाप्तिरेवासुमता कामना विषय। तत्प्राप्तिश्च धर्मानुष्ठानेनैव सभवति। अत एव 'यतोऽभ्युदय नि श्रेयस-सिद्धि स धर्म.' इति धर्मलक्षण-मुक्तम्। अभ्युदयो हि वर्तमान एव जीविते, नि श्रेयसस्य कल्याणस्य च सिद्धि परत्र। 'अवश्यमेव भोक्तव्य कृत कर्म शुभाशुभम्,' 'कर्म च स्वकृतमत्र न भुङ्क्ते,' इत्याद्यनुसारेण च शुभस्याशुभस्य च कर्मण. कृतस्य परिणामोऽवश्य भोक्तव्यो जीवेनेति शुभकर्मणा फल स्वर्गादि लोकान्तरप्राप्तिरेव। 'ते त भुक्त्वा स्वर्गलोक विशाल क्षीणे पुण्ये मर्त्यलोक विशन्ति। एव त्रयीधर्ममनुप्रपन्ना गतागत कामकामा लभन्ते' गीताया इति-प्रमाणेन च न धर्मानुष्ठानेनात्यन्तिकश्रेयसो मोक्षस्याधिगतिर्भवति। तेन तस्य त्रिवर्ग-साधनता कथिता पर नेतरसत्तम। मुमुक्षो स्थित प्रज्ञस्य स्थिरबुद्धेर्यानि लक्षणा-न्युक्तानि तदयमपि धर्म-स्वरूपत्वेनोक्ताना, व्रतानामनुष्ठानमेव मूलम्। केवल फला-काङ्क्षया कृताना चान्द्रायणादि-व्रतानां स्वर्गादिमात्र प्रयोजनत्वम्।

धर्मस्य धर्मत्व तु महाभारते, 'धारणाद् धर्म इत्याहुर्धर्मो धारयते प्रजा' इत्युक्तम्। तेन प्रजाना लोके साध्ववस्थितिरपि धर्म मूलेव। वय तु पदार्थाना स्वरूप रक्षणाचरणमेव धर्म स्वीकुर्म। न च तेन प्राचीनोक्तानि लक्षणानि बाध्यन्तेऽपि तु तेषामेव पुष्टि। यथाऽपा शीतस्पर्शवत्त्व क्लेदन च धर्म। 'तस्मिन्हीयमाने नापामप्यव भवेदिति तासा स्वरूपहानिरेव। तथैव वान (सदा गमनम्) वायो, दाह प्रकाशन च वह्नेर्धर्म। तस्मिंस्त्यक्ते वायोर्वायुत्व वह्नेश्च वह्नित्व न स्थेयेत्। सैव स्थितिर्मनिषाणाम्। मनुष्यानुष्ठेयाना जातिस्वाभाव्यादपरिहार्याणा कर्मणा करण एव मानुष्यक-रक्षा।

सत्य, क्षमा, धृति, शौच, स्वैर्यमात्म विनिग्रह।
अहिंसा समता, तुष्टिस्तपो दान यश॥

इति गीतायां प्रतिपादितानि तत्त्वानि धार्मिक सग्राह्याणि।

धृति क्षमा दमोऽस्तेय शौचमिन्द्रिय निग्रह ।
धीर्विद्या सत्यमक्रोधो दशक धर्म-लक्षणम् ॥

धर्मस्यैतानि दश लक्षणानि जीवनेऽनुष्ठीयन्ते चेत्तदैव धर्मस्य स्थितिर्नान्यथा । अतो न धारणेनैव धर्मस्य धार्यत्व धारकत्व चेष्टम् । अथम प्रजाभिर्धृतो धर्मो धारयितु क्षम । तत एव—

'धर्म एव हतो हन्ति धर्मो रक्षति रक्षित ।'

इत्यभियुक्तोक्ति सगच्छते ।

न चाहिंसादय केचित्पदार्था येषा गृहे रक्षणेन सिद्धि स्यात् । कर्तव्याना धर्मेणा धरण न च कर्तव्याना त्याग इत्येव धर्मस्य स्थिति । नाचरणमन्तरा चाहिंसादिव्रत-सिद्धिरित्याचारमूल एव धम । अत एव सदाचारो धार्मिकोऽनाचारो दुराचारो वाऽधार्मिक इति कथ्यते । आचारोऽपि यथा देशकालावपेक्षते, विपदि चापद्धर्मस्यानुष्ठान विधीयते, तेनाऽपि क्रियात्मकता (Practicalness) धर्मस्य सुतरा साध्यते । धार्मिकाणा जनानामाचरितानि दृष्ट्वैव लोका धर्माधर्मौ निर्णयत । यथोक्तम्—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन ।
स यत्प्रमाण कुरुते लोकस्तदनुवर्तते ॥

महाभारतेऽपि यक्षयुधिष्ठिर सवादे श्रेष्ठ पुरुषाचरणस्यैव धर्म-मार्गत्वस्वीकरण निरूपितम् । यथा हि—

"तर्कोऽप्रतिष्ठ, श्रुतयो विभिन्ना नैको मुनिर्यस्य मत प्रमाणम् ।
धर्मस्य तत्त्व निहितं गुहाया महाजनो येन गत स पन्था ॥"

गीताया वर्णिता दैवी सपदपि धर्माचरणमेव प्रतिपादयति । तादृशान् गुणानात्मसात्कुर्वन्नेव जनो धार्मिक इति कथ्यते ।

'स्वे स्वे कर्मण्यभिरत ससिद्धि लभते नर ।'
श्रेयान्स्व धर्मो विगुण पर धर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधन श्रेय पर-धर्मो भयावह ॥

इत्यपि धर्मस्याचार-मूलतामेव साधयति । सयत जीवन हि सदाचारवद् भवति, तदेव धर्मस्याङ्गम् ।

आचाराधं च प्राच्या उपादिक्षन्ननुष्ठेयानि कर्माणि । यथा तैत्तिरीयोपनिषदि—

"वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति, सत्य वद, धर्म चर, स्वाध्यायान्मा प्रमद । आचार्याय प्रिय धनमाहृत्य प्रजातन्तु मा व्यवच्छेत्सी । सत्यान्न प्रमदितव्यम्,

धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् भूत्यै न प्रमदितव्यम्, स्वाध्याय-वचनाभ्यां न प्रमदितव्यम्, देव पितृ कार्याभ्यां न प्रमदितव्यम् । मातृ देवो भव, पितृ-देवो भव, आचार्य-देवो भव, अतिथि-देवो भव । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि । यान्यस्माक सुचरितानि तानि त्वयोपास्यानि नो इतराणि ।

ये के चाऽस्मच्छ्रेयांसो ब्राह्मणा, तेषां त्वयाऽऽसने न प्रश्वसितव्यम्, श्रद्धया देयम् अश्रद्धया देयम, श्रिया देयम् ह्रिया देयम्, भिया देयम, संविदा देयम, अथ यदि ते कर्मविचिकित्सा वा वृत्त विचिकित्सा स्यात् । ये तत्र ब्राह्मणा समर्शिन युक्ता आयुक्ता, अलूक्षा धर्मकामा स्यु, यथा ते तेषु वर्तेरन्, तथा तेषु वर्तेथा । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणा समर्शिन युक्ता आयुक्ता, अलूक्षा धर्मकामा स्यु, यथा ते तपु वर्तेरन्, तथा तपु वर्तेथा । एष आदेश एषा वेदोपनिषत् । एतदनुशासनम् एवमुपासितव्यम् एवमु चैतदुपास्यम् ।"

एष एवाचारोपदेशो धर्मोपदेश । न वस्तुत कश्चिदस्माद् व्यतिरिक्तो धर्म । सार्वभौमोऽय न शिक्षयति परद्वप घृणा वा । शाश्वतस्य मानवमात्राचरणीयस्य लक्षणमिद धर्मस्य । अद्यत्वे सम्प्रदायत्वेनोक्ता एव देशकालभेदकृता आचारभदा । मूल तु सर्वेषा धर्माणामाचार पूतत्वम । बौद्धानामहिंसा समता च, जिन धर्मावलम्बितामपि सर्वथाऽहिंसा निष्ठा, अपरिग्रहवृत्ति । मोहम्मद (मुहम्मद) प्रवर्तित धर्मे च शुचित्वम् (ईमान), खीष्टमते (ईसाई) कारुण्य मैत्र्य च तत्र सार्वभौमे धर्मे समाविष्टान्येतानि तत्त्वानि । आचरन्नेतदनुसारेण सत्यानुष्ठानो न द्रुह्याद् भूतेभ्य कदाचित् ।

अद्य धर्म-नाम्नैव लोका सगहँ नाम्ना सकोचयन्ति । केचिदतीत युगीन परे च स्त्री विषय त प्रतिपादयन्ति । इतरे तु वाचाटा प्रवचनेषु धर्म पोषयन्तस्तद् विरुद्धमेवा चरन्ति । धर्मोऽद्य लोकै सैद्धान्तिकताभूमिमारोपितो जीवनाच्च बहिष्कृत । अत एव मानवो हीयते मानवतायां । आवरति स दानवानामाचारान् । धर्मध्वजा अपि त शोच्या एव दूषितैरात्म चेष्टितं कलङ्कयन्त्येव धर्मम् । अतो भूयोऽपि योग क्षेम कामै शान्ति कामैः पुष्टिकामैस्तुष्टि कामैर्यशस्कामै श्रीकामैश्चाऽऽर्येयो धर्म आचारेण जीवने । तदेव तेषा क्लेशनिवृत्ति सभवति नान्यथा ।

—०—

आर्जवं हि कुटिलेषु न नीतिः

अत्र संसारे विविधप्रवृत्तिमतां प्राणवतां वसतामेकत्र समाजे भवन्ति मिथः संव्यवहाराः संसर्गमूलाः। ते च भद्रा अभद्राश्चेति नैकविधा लोकानां प्रकृतिवशात्। केचित् तावन्निसर्गेणैव पाषाणा इव कटुस्वनाः, कण्टकवन्मर्मच्छिदः, मशका इव कर्णेजपाः, मत्कुणा इव पररक्तलोलुपाः, सर्पा इव छिद्रवृत्तयः, उत्पाता इव हानिकराः, अङ्गारा इव दाहकाः, उल्मुका इव कलुषितमुखाः, लूता इव कृतजालप्रपञ्चाः, वृका इवोदरपरायणाः सखीनां रिपूणां च हानिकरा एव सिध्यन्ति। परे तु स्वप्नेऽपि न चिन्तयन्तोऽन्यस्याशुभं सर्वेषा हितायैव चेष्टन्ते। तत्र साधुमार्गेण तितिक्षावलम्बने सति पूर्वचर्णिताना खलानां साहसस्य वृद्धिरेव भवतीति न तान्प्रति सन्नीतेः प्रयोगो युज्यते। तेषां कृते तु कूटनीतिरेव प्रदर्शिता नीतिविद्भिः।

नीतिप्रयोगस्याधिकारिणः केवलं सन्तो येषां हृदयं स्फटिकोपमम्, कर्माणि करतलामलकवत् स्फुटानि, तदनुकूलाश्च सुधामुचो वाचः। न स्वप्नेऽपि तेषां मनो वचः कायं वा छलं स्पृशति। न ते स्वप्नेऽपि परानिष्टं भावयन्ति, परैः पीड्यमाना अपि सुखयन्ति जगत्। उक्तं खलु तेषां कृते—

पाटोर ! तव पटीयान् कः परिपाटीमिमामुरीकर्तुम्।
यत्पिष्टतामपि नृणां पिष्टोऽपि तनोषि परिमलैः पुष्टिम्॥

तेषु प्रयुक्ता नीतिः सुक्षेत्रे वृष्टिरिव सुफला सम्पद्यते।

यद्यपि सर्वथा साधुदर्शिनो महात्मानो नालोचयन्तः खलानां छद्मव्रतानां कुत्सितानि चेष्टितानि, तानुपकुर्वन्त एव, परं न तेन कदिचल्लाभः संभवति। दुष्टा न बोधिता अपि बुध्यन्ते, शिक्षिता अपि शिक्षयन्ते, संभाविता अपि सत्क्रियन्ते, पाठिता अपि पाठ्यन्ते। तेषां प्रकृतिस्तु नलारोपितं दण्डुमिव न स्नेहनादिना सुनमा। दण्ड एव तेषां विनेता, खड्ग एव तेषां साद्धा, भयमेव तेषां शास्तृ। सामयादेस्तु चण्डताऽमीषामेधतेतराम्।

बहुधा खलैः कुटिलमतिभिः सह कृतस्य सद्व्यवहारस्य भूयान् दुष्परिणामोऽनुभूयते। असंभावयन्तः प्रतिक्रिया परस्मात् भूयोऽपि द्विगुणतरमन्याय्यमाचरन्ति, दौर्बल्यं सतो मन्यमानास्तेन क्रीडन्ति। पौरुषे ज्ञाते सति मूढनम्रा इव बहिः सख्यं

प्रदर्शयन्त पश्चाच् छिद्रान्वेषिण समये प्रहरन्ति। न तेषा प्रतीकारस्तदा सभवति। एतच्चोक्त भारविणाऽप्याधारणप्रतिभाविभारविणा किरातार्जुनीये—

व्रजन्ति ते मूढधिय पराभव भवन्ति मायाविषु ये न मायिन ।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसवृताङ्गानिषिता इवेषव ॥

कटु सत्यमिद प्रमाणीक्रियते भारतस्यैतिह्येन। तपोधना शान्ति शस्त्रा ऋषय कुणपाशनै सततमबाध्यन्त। राज-खड्ग एवाभूत् तेषा शास्ता। धर्मपथ-पथिका पाण्डवा कुटिलमतिभिर्धार्तराष्ट्रै सदाऽतुद्यन्त। महाभारत युद्धमेवाभूत् तेषा चिकित्सा। ग्रीस्य आक्रान्ताऽलक्षयेन्द्र (सिकन्दर) पुरुणा युद्धेन समावित एव परावर्तत। तस्य सेनानी शल्योक्ष (सेल्यूकस) अपि मौर्यसम्राजश्चन्द्रगुप्तस्य निशित-खड्ग धाराजले *निर्वाप्य स्वदिग्विजियीषामय प्रतापम् शशाम। मिलिन्द (मीनेण्डर)* पुष्यमित्र पौत्रेण वसुमित्रेण निगृहीत एवात्यजद् भारतजयोद्योगम्। साध्ववंतत्—

कृते प्रतिकृत कुर्यात् हिंसके प्रतिहिंसनम्।
न तत्र दोष पश्यामि शठे शाठ्य समाचरेत् ॥

ये तु न तथा विदधति भुञ्जत एव ते दुष्परिणामान्। पाञ्चालदेश्या जयपाल-प्रभृतयोऽयोत्स्यन्त चेन्महामदेन *गजनीपतिना, नात्यक्ष्यच्चेच्चाहाबदीन* दिल्लीश्वर पृथ्वीराज प्रथमविजयेऽपि न समधास्यन्त यदि मुगलै सह भारतीया क्षत्रिया प्रजाश्च, न भारतमपि पराधीनताकालुष्यकलुषितमभविष्यत्। राजनीतौ तु भवति चपेटिकाया उत्तर मुष्टि-वर्षं इष्टिकाना चाश्मवृष्टिरेकस्यापकृतस्य शत प्रत्यपकृतम्। अद्यापि भारतीया शासका कुटिलै पापस्थानीयैश्चीनैश्च सह मैत्रीमेव दर्शयन्ति, तै कृतानपकारान् मर्षयन्ति, तस्यैव फलित महति भागे चीनानामधिकार, पाक स्थानस्य च स्वार्थसिद्धि। न ते विभावयन्ति 'पय पान भुजगाना केवल विषवर्धनम्' इति गरलदन्तभग एव तेषा चिकित्सा। अत एवानुदिन पराभव।

वस्तुत सामकाले साम्न प्रतापकाले तु प्रतापस्यैवाश्रयण भवति नय। दुर्बला अपि पराजीयमाना शक्ति सग्रह विधाय कालान्तरे विजेतार प्रहरन्ति नाशयन्ति च तम्। कण्टक तावत् कण्टकेनैवोद्धियते। हस्तेनाभिमृष्ट तु गहन प्रविशति प्रकोप च कुरुते। दूषित रक्ते शिरावेध एव प्रतिक्रिया भवति। न जालमा (जालिम) जातूप-क्रियमाणा अपि शाम्यन्ति। बिभेति जन पौरपाधिरूढाद् एव। दाक्षिण्य भजन् रवि-रप्याश्रयति मन्दप्रतापताम्। भवत्याग्लभाषायामपि तावदाभाणकम्—

'Tit for tat'

अत साधूक्त श्रीहर्षेण—

'आर्जव हि कुटिलेषु न नीति'

महान्महत्येव करोति विक्रमम्

इह जगति भवन्ति प्राणिना मनोऽनुकूला विचारास्तदनुकूलाश्चाचाराः । प्रतिफलति तेषामाशय. कर्मसु ; अतो येषां कर्मसु, वचनेषु व्यवहारेषु च गौरवं दृश्यते त एव महान्तः । महत्त्वमधिश्रयति तेषां सत्त्वम् । नानुकर्तुं क्षमस्तान् निःसत्त्वः । तथाहि—

व्यालोलकेसरसटाजटिलांसभित्तिरारोपितो मृगपतेः पदवीं यदि स्वा ।
मत्तेभकुम्भतलपाटनलम्पटस्य नादं करिष्यति कथं हरिणाधिपस्य ॥

महत्त्वं च तेषां प्रतापाश्रयम् । पौरुषेणैव तेऽर्जयन्ति राज्यम्, उपहसित-सुरलोक-सपदः संपदः । दृष्टिर्हि तेषामुत्कर्षगामिनी । न कदाचित्परिभवं सहन्ते परस्मात् ते । विप्रकृतास्त्वरितं ते तेजोऽधितिष्ठन्ति ।

ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नग' फणां कुरुते ।
प्रायः स्वं महिमानं क्षोभात् प्रतिपद्यते हि जनः ॥ (अ. शा. ६, ३१)

परं पौरुषमाश्रयन्तोऽपि न विदधति कदाचित्ते दीनाक्रुपार्हान् स्वपराक्रमलक्ष्य-भूतान् । साटोपं गर्जंति, सजघनास्फोटं तर्जयति, दर्पविसर्पलपिते बलिन्येव प्रयुञ्जते बलम् । भवति तेन सह युद्धे तेषां निरतिशयः परितोषः । कृपणाना तु प्रत्युत्तरणेऽपि लज्जते महान् ।

'अनुद्दंकुरुते धनध्वनिं न हि गोमायु-रुतानि केसरी ।'

यथा कस्यचिद् विदुषः परा प्रीतिर्मस्तिष्क-कण्डू-व्यपनयन-पटौ जटिल-ग्रन्थि-ग्रन्थिले महति ग्रन्थ एवाधीते भवति, श्रेष्ठस्य वैज्ञानिकस्य महत्याविष्कारे जायते रुचि, गरीयान् दार्शनिको यथा गूढतमसमस्या-समाधाने भजते सुतरा तोषम्, तथैव महान् वीरो वीरायैव द्रुह्यति, तमेवाक्रामति यमवलोकयति रणदुर्मदम् । उक्तं च—

दिगन्ते श्रूयन्ते मद-मलिन-गण्डाः करटिनः
करिष्य. कारुण्यास्पदमसमशीलाः खलु मृगा. ।
इदानीं लोकेऽस्मिन्ननुपम-शिखानां पुनरयं
नखानां पाण्डित्य प्रकटयतु कस्मिन् मृगपतिः ॥

वस्तुतो विक्रान्तेन सह विरोधे भवति शौर्योत्कर्षः, विजये यश. पराजयेऽपि च प्रशसा जायते । तदनुरूपतामावलयितुं क्रियते व्यायाम. । एतेनाशक्तोऽपि शक्तता

ग्रजति । तदर्थमेव ग्रोक्तं भारविणा—

"समुन्नयन् भूतिमनार्यसंगमाद् वरं विरोधोऽपि समं महात्मभिः ।।"

ग्रल्प-बलेन सह विरोधे तु पराक्रमिणो लज्जैव भवति । तथाहि विजये न किमपि यश., 'किमनेन कृत वराकोऽसौ जितश्चेत् ।' यदि तु कथमपि पराजितो भवेत्तेन, ग्रपरिमार्जनीयमयशो नितरामुपहासश्च जायेतेति जये पराजये चोभयतोऽपि हानिः । कालुष्यं कलंक-जनितं परिहर्तुं न वीरोऽवीरे प्रहरति शस्त्रम् । लज्जते स तथास्त्रं चालयन् । ग्रतएवान्विष्यति सुभट-शिरोमणिशौर्य-दर्प-निकषायित दोर्दण्ड-कण्डू-व्यपनयन-पटुं प्रतिभटं शूरः । तत एव वीर-भट-मुकुट-मणेर्मेघनादस्योक्तिर्गरीयसी—

ॐ क्षुद्राः संत्रासमेते विजहृत हृदय क्षुण्णशक्रेभकुम्भा
युष्मद्धेषु लज्जां दधति पुनरमी सायका निष्पतन्तः ।
सौमित्रे तिष्ठ, पात्र त्वमसि नहि रुषां, नन्वहं मेघनाद
किञ्चिद् भ्रूभंगलीला-नियमितजलधि राममन्वेषयामि ।।

शोभते वीरेण सहैव वीरस्य प्रतिस्पर्धिता । तदेव भवति तस्य पराक्रमस्य परीक्षा । कृपणे बल-प्रयोगः प्रयोक्तुरेव ह्रिये । न केसरी मूषिकं प्रहरति, मद-मत्त-मातग-कुम्भ-भेदेन एव तस्य परितोषः । न कदापि विद्वान् विवदतेऽल्पज्ञेन सह । न स्पर्धते धन-कुबेरः कमलाविलास-लालित. स्तोक-द्रव्येण सह । का तुलना सानुमतो गण्डशैलेन सह । समबलेन सह मैत्री वैरं चोभयमपि शोभते । बलीयसा विरोधे मानिनां पराभवोऽप्युत्सवायैव । न वीरः स्वतो दुर्बलं रोगिणं स्त्रिय शरणागतं, शस्त्र-हीनं प्रमत्तं शयानं वाऽऽक्रामति ।

युक्तिरापदि यद् गम्या परस्तन्मानिनो ह्रिये ।
विधुर्विधुन्तुदस्येव पूर्णस्तस्योत्सवाय सः ।। (शि. व. २,४५)

प्रकृतिरियं मनस्विना सत्वानुकूलमेवाचरितुम् । न ते जातुचित् लघीयसि महति भुरसहन्ते । मतः साध्विदमुच्यते—

तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः ।
स तूच्छ्रितानेव तरून् प्रबाधते
महान्महत्येव करोति विक्रमम्"

—०—

काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतिम् ।

सामाजिकस्य मानवस्य जीवनं मरणं च समाज एव भवति. समजोऽपि तिरश्चां तस्यात्मनीनः सम्पद्यते, किम्पुनः सजातीयो मनुष्य. । कामं स भवेत्यक्तासङ्गः कानने वसन्, तत्रापि तस्य यथाकथंचन संसर्गो जायत एव । तथाहि—

मुनेरपि धनस्थस्य स्वानि कर्माणि कुर्वतः ।
उत्पद्यन्ते भयः पक्षा मित्रोदासीनशत्रवः ॥

यदा मुनीनामपीयं दशा, का कथा रागापहृताना जनानाम् । अतो न संभवति पर-संसर्गाभावः सर्वथैकान्त-वासो वा । एवमवश्यं-भाविनि पर-सगे कस्य ससर्गं उचितः कस्य वा नेति विचिकित्सायां सतामेव सङ्गः करणीयत्वेन खलानां च परिहरणीयत्वेन प्रतिपादितः ।

आत्मनस्तावदूर्ध्वोन्मुखी वृत्तिः । काय-क्लेश-कर्म-विपाकादिमये रागादिबहुले शरीरे ऽस्मिन् न जीवस्य शाश्वती स्थितिः । शुद्धस्य सच्चित आनन्दमयस्य च ब्रह्मणो ऽभिन्नत्वेन तमेव प्रकाशमयमव्ययमनपायंमरजस्तमोमयं स्वं पदं प्रविविक्षुः स नितरामुद्यतते । येषां संगेन तथाविधा प्रवृत्ति र्जायते रागासक्तस्य चेतसि, त एव वस्तुतः सन्तः । येषा संगतिस्तु चेतनामहरहो ऽवपातयति महा-मोह्-कर्दमे पांकपङ्के सद्विचारानव-लुम्पति, जनयति कुत्सितान् विचारान्, प्रवर्तयति च दुष्कर्म-पथे, कारयति सकृदचिन्तितान्यपि महापातकानि, निमज्जयति दुस्तरेऽज्ञानान्धकारे विष इव परिहरणीय एव तेषा संगः । वह्निज्वाला इवास्पृश्यास्ते । नरकवासकल्पस्तन्मध्ये सवासः । क्षणमपि कृतस्तेषा संपर्को बहूनुत्पादयति दोषान्, किं पुनस्तैः सह संभाषणम्, मैत्री निवासो ऽनुरागश्च । अतः प्रतिपादितमभियुक्तैः—

दुर्जनः परिहर्तव्यो विद्यया ऽलंकृतो ऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥

उष्णोदकस्य सम्पर्केण शीतलमपि जलं भजत्यूष्माणम् । अयस्कान्तो मणिश्चण्ड-कर-प्रकर-प्रतिफलनेन दहनं सूते; उपलो ऽपि चन्द्रकान्तः शशिकिरण-संसर्गेण क्षरति रसम् । सम्पर्काद् भवन्ति दोषा गुणाश्च । अत्रोरेव सजन्मनोः संग-वशाद् दृश्यन्ते भिन्नाः प्रकृतयः । यथा खलु यवन-सहवास-शिक्षित-गाली-प्रदानस्य शुकस्य

कङ्कतीराकर्ण्य कुपितं नृपं प्रति मुनि-वने वसतो हारीतस्य वचनम्—

गवाशनानां स शृणोति वाक्यमहं हि राजन्वचनं मुनीनाम् ।
न चास्य दोषो न च मद्गुणो वा संसर्गजा दोष-गुणा भवन्ति ॥

प्रभाव एव दुसंगस्य तादृशो योऽनेकान् दुर्गुणान् जनयति गुणांश्च नाशयति ।

पात्रमपात्रीकुरुते दहति गुणं स्नेहमाशु नाशयति ।
अमले मलं निषिञ्चति दीपज्वालेव खलमैत्री ॥

अतः परिहृत्य सकलाविनययोनिं तं दुसंगं सतामेव संगतिः कार्या यया गुणानां संचारो जायते, अगुणोऽपि गुणवान्, अविद्योऽपि विद्वान् अश्रुतोऽपि श्रुतवान् संपद्यते ।

जाड्यं धियो हरति, सिञ्चति वाचि सत्यम्,
मानोन्नतिं दिशति, पापमपाकरोति ।
चेतः प्रसादयति, दिक्षु तनोति कीर्तिम्,
सत्संगतिः कथय, किं न करोति पुंसाम् ॥

अन्यच्च—

दूरीकरोति कुमतिं, विमलीकरोति चेतश्चिरन्तनमघं चुलुकीकरोति ।
भूतेषु किं च करुणां बहुलीकरोति, संगः सतां किमु न मंगलमातनोति ॥

स्फुरति मतिस्तेषां प्रभावेण, उदयते कारुण्यम्, जायते कर्मसु पाटवम्, विलीयते व्यसनं दोषेषु, चलति चित्तं सत्पथे, रमते वृत्तिः सुव्रते ।

हीयते हि मतिस्तात हीनैः सह समागमात् ।
समैश्च समतामेति विशिष्टैश्च विशिष्टताम् ॥

भाग्यवन्त एव सतां संगं लभन्ते, दैवानुकूल्याद् वा यदा कदा जायते परमल्पीयानपि भूयांसं गुणं करोति रसायनमिव । छायाऽपि तेषां कल्मषहारिणी जीवनरस ।

गंगा पापं, शशी तापं, दैन्यं कल्पतरुस्तथा ।
पापं तापं च दैन्यं च घ्नन्ति सन्तो महाशयाः ॥

नैसर्गिको शान्तिर्भासते सतां मुखे, यया ऽन्येषामपि तापः शाम्यति । पीयूषधारा इव वाक्प्रपनाश्च्योतन्ति ततो, यया प्रीयते हृदयम्; सजीवनरस इव जीवविकासनोऽपूर्वः प्रेमास्रवतीव तेषा दृष्टेर्यत्र स्नातवता गलति कालुष्यं सर्वमपि ।

कीटोऽपि सुमनःसंगादारोहति सतां शिरः ।
पद्म-पत्र-स्थितं तोयं, धत्ते मुक्ताफल-श्रियम् ॥

अतो भूयसा प्रयतनीयं दुःसंगपरिहाराय । प्राणपणेनापि च कार्यः सत्संसर्गः यैः सह विरोधोऽपि लाभायैव सम्पद्यते । का कथा मैत्र्याः । अत एवोक्तं केनाऽपि—

काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतिम् ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि दृष्टे तस्मिन्परावरे ॥

इह जगति द्वे विद्ये निगदिते वेद्ये पराऽपरा च। तत्रापरया विश्वमिद नामरूपात्मक सविशेष वेद्यते। शिष्टा च 'परा यया तदक्षरमधिगम्यते' इत्यनुसारेण ब्रह्मण आत्मनश्च प्रतिपादयित्री, यदक्षर परम वेदितव्य यच्च वेदविदो विदन्ति, यच्च वीतरागा यतय प्रविशन्ति। यस्मिञ्ज्ञाते न किमपि ज्ञातु शिष्यते। यथा चोक्त याज्ञवल्क्येन—'आत्मा वा अरे ज्ञातव्य, श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति। आत्मैव ज्ञानाधिकरण परमात्मा जीवात्मा चेति द्विधा विभक्त एक एवाने-कत्वमापन्न। भोगाधिकरण देहमधिष्ठायाविद्याकृत क्लेशकर्मविपाक भुञ्जान एवास्मिञ्जगति विहरति स जीवात्मा मायया मुक्तोऽस्मावेव 'अह ब्रह्मास्मि' 'सोऽहम्' इत्यभेदबुद्धिमापन्न पुनरपि शाश्वत स्वरूप प्रविशति।

नामरूपात्मकेऽस्मिञ्जगति निखिलमपि पदार्थजात केवल सन्मय, चिन्मय-मानन्दमय वा सविकल्पोपाधिक तस्य प्रजापतेरेव व्यक्त रूपम्। अत न केवलमस्मिन्नापातरमणीये विश्वस्मिन्नपि केवल रन्तव्यम्। कुलालचक्रवन्नित्य प्रवर्तमानस्यास्य जगतो वर्तते कश्चिन्नियन्ता येन प्रेरितो जीवनिवहो विविधानि कर्माण्यनुतिष्ठति।

ईश्वर सर्वभूताना हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि य्रारूढानि मायया॥

परमत्र विषये द्विविधा प्रतिपत्ति मानवानाम्। एके देहात्ममानिन शरीराद् व्यतिरिक्त न कमपि दृश्यमदृश्य वाऽऽत्मभूत मन्यन्ते, परमात्मनस्तु कथैव का। तेषा मत भोगाधिकरण देहोऽयमेवात्मा, भस्मसात्कृतेऽस्मिन् सोऽपि नश्यति। अतो भोगानेव ते परमार्थत्वेन स्वीकुर्वाणास्तत्रैव रमन्ते।

"यावज्जीवेत्सुख जीवेद् ऋण कृत्वा घृत पिबेत्।
भस्मीभूतस्य देहस्य पुनरागमन कुत॥'

इत्येव तेषा विश्वास'।

अपरे चात्मतत्त्वं स्वीकुर्वाणा मन्यमानाश्च परमात्मसंज्ञं मन्दिरे, तीर्थे वा परिमार्गयन्ते। तेषु केचन तत्प्राप्तये तनुं ग्लपयन्ति, तपःक्लेशं सहन्ते, व्रतानि च चरन्ति। वस्तुतस्ते सर्वेऽपि न यथार्थ-दर्शिनः। न स सर्वथा विस्मर्तव्यो नाप्यन्यत्रान्वेष्टव्यः। अन्तरेव स सर्वेषां रमते बुद्ध्या ज्ञानेनैव द्रष्टव्यो लभ्यश्च। तनुरियमेव हितस्याधिष्ठानं वैकुण्ठलोकश्च। यथोक्तम्—

अष्टचक्रा नवद्वारा देवानां पूरयोध्या।
तस्यां हिरण्मयः कोशः स्वर्लोको ज्योतिषाऽऽवृतः॥

छान्दोग्याश्चाम्नासन्ति—

'अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद् वाव विजिज्ञासितव्यमिति। तं चेद् ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश. किं तदत्र विद्यते यदन्वेष्टव्यं यद् वाव विजिज्ञासितव्यमिति। स ब्रूयाद् यावान् वाऽयमाकाशस्तावानेषोऽन्तर्हृदयः आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्समाहितमिति। तं चेद् ब्रूयुरस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहित सर्वाणि च भूतानि सर्वे च कामा यदैतज्जरामाप्नोति प्रध्वंसते किं ततोऽतिशिष्यते इति। स ब्रूयान्नास्य जरयैतज्जीर्यति न वधेनास्य हन्यते। एतत्सत्यं ब्रह्मपुरमस्मिन्कामा समाहिताः। एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघित्सितोऽपिपास. सत्यकाम सत्यसंकल्पः.....।'

एवं स्वान्तस्थ एव तस्मिन्कुत्र व्रजेत्तमवबोद्धुम्? महिमाऽस्यैतादृशो यन्नैकया परिभाषया निरूप्यते।

अणोरणीयान्महतो महीयानात्माऽस्य जन्तोर्निहितो गुहायाम्।
तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः॥
(क. उ.१.२०)

सन्नप्ययमात्मा न सर्वैर्दृश्येत गुहास्थत्वात्। इन्द्रियाणि हि बहिर्मुखानि कथं वाऽधोक्षजमेत पश्येयुः।

पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्।
कश्चिद् धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्॥
(क. उ. ४)

आत्मन आत्मत्वं हि—

यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह।
यच्चास्य संततो भावस्तस्मादात्मेति कीर्त्यते॥

स एव शरीरेऽधियज्ञरूपोऽग्निः । यथा गीतायामुक्तम्—

'अधियज्ञोऽहमेवात्र देहे देहभृतां वर ।'

तथा च—

अरण्योर्निहितो जातवेदा गर्भइव सुभृतो गर्भिणीभिः ।
दिवे दिव ईड्यो जागृवद्भि-र्हविष्मद्भिर्मनुष्येभिरग्निः ॥
एतद्वै तत् ॥ (क. उ. २, १, ८)

इत्थं सोऽग्निश्चायनीयः श्रेयस्कामैः । चयनप्रकारस्तु न दुर्लभः । तथाहि—

स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासात्पश्येद्देवं निगूढवत् ॥

तस्मिन्नेव दृष्टे, साक्षात्कृतेऽनुभूते च परमार्थसिद्धिः । स एव हि चरमः पुरुषार्थो यत्र लीनो न भूयो मृत्युमृच्छति, उदके प्रास्तो लवणइव तत्रैव लीयते । यथाह याज्ञवल्क्यः. "स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत नाहास्योद्-ग्रहणायेव स्याद्यतो यतस्त्वादद्दीत लवणमेवेव वा अर इदम्महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमि ।" (बृह) न चात्र विश्वस्मिन्नपि किमपि तद्व्यतिरिक्तमस्ति । स एव विविधरूपो वर्तते ।

"यत्र हि द्वैतमिव भवति तदितर इतरम्पश्यति तदितर इतरञ्जिघ्रति तदितर इतरमभिवदति तदितर इतरं शृणोति तदितर इतरम्मनुते तदितर इतर विजानाति । यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कम्पश्येत्तत्केन कञ्जिघ्रेत् तत्केन कमभिवदेत्तत्केन कं शृणुयात् तत्केन कम्मन्वीत तत्केन कं विजानीयात् । येनेदं सर्वं विजानाति तं केन विजानीयाद् विज्ञातारमरे केन विजानीयादिति ।" (बृह.)

स एवास्याधिष्ठाता नानारूपोऽत्र दृश्यो ज्ञेयश्च ।

प्रजापतिश्चरति गर्भेऽन्तरजायमानो बहुधा विजायते ।
तस्य योनिम्परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥
येनस्तरपश्यन्निहितं गुहा सद् यत्र विश्व भवत्येक-नीडम् ।
तस्मिन्निदं सं च विचैति सर्वं स ओतः प्रोतश्च विभुः प्रजासु ॥
(यजु ३२।८)

अथमेवानन्दः, अस्मा एवान्नमयं, प्राणमयं, मनोमयं विज्ञानमय च कोशमति-क्रम्य परावरत्वमाश्रियत आत्मा । 'रसो वै सः, रसं लब्ध्वैवायमानन्दी, भवति ।'

तथा च—

'यल्लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।'

कथं नाम न सु दुर्विज्ञेयो ज्ञेयो यस्य ज्ञानमन्तरा न मृत्युमत्येति—

वेदाहमेतं पुरुषम्महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥

मृत्युरेव हि महद् भयं लोके तद्यदि जितं सर्वथाऽभयमात्मन. ।

पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम् ।
अथ धीरा अमृतत्व विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते ॥
(क. उ. २, १, २)

महानयं संसारमार्गो दुर्गमो यत्र पतिता जीवा मज्जन्ति मोहान्धकारे, स्वपन्ति च विषयनिशायाम् । तेषामेव दुःखम्, तेषामेव संशयः, तेषामेव मृत्युभयम् । जाग्रतामप्रमादाना च तत्र कुतो भयम्, कुतो दुःखम्, क्व शका ?

अविद्यायामन्तरे वर्तमानाः स्वयंधीराः पण्डितंमन्यमानाः ।
दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥
(क उ. १, २, ५)

ते प्रेयोमार्गं श्रयाणा संसारबन्धनान्यश्नुवन्ति ।

विज्ञानसारथिर्यस्तु मन प्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति तद्विष्णो. परम पदम् ॥ (क. उ. १, ३, ९)

त ज्ञातवान् पुरुषस्तु—

"स पर्यगाच्छुक्रमकायमव्रणमस्नाविर शुद्धमपापविद्धम् ।
कविर् मनीषी परिभू स्वयभूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः
समाभ्यः ॥" (ईश. ८)

एवं च—

अशब्दमस्पर्शमरूपमव्यय तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुव निचाय्य तंमृत्यु मुखात्प्रमुच्यते ॥

तस्य ज्ञानमेव चरमः पुरुषार्थः । त ज्ञातवान् सर्वत्रैकमेवात्मानमनुपश्यति । न स परस्य कष्टाय क्रमते । निर्मोहो विशोको धीरश्च भवति ।

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मान ततो न विजुगुप्सते ॥ (ईश. ६)

तथाभूतस्यैव चोपदेश —

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम् ॥ (ईश १)

संसारबन्धहेतु संपन्मयीमसंभूतिमुपासमाना एवात्महनः । तेषामेव कृते ऋषेरुद्बोधनम्—

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत ।
क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति ॥
(क उ १।३।१४)

ततो जागृताना कर्तव्य तस्य परमतत्त्वस्य ज्ञानेनामृतत्वप्राप्तिरेव—

न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाऽभिक्लृप्तो य एतद् विदुरमृतास्ते भवन्ति ॥

एव च—

यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थय ।
अथ मर्त्योऽमृतो भवत्येतावद्ध्यनुशासनम् ॥ (क. उ २, ३, १५)

अतो यावन्नासौ पुरुषो विदितस्तावदज्ञ एव जनः । स च जगत्यन्तर्हित ।

हिरण्मयेन पात्रेण सत्यस्यापिहित मुखम् ।
तत्त्व पूषन्नपावृणु सत्यधर्माय दृष्टये ॥

दृष्टे च तस्मिन्संशया नश्यन्ति । अत साध्वेवोक्तम्—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशया. ।
क्षीयन्ते चास्य कर्माणि दृष्टे तस्मिन्परावरे ॥

आशा हि परमं ज्योतिर्नैराश्यं परमं तपः

इह जगति सुख-दुःख-बहुले संपद्विपद्विषमायिते नैकदशाकषायिते मृत्युभय-विरसीकृतेऽपि भवन्ति प्राणिनां विविधाः संव्यवहाराः। नास्ति कोऽपि जनो यः खलु क्लेशकलुषितमतीतं विचार्य दैन्यमलिनं च वर्तमानमप्यनुभवद् न शुभं भविष्यन्त-माशास्ते। जानन्तोऽपि लोका जीवितं क्षणभंगुरं प्रयतन्ते सरसीकर्तुं मिदम्। दारिद्र्य-दारित-मना अपि दुर्गतो भाविनि काले संभावयत्येव वैभवभूयिष्ठभाजमात्मानम्। इति विफलितकृषिरपि कृषीवलो द्विगुणफलाशया वपत्येव बीजं क्षेत्रे तावतैव चोत्साहेन सिञ्चति रक्षति च। मृत्युभयेऽविकलेऽपि को न प्रगतये सदाचरति पूर्णं प्रयासम्। जातप्रायस्य शिशोरपि वात्सल्यविवशा सवित्री संभावयत्येव वयोविलास-सुभगं बाल्यं निखिल-सौख्य-सरसी-कृतं यौवनं सन्ततिफलितं विवाहं जरसि च तेन विधीयमानां सेवाम्। प्रकृतिरियं प्राणिनां भूतस्य स्मरणं भविष्यतश्चाशा।

वस्तुतः प्रेरणादात्रीयमाशा भूतानां मया कृच्छ्रबहुलमपि जीवनं सौख्यमयं विधीयते। विरहिणी मिलनायैव प्राणाधिकस्यापि वल्लभस्य विरहकालं शान्त्या व्यत्याययति।

आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानाम्
सद्यः पाति प्रणयिहृदयं विप्रयोगे क्षणेन॥ (पू. मे.)

न निराशस्य स्फुरतः करौ किमपि विधातुम्, न प्रवर्तते मतिः, क्षीयते बलम्, अपहीयते साहसम्, क्षीयत उत्साहः, गलति कान्तिः, ग्लायते तेजः, शाम्यति प्रतापः, मदयति पौरुषम्। न स जीवितुमपि प्रभवति तया सह। कल्पनाः, योजनाः, प्रेरणाः, प्रवर्तनाः, प्रापंनाश्च सकला अपि भविष्यन्ति सापुसंभावनामूलाः।

आशावादिन एव जनाः प्रभवन्ति भुवि महान्ति कार्याणि कर्तुम्। त एवाभ्रं-लिहानि भवनानि निर्मापयन्ति, पारदमरकारपेणाः सुपसाः शिदान्ते, देशान्तराणि कर्तुं सुरगहन्ते। व्यवसायिनो आशागंधार्यव वाणिज्य-

मनुतिष्ठन्ति । नवदम्पती मंगलमयस्य एव भाविनो जीवनस्य कामनयैव दाम्पत्ये सरसतामनुभवतः । कश्चित् छात्रोऽपि पूर्वमेव परीक्षोत्तरणे विद्यालाभे निराशश्चेन्न जातु परीक्ष्यतां स्वीकुर्यादध्ययनं वा समाचरेत् । आशामन्तरा न लोको जीवितुमपि प्रभुः । आशावादगुरुकया दृष्ट्या (optimistic outlook) सबला जातिरेव विश्वं न्यक्कर्तुं क्षमा । किं तादृशो वराकः कलुः प्रभवति कर्मसाधारणं यः खलु उत्तिष्ठतु शयानो वा जीवितमाक्रोशद् विधातु मृत्युमेव कामयते । अत्र तु तादृश एवारोढुंक्षमः प्रगतिगिरिशिखरं यस्य भावना नित्यम्—

"पश्येम शरदः शतं, प्रब्रवाम शरदः शतं, शृणुयाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ।"

इति—

'उतो पश्यन्नश्नुवन् दीर्घमायुरस्तमिवेज्जरिमाणं जगम्याम् ।'

इत्येवंविधा च वर्तते । विपदन्धतमसनिविडितेऽपि कण्टकसंकुलेऽपि साधनविकले ऽपि च कर्मपथेऽतुलमन्दमप्रधृष्यमुत्साहस्नेहप्रदीपितमाशादीपं वहन् साधारणोऽपि जनः कल्पते सफलतार्थियं चुम्बितुम् । नैराश्यकुहूमलिनाशयस्तु सबलोऽपि, ससहायोऽपि ससाधनोऽपि त्यज्यत एव फललक्ष्म्या । सुखमयमपि जीवनं विषमयमिव मधुरमपि भोजनं विरसतामेति तस्य । अत आशैव उत्कृष्टतमं ज्योतिरप्रदीप-कृतम्, अरवि-प्रभासितम्, अशशिकर-कल्पितम्, अनग्नि-शिखा-प्रसूतम् ।

पर निन्द्यते ऽपि सा विचारकैरितरैः । यदा परतो धनलाभ-कामना, सुखैषणा वा ऽऽशा-पदेन गृह्यते तदा नं प्रशस्यते । विरक्तिमार्गविलम्बिनः परमार्थ-परिपन्थितामस्या मन्यन्ते । एनामधिकृत्य हि मानवः कां न कदर्थनामनुभवति ? नीचानामपि धनिनां स चाटुकारितामङ्गीकरोति, न तत्कृतामवमाननां गणयति, न भर्त्सनया लज्जते, कान्तारपथमप्यतिक्रामति, तरति दुर्गमानपि जलनिधीन् । अनया विलोकितो निन्दितान्यपि कर्माणि कर्तुं मुद्यतते । अतएव निन्दता सामुक्तं भर्तृहरिणा—

आशा नाम नदी मनोरथजला तृष्णातरंगाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तराऽतिगहना प्रोत्तुङ्गचिन्ता तटी
तस्याः पारगता विशुद्धमनसो नंदन्ति योगीश्वराः ॥ (वै. श. ४५)

आशावन्तो हि दुर्मदानां धनिनां कटूवचनानि सहन्ते, सुखमयमपि जीवनं विदधति मधुकायितम् । सकलमपि भुवनं तेषां सत्कारपात्रं भवति—

"आशाया ये दासास्ते दासाः सर्वलोकस्य ।
आशा येषां दासी तेषां दासायते लोकः ॥"

न ये कामपि लाभसभावना जगत आवहन्ति सम्राजोऽपि ते न तृणाय मन्यन्त—

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलै
सम इह परितोषो निर्विशेषो विशेष ।
स हि भवति दरिद्रो यस्य तृष्णा विशाला
मनसि तु परितुष्टे कोऽर्थवान् को दरिद्र ॥ (वै श ५०)

वस्तुत आशाग्रहग्रस्ताना जीवन विडम्बनैव भवति ।

एहि गच्छ पतोत्तिष्ठ वद मौन समाचर ।
एवमाशाग्रहग्रस्तै क्रीडन्ति धनिनोऽर्थिभि ॥

नित्यमेवाधिकाधिक विभवादिकमाशासाना न कदापि भवति शान्ति, अशान्तस्य च सुख कुत । अत उक्त केना ऽपि—

आशा हि परम दु ख नैराश्य परम सुखम् ।
सद्भिरस्मादेव कारणात् सर्वप्रथममियमाशा निन्द्यते ।

'चाह गई चिन्ता मिटी मनुआ बेपरवाह ।
जिनको कछू न चाहिये तेई साहसाह ॥"

एव निष्कर्षे व्यवहारपक्षे जगद्व्यापारहेतुभूततया जीवनाधाररूपिणी नोपेक्षणीया तावदाशा, पर निवृत्तिपक्षे परस्माल्लाभेच्छाया च सा गर्ह्यैव यतस्ता मसिीकृत्य मनस शान्तिरपि दुलभा सतु । तत साधूक्तम्—

'आशा हि परम ज्योतिर्नैराश्य परम तप ।'

'यस्मिञ्जीवति जीवन्ति बहवः, सोऽत्र जीवतु ।'

अस्मिन्नाना-चरित्र-विचित्रिते विविध-विभूतिमति जगति दृश्यन्ते प्राणिनां नैकविधाः प्रवृत्तयः । केऽपि बहु-साधन-साधित-सकलसंपदोऽपि नित्यमेव विलासैक-संग्रह-परा आत्म-पोषण एव सकलमपि जीवनं यापयन्ति । क्षणमपि न ते कमपि स्वकीयेन धनेन, वचनेनान्तःकरणेन वा सुखयितुं क्षमाः । शुनामिवोदर-पोषणैक-व्रताना शूकराणामिव विषयलम्पटानाम्, ऋक्षाणामिव पर-रक्त-पायिनाम्, मत्कुणानामिव परोपजीविनाम्, लुब्धकानामिवान्य-जीवापहारिणाम्, स्वर्णकाराणामिव पश्यतोहराणाम्, लोक-घस्मराणा तेषां धूमकेतूनामिवोदयो भुवन-विनाश-पिशुन एव । इतरेषां विपदि स्वकीयाया सम्पदि च ते हृष्यन्ति; क्षुत्क्षाम-कण्ठेऽपि निखिले जनेऽनावश्यकमाकण्ठं भुञ्जाना अजीर्ण-ग्रस्ता अपि कञ्चन वीक्ष्य भक्षयन्तमुदर-शूलेन म्रियन्ते । संभारो भवति धनकृतः, परं भारेणेव तप्यंते खलाः कदर्य्यन्ते ।

तद्-व्यतिरिक्ता भवन्ति केचन कामं विरलाः परं सरलाः परविपदि तरलित-हृदः, येषा जीवितस्य पलमात्रमपि पर-हित एवोपयुज्यते । आत्माऽपि तेषां न स्वार्थे; कण्ठ-गतेष्वपि प्राणेषु न जातु जहति तेऽन्य-हित-व्रतम् । यदि सत्यं तेषामेव सता शशि-कराणामिव पर-ताप-हारिणाम्, सुमनसामिव सुरभित-मनसाम्, श्रीखण्ड-खण्डानामिव दाह-लोपिना जीवितं जीवितम् । धन्या तावदेकाऽपि घटी याऽन्य-कार्य उपयुज्यते । पर-हित-व्रतिनां साधूनां जन्मैव भुवन-कल्याणाय जायते । कथं न ते तथा भवेयुः ? मानुषं तावदिदं शरीरम् ! नास्य कृतार्थता कुक्षिंभरिता-मात्रेण ।

जातः कूर्मः स एकः, पृथु-भुवन-भरायापितं येन पृष्टं
श्लाघ्यर्षं जन्म ध्रुवस्य भ्रमति नियमितं यत्र तेजस्वि-चक्रम् ।
संजात-व्यर्थ-पक्षाः परहित-करणे नोपरिष्टान्न धाधो
ब्रह्माण्डोदुम्बरान्तर्मशकवदपरे प्राणिनो जात-नष्टाः ॥

(वै. श.)

पक्षिणोऽपि स्वोदर-पूरणं विदधति । किं तेनैव कर्मणा चतुरशीति-लक्ष-योनि-चंक्रमणानन्तरमुपलब्धस्य मानुष्यकस्य साफल्यम् ? किमपि गुरुतरं कृत्यं कारयियिषति शरीरेणानेन सुदुर्लभेन धाता । वृथैव यैर्यापितोऽयमवसरः, पश्चात्ताप एव तेषां भवति ।

नान्यस्ता भुवि वादि-वृन्द-दमनी विद्या विनीतोचिता,
खड्गाग्रैः करि-कुम्भ-पीठ-दलनैर्नाकं न नीतं यशः ।
कान्ता-कोमल-पल्लवाधर-रसः पीतो न चन्द्रोदये,
तारुण्यं गतमेव निष्फलमहो शून्यालये दीपवत् ॥ (वै. श. ८६)

वस्तुतो ये स्वजीवनमिहाऽऽ गत्य लोक-हिताय, समाज-संस्काराय, दरिद्र-दैन्य-दुर्दलनाय, पापि-पाप-प्रणोदाय, दुर्बल-रक्षणाय, देशोद्धाराय चोत्सृजन्ति, अहर्निशं परहित-साधन-रताः स्व-योग-क्षेममपि विस्मरन्ति, साफलीकृतं तैर्जीवितम् । तेषामेव सवित्री सवित्री, तेषामेव कुल, कुलम्, तैर्भूषितैव धरणी धरणी । पावनीक्रियते तैरिदं भुवनम् ।

एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम् ।
सहैकादशभिः पुत्रैर्भार वहति गर्दभी ॥

विरला अपि ते भूषणता व्रजन्ति लोकस्य । खेदं तेऽनुभवन्ति परहित-क्षमताऽभावे ।

कस्त्वं भोः कथयामि, दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि ? साधु विदितम्, किमादिशं कथ्यते ।
यामेनात्र वटस्तमध्वग-जनः सर्वात्मना सेवते
न च्छायाऽपि परोपकार-करणे मार्गस्थितस्यापि मे ॥

अजा-गल स्तनस्येव तस्य जन्म निरर्थकमेव येन न रक्षिता अबलाः, न येन सनाथा अनाथाः, न पाठिता पाठार्थिनः, न तर्पिता अर्थार्थिनः, नानुगृहीता अनुग्रहार्थिनः, न शमिता अरयः, नोन्नीतं कुलम्, न धन्यीकृतः समाजः, न साधिता साधुता । यस्याश्रयेणानाथा अपि सनाथतां यान्ति, अबन्धवोऽपि बन्धुतां भजन्ते, अशरणा अपि सशरणतां व्रजन्ति, अबला अपि सबलतां गच्छन्ति, हताशा अपि प्रसाधिताऽऽशामाश्रयन्ति, तस्य जनुरेव धन्यीकृता जननी । पयोमुचामिव साद्भुतादयो लोकाभ्युदयाय खलु । अत. साध्विदमुच्यते—

यस्मिञ्जीवति जीवन्ति बहवः, सोऽत्र जीवतु ।
वयांसि किन्न कुर्वन्ति चञ्चवा स्वोदर-पूरणम् ॥

संघे शक्तिः कलौ युगे ।

आसीत् कोऽपि कालो यदा मानवस्य व्यक्ति-गतं बलमेवापेक्ष्यत मानादि-रक्षणाय । स्ववीर्य-गुप्ता हि मनोः प्रसूतिरिति तदैवायुज्यत कथनम् । परं चिरातीतं तद् युगम् । अद्य न तावती शक्तिः, न तेजः, न प्रभावः, नापि क्षमता मनुष्ये यदेकलः कश्चिन्महत्या अपि सत्तायाः प्रतिरोधे प्रभवेत् । कामं वैयक्तिकीमापदं प्रतिकर्तुं शक्नुयात्सः । समुदायकृतान्यद्याक्रमणानि, येषामुपायोऽपि सामवायिकं बलमेव । वज्रं हि वज्रेणैव तक्ष्यते । अतो वर्तमाने संघ एव सर्वातिरिक्ता शक्तिः ।

यद्यपि संघोऽपि व्यक्तीनामेव कल्प्यते, व्यक्तयः सशक्ताश्चेत् संघोऽपि तासां शक्तिमान् स्यात्, प्रभवत्कस्याऽप्युपकाराय विपदा वा प्रतीकाराय । निर्बलानां समवायस्य तु न भवेत्काऽपि प्रभविष्णुतेति संघहेतो व्यक्तिगतं सामर्थ्यमेव प्रथमं तावदपेक्ष्यम्, सत्यमेतत् । सबलाना सघटन बलातिशयाय कल्पते । परं निर्बलानामपि समुदायो न निर्बलो ऽपि तु संहतशक्तिमत्त्वादधृष्यता व्रजति । तथा चोक्तम्—

बहूनामप्यसाराणां समवायो दुरत्ययः ।
तृणैराबध्यते रज्जुर्यैर्मत्तदन्तिनः ।

तृणं नाम भवति लघुतमं द्रव्यम्, तत्कल्पितेनाऽपि दाम्ना यदि मत्त-मातंगा निबद्धुं शक्यन्ते तर्हि हस्त-पादादि-मतां विवेक-सहायानां मानवानां संघस्य शक्तिः किविधा सम्पत्स्यते इति विचारणीयमेव ।

पाणेरेकस्यापेक्षया युगलस्य शक्तिर्द्विगुणा । एवमेव पृथक्पृथग् यतमानानां बलं महति कार्ये बहुधा न फलिनतां व्रजति विशेषतश्च तिष्ठति बहुपरिमाणे प्रतिबले । परं संघशक्तया महानपि रिपुः पराजीयते । अग्निस्फुलिंगा अपि निचिता एवत्र दहन्ति ग्राममपि । बिन्दुशः संचितमपि जलं शमयति करालतामुपवुंधस्य । भूयसा समुदितान्यपि तारकाणि विभासयन्ति गगनांगणम् । सिंहोऽपि बलाद् धृष्यते शृंगायुधाभिरजाभिः । परं संघीभावस्य न तावत् समदं एव जनानामर्थः । पर्वणि समवेता लक्षशो

ऽपि जना न संघतां व्रजन्ति, सहसा ऽपि समागते संकटे प्राणरक्षणार्थं पुच्छमुत्थाप्य पलायन्ते । बुद्धि-मनः-करणानामिवानेकव्यक्तीनामैकमत्यमेक-व्रतत्वम् समनस्त्वम्, सयोगत्वं ससंकल्पत्वं च संघीभावायावश्यकम् । यथाह वेदः—

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः ।
अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या ॥
समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि ।
सम्यञ्चोऽग्निं सपर्यतारा नाभिमिवाभितः ॥
(अ. वे. ३,३०)

समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सु सहासति ॥
(ऋ. १. १९१,४)

इत्थमेवीभूतमनस एव संघीभावाय कल्पन्ते । परं न संघभावना ऽनायासेन संभवति । नेतुः शासन-पालनं तदर्थमनिवार्यम् । न च नेतारं विना कस्यापि संघटनस्य साफल्यम् । तं विना हि सर्वे स्वेच्छयैव कार्यं कुर्युः । तेन च सर्वथा ऽव्यवस्था स्यात् । अनुशासन-सूत्रेणैव भिन्नरुचयो ऽपि लोका ऐक्य-बद्धाः सम्पद्यन्ते । तदुक्तम्—

"अनायका विनश्यन्ति नश्यन्ति बहुनायकाः ॥"

सेनायाम्, रक्षापुरुषेषु, (Police) संहितेषु च दासेषु, बालचरेषु (Scouts) रक्षादलेषु (Home Guards), क्रीडकमण्डलीषु (Games-team) संघभावना (Party-spirit) अनुशासनं च सर्वथा ऽनिवार्यं । संकटकाले जनानामेतादृशाः सर्वा एव साहाय्याय कल्पन्ते ।

न केवलमस्मिन् जनयुगे, पुराऽपि संहननस्याऽभूदावश्यकता । तदभावे च महती हानिरस्माभिरनुभूता । महाभारत-युद्धस्य कारणं परस्परं भेद एवासीत् । संहितीभूय कार्यकरणस्य शक्तेरभावेनैव स्वल्पसंख्या अपि यवना भारतमधिगन्तुं प्रभवन् । अन्यथाः शासकास्तु मिथः सहायमाना घोर-प्रति-रोधापाताकरणादेव साहाय्यमाचरन् । ते ध्यस्मरन् युधिष्ठिरस्य वचनम्—

परापर-विरोधे तु वयं पञ्च शतं च ते ।
अन्यः सह विरोधे तु वयं पञ्चदशोत्तरम् ॥

अत एवाल्पीयास एव गोरण्डा भारतीयान् परस्परं योधयित्वा स्वयं महादेशमिममधिचक्रुः। अधुना स्वतन्त्रे ऽपि भारते पुनः संघभावना लुप्ता लक्ष्यते। सर्वे संकीर्णं-दृष्टय सम्प्रदायस्य, धर्मस्य, जातेर्देशस्य भाषायाः, प्रान्तस्य चापदेशेन देशं खण्डश. कर्तुं प्रयतन्ते। न ते दूरदर्शिन; ये स्वकलहेन प्रगत्यं चेष्टमाना मातृभूमि संशयसागरे मज्जयन्ति। भद्रं तदैव, यदा ते स्वार्थ-भाव परित्यज्य भारतीयतामात्रमनुरुध्य मन्त्रमिममनुसरेयु—'सघे शक्ति कलौ युगे' इति।

किं विश्वरूपो मानवः ? (Is man a multi-personality ?)

मानवः सृष्टि-भूषणम् ; तस्य चैतन्यस्य विस्तारः कलासु, शिल्पेषु, सर्वेष्वपि विद्याक्षेत्रेषु, गम्येष्वगम्येषु च विषयेषु द्रष्टुं शक्यः। स एको हि नामातीन्द्रियान् ज्ञानैकाधिगम्यानु विषयानपि सीमातीताऽन्तर्दृष्ट्या साक्षात्कर्तुं प्रभवति, दैव्यासुरी च प्रवृत्तिस्तस्यात्म-क्षेत्रमधितिष्टतः। प्रथमाया प्राबल्ये स विश्व-कल्याणाय कल्पते, अपरस्या सबलत्वे तु जगतो रुजे। समस्तानां कल्याणानामुपाधीनां च स स्फुट निधानम्।

न केवल शारीर-बलेन, आत्मबलेनापि गुरुतरेणाज्ञात-पूर्वाण्यपि, अदृष्टचराणि कुतोऽप्यश्रुतान्यपि क्षेत्राणि साक्षात्कर्तुं दुरधिगमानपि विषयान्समधिगन्तुं क्षमोऽसौ।

मनुजस्तावदभिमतोऽखिल-जगद्बीज-भूतस्य परमात्मनो व्यक्तरूपः प्रतिनिधिर्यस्तस्य कलामात्मनः प्रतिभया, पौरुषेण साधनया च लब्धुं यतते। यो विश्वात्मा 'एकोऽहं बहु स्यां बहु प्रजायेय' इति संकल्पेन सूक्ष्ममतीन्द्रियमकरणगोचरमात्मानं जगद्रूपेण व्यक्तीभावमधिगमयति, सोऽपि विश्वरूपो विराडिति कथ्यते। तस्य व्यक्तित्वं नैकधा प्रतिभात्यस्मिन् विविध प्रवृत्ति-मति जगति। प्रजापतेः शक्तेः साक्षादुपघातं नरोऽद्य त सर्वेष्वपि क्षेत्रेषु यतते समतिशेतुम्।

विश्वात्मतया जगति व्याप्तस्य तस्य गतिः क्व व्याहन्यते ? अपाराणामगणितनक्र-मकरचक्र-जलावर्त-शतवक्र-मरुदराल-हिल्लोलजाल-दुष्पाराणामकूपाराणां वक्षसु, जलधरघटाभिदुरासु घनतरुलतातृणश्यामलिममेदुरान्धकारासु दुरारोहासु गिरिशिखासु क्रीडाशिखरिष्विव स्वैर विहरन्, स्वच्छन्द खग इव च नभसि पर्यटन्, सदाशीतेष्वनुपभुक्तचण्डरश्मितापेषु प्रालेयालयेषु प्रदेशेषु स्वालय इव सुख वसन् विज्ञान-बलेन सततोद्यमेन च दुर्धर्षायाः प्रकृतेरपि विजेताऽसौ।

वैज्ञानिक. सन् सोऽद्य दुश्चिकित्स्यानां रुजां नाशायौषधशक्तीनोषधीर्विष्करोति, आसुर्या प्रतिभयाऽधिष्ठितः संहारशक्ति स्वकरे संगृह्य निर्माणबीजैरेवाणुभि. सृष्टि-विध्वंससाधनानि निर्मिमीते, सिंहादिभिरुन्नीयोन्नीयरक्तपायिभिर्हिंस्रजीवैः क्षुद्र-मानव-गति प्रसरेषु कान्तारेषु विद्युद्दीपोज्ज्वल-विभा-विभासितहर्म्यराजिचक्रचकायितमानवावास-

वृन्दानि नगराणि प्रतिष्ठापयति येषु निवासायाकलनीयविभवलालिता घनपतयोऽहम-हमिकया स्पर्धन्तेतमाम् । एकतः स एतादृशानि विस्मयकराणि सृष्टिश्रेयःसाधनानि प्रजनय्य विधातुमहिमानमधिजिगमिषति, परतश्चाग्नि-गोलकैर्बहुजन-संकुलानि महापुराणि समूलदाहं निर्दह्य प्रलयकारिणः पशुपतेः पदमपजिहीर्षति ।

स एव मानवोऽधुना स्वाप्रतिहत-शक्तिप्रभावात् मुख्यतमायाः शक्तेः पदमधिगतवान् स्वभावनयैव कस्मिन्नप्यदृष्टचरे परमात्मनि विश्वसिति अतः स स्वयमीश्वरस्य कल्पयिता जनयिता च मन्यते । विज्ञानवित् सन् सर्व-विद्यानां निधानम्, आश्चर्याणां कर्ता, संहार-यज्ञस्यानुष्ठाता, सृष्टिस्रोतः प्रतिष्ठापयिता, रुजामपहर्ता, शिल्पानामुद्भावयितोन्नमयिता च । नासाविदानीमात्मानं सार्वकालिकं मृत्युकवलं मनुते मृत्युञ्जयत्वं लब्धुं च सततं प्रयत्नमनुतिष्ठति ।

अद्य स एव प्रभुः, ईश्वरः, श्रद्धयोपास्यः, सेव्यस्तोष्यश्च । तस्मिन् हृष्टे, तुष्टे, पुष्टे, स्वस्थे, सुस्थे, आरोग्य-शालिनि, अधिगतसकलजीवनीयानिवार्य-वस्तुजाते, विदुषि, बला-धिजग्मुषि, विश्वमेवेदं त्रिविष्टप-पदवीमधिष्ठास्यति । स एव कौपीनधारी दरिद्रो नारायणः सुप्तकाल्पोतांसि मानव-मनांसि प्रबोधयितुं भिक्षा-पात्रं करे दधानो द्वारेषु परिभ्राम्यति ।

इन्द्र-स्पृहणीय भोगान् भुञ्जानः स एव निर्धनान् घनमदान्धः कीट-मशक-कल्पान् परिहसति । समाज-सेवी दुर्गतानां रोगिणां परिचर्यां चरन्नघृणि प्रमार्जयन् मधुर-मधनैर्हृत्सु मोदं संचारयन् करुणा-प्रतिमूर्तिर्विभादि । साम्राज्यलोलुपोऽखण्ड एव षण्ड-षण्डवं वितण्डयन् स्वैरसुप्तेषु लोकेषु विनाशवज्रमनघं पातयति । जनानां प्राणदाताऽन्नदाता तुष्टिदाता, पुष्टिदाता, कर्ता, धर्ता संहर्ता च स एव । तस्यैव विस्तारः सर्वत्र । स एव प्रभवति निखिलेषु क्षेत्रेषु । तस्यैव महिमानं यावन्मात्राणि स्थावर-जंगमानि प्रत्यक्षमप्रत्यक्षं वा गायन्ति । स विराट् विश्वरूपः भूमा, सर्वेषां चेतरेषां विशेषणानां भाजनम् । कैर्नाम शब्दैस्तस्य गरिमा स्तूयेत ?

केवलमेतावदेव वक्तव्यं यत् तस्य दैव्याः प्रतिभायाः प्रसार एव जगत उपकाराय क्षमो न त्वायुर्धा । पौराणिको नारायणः स्वसृष्टान् प्राणिनः स्वयं न भक्षति तु प्रलय-कर-त्रिपुरारिकरेणैव घातयति । परमयं मानवाकारः स्वयमिमां जगतीं नानासुख-साधनैः प्रतिभयाऽऽविष्कृतैः सुरलोक-कल्पां परिकल्प्य स्वकरेणैवाग्निवर्षं न दहेत् । एषा विभीषिका मानवस्य विश्वरूपत्वं जगतोऽश्रेयसे प्रत्याययति ।

तथा चैतत्, तर्हि 'बाहुवीर्या पुरुषः सहस्रशः सहस्रधात्' इति साश्चर्यमुक्तः स नानाशिरःकर-पदवद्भिः पौराणिकैः रक्षोभिरदमेयतां भजन् सृष्टेर्नाशायैव कल्पिष्यत इति निश्चयप्रत्यम् ।

—०—

अणुशक्तिः

विश्वस्येतिहास आसीत्तद् विस्मयकर दिन यस्मिन्नि स्पन्दश्वासेन, स्तिमित-नाडी गतिना, स्थगित-पक्ष्म तारक चक्षुषा मानवेन श्रुतं यदमेरिकासैन्याधिकारिभि पातितेनैकेनाणुपिण्डेन (Atom-bomb) जयपाणिदेशस्य (जापान) नागासाकिनगर लक्षत्रय जन कोलाहलपूरित निमिष-मात्रेण भस्मसादनुष्ठिम्। न तत्र मानव, न भवनम्, न तरु, न तृणम्, न च क्षुपम् (Plants) क्वाप्यशिष्यत। सकलाऽपि शस्य श्यामला धरणी क्षणेन पक्व मृण्मयीव कपिलोपरायिता च। सैव दशा हिरोशिमापुरस्यापि समजनि। अभूतपूर्वेयमासीद् घटनाऽकाण्ड एव यथा मनुष्यस्य रक्त लिप्साताण्डवेन ताण्डवितम्। तादृशोऽभूदस्य नवास्त्रस्य लोक यस्मरश्चमत्कारो येन विस्मितस्याऽपि जगतोऽजायत भयाक्रान्त मन। स्मारिता सर्वे प्राक्तनस्य महाभारतस्य यत्र वायव्यानि, कार्शानवानि, वारुणानि चायुधान्यक्षिप्यन्त। क्रीडनकीकृतानि नवेनामुना पारमाणव-पिण्डेनासाधारणविनाशक्षमेन प्रलयकारिणा खड्ग भुशुण्डी शतघ्नी-प्रभृति प्रहरणानि।

सकलाऽपि सृष्टि पदार्थानामणुभिर्निर्मिता, सूक्ष्मतमोऽणुश्च स्वतन्त्र इति वैज्ञानिकाना प्राचामभूमतम्। भारतीयदार्शनिकास्तु—

जालसूर्यमरीचिस्थ सूक्ष्म यद् दृश्यते रज।
तस्य षष्टितमो भाग त्रसरेणु स कथ्यते।
तस्य षष्टितमो भाग परमाणुरिति स्मृत॥

इति प्रतिष्ठापयामासु। परमामरीवेयो वैज्ञानिको ऽल्बर्ट आइन्स्टाइनसज्ञस्तेषामपि परस्परसम्बद्धतामजूघुपत्। तस्य सिद्धान्त सापेक्षवाद (Relativity) इति प्रसिद्ध। तन्मतानुसारेण शार्मण्यदेशस्य विज्ञानवित् ओटो हॉननामा परीक्षण शतानि कृत्वाऽणूना खण्डने समर्थोऽभवत्। डा० रदफोर्ड, चनंर हीजन वर्ग, मैक्समान लेन एते वैज्ञानिका अपि तन्नानेकान् प्रयोगान् व्यदधु। परञ्चाद्यार्मण्यदेशे (जर्मनी) श्रेष्ठानामणुविशेषज्ञाना मण्डन भीषणतमस्य पारमाणवास्त्रस्य निर्माणे सलग्नमासीत्।

केचिदामरीकेयाः प्रणिधयोऽणुरहस्यं विज्ञाय स्वदेश्येभ्यो विज्ञानविद्भ्यो निवेदितवन्तः। दैववशादेतस्मिन्नन्तरे शार्मण्यदेशो युद्धे पराजित इति सत्यता वैज्ञानिका न प्राभवन् तदस्त्र-निर्माणे। आमरीकेयास्तु रहसि प्रयतास्तत्र कर्मणि कालान्तरे सफलतामभजन्। प्रथम परीक्षणं च तस्य मार्क्षिक (मेक्सिको) द्वीपे लासवेगास स्थाने • प्रशान्तसागरस्य तटेऽक्रियत। महीयस आयस-स्तम्भस्य मुखे पारमाणवः पिण्डो न्यधीयत। दूरे च सूक्ष्मदर्शकान् गृहीत्वा विज्ञान-विदोऽतिष्ठन्। विद्युद्वर्तनेन (Electric Switch) तस्य स्फोटने कृते महत्तमोऽश्रुतपूर्वोऽदृष्टपूर्वश्च विस्फोटनादः समजनि। तदुद्भवेन गुरुतमेन प्रकाशेनैकस्य दिदृक्षोर्दृष्टिरेवालुप्यत। कोटिशो मरुत्वा व्यनश्यन्। लौह-स्तम्भस्तु धूमेनैव सहालीयत। विलोक्यैतादृशीमदृष्टचरा शक्तिमस्त्रस्यास्य वैज्ञानिका नितरामहृष्यन्। जयपाणिश्च (जापान) कथमपि पराजयं न स्वीकुर्वन् तस्य शरव्यताम् (Victim) अगात्।

विज्ञानविदामनुभवेनागूनामप्यशा भवन्ति। अलक्त्रोना (इलेक्ट्रोन) प्रोतनाः (प्रोटोने) न्यूतनाः (न्यूट्रोन) च कणा अणून् परितो भ्रामन्ति। तदर्थं यूरेनियम-२३५ संज्ञः थोरियमसंज्ञश्च धातुरतिशयेनोपयोगिनौ। हेलीयमगेपेण (हेलियमगैस) निरन्तरप्रहारैः अलक्त्रोनिकाः प्रोतनिकाश्च कणाः पृथग् जायन्ते। एतेन गरीयसी शक्तिरुत्पद्यते। अतः पिण्डनिर्माणे तामेव पद्धतिमनुरुन्धाना वैज्ञानिकाः पिण्डेषु यूरेनियम-संज्ञं धातुं निक्षिप्य तदशाश्चशैथिल्यानयनाय मधुसारेण (मोम) मिश्रयन्ति। पिण्डस्य विस्फोटे कृतेऽणुकणाः परस्पर-समर्दैन खण्डशो भवन्तः शक्तिं जनयन्ति।

स्थूलवस्तूना सूक्ष्मशक्तौ परिणमनमेवास्याः पद्धतेर्मूलम्। प्रस्थार्धपरिमितेन यूरेनियमधातुना या शक्तिः संगृह्यते सा महदपि नगरं क्षणाद् भस्मसात्कर्तुं शक्यते। वैज्ञानिकानुसारेण सौरचक्रंऽप्यसावेव प्रक्रिया कार्यं करोति। अतोऽणु-शक्त्या भविष्यति काले कृत्रिमसूर्यनिर्माणं वृष्टेः करणं धातूना परिवर्तनं च सम्भविष्यति। यन्त्रचालनम् यानगतिः, विद्युज्जननम्, मरुभूमेः शाद्वले परिणमनं चाणु-प्रभावेण सुकरम्, प्रकृति-विजयाय प्रयतमानो नरोऽधुना सृष्टिनिर्माणस्य मूलतत्त्वान्यपि वशीकर्तुं समर्थः। अधुनाऽऽथित्यामुं शक्तिं दुश्चिकित्स्या अपि गदा निराकर्तुं शक्यन्ते, अक्षयेन्धनप्रभावेण लोकान्तरयात्राऽपि साधीयसी सम्पत्स्यते। कृत्रिमसुवर्णरत्नतया दुःसहं दारिद्र्यमपि नामशेषं करिष्यते।

परं नायं पक्षः साधितोऽद्यावन्मानवेन, लोकसंहारक्षमा शक्तिमेव स संग्रहीतुं निरन्तरं यतते। अणवस्त्रनिर्माणे जाता प्रगतिमवेक्ष्य प्रथमः परमाणुपिण्डोऽधुना बाल-क्रीडनकायते। उदजन्बमाः (Hydrogen bomb) किरणबमा घातकानि बायव्या-स्त्राणि च भाण्डागारेषु संगृहीतानि। प्राक्तनान्यस्त्राणि पूर्वपक्षे स्थापितानीदानीम्।

अणुशक्तिः

विश्वस्येतिहास आसीत्तद् विस्मयकर दिन यस्मिन्नि स्पन्दश्वासेन, स्तिमित-नाडी गतिना, स्थगित पक्ष्म तारक-चक्षुषा मानवेन श्रुत यदमेरिकासैन्याधिकारिभि पातितेनैकेनाणुपिण्डेन (Atom bomb) जयपाणिदेशस्य (जापान) नागासाकिनगर लक्षत्रय जन कोलाहलपूरित निमिष मात्रेण भस्मसादनुष्ठिम्। न तत्र मानव, न भवनम्, न तरु, न तृणम्, न च क्षुपम् (Plants) क्वाप्यशिष्यत। सकलाऽपि शस्य श्यामला धरणी क्षणेन पक्व मृण्मयीव कपिलीपरायिता च। सैव दशा हिरोशिमापुरस्यापि समजनि। अभूतपूर्वेयमासीद् घटनाऽकाण्ड एव यथा मनुष्यस्य रक्त लिप्सा ताण्डवेन ताण्डवितम्। तादृशोऽभूदस्य नवास्त्रस्य लोक घस्मरश्चमत्कारो येन विस्मितस्याऽपि जगतोऽजायत भयाक्रान्त मन। स्मारिता सर्वे प्राक्तनस्य महाभारतस्य यत्र वाय०यानि, कार्शानवानि, वारुणानि चायुधान्यक्षिप्यन्त। क्रीडनकीकृतानि नवेनामुना पारमाणव-पिण्डेनासाधारणविनाशक्षमेन प्रलयकारिणा खड्ग भुशुण्डी शतघ्नी-प्रभृति प्रहरणानि।

सकलाऽपि सृष्टि पदार्थानामणुभिर्निर्मिता, सूक्ष्मतमोऽणुश्च स्वतन्त्र इति वैज्ञानिकाना प्राचामभ्युमतम्। भारतीयदार्शनिकास्तु—

जालसूर्यमरीचिस्थ सूक्ष्म यद् दृश्यते रज।
तस्य षष्टितमो भाग त्रसरेणु स कथ्यते।
तस्य षष्टितमो भाग परमाणुरिति स्मृत॥

इति प्रतिष्ठापयामासु। परमामरीकेयो वैज्ञानिको ऽल्बर्ट आइन्स्टाइनसज्ञस्तेषामपि परस्परसम्बद्धतामजूघुपत्। तस्य सिद्धान्त सापेक्षवाद (Relativity) इति प्रसिद्ध। तन्मतानुसारेण शार्मण्यदेशस्य विज्ञानवित् ओंटो हॉननामा परीक्षण-शतानि कृत्वाऽणूना खण्डने समर्थोऽभवत्। डा० रदफोर्ड, वर्नर हीजन वर्ग, मैक्सवान लेन एते वैज्ञानिका अपि तत्रानेकान् प्रयोगान् व्यदधु। पश्चाच्छार्मण्यदेशे (जर्मनी) श्रेष्ठानामणुविशेषज्ञाना मण्डल भीषणतमस्य पारमाणवास्त्रस्य निर्माणे सलग्नमासीत्।

केचिदामरीकेयाः प्रणिधयोऽणुरहस्यं विज्ञाय स्वदेश्येभ्यो विज्ञानविद्भ्यो निवेदितवन्तः। दैववशादेतस्मिन्नन्तरे शामेण्यदेशो युद्धे पराजित इति तत्रत्या वैज्ञानिका न प्राभवद् तदस्त्र-निर्माणे। आमरीकेयास्तु रहसि प्रयतास्तत्र कर्मणि कालान्तरे सफलतामभजन्। प्रथमं परीक्षणं च तस्य माक्षिक (मेक्सिको) द्वीपे लासवेगास्र स्थाने प्रशान्तसागरस्य तटेऽक्रियत। महीयस आयस-स्तम्भस्य मुखे पारमाणवः पिण्डो न्यधीयत। दूरे च सूक्ष्मदर्शकान् गृहीत्वा विज्ञान-विदोऽतिष्ठन्। विद्युद्वर्तनेन (Electric Switch) तस्य स्फोटने कृते महत्तमोऽश्रुतपूर्वोऽदृष्टपूर्वश्च विस्फोटनादः समजनि। तदुद्भवेन गुरुतमेन प्रकाशेनैकस्य दिदृक्षोर्दृष्टिरेवालुप्यत। कोटिशो मक्षिका व्यनश्यन्। लौह-स्तम्भस्तु धूमेनैव सहालीयत। विलोकयंस्तादृशीमदृष्टचरा शक्तिमस्त्रस्यास्य वैज्ञानिका नितरामहृष्यन्। जयपाणिश्च (जापान) कथमपि पराजयं न स्वीकुर्वन् तस्य शरव्यताम् (Victim) अगात्।

विज्ञानविदामनुभवेनाणूनामप्यशा भवन्ति। अलवत्रोना (इलेक्ट्रोन) प्रोतनाः (प्रोटोन) न्यूतनाः (न्यूट्रोन) च कणा अणून् परितो भ्रामन्ति। तदर्थं यूरेनियम-२३५ संज्ञः थोरियमसंज्ञश्च धातुरतिशयेनोपयोगिनौ। हेलीयगेपेण (हेलियमगैस) निरन्तरप्रहारैः रलत्रोनिकाः प्रोतनिकाश्च कणाः पृथग् जायन्ते। एतेन गरीयसी शक्तिरुत्पद्यते। अतः पिण्डनिर्माणे तामेव पद्धतिमनुरुन्धाना वैज्ञानिकाः पिण्डेषु यूरेनियम-संज्ञं धातुं निक्षिप्य तदंशाश्चलैथिल्यानयनाय मधुसारेण (मोम) मिश्रयन्ति। पिण्डस्य विस्फोटे कृतेऽणुकणाः परस्पर-समहॅन खण्डशो भवन्तः शक्तिं जनयन्ति।

स्थूलवस्तूनां सूक्ष्मशक्तौ परिणमनमेवास्याः पद्धतेर्मूलम्। प्रस्थार्धपरिमितेन यूरेनियमधातुना या शक्तिः संगृह्यते सा महदपि नगरं क्षणाद् भस्मसात्कर्तुं शक्नुयते। वैज्ञानिकानुसारेण सौरचक्रेऽप्यसावेव प्रक्रिया कार्यं करोति। अतोऽणु-शक्त्या भविष्यति काले कृत्रिममूर्यनिर्माणं वृष्टेः करणं धातूना परिवर्तनं च संभविष्यति। यन्त्रचालनम् यानगतिः, विद्युज्जननम्, मरुभूमेः शाद्वले परिणमनं चाणु-प्रभावेण सुकरम्, प्रकृति-विजयाय प्रयतमानो नरोऽधुना सृष्टिनिर्माणस्य मूलतत्त्वान्यपि वशीकर्तुं समर्थः। अधुनाऽऽश्रित्यामुं शक्तिं दुश्चिकित्स्या अपि गदा निराकर्तुं शक्यन्ते, मक्षयेन्धनसारेण लोकान्तरयानाऽपि साधीयसी सम्पत्स्यते। कृत्रिमसुवर्णरचनया तु सदं दारिद्र्यमपि नामशेष करिष्यते।

परं नायं पक्षः साधितोऽथवाऽज्ञानबेन, लोकसंहारकामां शक्तिमेव सा संग्रहीतुं निरन्तरं यतते। अण्वस्त्रनिर्माणे जातां प्रगतिमवेक्ष्य प्रथमः परमाणुपिण्डोऽधुना बाल-क्रीडनकायते। उदजनबमाः (Hydrogen bomb) किरणबमा घातकानि बाधव्या-स्त्राणि च भाण्डागारेषु संगृहीतानि। प्राक्तनान्यस्त्राणि पूर्वपक्षे स्थापितानीदानीम्।

एषां परीक्षणेष्वपि विसृमरास्तरंगायिताः कणा दु साध्यरोगाञ्जनयन्ति, वायुमण्डले चासाधारणी विक्रियामाचरन्ति, यया ऽतिवृष्टिरनवृष्टिश्च दु.खाकरोति भुवनम्। अतः शान्तिप्रियाणि राष्ट्राणि जिजीविषन्त्यश्च तेषा जनताः सधिक्कारं गर्हयन्त्येतानि परीक्षणानि। अप्रतीकारैरमोघिरस्त्रैः समीपमानीतो युगक्षय इति गरीयसी तृतीय-युद्धविभीषिका।

अपेक्ष्यते च संप्रति शक्तैरस्या जनकल्याणाय प्रयोगः। यावानर्थं उपयुज्यते ऽद्दोहेतुकानामस्त्राणा निर्माणे, तावता सकलस्यापि जगतो दारिद्र्यस्य नाशः संभवति। पुञ्जवादेन सुतरा पीडिताः प्रजाः सरोषा अस्य नाशाय चोद्युक्ता.। तेनाऽपि प्रलय-कल्प एव संहारो भविष्यति। अत पूर्वमेव सर्वैरपि संभृतैः साधनैरशान्ति-हेतोरस्यदारिद्र्य-स्यैव प्रलयो विधेयः। चिरं पीडिता दलिता शोषिता च मानवजातिरद्य भोजनमपेक्षते नास्त्राणि, विकासं काङ्क्षति न विनाशम्, बोधमभिलषति न युद्धम्, प्रीतिमीहते न वैरम्।

अतएव भारतेन पुनर्निर्माणाय प्रयतेनाणुशक्तेः प्रयोग. प्रजाकल्याणाय शान्ति-स्थापनायै च विधीयते। मुम्बापुर्या. (बम्बई) समीपे त्र्यम्बकपुरे (ट्रावे) स्थापिता-ऽणवी प्रयोगशाला, आयोजितश्चैकोऽण्वायोगः (अणु-कमीशन)। अणुयन्त्रस्य ((Atomic plant) स्थापनेऽमरीकाशासनेन भूय. साहाय्यं कृतम्। गुरुजल-(Heavy water) प्रभृतीन्युपकरणानि प्रतानि। डा० भाभा-सज्ञो वैज्ञानिक-प्रवरोऽस्य निर्देशकः। अप्सर.सज्ञा घर्मनिका (अणु भट्टी) स्वकार्यं कर्तुं प्रवृत्ता। अधुना भारतसर्वकारोऽणुशक्ति-चालितानि विद्युत्प्रतिष्ठानानि स्थापयितुं विचारयति। सर्वाण्यपि राष्ट्राणि प्रभु जीरश्चेत् शान्तये योगक्षेमाय च जनानामिमां शक्तिम्, अल्पीयसा कालेन सकलोऽपि दारिद्र्य-दोषः प्रजाना गच्छेत् स्मरणीयताम्।

आधुनिका उपग्रहप्रयोगाः

लोकाः पुराणेषु बहुधा श्रपठन् नारदादीनां मुनीनां लोकान्तरेषु गमनम्। महाभारतेऽपि सन्त्येवविधानि वर्णनानि। बाल्येऽपि च पितामही मातामही वाऽश्रावयदुड्डयनखट्वाम् (उड़न खटोला) श्रारुह्य राजश्चन्द्रस्य राज्ञी तारामुपयियसोः कथाम्। सर्वाणीमान्याख्यानानि विस्मयकराणि कपोलकल्पितान्येवामन्यन्त जनैः। श्रभूत्तथापि मानवस्य कौतूहल विवत-पक्षाम्पक्षिणो दर्शं दर्शम्, भासमानानि च खल-प्रमाणि तारकाणि रजत-पुष्पाणीव नीलनीलायां शाट्याम्। श्रकामयत सोऽपि मुक्त-बन्धनो विगलितसीमबन्धे विहर्तुं नीलाम्बरे। व्यचारयत् तज्ज्ञानिका बहूनि वर्षाणि यावदन्तरिक्षयात्रायम्। कथमुड्डीयता मानवो नभसि ? कथंकारं भविष्यति तस्य भार-संतुलन तत्र ? कः प्रकारोऽस्य तस्मिन्नवस्थानस्य ? क उपाय. पतनाभावस्य ? इत्यादयो बहुविधा· प्रश्ना श्रभूवन् तेषा मनसि, परं विमानाविष्कारेणानेकेषा तेषु समजनि समाधानम्। स्वनादपि तीव्रगामिभि· खेट-यानैर्दूरीकृतः स्थानकृतोऽन्तराय.। स्वल्पेनैव चानेहसा दुर्गमानपि प्रदेशानद्रिमध्यगतान् समुद्रवक्ष.स्थितांश्च भूभागान् गन्तुं शक्नोति जनः।

एवविधे व्यतिकरे वैज्ञानिका श्रकल्पयन् कस्यचिद् द्वि-भूमिकस्य यानस्य रचनाम् यत्केनाऽपि प्रबलशक्तिमताऽश्वयेणेन्धनेन चालित भवेत्, यन्न पृथ्व्या गुरुत्वा-कर्षणेन कृष्येत, नोल्काभिर्बाध्येत, न तापैस्तप्येत, न ब्रह्माण्डादिकिरणैर्धूप्येत न जाड्याज्जडीक्रियेत। प्रथमे महायुद्धे शार्मण्यदेशयैवैज्ञानिकैर्निर्मिता वी (V) सज्ञा-स्तीव्रगामिनः स्वतश्चालिता श्रग्नि-बाणा श्रभूवंस्तेषामादर्शा.। परं द्वितीय-महायुद्धस्य मध्य श्रापतनादतिष्ठन्नपूर्णा एव सर्वा योजनाः।

द्वितीयमहासमरानन्तरं तु प्रक्षेपास्त्रनिर्माणेन सह पुनः प्राबल्यमगादयं प्रश्नः। श्रमरीकया रूस्याश्च प्रतिभटतामगच्छन् चन्द्रलोकाभियानोद्योगे। परं सहसा विस्मितेन जगता श्रुतं यत् खीष्टाब्दे १९५७ तमे श्रक्तुबरमासस्य चतुर्थे दिने रूस्याः

सार्धमणद्वयमात्रमुपग्रहं वियति प्रेषयितुं प्राभवन् । प्रक्षेपणीयेन क्षिप्तोऽयं भूग्रहः शताधिकयोजनात्मकमुच्छ्राय गत्वा स्वप्रक्षेपकात् पृथग्भूतः प्रतिहोरमष्टादशसहस्र-क्रोशलघिन्या गत्या पचोनशतेन कलाना (Minute) पृथ्वीं परिक्रामति । न यावदमरीका प्रहिणोति स्वकीयं प्रथमं कृत्रिमं ग्रहम्, रूस्या अपरमपि ततोऽपि गुरुतरं सध्वनिग्रहयन्त्र सप्रसारणकलं (Radio) साधिदेवतमिव लाइकाख्यया शुन्या पुनः प्राक्षिपत् । गतेनान्तरिक्षयात्राया प्राणिना शरीरे कः प्रभावो भविष्यतीति विषये लब्धा भूयासः सकेताः ।

मासत्रयानन्तरमामरीकेयैरपि वैज्ञानिकैः प्रक्षिप्तो लघीयानुपग्रहः । सहस्राधिकयोजनोच्छ्राय गतोऽय प्रतिहोरमेकोनविंशतिसहस्राणि क्रोशाना गत्या लंघयन् षड्डुत्तरेण शतेन कलाना भुवं पर्यक्राम्यत् । अपरावप्युपग्रहौ तदीयैरेव वैज्ञानिकैः सृष्टौ साधारणावेव ।

रूस्याना तृतीय उपग्रहो गुरुतमः सार्ध-टन (Ton) भारात्मकोऽपि तीव्र-गत्या गगने चक्रमणपरो विस्मयावहः । चतुर्थे वारे च प्रक्षेपणास्त्र चन्द्रमण्डलमपि निर्भिद्य सूर्याभिमुखमगच्छत् । एतस्मिन्नन्तरे रूस्याश्चन्द्रस्य पृष्ठदेशं द्रष्टुं तदीय-प्रदेशाना चित्राणि च ग्रहीतुमकल्पन्त । तैः गागारिन-तितोवनामानौ द्वौ यात्रिणौ आकाशे प्रेषितौ पुनरानीतौ च ।

गते ग्रीष्मकालेऽमरीकावासिभिरुत्सृष्टे कृत्रिमग्रहे मानवोऽपि यात्रा व्यधात् । कामं स नाधिकोच्छ्रायं गत । भारतस्य तद्देशस्यो राजदूतश्च ग्रहस्थ-यात्रिण्वमूदिति समाचारपत्रेभ्यो ज्ञातम् । इत्थं दिनाद्दिनं लोकान्तरयात्राया दिशि प्रगतिरेव भवति । आत्लदेशो अमरीकाया च विंशत्यधिकैः सहस्रैर्जनाना चन्द्र-लोक-गमनाय याने स्वस्थानानि सुरक्षितीकृतानि । चन्द्रः खलु भूमण्डलस्य नेदीयान् प्रतिवेशी इति प्रथमं तन्मुख्येव यात्राऽऽयोज्यते । पर रूस्यास्तु चन्द्रलोकयात्रा पूर्णकल्पा मन्याना मंगलग्रहयात्रायै परामृशन्ति । सन्ति यद्यपि काश्चनासमाहिताः समस्यास्तेषा समक्षम् । यथा

१—आकाशे यानास्थानस्य (हवाई अड्डा) निर्माणम् ।

२—मानवशरीरे ग्रहाण्डादिकिरणाना प्रभावस्य निवारणम् ।

३—तत्स्थलीयशीतादेर्मानवस्य सुरक्षा ।

४—पुनः परावर्तनस्याव्याहतता

५—प्रक्षेपणावेगसह्यता

मार्गे भोजनादेर्मलमूत्रत्यागादेश्च सुविधा कथं स्यादिति च प्रश्नोऽधुनाऽपि न रागाहिनः । अतः शिष्टमद्यापि तत्र भूयः कार्यम् । प्रतीक्षते जगद् विस्फारितेन चक्षुषा सकौतुकेन चान्त करणेन सत्यतामस्य स्वप्नस्य ।

विश्वसंघस्यावश्यकता

सृष्टेरारम्भादेव यथा यथा मानवेषु मिथः कलह प्रवृत्ति प्राप पद तथा तथा समजनि भावना सघटनस्य। आत्मनिर्भरतायामपि बहुषु कार्येषु परापेक्षतयाऽन्य-सहयोग सर्वैरपीष्यत इति सामाजिकताऽऽद्रियते। यथा सामान्यजीवने कौटुम्बिकता जातीयता च जनाना सश्लेषहेतुस्तथैव राष्ट्रीयता मित्रभावश्च राष्ट्राणा बन्धन-मूलम्। राजनैतिकेष्वाक्रमणेषु सत्सु मिथ साहाय्येन प्रतिरोधोऽक्रियत। इत्थ नगर-राष्ट्रं सहतैर्विशालाना राज्याना राज्यंश्च साम्राज्यानामुदयोऽभूत्।

इय सघभावना विशेषेण विरोधस्य सग्रामस्य चान्तायैव समुदिताऽऽसीत्। निर्मितेषु च सघेषु, कुटुम्बेष्विव लघुराष्ट्रेष्वपि नाभवन् सहसा रणा। तेषा सख्या न्यूनतामगमत् पर भीषणता नितरामैधत। नाजायत तादृशी जनहानिर्लघुषु कलहेषु, यादृशी महासमरेष्वभवत्। केवल कतिपये ग्रामा प्रथम सम्मिलिता अभवन् पर व्यापकेषु युद्धषु जनपदा आसन् योधिन। इत्थ सपर्याय सहैव सघोभावस्यापि क्षेत्रमगाद् वृद्धिम्।

अद्य तु स्थितिरेव विलक्षणा। एकतो देशकृता, जातिकृता, वर्णकृता, वर्गकृता सिद्धान्तकृता भेदाश्च मानवान् दूराद् दूरतर नयन्ति, परतस्तु विज्ञानमूला भाविष्कारा बहुधा भिन्नमपि विश्वं त्रिघटितप्रायमपि सघटयन्ति। एकत्र प्रवृत्ते युद्धे न समीपस्थो देशोऽविकृत स्थातु क्षम। साधारण्यपि क्रान्तिर्द्वीपाद् द्वीप वात्येव सकलमपि भुवन चालयति। सर्वेऽपि प्रदेशा, सर्वाण्यपि राज्यानि, निखिलाऽपि राष्ट्राणि तथाऽद्य नैकट्य भजन्ते यथा विकासे ह्रासे वा प्रगताववनतौ वा परिस्थितिर्लङ्घ्वेवान्यत्र सक्रामति।

शताब्दीय नवसम्यताया, नवनवाविष्काराणाम्, अभिनव-विकासस्य च। मानवेनास्यामश्रुतपूर्वोऽदृष्टपूर्वोऽचिन्तितपूर्वो च वृत्रा समुन्नतिरिति प्राणो विपद्यन्ते लोका। परमेतावदपि ते जानन्ति यत्पूर्वार्धे एवास्या विश्वधरित्रे अनातपूर्वे द्वे महायुद्धे भुवनेन दृष्टे। तृतीयस्य भयं चालयत्पाणीयवायेन सर्वेषां शिरसि

जागर्ति । यादृशी भीषणता गतयोर्महासमरयो श्रूयते, न तादृशी महाभारतेष्वने-केष्वपि स्यात् ।

इमामेव विनाशलीला समीक्ष्य प्रथमयुद्धानन्तर पृथ्व्या सग्राम नामशेषता नेतु राष्ट्रसघ (League of Nations) सस्थापित आसीत् । पर नादीयन्त तस्मै केऽप्यधिकारा , न च बलवन्ति राष्ट्राणि व्यश्वसन् तस्य शान्तिप्रियेषु सिद्धान्तेषु । विशेषत इटली, जर्मणि शर्मण्यश्चेति त्रयो देशा 'धूराष्ट्राणि' (धुरी राष्ट्र) इति प्रसिद्धा आतकप्रिया नीतिमाश्रयन् । प्रथमेन 'अबीसीनिया,' 'लीबिया', 'अल्बानिया' इति राष्ट्रत्रय बलवदाक्रम्यात्मसात्कृतम् । स्पेनदेशे तत्रत्येन सेनापतिना फ्रांकोनाम्ना विद्रोहेण प्रजातन्त्रस्य लोपो विहित । पर सर्वमिद घटना चक्र नाटकीयदृश्यमिवानायासेनैवाजायत । क्लीब इव च राष्ट्रसघ केवल पश्यन् नापारयत किमपि प्रतिकर्तुम् । तस्य परिणतिश्च द्वितीयो महासमर ।

अस्यान्ते च पुन सयुक्तराष्ट्रसघस्य स्थापनाऽक्रियत तमेव प्रथम लक्ष्य पुरस्कृत्य, कृतानि च तेन महान्त्यनेकानि कार्याणि । तथाऽपि स्वार्थपराणा राष्ट्राणा दलबद्धता पक्षपरिपोषनीतिश्च तस्मिन् दृश्यते । अद्यावधि तत्र गौराङ्गाणामेव प्रभुत्वम् । न तेऽन्यायकृत श्वेताङ्गजातीयराष्ट्रस्य प्रतीप किमप्याचरितुमुद्यता । प्रत्युत स्वार्थ-वशेनान्यायमेव बहुश समर्थयन्ति । सयुक्तराष्ट्रसघीयो मञ्च पक्ष द्वयस्य सघर्षमञ्चायते । अद्यापि तत्र बहूना राष्ट्राणां न्यायोचिताऽपि सम्मतिररण्य-रुदितमिवोपेक्ष्यते । वर्णद्वेषो वर्गद्वेषश्च तत्रापि दृश्येते । अफ्रीकामहाद्वीपस्य बहुषु भागेषु श्वेताङ्गै कृतानत्याचारान् स षण्ढ इव पश्यति न तान्प्रति दण्डायोत्सहते ।

साम्यवादेन सर्वाधितसाहसदृप्तोऽद्य भुवनमाह्वयते । सोऽपि जनसख्या शक्ति चाधिकृत्य विश्वस्य महाराष्ट्रम्, पर न सयुक्तराष्ट्रसघस्य सदस्यताभागद्यापि । इत्य निरस्त-प्राया सकलाऽप्याशा नीतिमिमामनुसरताऽमुना सघेन । अत एव बुद्धिमन्तो नीतिविदोऽधुना सग्रामस्य सर्वथा लोपाय विश्वसघस्य स्थापना समर्थयन्ते यस्मिन् सकलमपि भुवनमेकमात्र राष्ट्र भविष्यति, सकला अपि मानवा एकस्या पृथिव्या पुत्रा. सन्त ऐक-मत्येन ता प्रार्थयिष्यन्ते—

यस्यां समुद्र उत सिन्धुरापो यमन्वन कृष्टय सबभूवु ।
यस्यामिद जिन्वति प्राणदेजत् सा नो भूमि पूर्वपेये दधातु ॥
(अथ. १२, १, २)

विश्वम्भरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी ।
वैश्वानर बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु ॥
(अथ. १२, १, ५)

न यत्र कश्चित्क्षुधया न चापरोऽजीर्णेन विनङ्क्ष्यति, न यत्र जातिकृतो वर्ण-कृतो वर्गकृतो देशकृतो लिङ्गकृतश्च भेद कलह जनयिष्यति, न यत्र संन्यासा, रक्षापुरुषाणा, शासकाना च दर्पकर्कशा वागुदेष्यति ; न मनुष्यो मनुष्यस्य रक्तं पातयिष्यति ; कुटुम्ब इव, कुल इव, जातिवि, वर्ग इव समाज इव सकलेऽपि भुवने जन सामान्येन सम्मान भजिष्यति, परम् 'उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथै' इत्यनुसारेण न सकल्पमात्रेण तादृशस्यादर्शस्य प्रतिष्ठा सभवति। यावन्न मानवस्य हृदयात्पातकमिव स्वार्थपरता, परस्परमविश्वासश्च निष्क्रामति, यावन्न स स्वपरभाव कलुषमिव जहाति, यावन्न स सकलमपि भुवनमात्ममयं पश्यति, कथ तावदस्य स्वप्नस्य साफल्यम् ? तथापि लोकक्षेमैकहेतोरस्योद्देश्यस्य पूर्त्यै प्रयत्नो विधेय एव।

भारतस्य परराष्ट्रनीतिः

नीतिं विवेचयता माघेनोक्तमासीत्—

तन्त्रावाप-विदा योगमंण्डलान्यधितिष्ठता ।
सुनिग्राह्या नरेन्द्रेण फणीन्द्रा इव शत्रवः ।। (शि. व. २।८८)

एतदनुसारेणं शासकैः स्वराष्ट्रस्य परराष्ट्रस्य च चिन्ता विधीयते । यथासमयं राष्ट्रान्तरैः सह सन्धिर्विग्रहोऽप्यानुष्ठीयते । यावदभूत्साम्राज्य-विस्तार-चिन्ता, तावत्तु परराष्ट्र-विभागस्य कार्यमासीन्मित्रराष्ट्रैः सह सन्धिदार्ढ्यम्, उदासीनेषु च बलवतां सख्यापादनम्, निर्बलानां च निग्रहणम् । परमद्य प्रजातन्त्र-युगे साम्राज्य-भावनाया नास्ति महत्त्वम् । 'राजा घृणी ब्राह्मणः सर्वभक्षो' इति मतमद्य नादरास्पदम् । कोणे-कोणे, धरण्या दासतायाश्चिरपरिचिताः शृंखलाः सरभसं शकलीक्रियन्ते, क्व तदा नवविजय-प्रसंगः ? तथापि व्यापारादि-सौकर्याय पक्ष-पोषणाय च कूटनयप्रयोजितो मैत्र्य-सम्बन्धो योज्यत एवेति न निष्प्रयोजनोऽयं विदेश-सम्पर्कविभागः ।

भारतस्य दास्यकाले यैर्देशिकाः शासका एव स्व-हितानुरोधात् विदेशैः सह नीति-बन्धम् अकुर्वन्, परं स्वातन्त्र्य-लाभानन्तरं भारतीया एव प्रभवः पक्ष-विपक्ष-निर्धारणे इति ते देश-हितं पर्यालोच्य तटस्थनीतिरेवाश्रयणं श्रेयस्करमन्यन्त । काले·ऽस्मिन् साम्यवादिनां जनतन्त्रवादिनां च विरुद्धौ पक्षौ । प्रथमस्य नायको रूसोऽपरस्य चामरीकेति प्रतिद्वन्द्विनावेतौ । भारतं च चिरकालिक-पारतन्त्र्यवशात् साधन-हीनम्, विज्ञानादिषु च नगण्यम् । पक्षद्वये च स्व-प्रभाव-प्रसाराय प्रयतमाने, पौरस्त्यपश्चिमाभ्यां दिग्भ्यां सहैव तत्तद्देशेषु च विभक्तेषु, तृतीय-महायुद्ध-विभीषिका-समाक्रान्ते जगति प्रौद्योगादि-दृष्ट्या निर्बलेषु प्राच्य-देशेषु, स्वास्तित्व-रक्षणाय अनुपेक्षणीये शक्ति-संग्रहोद्योगे, अपरिहार्ये विश्वतोमुखे विकासे, साधन-संभार-समाहरणाय मार्गणीये साहाय्ये न समभावि केनापि पक्षपातिनो राष्ट्रस्य तटस्थत्वम् । परं दूर-दर्शिभिर्भारतनेतृभिः सुचिन्तितमेव चिन्तितं यदेकतर-पक्षाश्रयणेऽपरस्य विरोधः स्यात् । पर-प्रभावे च साहाय्यार्थमनुचितोऽपि समयः (Condition) स्वीकार्यो भवेद् यो

राष्ट्रीयसंमानस्य हितस्य च परिपन्थितामाश्रयेत्। केनचिदपि विरोधे सति वृथैव व्यायाम-कालेऽपि युद्धादिना शक्तिह्रासो हानिकर सम्पद्येत।

पर वाराङ्गनेव नृपनीति स्वार्थानुबिन्धनीति न न्याय्य इति कृत्वा कश्चित्पक्षस्तस्यादरस्य विषय। अत. प्रथम भारतस्य नीतिमधिकृत्य सर्वेऽपि समशेरत। हंगरीराज्ये कृत दमनचक्रं भारतीया शासका निनिन्दुरिति रूस्या अकुप्यन्। मिस्रदेशोपरि ब्राग्लीयस्य फ्रांसीयस्य चाक्रमणस्य विरोध तेऽकुर्वन्निति पाश्चात्या अपि रुष्टा। अमरीका-प्रदत्तामन्त्र-सहायता सपत्नामिति राष्ट्र समन विरोधिनी कृत्वा प्रत्यादिशन्निति तदीयनीतेर्दार्ढ्यमपि स्फुटतामगात्। कुरुदेशे (कोरिया) सिन्धुचीने (हिन्दचीन) च शान्ति-स्थापनायै भारतस्य कार्यं प्रशस्यतममभूदिति भूयानजित आदर। दलित-राष्ट्राणा पक्ष-पोष अत्याचारिणा च विरोध कृत इति साधिता न्याय-प्रियता दुर्बलाना विश्वास-भावना च। 'शान्ति-स्थापना न सुरक्षा-सघटनं (Defence Organization) शस्त्रसग्रहैर्वा भवित्री, साम्राज्यवादस्य (Imperialism) पुजवादस्य (Capitalism) शोषणनीते (Policy of exploitation) चान्तेन, दारिद्र्य-ग्रस्तानामवनताना च विकासेनैव सा समवति। सयुक्तराष्ट्र-सघस्य साफल्य न सबल-राष्ट्राणा प्रभावेण अपितु बहिष्कृताना प्राच्यदेशाना सहयोगेन भविष्यति, निष्पक्षतया सर्वत्रैवान्यायो निराकरणीय, इति भारतस्य घोषणा। सबलानामपि विवादाना मन्त्रणाभि समाधाने विश्वसद्भिरदसीयैः शासकैर्न पाकस्थान (पाकिस्तान) पूर्तगल्ल (पुर्तगाल) वा स्व-प्रदेश-मोक्षाय बलात्क्रियते। अनया तटस्थतानीत्या निबटमागतोऽपि तृतीयो महा-समरो दूरीकृत'। अद्य परिचिनोति विश्वमस्यनीतेर्यथार्थताम् अत शान्ति-स्थापनायै प्रार्थ्यते तस्य योग। श्रूयते तस्य वाणी। समर्थ्यते च तस्य पक्ष.। सर्वत-स्तस्य प्रगतये धनेन, विशेषज्ञप्रेषणेन, प्रशिक्षण-प्रदानेन, यन्त्रागार-प्रतिष्ठापनेन च साहाय्य विधीयते विरोधिभिरपि राष्ट्रै.। कानिचिद् दुराग्रहपराणि राष्ट्राणि वर्जयित्वा सर्वै. सह भारतस्य मैत्री। न तत्र वाद, वर्ग वर्णो वा बाधक। अय साम-देक्तर पक्षस्तस्य नीतेः। अपरस्मिन् तु महती हानिरप्यनया समपद्यत। तथाहि, महत्त्वाकाक्षिभि कुटिल-मतिभिर्बलदर्पितैश्च कैश्चिद् राष्ट्रैस्तस्य तटस्थता नीति-दौर्बल्यप्रमाणमित्येव स्वीकृता। अतोऽतीतेष्वपि त्रयोदशाधिकेषु वर्षेषु नाद्यापि स्यक्त पूर्तगल्लीयैर्भारतस्य प्रदेश। पाकस्थानमपि कूटनयेनाग्लामेरिकासाहाय्येन वृद्धसाहस नाधिकृत कश्मीरभाग मुञ्चति। निरन्तर भारतमपकुर्वदपि तदस्मा-कासर्वं सामदानाभ्यामेव तोष्यते, स्वहितार्थं बलिदानेनापि तत्प्रसाद्यते। जगत-मवगण्यापि तेन सह सन्धिर्विधीयते। राज्ञ्य माया-जालप्रतारितैरतंदैतस्य महान्भागश्चीनैर्हारित। मैत्र्यैव सोऽपि मोचयिष्यत इति मरु-मरीचिका भ्रान्ते-स्तैरद्यापि चीने विश्वासो विधीयते। अस्या नीतेस्तावदय परिणामो यत्—

न यत्र स्थेमानं दधुरति-भय-भ्रान्त-नयना
गलद्दानोद्रेकभ्रमदलिकदम्बाः करटिनः ।
लुठन्मुक्ताभारे भवति परलोकं गतवतोः ।
हरेरद्य द्वारे शिव ! शिव ! शिवानां कलकलः

(भा वि.)

वस्तुतो युगमिदं शक्ति-संतोलनस्य । सर्व-विध-शस्त्रास्त्र-समृद्ध-सैन्यस्य, त्रिविध-चमू-परिवृढ-बलस्य राष्ट्रस्य शब्द एव प्रामाण्यमर्हति लोके । उक्तं च—

अवन्ध्य-कोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्ष-शून्येन जनस्य जन्तुना न जात-हार्देन न विद्विषाबरः ॥

(किरा. १ । ३३)

अतो वर्तमानायां स्थितौ शक्तिसंग्रहाय युद्धस्य प्रत्यादेश एवोचितः । सम्मानस्य रक्षायै कामं रणस्यानिवार्यताऽप्यतेत्, परं यावच्छक्यं तद् दूरीकृत्य देशस्य सर्वतोमुखं निर्माणमेव करणीयम् । तदर्थं च तटस्थतानीतिरेवापेक्ष्यते । अनया च लोकमतमपि स्वपक्षे क्रियते । संकट-काले तदपि सहायकं स्यात् । अनया सह कूटनीतिर्यद्यार्थीयते राजनयानुसारेण सा हितानुबन्धिनी भवेदित्यपि नयज्ञानां मतम् ।

जनतन्त्र-पद्धतिः, तस्या गुणा दोषाश्च

अद्यत्वे राजनीति-शास्त्रस्य (Political Science) दृष्ट्या शासनस्य राजतन्त्रम् (Monarchy) अधिनायक-तन्त्रम् (Dictatorship) प्रजातन्त्रम् (Democracy) शिष्ट-तन्त्रम् (Autocracy) सैन्यतन्त्रम् (Beaurocracy) इत्येवं प्रकारेणानेकाः पद्धतयो निरूप्यन्ते, तासु जनतन्त्र-प्रणाल्येव सर्वाधिका लोकप्रिया। वर्तमाने युगे विश्वस्मिन्नपि विरलान्येव राष्ट्राणि वर्तन्ते, यत्रान्या विशेषेण राजतन्त्र-पद्धतिर्वर्तते। साम्यवादिषु देशेष्वपि न राजतन्त्रमपि तु जनतन्त्रस्यैव विकृतः प्रकारोऽधिनायक-तन्त्रमधिकृतम्। इंग्लैण्डादिषु देशेषु, यत्र राज्ञा न सर्वथाऽभावः, केवलं सामन्त-युगस्यावशेष-सूचकम् राजतन्त्रम्। तत्राऽपि जन-संसदा तेषामधिकारा नियम्यन्ते। विधानानुकूला. शासकास्ते प्रजा-प्रतिनिधिभिर्निर्णीतस्य प्रामाण्यमाचरन्तो हस्ताक्षर-यन्त्रमात्रम् (Signing Machine)। जनतन्त्रस्य परिभाषा नव-जगत् (New world) संज्ञया ख्यातस्यामरीका-देशस्य राष्ट्रपतिना अब्राहम लिंकनेनैवं कृता—

'Democracy is a government for the people, of the people, by the people.'

अर्थात् जनाना हिते जनैर्निर्वाचितानां जनानां शासनं जनतन्त्र इति।

अस्या जनतन्त्रपद्धत्या अनेके गुणाः। अस्या शासनाधिकारः प्रत्यक्षं परोक्षं वा प्रजानामेव। लोकेन स्व-मतदानेन निज-प्रतिनिधीकृत्य प्रेषिता जना एव बहुसंख्यकाः सन्तः, शासनं चालयन्ति। अतो नैवतन्त्र इवास्या व्यक्तिगतं स्वातन्त्र्यमपहन्यते। प्रति-गृहं, प्रतिविपणि, प्रति-चत्वरं शासकदलस्य स्वैरमालोचनं कर्तुं शक्यते, यदा भ्रष्टेषु शासकेषु रुष्टा जनता यथा-नियममान्दोलनं संसदि चाविश्वास-प्रकटनं: शासन-कर्तॄन् पदाच्च्यावयितुमर्हन्ति। प्रत्येकं वयस्को (Adult) नरः नारी वा स्वमतदानस्याधिकारिणी। नात्र व्यक्तेरेवस्या उचिताऽनुचिता वेच्छा निग्रहानुग्रहयोः प्रभुः लोकाः हितमहित वा विमृशन्तीति लोकतन्त्र-शासने ते स्वकल्याणं साधु कर्तुं क्षमाः। विचार-स्वतन्त्रता तदभिव्यक्ति-सामर्थ्यं चास्या. प्रणाल्या विशेषता। अत एव

समाचार-पत्राणा प्रजाना प्रातिनिध्यमाचरता वैशिष्ट्यमत्र । न कोऽपि निरपराधो यथानियम न्यायालयस्य निर्णय विना निग्रहीतु शक्य । तथा कुर्वञ्च शासन-मप्यभियुज्यते । प्रजातन्त्रे विधान सर्वोपरि । तस्य समक्ष शास्ता शासितो वा समान । लिङ्गकृता, जातिकृता वर्ग-कृता वाऽयोग्यता न तत्र विहिता । किमपि कार्यं बहूना विचारेण भवतीति नैकस्येच्छा राष्ट्र स्वर्गं रसातल वा प्रापयितु क्षमा । मन्यासु प्रणालीषु योग्या अयोग्या वा कतिपये जना प्रजाना भाग्य-निर्णयमनुतिष्ठन्तीति भूयान्न्यायावसर । पर नैतत्प्रजातन्त्रे सभवति । योग्या परीक्षिताश्च निर्वाचिता स्युश्चेत्तया व्यवस्था लोक-कल्याणायैव कल्पेतेति न सशय ।

विश्वस्य प्राचीन इतिहास प्रायो राजतन्त्र-प्रधान एव । अतीते सर्वत्रापि सामन्त-वादस्यैव प्रभुत्वमभूत् । राज्ञा महाराजाना सम्राजा च वर्चस्वमक्षुण्णमासीत् । पर लभ्यन्ते तादृशानि प्रमाणानि यै प्रागैतिहासिककाले जनतन्त्रस्य सत्ता सूच्यते । यथा वेदेष्वेव—

'स्वाराज्य वैराज्य पारमेष्ठ्यम्, राज्य महाराज्यमाधिपत्यमयम्' इति । एतेषु स्वाराज्य विशेषेण वैराज्यराजविहीन शासन प्रजातन्त्रमेव सूचयति । एतादृश शासन-प्रधानानि राष्ट्राणि च गणा इत्युच्यन्ते स्म । महाभारतस्यानुशासनिके पर्वणि राजधर्म-प्रसगे युधिष्ठिरस्य गणाना विषये भीष्म प्रति प्रश्नो लभ्यते । बौद्धसाहित्यानुशीलनेन गोतम-बुद्धस्य समये लिच्छवीना शाक्याना मल्लानां वृजीना च गणराज्यान्येवासन् । लिच्छवीना शक्तिमद् राष्ट्र वैशाल्या (इदानी बसाढ इति ख्यातो ग्राम) बभूव, शिशुनागवश्येन बिम्बसार-पुत्रेणाजातशत्रुणा च ध्वस्तमभूदिति प्रसिद्धम् । अलक्षयेन्द्र (सिकन्दर) स्याक्रमणकाले पञ्चनदेषु मद्रका, योधेया, त्रिगर्ता, क्षुद्रका, अन्ये च गणा आसन् । एव भारते जनतन्त्रपद्धति पुराऽप्यासीदिति निर्विवादम् । समुद्रगुप्तस्य जयेन तस्या अन्तोऽजायत ।

अद्य यद्यपि कोणात् कोण विश्वस्य राजतन्त्रस्य शृखला सतडत्कार त्रुट्यन्ति, अतिशयेन लोक प्रिया चैषा प्रजातन्त्र-पद्धति तथाऽपि न सर्वथा निर्दोषा । तथाहि— योग्या अयोग्या वा शिक्षिता अशिक्षिता वाऽत्र प्रतिनिधी-भाव मतदान चाहन्ति । बहुधा छलेन धन प्रदानेन वाऽनर्हा अपि सदा सदस्या भवन्ति । तादृशा स्वार्थमेव साधयन्ति न परमार्थम् । पुनर्बहु-सस्यक-दले शासके सति, तस्यैव नीतिरुचिनाऽनुचिता वा, राष्ट्रस्य भाग्य निर्णय करोति । अत स्खलितान्यपि सभवन्ति । प्रत्येक कार्यं सदा स्वीकृत्या स्यात् इत्यात्यधिके कार्येऽपि कृपा विवादेन विलम्बो जायत । निर्वाचन-व्यवस्थाया घोषणादिषु च महान् अर्थव्यय सपद्यते ।

शासन खलु मन्त्राधीन भवति । न च भूयासो मन्त्र रक्षणे समर्थाः ।

उक्त च—

मन्त्रो योग इवाधीर सर्वाङ्गं सवृतैरपि ।
चिर न सहते स्थातु परेभ्यो भेद-शकया ॥ (शि व २।१९)

भीष्मेणापि युधिष्ठिरकृत प्रश्नमुत्तरयता गणराज्याना दोषा वृद्धि-प्रकाराश्च वर्णिता । यथा—

'चार मन्त्र बलादानं सामदान विभेदनं । दण्ड व्यय-भयोपायं कर्शयन्तीतरेतरम् ॥
तत्र दानेन भिद्यन्ते गणा. सघात वृत्तय । भिन्ना विमनस सर्वे गच्छन्त्यरिवश भयात् ॥
भेदाद् गणा विनश्यन्ति भिन्ना सूपजपा परै । तस्मात्सघात योगेषु प्रयतेरन् गणा सदा ॥
अर्था ह्येवाधिगम्यन्ते सघान बल-पौरुषात् । बाह्याश्चव भेदो कुर्वं ति तेषु सघात वृत्तिषु ॥'

इत्थ गणतन्त्रेषु विविधाना दलाना शासने मन्त्रभेदस्य भय भवति । तदर्थमपि भीष्मेण प्रोक्तम्—

"मन्त्रगुप्ति प्रधानेषु चारज्ञामिथकर्शन । न गणा' कृत्स्नशो मन्त्र श्रोतुमर्हन्ति भारत ॥"

परेषामुपजापेन गणा शत्रुवश यान्ति । तै कृताद्युपप्रवाद् भय महदुत्तिष्ठति । उत्कोचादिबाहुल्येन, प्रमादेन, चरित्र-दोषाच्च गणतन्त्राणा दोषा उद्भवन्ति । एतान् दोषानभिवीक्ष्य स्पष्टीभवति जनतन्त्रस्य दौर्बल्यम । पर शिष्टेषु ततोऽप्यधिका उपाधय इति जनं प्रजातन्त्र-प्रणाल्येव विशेषेण स्वीक्रियते ।

अद्य लोक-तन्त्र स्वीकृत्य राष्ट्रं रक्षत्याश्रितोन्नति कृता । अमरीका देश, रूस, मिश्र, भारतम् अन्ये च प्रजातन्त्र एव नवनिर्माण व्यधु । पर तत्साफल्याय जनाना शिक्षा, स्वकर्तव्य प्रति जागरूकता, दृढमनुशासनम्, योग्यतमाना परीक्षिताना च हस्तेऽधिकार, आलोचकाना साध्वी सख्या चानिवार्या । अन्यथाऽवसरवादिना हस्ते गत शासन राज-तन्त्रादप्यतितमा क्लेशद भवति ।

भारत-चीन-सीमा-विवादः

प्राच्य देशेषु भारतवर्षवत् चीन देशोऽपि नितरा प्राचीन सभ्य उन्नतश्च। तस्यापि संस्कृतिरतिपुराणी समुन्नता च। गुप्तकाले कुमारजीवशान्तिरक्षित प्रभृतयो महापण्डितास्त देशमगच्छन् बुद्धस्य सदेश च तत्र समदिशन्। चिरादेव भारतेन सह तच्छासकाना मैत्री सम्बन्ध एवाभूत्। भारतस्य स्वातन्त्र्यलाभानन्तर प्रधानमन्त्री जवाहरलालोऽपि चीनाना स्वागतभाजनतामगात्। तत्रत्यो मुख्यामात्यश्चाउ एन-लाई नामा चास्माक देशस्य यात्रामन्वतिष्ठदस्मत् सत्क्रिया चागृह्णात्। सर्वत 'भारतीया-श्चीनाश्च भ्रातर' (*हिन्दी चीनी भाई भाई*) इति घोष प्रासरत्। *विश्वेन ज्ञातम्, द्वौ* महादेशौ भिन्नादर्शावपि मिथ सख्याबद्धौ जगति किमपि नव परिवर्तन करिष्यत।

चीनस्य प्राचीना शासका विशेषेण माञ्चूवश्या सम्राजोऽतिविस्तारवादिन साम्राज्य लोलुपाश्चासन्। पर गत शताब्दया सर्वत प्रवृत्ते प्रजातन्त्रवादे डा० सनयात सेन नाम्नो नायकस्य नेतृत्वे तत्रापि क्रान्तिर्जाता राजतन्त्रस्य समाप्त्या च सह जनतन्त्र प्रतिष्ठित। गत-महायुद्धानन्तर च महति गृह-कलहे साम्यवादिना विजयेन चीन-देश साम्यवादप्रणालीमनुरुन्धे।

भारतस्योत्तरसीम्नि पृथिव्या पृष्ठदेशत्वेन (ससार की छत) ख्यातस्त्रिविष्टप-देश (तिब्बत) चिरन्तन बौद्ध धर्मानुगामी च। कदाचिदय चीनैरधिवृत्त परचाच्च स्वातन्त्र्यमभजत्। ब्रागल शासन-काले तत्र भारतीया व्यापारादि सौकर्यार्थ बहूनधिकारानभुञ्जत। अस्माक सैन्य-गुल्माश्च तत्रावसन्। विस्तृता पर्वत शृखला त देश-मस्माद् विभजते। १९१४ तमे खीष्टाब्दे शिमला नगरे ब्रागल चीन तिब्बत-प्रतिनिधि-सम्मेलने मेकमोहन-सज्ञेनाग्न प्रतिनिधिना निर्धारिता सीम रेखा स्वीकृताऽसीत्। सोऽयमिद गिरि-मध्यवर्ति नितरां दुर्गम मार्ग हीन च। लद्दाख क्षेत्रे 'चुशूल' सज्ञमेवमेव वातास्थानम् (*हवाई अड्डा*)। वस्तुतो भारत-सर्वकारेण चीन मैत्री विश्वस्तेन न तस्मिन् भागे सुरक्षा-व्यवस्था व्यवस्थापिता।

यावत् त्रिविष्टप देश स्वतन्त्र आसीत्, तावन्नान्वभूमत किमपि काठिन्यम्। पर यदा चीनै सैनिकाक्रमणेन त्रिविष्टपो वशीकृत, तदवधि विषादारम्भोऽपि

जात । चीनाक्रमणस्य रूसवर्जं सर्वैरपि देशैर्विरोधे कृते भारत-शासकैर्घोषित यत् त्रिविष्टपश्चीनस्यैवाङ्गमिति । एतेन वर्धितोत्साहैश्चीनैं पूर्णतया त्रिविष्टप आयत्तीकृत । पर तदा स्वायत्त-शासन तस्य स्वीकृतम् । अयमेव राजनैतिक प्रमादो भारतस्यापि शिरोव्यथाया मूलम् । काममद्य भारतीया प्रधानामात्या न स्वत्रुटिं स्वीकुर्युं परमयमभूद् राजनैतिकोऽधम्योऽपराध । तेनैव भारतीय क्षेत्रोपरि चीनाक्रमण सुकरमभूदिति स्वय क्रोतेय विपत् ।

न चेयमाक्रान्तिराकस्मिकी, अपि त्वायोजित-पूर्वा । अत एव चैनेषु मानचित्रेषु विस्तृत भारतीय क्षेत्र चीन सम्बन्धितया दर्शितम् । बहुश सीमा निर्धारणाय चोदिता अपि चैनाधिकारिणोऽवहेलामवाचरन् । त्रिविष्टपे स्व योजना सत्यापयितुं तैरनुष्ठितेभ्य कार्येभ्यो भीतास्त्रैविष्टपा शासका भारते शरणमगृह्णन् । अधुना भारतीयाना त्रिविष्टपे व्यापारादि कार्यं निरुद्धम् । शक्ति-मद-दृप्ताश्चीना अस्मान् विस्तारवादिनो वदन्ति, स्वय च तैर्विस्तृत भारतीय क्षेत्रमधिकृतम् । एकदा रक्षासैनिकाना गुल्मोऽप्याक्रान्तो निर्दय न हता निश्शङ्का सैनिका ।

अद्यापि भारतस्य शासका न प्रत्याक्रमण विदधति, पर्यन्त-भूमिषु मार्गादिनिर्माणं रक्षा प्रयत्नानाचरन्ति । परमधिकृत-क्षेत्राणा मुक्तये न किमपि सम्प्रति प्रतिविधातु शक्यते युद्ध-भीते । तेषामुद्यमो न खल्वमैत्रीपूर्णम् । इत साम्यवादिनो भारतीया अपि चीने समवेदना भजन्तोऽन्त कोप समाचरन्ति । अन्ये गणास्तु (*Parties*) त प्रति कठोरा प्रतिक्रियामर्थयन्ते ।

अधुना स्थितिरियमति विषमा । युद्धार्थिन प्रमोदन्ति दर्शं दर्शमिम सीमाविवादम् । भारतीया प्रजा अनुभवन्ति कातर्यं न प्रतिविदधता शासकानाम् । राजनैतिकानि दलानि समस्याया अस्या अपदेशात् सभावयन्ति विजय निर्वाचने । शासकाश्चास्माकमुभयत पाशारज्जु मध्ये पतिता । स्व क्षेत्र-रक्षणाय प्रत्याक्रान्तु चेष्टेरन् चेत्स्वल्पमपि युद्ध महासमरे विपरिणमेत् । उदासीरन् चेत्क्षुब्धा प्रजा वदर्थयेयु तान् । सभावितस्य तृतीय-समरस्य क्षेत्र माभूद् भारतमित्यपि तेषा प्रयास । तथा सति देशस्यैव विध्वसो भवेदित्यवाञ्छनीयमेतत् । पश्यना सर्वेषा स्वक्षेत्रस्य परहस्त गमन राष्ट्रीयसम्मानस्यैव हानिकरम् । पर यदि न समाधीयते विवादोऽय साम्ना, दुष्परिणामोऽय सघर्षस्य परिणमेत्सर्वाभि विरोध रूप । सस्कृततमयो प्रान्ततमयोर्महतोर्देशयोरनयोर्मैत्र्यव लोकक्षेमाय कल्पेत । पर शान्तिकामनोभयतस्त्यागमपद्यते । दुराग्रहे तु मृगतृष्णेव समाधानाशा ।

स्त्री-शिक्षा कीदृशी भवेत् ?

अय प्रश्न इदानी भारतीयाना समक्ष भूयोभूय आयाति यत् स्त्रीशिक्षा कीदृशी स्यात् ? कथ तावदस्योद्भूति ? नाभूत्प्राचीनकाल एतादृशी समस्या । तदा बाला इव बालिका अपि पाठ्यन्तेस्म । गार्गी, घोषा, विश्ववारा, लोपामुद्रा चैता नार्यो ब्रह्मवादिन्यो मन्त्र द्रष्ट्र्यश्चासन् । जनक-सुलभोपाख्यानाच्च सुलभाया वैदुष्य स्फुटी-भवति । महाभारते कुन्त्या विदुलायाश्च यादृश चरित्र चित्रितम्, रामायणे च कैकेयी तथा सीता यादृश्यो वर्णिते, तदपि तासा साधु शिक्षितत्व साधयति । आद्यशकरा-चार्यस्य मण्डनमिश्रपत्न्या सकाशात्पराजय, 'या वैदर्भगिरा वास कालिदासा-दनन्तरम्,' विजयासम्बन्ध इयमुक्ति, नीलोत्पलदलश्यामा विज्जिका मामजानता, वृथैव दण्डिना प्रोक्त सर्वशुक्ला सरस्वती ॥' इति सरस्वती प्रतिमूर्ति-विज्जिका-प्रशस्ति, 'काले माघ मासे मासे यश्च शकास वदति सकाशम् । उष्ट्रे लुम्पति र वा प वा, तस्मै दत्ता विकट-नितम्बा ॥' इति विकट-नितम्बाया वेदोत्तिस्तिरुमलाम्बि-काया प्रौढ-गद्य निर्भरा वरदाम्बिका परिणयचम्पू सर्वमेतत् स्त्रीणा शिक्षितत्व साध्नोति । तास्त्वतु षष्टि कलाना ज्ञान विज्ञान साहित्य कामशास्त्र च साध्वध्यैयत । राजकुमारीणामभिजातकन्याना च शिक्षणाय समानिता आचार्या न्ययुज्यन्त । साधारणेषु जनेषु कीदृशी व्यवस्याऽभूदिति न प्रमाणमद्योपलभ्यते । परमनुमीयते यत्तदर्थमपि कश्चित्प्रबन्धोऽवश्यमेवासीत् ।

मध्ययुगे विशेषेण यवनागमनात्प्रभृति नारी-शिक्षा निरुद्धाऽभवत् । तेषा समाजे स्त्री वासना शमनस्य साधनम् उपभोगसामग्री चेति विजय-मद-मत्ता अनत्या' पन्या सबलात्कारमदूषयन्निति तारा पितरो बाल्य एव पाणिमग्राह्यन् । तस्य परिणतिरतितमा समाजघातिका समजनि । ययाऽन्नस्याः स्त्रिय सर्वथाऽज्ञानान्धकारे न्यमज्जन् । केषामेव विचारवता सन्तति साक्षरा सती शिक्षितेति सम्मानमभजत् ।

आङ्गलानां शासनकाले नव-शिक्षा-पद्धति-प्रसारेण सहैव कन्याना शिक्षणस्यापि प्रश्न समजायत । प्राचीन-परम्परानुयायिनः 'न स्त्री स्वातन्त्र्यमर्हति' इति वचने -

'स्त्रीशूद्रौ नाधीयाताम्' इति कथने च श्रद्दधाना सर्वथा नारी-शिक्षाया विरोधिन । प्रगतिशीलास्तु पुरुषाणामिव स्त्रीणामपि विकास समाज-कल्याणाय मन्वानास्तासा शिक्षाया पक्षपातिन । वस्तुतो न कोऽपि सभ्यमन्यो नारीमशिक्षितां दिदृक्षेत् । जननी-भगिनी, पुत्री गृहिणी चेति बहु-व्यक्तित्वशालिनी नारी शिक्षाऽभावे कथ समाजस्यो-न्नतमङ्गं स्यात्, कथ वा कस्यचिच्छिष्टस्य विदुषोऽर्धाङ्गिनी पद भजेत् । शिक्षितैव पुरुषस्य सह धर्म-चारिणी सखा जीवन-सहचरी च भवितु समर्था । सैव सुदक्षा गृहिणी गृह लक्ष्मी-विलासोचित विधातु प्रभविष्णु । मोद्यमेवैतद् यदि सुशिक्षिता नारी गृह-सचालने ऽसमर्था मन्येत । न च केवल शिक्षा तासा शील भग-हेतुः । किं नाऽशिक्षान्धकार-मग्ना अनाचार दूषिता जायन्ते ? शिक्षा-प्रभावात्तु तासा विवेको जागर्ति, यस्य प्रसादात् चरित्र-भ्रंश-दोषांल्लम्पटाश्च पुरुषान् साधु परिचेतु क्षमा स्यु । नार्या धैर्यमात्मबल साहस च जागृत स्यात्, पथो न यथा स्वेच्छया बलाद् वा भ्रश्येत ।

पर शिक्षेय कीदृशी देयेति प्रश्नोऽद्यापि शिष्यति । वस्तुत स्त्रीणा चारित्र-भ्रंशशकेमा पाश्चात्य-शिक्षामधिकृत्यैव, यत्र विषयाणामभ्यासो विधीयते, शीलसम्बन्धे तूदास्यते । माहशमद्य शिक्षा-सस्थाना वातावरण विशेषेण सह-शिक्षा-प्रधानानाम्, तत्र छात्राणामुच्छृखलताऽनुदिन वर्धते । ते विद्याध्ययनेन सार्धं पत्नी-नामन्वेषणमपि विदधति । मार्गे सहपाठिनीरनुधावन्ति, ता. श्रावयन्तोऽश्लीलानि गीतानि गायन्ति, विशेषेणाकर्षकाणि वस्त्राणि परिदधति, चलचित्रादि प्रदर्शनेन ताः प्रलोभयन्ति । एतेन शालीना अपि कन्या शीलाच्याव्यन्ते । महाविद्यालयेषु विश्व-विद्यालयेषु तु स्थितिरतितमा दूषिता यत्र प्राध्यापका स्वय स्व-शिष्या काम-पिपासा-साधनानि विदधति । ताश्च वराकयस्तान् प्रसादयितु परीक्षाया भूयसोऽङ्कादव लब्धुमात्मानमपंयन्ति । यदि कन्याना सरक्षका शिक्षामेव तासा दूषिका मन्येरस्तर्हि कस्तेषा दोष ?

विद्यार्थिन्योऽपि पतिवरा इव कल्पितशृगारा कटाक्षपातै परिहासैश्चाह्व-यन्तीव सतीर्थ्यानध्यापकाश्च । चलचित्राणा वातावरणस्य च तादृश प्रभावो येन सर्वत्र तादृच्छृखलता लभ्यते । यदा—

कृश, काण, खञ्ज, श्रवणरहित पुच्छविकलो
व्रणी, पूयस्निग्ध क्षुमि कुल शतैरावृत-तनु ।
क्षुधा क्षामो जीर्ण पिठरक-कपालार्पित-गल
शुनीमन्वेति श्वा, हतमपि मदनं मदयत्येव मदन ॥ (भ श.)

का कथा तर्हि सशावकुक्कुटाण्डभोजिना यूचिका पिच्छिल मनसां यूनाम् । इत्यमिय पाश्चात्यशिक्षा मदरूपावयिष्टे । तस्मिन् कन्या केवल गीताभिनयणादिक

पठेयु, पूर्ववद् वा 'असूर्यम्पश्या' लिष्ठेयु ? नैतत्सभाव्यतेऽस्मिन् युगे। यदा तासा कृत सर्वाणि क्षेत्राण्युन्मुक्तानि, यदा ता स्वसाहसेन बुद्धयुत्कर्षेण च पुरुषान् पराजयन्ते, सैन्यसचालने, विमानचालने, मल्लयुद्धे, सागरतरणे, यान्त्रिकविद्याया प्राड्विवाक-व्यवसाये च तासा तुल्या गतिस्तदा कथ ता दर्वी हस्ताश्चुल्ली घमन एव काल नयेयु ? केषाचिद् विदुषां मत यत् स्त्रीणा कृते पाठ्यक्रम एव पृथक् स्यात्। भाषाणा ज्ञानेन सह कला, शिल्पम्, साधारणी चिकित्सा (First-aid), पाक-क्रिया, गार्हस्थ्य विज्ञानम् (Domestic Science), गणित, व्यवहारज्ञान चेति तासा शिक्षा विषये सर्वं समावेश्यम्। नारीणा दाम्पत्यं मातृत्व च यथा सफल भवेत्तथा ता शिक्षणीया। यतो न तासा कार्यक्षेत्र पुरुषाणामिव। तासा विषयेषु एतेषु प्रतिभाया विकास साधु सभवति। शालीनता गृहकार्यदक्षता च स्त्रीणामनुपेक्षणीया।

वस्तुतो नात्र काचिद् विप्रतिपत्ति। नारीणा साफल्य मातृत्व एवेति प्राय सर्वा एव ता दाम्पत्य स्वीकुर्वन्ति। अतो यथा ता सुख सकौशल च गार्हस्थ्यमाचरेयु-स्तथा शिक्षणीया। कला शिक्षयित्वाऽर्थार्जनसामर्थ्यं तासामवश्यमापादनीयम्, येन सङ्कटकाले न पराश्रयणमपेक्षित स्यात्। स्त्रियो हि प्रायोऽर्थकार्येणैव मार्ग-भ्रष्टा भवन्ति। तासा शिक्षा चरित्रनिर्माणेन सह व्यवसायोपयोगिनी स्यात्। पारयु विशेषेण प्रतिभावत्यस्ता अन्यानपि विषयान् शिक्षितुमर्हन्ति। न तत्राबरोध कार्य। कला, यमशिक्षा, इतिहास, विविध भाषाणा परिचय, याम शास्त्रम्, व्यवहार-शिल्पम्, पाक क्रिया, आमुत (अचार मुरब्बा आदि) प्रभृति वस्तु-विज्ञानम् तासामभी विषया अनिवार्या स्यु। भूमि धराणा कन्या कृषिमुद्यान शिक्षा चाभ्यस्येयु। सलिनकर्नागु स विशेषपरिचय तत्राधिक प्रयतेरन्। यौन विज्ञानस्य सामान्य ज्ञानमपि तासा सर्वासा स्यात्। एतादृशी शिक्षा स्वस्थे क्षेत्र कृता सती नारीणा क्षेमाय कल्पेत।

वर्णाश्रम-व्यवस्थाया उपयोगिता

ऋग्वेदस्य दशमे मण्डले चतुर्णां वर्णानां विराट्पुरुषाङ्गत्वेन वर्णनं लभ्यते—

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद् वैश्यः, पद्भ्यां शूद्रो अजायत ॥

आर्यैः समाजस्य वर्ण-चतुष्टये जीवनस्य च चतुर्ष्वाश्रमेषु विभाजनं कृतम् । वर्णेषु ब्राह्मणः समाजस्य मुख-स्थानीयः, क्षत्रियश्च बाहु-स्थानीयः, वैश्यो जंघा-स्थानीयः, शूद्रश्च चरण-स्थानीयः, एवमाश्रमेषु जीवनस्य प्रथमः कालो ब्रह्मचर्यस्य, द्वितीयश्च गार्हस्थ्यस्य, तृतीयो वानप्रस्थस्य चतुर्थस्तु संन्यासस्येति सकलस्यापि शतवर्षात्मकस्य पुरुषायुषस्य पूर्णो विभागः सोद्देश्यः ।

अद्येयं व्यवस्था प्रायो निन्द्यते लोकैः, अनुपयोगिनी हानिकरी च साध्यते । परं वैज्ञानिकीयं न तैः साधु परिचीर्णते । वस्तुतो वर्ण-व्यवस्था समाजवाद आर्याणाम् । तथाहि विद्याया अध्ययनमध्यापनं यजन याजन प्रतिग्रहो दानं चेति ब्राह्मणस्य कर्तव्यानि । शासनं, प्रजाना रक्षणं बलकार्यं क्षत्रस्य । कृषि र्वाणिज्यं पशुपालनं चेति वैश्यस्य कर्माणि । वर्णत्रयस्य सेवा स्वजातीय-कर्मणामनुष्ठानं च शूद्रस्य कार्यं निर्दिष्टम् । ब्राह्मणस्य मुखस्थानीयता तत्कर्मापेक्षया । तथाहि विद्याया अध्ययन-मध्यापनं वा यज्ञादि च मुखेनैव क्रियते । तस्य स्वय ज्ञान-ग्रहणं ज्ञान-प्रदानं मस्तिष्क-कार्यं बौद्धिकता प्रकटयति । बुद्धिबलस्य शरीर-बलापेक्षया श्रेष्ठता स्वीकृतोपकारकत्वात् । शारीरं तु पाशवं पर-पीडनेऽपि प्रभवतीति ततो निकृष्टम् । पर समाज-रक्षण-कार्ये-मधिकारयुक्तं नियन्त्रितं सत् कल्याणाय कल्पतेऽनियन्त्रितं तु दर्पान्धतया पीडनं कुर्यात् । अतो बुद्धिबलस्य शारीर-बल-नियामकत्वम् । वस्तुतः केवल बुद्धिबलं शारीरं वा न श्रिये । द्वयोः समन्वय एव समाजस्य क्षेमाय । यथोक्तम्—

यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह ।
तं लोक पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ॥

परं न केवला बौद्धिकता देहबलं वा श्रेयसे संभवति। अन्नाधीना. खलु प्राणिना प्राणा। व्यवहाराश्चार्थ-साधना। अत एव समाजस्य पालन कृषि-वाणिज्याद्यधीनम्। तत्कर्म च वैश्यानाम्। यतोऽध्ययनाध्यापनादिकर्मणि न वणिग्वृत्ति-रुचिता, रक्षणस्य चोत्तरदायी न कृष्यादेरतिरिक्तं भारमर्हति व्यवस्था-भङ्गात्। वंशानुक्रमागते च व्यवसाये नैपुण्योदभव इति सततेरपि पैतृकोद्योग एव प्रवृत्तिर्विहिता। समाजस्य क्षेमाय शमंणे च चतुर्थ-वर्णस्य शूद्रस्य स्वीकृतिः। विद्या-सत्तादि-विहीनोऽयं वर्गः सेवा-धर्मेणैव नि.श्रेयसाय कल्पते।

बुद्धि-कर्म भस्तिष्कस्य, तच्चोत्तमाङ्गमिति ब्राह्मणस्याग्रहितत्वम्। परं न तस्य धनार्जनादिना सम्बन्ध। तत्र प्रवृत्तो हि स स्वकर्मण्युदासीत। क्षत्र च क्षतात्त्राणम् तत्पौरुषाधीन तदर्थं बाह्वोरेव प्रयोग इति बाहु-स्थानीयो राजन्य.। न तस्य दानादि-ग्रहणं तपश्च नियत कर्म। दानस्य पौरुष-विपरीतत्वात्तपसश्च दौर्बल्यावहत्वात्। शिक्षा रक्षा चेत्युभय समाज-भद्रायावश्यकम्। अतएव ब्रह्म क्षत्रयो परस्पर सह-योग उचितो मत।

जंघे यथा गमनादि-व्यापार-प्रवर्तिके, ताभ्या विना पङ्गुरेव प्राणी; तथैव कृष्यादिमविना न सामाजिका व्यापारा. संभवेयुरिति लोकयात्राया आधार-भूतो वैश्य-वर्गः। पादयोर्वपुष स्थितिरिति शूद्रस्य समाज-स्तम्भत्वमिष्टम्।

इय वर्ण-व्यवस्था जन्म-मूलाऽऽसीत् कर्म-मूला वेति विचिकित्साया द्विविधे अपि प्रमाणे उपलभ्येते। 'चातुर्वर्ण्यं मया सृष्ट गुण-कर्म-विभागशः' इत्यत्र 'मया' इति पदेनेश्वर-कर्तृकत्वं वर्ण-चतुष्टयस्य मन्यते।

नोपतिष्ठेत्य पूर्वां नोपास्ते यश्च पश्चिमाम्।
स शूद्रवद् बहिष्कार्यः सर्वस्माद् द्विजकर्मण.॥'

इति मनुवचनात् 'स्त्री-शूद्रौ नाधीयाताम्' इति सूत्रकारोक्तेश्च जन्म-मूलता वर्णाना सिध्यति। परं महाभारते यक्ष-युधिष्ठिर-सवादे वृत्तवत एव ब्राह्मणत्वोक्तै विश्वामित्रस्य ब्रह्मण्य-प्राप्त्युद्योगोपाख्यानाच्च कर्मणैव वर्णाना स्थितिः प्रमाणी-क्रियते। गीतायां चतुर्णामपि वर्णाना स्वाभाविकानि कर्माण्युक्तानि। यथा—

ब्राह्मण-क्षत्रिय-विशां शूद्राणां च परन्तप।
कर्माणि प्रविभक्तानि स्वभाव-प्रभवैर्गुणैः॥
शमो दमस्तपः शौच क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्म-कर्म स्वभावजम्॥
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वर-भावश्च क्षात्र-कर्म स्वभावजम्॥

कृषि गो-रक्ष्य वाणिज्यं वैश्य कर्म स्वभावजम् ।
परिचर्यात्मक कर्म शूद्रस्यापि स्वभावजम् ॥ (गीता १८ । ४१-४४)
एतेन तु वर्णाना जन्मजातत्व सिध्यति ।

एवमेव चतुर्णामाश्रमाणा व्यवस्थाऽपि विचार-पूर्विकैव । जीवनस्य विशेषेण तिस्र एव दशा भवन्ति—कौमार यौवन जरा च । एतासु प्रथमा निर्माणात्मिका, द्वितीया विकासात्मिका, तृतीया च ह्रासात्मिका । सृष्टि-यज्ञ इवास्मिन्नपि जीवन-यज्ञे शैशव वसन्त यौवन ग्रीष्म, जरा च शरत् । आदौ सप्त-धातूना वृद्ध्या पुष्ट्या च सह बुद्धेर्मस्तिष्कस्य मनसश्च विकास सभवति । तदर्थं शक्ति सचयस्यावश्यकता । यथा घटे पूर्यमाणे एव छिद्र स्याच्चेत् सलिलस्य निष्क्रमणे न स पूर्येत । एवमेव यौवन-प्राप्ति-पर्यन्त शक्तीना विकासे जायमाने तासा रक्षणमपरिहार्यम् । अत पच विंशति-वर्षाणि यावद् ब्रह्मचर्यस्य कालो निश्चित । अस्मिन् मनो बुद्धि शरीराणा विकासादतिरिक्त न किमपि चिन्तनीयम् । विकासे पूर्णे सति गार्हस्थ्ये सचिताना शक्तीनामुपयोगोऽर्थं कामयोरुपभोगे । सन्तति प्रजननेन सृष्टेर्विस्तार पितृणान्मुक्ति चापाद्य निःसगतया विषयाणामुपभोगोऽस्याश्रमस्य धर्म । न जातु काम कामानामुपभोगेन शाम्यतीत्युक्ते. शनैः शनैर्विषयेभ्यो मनस उपरामाय वानप्रस्थाश्रम रोढ्योऽभूत् । पुनरादौ गृह भार विन्यस्य धर्मार्जनाय विराग ग्रहणमस्य धर्म । पचाशद्वर्षोपरि प्रवृत्तस्यास्याश्रमस्य तपसि लोक कल्याणायात्मन श्रयसे चोपयोग । पञ्चसप्तत्युत्तर तु शिथिलानामिन्द्रियाणा सर्वथा विषयेभ्य उपरामान्निवृत्त-कर्मणोऽधिगतब्रह्मज्ञानस्य परम पदाधिगतये प्रयास एव सन्यास । ब्रह्मचर्य कालेऽध्ययन प्रवृत्त्या न जनाना जीविका चिन्तोचिता । गार्हस्थ्यस्य पचविंशति वर्षेषु चार्थार्जन कामोपभोग-प्रवृत्तेरवसर कारितोपपत्ति । पचाशदुपरि च धनार्जनादि-कार्येभ्यो विरतेर्नवानामागन्तुकाना कृते कर्मक्षेत्र मुक्तमभूत्, तदूर्ध्वं ब्रह्मचर्य-पालनेन च सन्तति-निग्रहोऽप्यनायासेन साधित ।

इत्यमवलोकनेनार्याणा वर्णाश्रम-व्यवस्थाया वैज्ञानिकता सूच्यते । प्रत्येक जनस्य वृत्तेर्निर्धारणात् कस्याऽपि जीविका हरणस्य शकैव नैवमभूत् । एतेन न सम्प्रतीव कार्यार्थं जना द्वाराद् द्वारमभ्राम्यन् । आश्रमैश्च नियमिता समाजस्य जीवन-सस्था । कौमार एव विवाहे सति वार्धक्य यावत् सतति जनयता यावज्जीव चार्थार्जने ससक्त-मनसा क्व शान्ति, सौख्य वा स्यात् ?

केचित्तु वर्ण-व्यवस्था सामाजिकान्यायहेतुमाश्रम-व्यवस्था च परोपजीविता-मूल वदन्तो निन्दन्ति ताम् । तेषा मते वर्ण-व्यवस्थयैव समाजे जनितोत्तमाधम-भावना । ब्रह्मचारिणो वानप्रस्थाना सन्यासिना च निष्प्रयोजनो भारो गृहस्थाना स्कन्ध आरोपित । कालक्रमेण तैरेको भिक्षोपजीवी वर्ग एवोत्पादित । वस्तुत आर्याणा

भावनाऽऽसीत् त्यागपूते भोगे। धनमर्जयतो नरस्य दानादिना चान्यत्र प्रयुञ्जतो न सीमातिरिक्त द्रव्य सचीयते। प्रकारान्तरेण तत् समाजस्यैव पार्श्वं आगच्छति। एवमभाव ग्रस्तानामप्यभाव-निवृत्ति सम्पद्यते। ब्रह्मचर्य-वानप्रस्थाभ्या भोगेऽपि नियन्त्रण कृतम्, तेन बहु-प्रजा-मूला निर्ऋतिर्नापीडयत्। सामाजिक-वैषम्यस्य मूल स्वकर्तव्य-परित्याग।

'स्वे स्वे कर्मण्यभिरत ससिद्धि लभते नर.'

इति विस्मृत्य लोका पराजीविकामपहरन्ति। अतएव वृत्ति शल्यम्। यदा ब्राह्मणा स्वाध्यायादि-कर्म परित्यज्य चर्मविक्रय रस-व्यवसाय चाचरन्त शूद्राणां वैश्याना च जीविका हरन्ति, तदा तेऽपि किमप्यन्यत्कार्यमाजीविकायै समाचरन्ति। वाणिज्य-क्रिया वणिजो भृति-कर्मणि (नौकरी) क्षत्रिया व्यापारे शूद्राश्चाध्यापने सज्जन्त इति स्वकर्मलोप एव वैषम्यस्यासान्तेश्च मूलम्। यदा च व्यापारादे रक्षक शासन स्वयमेव वाणिज्यमाचरेत् कथ न तदा वृत्ति-शल्यम् (Unemployment) उदियात्? यदि सर्वे वर्णा स्व स्वमेव कर्म शुचितया (ईमानदारी) समाचरेयु, यथा नियमसाश्रम-व्यवस्थाया पालन च विदध्युस्तर्हि नयमुपलभ्यमाना विशृखलता वैषम्य च समापतेदिति न वर्णाश्रम-व्यवस्था हानिकरी दूषिता वा। तस्या अयथा-पालना एव तद्दोषमूलम्।

ग्रामोन्नतिः

आसीत् कश्चित् कालो यदा ग्रामीणाना विषये केनचित्कविना लिखित-मासीत्—

तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि ।
अल्पव्ययेन सुन्दरि ग्राम्यजनो मिष्टमश्नाति ॥

काममत्र समीक्षका ग्राम्यत्वदोषं पश्येयु पर निराडम्बरस्य ग्राम्यजीवनस्य ध्वनिरत्र विद्यत एव । नगराणा कृत्रिमसभ्यताया प्रभावान्मुक्ता भारतीया ग्रामा अभूवन् स्पृहणीयनिवासा, स्वगुणै. । कृषिसमृद्ध्या गृहोद्योगैश्चात्मावलम्बिनो ग्रामीणा श्रममय जीवन यापयन्त शान्त्या कालं नयन्ति स्म । राजानोऽपि तत्र गत्वा शान्ति-मेवामजन्त । राजनीति-कृत कोलाहल न तानस्पृशत् । कर्मारा, रथकारा, स्वर्णकाराः, भिषज., सूचीकारा, वर्णिनश्च सर्वविधा व्यवसायिनो ग्रामेऽवसन्निति राष्ट्रस्य स्वतन्त्रैकिका (Unit) सोऽभवत् । राष्ट्रस्य ग्रामभाग एव जनपदसज्ञया प्रसिद्धि-मगमत् । पुरवासिभिर्नृपै सह तेषा सपर्को यदाकदैवाभूत् । उत्पादनस्य षष्ठमश कर-रूपेण प्रदाय शिष्ट ग्राम्या उपायुञ्जेति न ते दारिद्र्यदुर्गता अवर्तन्त । प्रधानतंवात्र ग्रामाणाम्, नगराणि च कतिपयानीति न समभवत् तेषामुपेक्षा । स्वातन्त्र्यात्पूर्वं समग्रे भारते ग्रामसख्या लक्षसप्तकमासीत् । यद्यपि यवनानामधिकारात्प्रभृत्येव तेषा स्थितौ ह्रासस्यारम्भ प्रवृत्तः परमाग्लशासने ग्रामाणा दशा शोचनीयैव जाता । कूटवणिज इमे राजनीत्या व्यापारेण चोभयथाऽपि देशमलुण्टन्निति स्वयन्त्रनिर्मित-वस्त्रशर्करादि विक्रयाय ग्रामाणा वसनोद्योग गुडव्यवसाय च नष्टप्राय चक्रुः । पूर्वं सर्वलोऽपि विनिमयोऽन्नेनापि सम्भवदिति नाऽभूवन् ग्रामीणा धनस्यावश्यकताम् । राजकरोऽपि तदाऽन्नद्वारेणाप्यंत । परमाग्लै सर्वेष्वपि कार्येषु मुद्राया एव व्यवहार-कृत इति जानपदा स्ववस्तुविक्रयाय नगराणि गन्तुमबाध्यन्त । तत्र लाभजीविभि-र्वणिग्भि कूटतुलाभि कूटवर्तकै (बाट) च स्वल्पमूल्येन तेषा श्रमफलमक्रीयत भूयसा च व्यक्रीयत । एव लाभाशेन वञ्चिता कृषका घोरे दारिद्र्य-सागरेऽमज्जन् । नगराणा

सम्पर्केण तेषु कृत्रिमतापि प्रसृता । पूर्वं ग्रामेषु लोकाः शुद्ध सद्योदुग्ध स्वादीयस्तक्रं पुष्टिद हैयगवीन सतीन शिम्बिका-वृन्ताक-मेथिका राजिका-कूष्माण्डगोजिह्वादि-शाकान् विविधानि च फलान्युपभुज्य पौराणा स्पृहणीयस्वास्थ्या अभूवन् । दुग्धस्य घृतस्य वा विक्रय सुतस्य कन्याया वा विक्रयेण तुल्यममन्यन्त । तदवधि यक्ष्मसदृशा रोगा नाभवन्कर्णगोचरा अपि । पर नागरिकाणामर्थपरता तेषामात्मनि सक्रान्ता तानपि क्षीरादिवञ्चितान् व्यधात् । तेषा स्थान दुर्व्यसनानि लम्पटता चा ऽभजत् । अधुना दुग्धादि नगरेषु विक्रयार्थं गच्छति, ग्रामीणा स्वय तक्रायापि लालायन्ते । पूर्वं पञ्चायतनेषु तेषा विवादा समाधीयन्त, परमिदानी न्यायालयास्तेषामालया, अदिरालया विद्यालया, कन्हा एव क्रीडा, दुर्भिक्षाणि मित्राणि, रोगा बन्धव, दौर्बल्य सखा, ईतयोऽतिथय, अकालमृत्युर्ज्ञाति, कीटाणव सहचरा, अभियोगो व्यवसाय, पैशुन्य विनोद, पराभिषग अमोदावसर । क्वाद्य सा ग्रामश्रीर्यस्या अवलोकनमात्रेणामोदत म्लानमपि मन ? इतोऽवकरसकर, ततो गोमयकूटम्, मध्येमार्गं विस्रगन्धा प्रणाली, रथ्यापालीषु विष्ठाऽऽविष्टा । अविशन्तमेव मक्षिकाणा मशकाना दशाना च सेनाऽभिपेणयतीव । गृहाणि च मृत्तिकाकुड्यानि तृणाच्छन्नपटलानि, अदत्तवातप्रकाशप्रवेशानि सकीर्णानि च यत्र प्रेयसीव महिषी पुच्छोद्धूननविकीर्णमलमूत्रा सततास्यासनिर्गन्धीकृतनासा सहैव स्वामिना स्वपिति । एवस्मिन्नेव गर्भगृहकल्पे सकीर्णे प्रकीर्णनिखिलवस्तुनि कक्षे सकलोऽपि परिवारो विश्राम्यति । अवस्था तेषा गृहाणाम्—

तस्मिन्नेव गृहोदरे रसवती तत्रैव सा कण्डनी
तत्रोपस्करणानि तत्र शिशवस्तत्रैव वास. स्वयम् ।
सर्वं सोढवतोऽपि दुस्थगृहिण किं ब्रूमहे तां दशाम्
अद्य श्वो जनपिष्यमाणगृहिणी तत्रैव यत्कुंथति ॥

इति पद्येन स्फुटतामायाति ।

अशिक्षावशात्कुप्रथास्वेव तेषामास्था, विवाहेषु मृत्युभोजेषु चातिशक्तोऽप्यो व्ययस्तान् ऋणीदजीविनामृणपाशे तथाऽपातयद् यथा भूमिं गृह वृषभान् हल किं बहुना, जीवितमपि दत्त्वा नाधमर्ण्यादमुच्यन्त । दूरे कोऽपि विस्मृतिवशात्स्यादितश्चिकित्सालयदचेन्न तत्र चिकित्सक, सति तस्मिन् न भेषजम्, विद्यमानेषु वैद्येषु नातुरवशा उत्कोचार्यं द्रव्य मत्यार्पणेन राज्यस्य वेतनभोगिनोऽप्येते चिकित्सकचणो पमदूता पृच्छेयुराममवधामपि । मार्गाश्चाकुट्टिमा वर्षासु जानुदघ्नपथा, क्वचित् परितो धूलिमयनभोमण्डला दिवाऽपि च सतप्तरजस्का येषु गच्छद् पान्थो नरकस्येव प्रमाणमनुभवति । न तेषा शिक्षाऽऽरोग्य यथा ते स्वास्थ्यावह जीवनप्रकार

भजेयु । अत एव महिषादि-स्नानाविले पल्वले मानवा अपि स्नान्ति बहुधा पिबन्ति च तत्तोयम् । तेन दुःसाध्यरोगाक्रान्ता कीटवत् म्रियन्ते ।

तेषामुद्धाराय राष्ट्रीयसर्वकारेण प्रयतित बहुधा । यथा ग्रामे ग्रामे पाठशाला, मौलिकशिक्षाप्रचार, यत्र तत्र चिकित्सालयाना स्थापना, कूपादिनिर्माणाय दीर्घ-कालिकणंप्रदानम्, कुल्याप्रसार, गोमयादेर्गर्तेषु पूरणेनोर्वरके परिवर्तनम्, रासायनिकोर्वरकवितरणम्, रात्रि-विद्यालयाना स्थापना, विद्युत्प्रापणम्, आकाशवाणी-यन्त्राणा ग्रामेषु सप्रसारणम्, पशु चिकित्सालयप्रतिष्ठा चेति ग्रामोन्नतये प्रमुखानि कार्याणि । मध्यकाले भूदारा (जमींदार) कृषकाणा सर्वकारस्य च मध्यपातिनो ऽमरवल्लरीव परोपजीविन. कृषीवलानामुत्पादनस्य महान्त लाभाशमपाहरन् । राष्ट्रीय-सर्वकारेण विधेयक (कानून) निर्माय सेवा वर्ग एवोन्मूलित । तालगुडस्य, मधुमक्षिका-पालनस्य, कौशेयकृमिलालनस्य, हस्तनिर्मेयवसनस्य (Handloom) चोद्योगाय साहाय्य क्रियते । पचायतनानि पुनरुज्जीवितानि । न्यायालयानामधिकारा यथोचित तेभ्यो दीयन्ते । अन्नमूल्यस्य ह्रासो निरुध्यते । पाचवर्षिक-योजनासु द्रव्यस्य महती राशिर्ग्रामोन्नतय एव निश्चिता । कुसीदजीविना सकाशात्कृषकाणा मोक्षाय सहकारि-समितीना तादृशनिधीना च स्थापना क्रियते । तत्राल्पकुसीदमाश्रित्यर्णदानस्य व्यवस्था । एता समितय उचितमूल्येन कृषकस्योत्पादन विक्रीणन्ति, बीजादिक च क्रीणन्ति । नाधुना लेखपालेभ्य (पटवारी) कृषकाणा तथाभयम् ।

तथापि बहु करणीयमेतद्विषये ऽद्यापि । यावत्प्रचारित न तावत्कार्यं जात तत्र । राजकीया अधिकारिण प्रायो न ससृज्यन्ते ग्रामीणै सह । निवासादे विकासस्य शिक्षणादेश्च न तथाविध सौविध्य ग्रामेषु यन्नागरिका आकृष्टा भवेयु । स्वय ग्राम्या इदानीमपि विहाय गृहाणि पुर प्रति धावन्ति । शिक्षितेभ्यो न कृष्यादिकार्यं रोचते गृहोद्योगाना न तावान् विकासो यावान् प्रचार । सत्योन्नतिस्तदैव बुध्येत यदा न केवल ग्रामीणाना पलायन निरुध्येत, नागरिका अपि पुराणि विहाय ग्रामवासाय स्पृहयेयु । तदैव मन्येत ग्रामाणामुन्नति ।

विज्ञानस्य लाभा दुष्परिणामाश्च

हन्त ! अदम्या मानवस्य मृगतृष्णा ! दुर्दमनीया महत्त्वैषणा, अशमनीया नियतिविजयदुराशा ! अनतिक्रमणीया सकलविभवनिर्विभागाधिकारपिपासा । दुरभिभवो जगतीपरिणाह-परिच्छेदाभिलाष अनन्ता चानधिगत-विषय-विषयिणी जिज्ञासा, दुःशमा चानतिक्रान्त-प्रदेशातिचिक्रीर्षा, असुलभ्या नामाद्दष्टपूर्व-पदार्थ-दिदृक्षा यथाऽनुदिवसम्, प्रतिक्षण प्रहिता साहसैक-रसिका नवनवाभियाने-ष्वभिरुचिं दधति । तन्मूल एव च मनुसन्ततेः सततमविरतोद्यमोऽनुभूतभावानुभूतौ । अद्य नासौ करितुरग-वृषभ-यान साधनस्सन् भूमि-भ्रमण-मात्रेण सन्तुष्यति, परं मीन इवाजस्रोन्मीलित-यन्त्र-नयन उद्वान्त-धूमराशिच्छलेन गगन-पारिता जलधिविजय-पताका भविष्यन्नभोऽभि-भव-शंसिनी व्यापयन् सायात्रिक-सहस्राधिरोहणाकिञ्चन-भार पोतमारूढो निःशङ्कं निरातङ्कतल-पाथः-पथे विहरति, खेचर इव विस्तारित-पक्षसन्तति साहसैक-पाथेयो निशाकर इव द्योतिततारक, रविरिवविध्वक प्रतिष्ठित-प्रताप यतिरिव नियतमविद्यमानानभिगमनीय-स्थल-विशेषो वृन्दारक इव विष्णुपथे परिभ्रमति । वराह इव भूदारको मशक इव रन्ध्र-प्रवेश-निपुण भ्रमर इव सार-प्रतिग्रहैक-रसिक, कस्तूरिका-मृग इव गन्धाभिनिवेशी भूगर्भेषु प्रविशति, दुरवगाहमम्भः-पूरमवगाहते, सततोद्गच्छदनल शिखा-सख शिखि-शिखरि-शिखरविल साधक इव सिद्धिमार्गी गन्धकग्रहणायाभियाति । विज्ञानमेव तस्य मार्गदीप. ।

अस्यैव विज्ञानस्य बलादद्य घातका अपि दुश्चिकित्स्या व्याधय सुचिकित्स्या । उदरादि-गूढ-स्थान-स्थाना गर्भगतानामिव घटनाना वस्तूना दर्शन क्ष किरणादि (X-Ray) साधनै सुकरम् । एतस्यैव महिम्ना देश-काल-कृतोऽन्तरायो निरस्तो लघूकृतो वा । तत्प्रसादादेव दर्पलघनीया अप्यध्वानो द्विभिरेव दिनैरतिक्रम्यन्ते । यात्रासौख्यायाद्य सर्पिण्य इव कुटिलगतय, कृशानुज्वाला इव धूम-रेखा वमन्त्य, योगिन्य इव लोह-पथ-गामिन्य, काल-गतय इवाहनिशं चरन्त्यो धूम्रशकट्यो देशाद्देश स्वल्पामिरेव होरामि' क्षीघ्र-क्षपादघोराभि प्राणिनो महतोऽपि भार सभारांश्च

प्रापयन्ति। तयं इव महानदीषु दिवानिश धावन्त्य प्रतोलीषु तैल-शकट्य स्वर्णसारवता विहार-सौकर्यमाचरन्त्येव।

विज्ञानबलादेव दुग्धसार इव दुग्धात्, नवनीतमिव दध्न. चामीकर-कणा इवाकररजस सौदामिनी जलान्निर्गृह्य होता, रसायन-बलाद् वाष्पशक्त्या चोत्पादिता। साऽधुना प्राणिना प्रियतमेव जीवन-सगिनी, परिचारिकेव वचने स्थिता, वार-वनितेव सर्वभोग्या, पर वधूरिवास्पृश्या, मृत्यु घटीव करालो, व्यालीव विलीनसरणि', मित्रामेव हित साधिनी, नभ -प्रकृतिरिव ध्वनि विस्तारिणी, ऋतु सम्पदिव नाना-रूप-दर्शिनी, मापिक विद्येव प्रकटित विविधचमत्कारा कि नाम नाचरति जनस्य। प्रकाश ताप च यच्छन्ती स्पृशत्यधिकारक्षेत्र रवे। रोगानपाकुर्वन्ती स्मारयति धन्वन्तरे। गूढ लक्षयन्ती तुलयति महिम-शालिनो योगिन, शीतमण्णे विपरीत च विदधती जयत्यृतुत्रमम्, निवाते मन्द समीरस्पर्शं ददती पुनरुत्तयति सदागतिम्। भोज्य पचन्ती समाचरति सहकार वैश्वानरस्य, दूरभाष (Telephone) द्वारेण विदूरे स्थितानपि जनानालापयन्ती करोति मेलापकम्,नभोवाक्-प्रसारेण (Radio-broadcasting) लघयति सन्देश-प्रदान-व्यापारम्; यन्त्रचालनेन सहाकलयति व्यवसाय-विकासम्, कृत्रिम-वृष्टि-वर्षणेन प्रत्याचष्टेऽवग्रहम्; पाणिग्रहादिषु हर्षावसरेषु प्रदीप्त-दीप दीप्तिच्छुरित विभा-विभासनान् समाकलयति शक्र चाप शत-च्छटाम्, सूत्र-सन्तान-(Wire)-सहाया कतिपयाभिरेव होराभि प्रापयति योजन-सहस्रमपि सन्देशम्। आयसीषु ऋजु-कुटिल सरणीषु वलणद्-घटिका-रणरणायितापसारित-पादयात्रिका कोणात्कोणमनवरत कर्तव्यभाराकुला इव धावमाना विद्युच्छकट्य (Tram way) पथिकानामतिशयेन मनोमुदमातन्वन्ति महानगरीषु।

अनया जलमाकृष्यते, व्याधिर्धूंप्यते, भार उह्यते, शस्यानि पच्यन्ते यन्त्राणि चाल्यन्ते, पुस्तकानि मुद्रयन्ते, शिलासघाता निमेषपात-समकाल क्षुद्यन्ते, वस्त्राणि क्षाल्यन्ते, क्षणमुहूर्तपलातिश्रमणकलनेन कला कल्यन्ते।

विज्ञानस्यैव चाय प्रभावो येन यन्त्र विशेषं मार्गिनो झञ्झा प्रकोपस्य दिशा कालश्च पूर्वमेव ससूच्येते। ऋतवोऽनेन नियम्यन्ते, सलिलस्य निम्ना गतिरुदच्यते, विसूत्र-सूत्र-यन्त्रं (Wireless) गन्तु पूर्वमेव तस्य सप्राप्तिर्गन्तव्य-स्थानेषु सप्रेष्यते, तस्करास्तदङ्गलिभिर्गवेष्यन्ते,दूरादपि वक्तृणा नर्तकाना च गिर सचित्रा समीक्ष्यन्ते। लघु-मुद्रकाणा (Typewriter) दूर-मुद्रकाणा (Teleprinter) च कल्पना विज्ञान-बलादेव। तस्य प्रसादादय कलियुगमित्यन्वर्थनामा काल। मानवा अद्य पूर्व-पक्षे स्थापिता। वस्त्राणां प्रक्षालनम्, भोजनस्य पचनम् रश्मि-सग्रहणम् निवात-द्रव्योद्धरणम्, रत्नाकराद् रत्नाहरणम्, भूगर्भे चाग्नेय-तैलस्थिति ज्ञानम्, उच्चारणे स्वर-तन्त्र-कम्पनाङ्कनम्, विक्रेय-मूल्यादानम्, सकलनादिव्यापार', मानग्रहणादिका:

क्रियाश्च सुख स्वचालित-यन्त्रैर्विधीयन्ते। नरैर्वंपंमात्रेणापि वेतुमशक्य वस्त्रजात वयनयन्त्रेण (Weaving Mills) एकस्मिन्नेव दिने वेतु शक्यते। वृषभ-शतकर्षणीया भूमिश्च कृषियन्त्रेण होराभिरेव साधु कृष्यते। गजसहस्रेणाप्य-नुत्थापनीयो दुर्वहो भार उत्तोलन-यन्त्रेण (Crane) निरायासमुत्तोल्यते। किन्नामात्र पर यन्नास्ति किमपि कार्यमद्य यद् वैज्ञानकी प्रक्रियामृते साध्येत। तस्य बलादेवाद्य प्रजननसदृशमपि कर्म परानपेक्ष सूचीवेधादिना (Injection) क्रियते। विज्ञानस्यैव शक्त्याऽद्य कन्दुका इव उपग्रहा मानवनिर्मिता नभसि प्रहीयन्ते। चन्द्रलोक भित्त्वा प्रक्षेपणी (राकेट) सूर्यमण्डलमपि प्रवेष्टुं प्रभवत्। चन्द्रलोकस्य चित्राण्यपि विज्ञान-प्रभावादेवागृह्यन्त। तस्य साहाय्येनानन्तप्रालेयालये ध्रुव-प्रदेशे भूगर्भं गतानि खनिज-द्रव्याण्यादातु प्रयत्यते नरैः।

न केवल जीवनोपयिकानि पर समर-साधनान्यपि परमघातकानि तस्य शक्त्या विरचितानि। देवासुरैरिव वैज्ञानिकै रत्नसार इवानलाणव. सागरादिव काञ्चनिज-द्रव्येभ्य उद्धृत्य पाशुपतमिव जगत्सहारकमस्त्र पुञ्जीकृतम्। उदजनास्त्र ततोऽपि गुरुतर वायव्यानि च प्रहरणानि (Gas) रिपु विजिगीषया महताऽर्थव्ययेन निर्माय भाण्डारेषु निहितानि। सकेतका (Signals) सन्देशप्रेषका (Transmetres) टङ्काः (Tanks) प्रक्षेपदातघ्नीना परम्परा आधुनिक समर भीषणतर विदधति। तैश्चोपकारकमपि विज्ञानमिद विनाशमूलमिव प्रतिभाति।

न च नरः एतावतैव तुष्यति, स्वानुपम साफल्य द्विगुणिताभिमानश्चन्द्रमण्डलादि लोकान्तराणि जिगीषति। अस्यैव कारणादय नाऽधुनान्य सृष्टे कर्तार धातार वा मन्यते। स्वयमसौ शम्भु स्वयभूर्वा परमात्मनोऽपि निर्मातेति विकत्थमानो लोकपालाधि-कारेभ्य स्पृहयति। तेन धर्माचरणमाडम्बरे, शास्त्राणि कपोल कल्पनायाम्, न्यायवादो मौढ्ये, सदाचारो बकचेष्टिते, सत्यभाषणमनैपुण्ये, दुरभिमानिता प्रतापे, गुरु-वचन वाद्धंक्यविजृम्भिते स्थापितानि।

तस्माद् बहव एतन्निन्दन्ति, विनाशहेतुरिति गर्हयन्ति, नैतिकपतनमूलमिति वदन्ति। कार्यसौकर्यं विदधताऽनेन लोका दुर्गता व्यवसायजीविन आजीविका-रहिता विहिता।

इत्थ विज्ञानमिद वरदानमिव श्रेयस्करमभिशापो वेति विचिकित्सायामेतावदेवोच्यते यदभिरूपानुसारेण नाशो वहेर्दोषो यदेन यश्चिदागारे निक्षिपति। विनाशकार्यं एव प्रमोत्तारोऽस्य वचनीया। अतएव भारत लोकल्याणार्थमेव तत् प्रयुयुक्षते येन दारिद्र्य धरण्या नामशेषमेव जायेत।

भारतस्य पाञ्चवर्षिक्यो योजनाः

चिरात् परकीय-शासनोपनतम् असह्य दुर्वह दास्यभार वहद् भारत लम्भयदिव सर्वस्वाहुति तप -स धन-फल स्व-सुतान्, क्षीष्टाब्दस्य दिवसयुगाङ्क शशाङ्क-समितस्य (१९४७) अगस्त्यमासे (August) पञ्चदशे दिनाङ्के (Date) पुनरपि स्वातन्त्र्य-रवि-विभा-रतमभवत् । विगते च तमोमये दूषणमय इव कलुषिते दास्य पाशे हताशा फणि कुटिल धूपोद्गार-धूमच्छलेन मलीमसानिव श्वासान् मुञ्चन्ती सहसा व्यलीयत जन हृदय भुवन-कुहर-सचिता विषाद-काल निशा । पर सत्यपि ताहशोऽसाधारण उल्लासे परितो गृहे गृहे, जने जने व्याप्तस्य दारिद्र्यस्य गरीयान् सतापस्तथाऽजीज्वलन्मानसानि भारतीयाना यथा निखिलोऽप्यानन्द सन्दोहस्तत्र भस्मसाद् अभूत् । अतो निराकरिष्णु-वस्तुमसामान्य प्रजासु विष्वगाचितमिव, अन्तरिव प्रविष्ट दारिद्र्य प्रयानगणो जवाहरलालस्याध्यक्षतायां योजनाऽऽयोगस्य (Planning Commission) नियुक्तिमकुर्वन्नेतार । फलतस्त महता प्रयासेन सावधान सूक्ष्मेक्षिकया सकलामपि ततत्क्षेत्रीयामवस्थाम् समीक्ष्य प्रायोगेन विस्तृत विवरण भारत-सर्वकारस्य समक्ष प्रस्तुतम् । तदेवानुसृत्य प्रथमा पाञ्चवर्षिकी योजना शशिशरग्रहभू (१९५१) सख्यकेऽब्दे प्रयोगपथीनाऽजायत ।

तदन्तरञ्च कृषेरुन्नति कृष्यभूमे सेचनार्थं नदीषु सेतुबन्धाना (Dam) ततश्च कुल्यानाम् (Canals) निर्माणम्, भूदार (जमींदारी) प्रथाया उन्मूलनम् तत्र तत्र ग्रामेषु सहकार-समितीना (Co-operative Societies) महनिधि गृहाणाम् (Co-operative banks) च प्रतिष्ठाऽजनि । सामुदायिक-कल्याण-योजनाभिरत्र ग्रामाणा सर्वतो-मुखा प्रगतिरक्ष्यत । यातायातव्यवस्थाया समुन्नयनाय कुट्टिमानाम् (पक्का) अकुट्टिमानाम् च तैलादियानयोग्याना लोक-पथाना सर्वत प्रसारो व्यधीयत । अधिकतमान्नोत्पादनस्य विदेशेभ्य क्रीतस्य च खाद्यराशे समहार्यमान्दोलनमाचरितम् । देशे वाष्पयानपन्थाणा वायुयानाना पोताना च निर्माणशाला अस्थापिता । पूश्चयान-वर्त्मानां च कल्पना स्वदेश एव कर्तुं व्यवस्थितम्, तदीय-तृतीय-श्रेणि-यात्रृणां कृते च

सौविध्यमाचरितम् । कार्पासाना (सूती) पणमयाना च (पटसन) वस्त्राणा निर्माणे वृद्धिरजायत । अस्या योजनायाः साफल्याय वसुयुगनयनयुगलकोटयः (२२४८ करोड) मुद्राणा व्ययीकृता. । ऋतुशरग्रहशशिमिते (१९५६) वर्षे द्वितीया योजना प्रथमाया. स्थानमलभत ।

अस्या उद्देश्येषु देशेऽस्मिन् महतामुद्योगानामुन्नति, आवश्यकाना गुरुयन्त्राणा निर्माणशालाना स्थापनम्, षष्टिलक्षोत्तर-कोटिसप्तक-टणानि अन्नस्य, अष्टा-पञ्चाशल्लक्षाणि भारा तूलस्य, सप्तति लक्ष टणानि तैलीयपदार्थानामुत्पाद्यानि, सेचन-साधनाना निर्मातुं प्रक्रान्ताना पूर्ति । यन्त्रादिषु चात्मनिर्भरताऽऽपादनम्, समाजे नितरा व्याप्तस्य वृत्ति-कार्श्यस्य निराकरणम्, जनस्वास्थ्यस्य, कला-विज्ञान प्रौद्योगादि-विषयक-शिक्षाया, वाणिज्यस्य च विस्तार, वैदेशिक-मुद्रार्जनार्थं विविध-वस्तु नियतिषु वृद्धि', एवविधा अन्याश्च प्रगतयोऽभूवन् । तदनुसृत्य देशे रूस्येन आग्लेन पश्चिमशर्मण्य-प्रदेशस्य च शासनेन सह सहयोगात्मिकामार्थिकी सन्धि विधाय तत्सहकारेण मध्य प्रदेशे भिलई नाम स्थले, बगेषु दुर्गापुरसज्ञे स्थाने, उत्कलेषु च राउरकेलाऽभिधे ग्रामे विशाला-ना लौहसार निर्माण-शालाना स्थापन व्यधीयत । ग्रामेषु कृषिक्षेत्राणा चक्रबन्धोऽक्रियत येन कृषकाणा भूमिर्न खण्डशो विकीर्णा स्यात् । यन्त्रैश्च कृषि सुकरा महता परिमाणेन च जायेत । एता योजना पूर्णतामानेतु पूर्वं षट् पञ्चाशदर्वसमितो रूप्यक-राशिर्व्ययार्थं निश्चित' पर पश्चादर्थ-साधनाना लाघवात् षट्पञ्चाशत् कोट्यधिकमष्टाचत्वा-रिंशदर्बपरिमित द्रव्य स्वीकृतम् । विपुलोऽयमर्थ-राशि शासनकोषात्, राष्ट्रीयाद्दणात् वैदेशिकात् साहाय्याच्च समगृह्यत । अस्या योजनाया साफल्य च पाकस्थानस्य भारत-विरोधि-नीत्यनुसरणेन विदेशेभ्यश्चाणु शस्त्र-समाहरणेन चीन कृत-भारतीय-क्षेत्राधिकरणेन च राष्ट्रीय सैन्य-व्यय-वृद्धेः किञ्चिद् विघ्नितमभूत् । तथाऽप्यस्मिन् कालेऽणु-शक्ति-जनित्रागारस्य (Atomic generator) स्थापना जाता तस्य चाप्सर-सज्ञिका घमनिका स्वकार्ये प्रवर्तत इति महतो हर्षस्य विषय । अस्य प्रतिष्ठानस्याध्यक्षेण भाभाभहोदयेन घोषित मदधुना भारतमपि स्वल्पेनैव काले-नाणुबम-निर्माणे समर्थम ।

द्विषष्ट्युत्तरैकोनविंशे शतके तृतीया प्रयोग प्रगमिष्यति यदर्थं मुद्गणाम-वैद्ययाधिक खर्वं एको निश्चित' । तत्र चत्वारिंशदर्वसमितोऽयंराशि सार्वजनिके व्यवसाय-क्षेत्रे तत्प्रभुभिर्विनियोक्ष्यते, शेषस्यापि चार्धो भाग केन्द्रकोशाद् व्ययमेष्यति शिष्टश्च मण्डल-राज्य-कोशेभ्य । अस्या लक्ष्येषु च देशस्यान्नोत्पादन आत्मनिर्भरता, शर्करायां वस्त्राणाञ्च निर्यातन-सामर्थ्यम्, उर्वरकाणा लौहसारस्य चोत्पादनेऽतिशयिता वृद्धि., शिक्षालयेषु माध्यमिकीं कक्षा (High School) यावत् नि शुल्क-शिक्षा-प्रदानम्, सर्वेषा ग्रन्थाणा ग्रावनागरि-अक्षरान्तरञ्च [illegible]

वृद्धि, विद्युतश्च अष्टादशलक्षोत्तर-कीलवाट-परिमाणमुत्पादनम् इत्यादि कार्यजातमस्ति। अणु शक्त्या च लक्षत्रयकीलवाट-परिमिता विद्युच्छक्ति सम्पाद्या। वाष्प-तैल-यानोचिताना नवमार्गाणा विस्तार कार्यं। घटीयन्त्राणा कृष्युपकरणानाम् (Agricultural Empliments) च भारते निर्माणाय तदनुसारेण व्यवस्था विधेया। देशस्य समृद्धये खनिज-तैलस्यस्वावश्यकतामनुरुध्योत्पादनमपरिहार्यम्। खम्भात-अङ्केश्वरप्रभृतिषु स्थानेषु तस्योपलब्धिर्देशस्य भाविनीवृद्धिं निकटवर्तिनी द्योतयति। द्वितीय-योजना-काले प्रारब्धाना कार्याणा पूर्तिनिष्पत्तिश्चास्या योजनाया पूर्वार्धे समापनीया यथाऽऽरब्ध व्यवसायेभ्योऽर्थस्योपार्जन सुकर स्यात्। राष्ट्रीयायस्य प्रतिशत पञ्चमुद्रास्फिता वृद्धिर्यथा सम्पद्यते तथा प्रतिविधेयम्।

एवविधानि बहूनि लक्ष्याणि देशस्य विकासायास्या योजनाया येषा सिद्धौ भारतस्य स्वरूपमेव नव सम्पत्स्यते। पर दारिद्र्यपिशाच ग्रस्ते वैषम्य-बहुले राष्ट्रे कुत एतावतो अतिमहतोऽर्थ-राशेरुपलब्धिरिति विचिकित्साया समाधानमेतावदेव यच्चतुस्त्रिंशत्सहस्र-कोटयो मुद्राणा स्व-साधनेभ्य एवोपलप्स्यन्ते। द्वाविंशति सहस्राणि कोटयश्च वैदेशिकसाधनेभ्य साहाय्य प्राप्स्यन्ते। शिष्टानि च पञ्चाशदुत्तर-षोडश सहस्राणि कोटयोऽतिरिक्तं करलोकादेव समाहरिष्यन्ते।

वस्तुतो योजनाना स्वरूप लक्ष्य वा न शङ्कार्यं। चेत्सत्यम्, देशस्य सर्वतोमुखा प्रगतिरेतामि साधु सम्पाद्यैव। परमद्य राष्ट्रीय चरित्र तया पतित यथा का कथा प्रजानाम्, शासका, मन्त्रिण पदाधिकारिणो ये भारतस्य भाग्यधेयाना निर्मातृपदमधितिष्ठन्ति, सर्वेऽपि नवनीत हृदया याञ्चन कामिनी वा दृष्ट्वैव च्यवन्ते कर्तव्यपथात्। अतीव (बहिमानी) जनाना प्राणेष्वपि प्रविष्टम्। सर्वेऽपि भद्रवेशा धर्मकञ्चुकविलम्बितोत्तरीयान्तर्गूढोपधा उत्कोच (Bribery) सकुचित-सत्याचारा यथावपमपि द्रव्यमेवापजिहीर्षन्तोऽवसर प्रतीक्षन्ते। नैविदिका (Contractors) अधीक्षका. (Overseers) अधियान्त्रिका (Engineers) सर्वेऽपि कृत गूढ-समया लेपाश्मन (Cement) लोहाधारस्तूपाना चौर्ये शिक्तताप्रयोगे च निरता.। सर्वतो लब्धस्य धनस्यार्धं लेपामन्येषा चाधिकृताना च ग्रन्थिमेवोष्णयति। जनै पूर्वमेव कोपीन-शेषं करभारेण पुनर्विशेषेण बलिषु देयेषु धर्मशेषेरेव भवितव्यमित्यपरोध्य तेषा गण्डस्योपरि विस्फोट। व्यवसायिभिरप्रत्तस्यायकरस्य (Income Tax) सर्वंकारेण दृढनीरया सग्रह क्रियते चेत् तावतैव वराणामुद्देश्य सिध्येत्। अत साराद्धा एव विद्म एतावति। बहुधा सर्वंकारेण घोषिता साफल्याद्धारच प्रचारमात्र भवन्तीति भविष्यदेव तद्विषये प्रभवति सूचयितुं कया दिशा देशस्य दशाया वर्तितव्यमिति।

योगः कर्मसु कौशलम्

अस्यापारस्य दुस्तरस्य भव-सागरस्य सन्तरणाय परम-कारुणिकैः प्राक्तनैराचार्यैः प्रवृत्ति निवृत्तिश्चेति मार्ग-द्वयं निरूपितम्। तत्र प्रवृत्तिः कर्म-मार्गोऽपरश्च मुक्ति-मार्ग इत्युच्यते। यज्ञ-दानाभिरन्यजन्मनि सुखं परलोके च स्वर्गादि-कामनेत्येव प्रथमः प्रवृत्ति-मार्गः, संसारकर्मणां परित्यागेन लोक-निःस्पृहतया सर्वासङ्गविमुखीभूय प्राणायामादिकाष्टाङ्गयोगसाधनं तद्द्वारेण च ब्रह्मभूयोऽपुनरागमनं चेति निवृत्ति-मार्ग उच्यते। तत्र प्रवृत्ति-मार्गानुयायिनः शैशवादारभ्य जरावधि लोकयात्रा-साधनेषु शुभेष्वशुभेषु वा कर्मसु प्रवृत्ताः स्वस्य, परिजनस्य, ज्ञातीनाम्, समाजस्य, राष्ट्रस्य विश्वस्यापि वा कल्याणे निरता यावज्जीवं निरलसाः कर्मठाः पौरुषैकघनाः कर्मरता एव लोकमिमं जहति। परं निवृत्ति-मार्गानुयायिनः प्रायस्तान् निन्दन्ति 'मूढा एते, भोग-परा एते, आसक्ता एते, कृमिकीटपतंगवद् देह-पोषणरता इमे, भोग-कीटा इमे, भव-सुख-प्रलुब्धा इमे' इत्यहर्निशं गर्हयन्तस्तान् केवलं स्वयोगक्षेमाय सोद्यमाः क्लिष्टं शोचनीयं दुर्गतं च पार्श्वस्थमपि निरीक्ष्य 'निःसङ्गा वयम्, किमस्माकमेतेन ? स्वकर्म-फलमेव भुञ्जत एते' इत्युदासीनाः स्वं ज्ञानिनं परांश्चाज्ञानिनो मन्वते। कर्मरतान् प्रति च तेषामवज्ञैव प्रस्फुरति—

उपायाः शिक्षमाणानां बालानमुपलालनाः।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते॥ (वै. भू. सा.)

ते च केवलं लोक-कर्म-परित्यागमात्मरतिं चैव योगं मन्वते। परं संकुचित एवैष तेषां पन्थाः।

कामं पातञ्जल-योग-सूत्रे चित्त-वृत्ति-निरोधो योग इति प्रोक्तः परं न तस्यायमभिप्रायो यत्संसारस्योपेक्षा। वस्तुतश्चितं चेतनामयं सूक्ष्म-व्यापार-परम्परात्मकं नित्यं प्रवाहशीलम्। तदेव च सकल-जगत्कर्म-प्रपञ्च-सिद्धि-हेतुः।

न मनसः सततं नियोगाभावे जनः किमपि कर्तुं साधु वा कृत्यं सम्पादयितुं क्षमः। अनुष्ठेये कर्मणि न समाहितं चेच्चेतः, दिवसकरणीयमपि सप्ताहेन पक्षेण मासेन

वाऽपि न सम्पद्यते । कश्चिदधीयानो बाल प्रातरारभ्य किमपि पुस्तक साय यावद-समाहित चेता पठति घुणवन्नैकमप्यक्षर बोद्धु समर्थं । समाहितस्तु स्वल्पे नैवानहसा तयाऽवबुध्यते बोध्य न मया कालान्तरेणापि विस्मरति । योजनमेव योग प्रवृत्तिरिति यावत् ।

पारमार्थिके लौकिके वा कस्मिन्न कर्मणि योगोऽपेक्ष्यते ? वस्त्रवपनन्यन्त नियुक्तो जन कश्चित् प्रमत्तश्चेत् स्वाङ्ग हानिमेव विदध्यात् प्राणान् वा लुम्पेत् का कथा वस्त्राणाम् ? न स ग्रन्थिलान् तन्तूनपि वियोजयितु क्षम । तैलयानस्य विमानस्या पि वा चालकोऽसयत चेता सन् यानान्तरेण सह सघट्टन कुर्यात् कमपि वाऽधो मृद्नीयात् यानमेववाऽध पातयेत् । आत्मन आरोहिणा च प्राणहानि कुर्यात् । चित्रकार, नर्तको गायक, कवि, सैनिक, चिकित्सक, वणिक्, तापस, लेखक, मृगयु कश्चिदपि नाऽन्यमनस्क क्षम कर्म सम्पादयितुम् । सर्वत्र हि मनसो नियोग । स च नितरां योग प्रवृत्ति ।

भ्रान्ता एव ते ये कर्मणो निवृत्तिमेव योग मन्वाना । मोक्षलब्ध्यै प्रणि धानात्मकोऽपि योगश्चेन्न किं तत्र कर्मापेक्ष्यते ?

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नत ।
न चातिस्वप्न-शीलस्य जाग्रतो नैव चार्जुन ॥ (गी ६।१६)
युक्ताहार विहारस्य युक्त-चेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दु खहा ॥ (गी ६।१६)

किमेताभ्या श्लोकाभ्या प्रतिपाद्यते ? किं यथा समयम्, यथानियमम् यथोचित चाहारादिव्यापारा न कर्माणि ? लोक-सग्रहमुपेक्ष्य लोकयात्रार्थमेव कर्मणि निरतस्य तु शुन इवाल्प-परतैव जायेत या न लोकस्य कस्मै चिदप्युपयोगाय । तादृशा योगिनो यदि सर्वे एव जना भवेयुस्तर्हि लोकस्यैव क्षति स्यात् । क्व तावद् दृश्येत समाज ? लोक सग्रहो नाम सर्वस्यापि परमार्थ । तदर्थं कर्मणि प्रवृत्तिर्नितरामपरिहार्या । अतएव कर्तव्यमिति भावनया कर्म कुर्वाण साफल्यासाफल्यानपेक्ष सतत कृत्ये युञ्जान एव योगी । कर्मणा परित्यक्ता तू न । यथा चोक्त भगवद्गीतायाम्—

अनाश्रित कर्मफल कार्यं कर्म करोति य ।
स सन्यासी च योगी च न निरग्निर्न चाक्रिय ॥ (गी ६।१)

कर्मफलानां सुख-मृगतृष्णिकाना वाशानो वा सन्यस्ता योगी । तस्य न स्वय कश्चित् कामो भवति पर लोक-सग्रहार्थं कर्म करोत्येव स । वस्तुत कर्म कुर्वन्नपि न तु आत्मान कर्तृत्वाभिमानिन मनुते । तया कुर्वन्नु लिप्येताहकारेण, तेन च राग,

रागेणासक्तिः, ततः फलानुसन्धानम्, तेन च सासारिकेषु प्रलोभनेषु सज्जते मनः। अतः-सकल्प त्याग एव योगः।

य संन्यासमिति प्राहुर्योग तं विद्धि पाण्डव।
न ह्यसन्यस्त-संकल्पो योगी भवति कश्चन॥ (गी. ६।२)

योगस्य मूलमपि कर्मैवोक्तम्—

आरुरुक्षोर्मुनेर्योग कर्म कारणमुच्यते। (गी. ६।३)

कर्मणां त्यागो नापि तु कर्मफलाना त्याग एव सन्यास इत्युदीर्यते।

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः। (गी. १८।२)

स सन्यास एव योगः। अनासक्त-भावेन सिद्धावसिद्धौ वा निस्पृह कर्तव्यमिति भावनया कर्म कुर्वाण एव परमार्थतो योगी।

सिद्ध्यसिद्ध्यो. समोभूत्वा समत्वं योग उच्यते। (गी. २। ४८)

अज्ञानेन कर्म कुर्वतामेव तादृशी फलासक्तिर्भवति। ज्ञानवन्तस्तु न तत्रासज्जन्ते, न च तेन लिप्यन्ते। कर्म कृत्वाऽपि तत्फलायास्पृहयन् पुण्य पाप वा ज्ञानाग्निना दहति। न तेन स कर्मफलाना भाजनम्।

ज्ञानाग्नि-दग्ध-कर्माणं तमाहुः पण्डितं बुधाः।

कर्म अकुर्वाणोऽपि मनसि तत्काम दधानोऽपि न योगी। स हि तत्रासक्त।

नह्यसन्यस्तसकल्पो योगी भवति कश्चन।

ज्ञानमेवाश्रित्य मानवः कर्म कृत्वाऽपि न तत्रासज्जते। तेनोत्पन्नं दुष्फलमपि ततो निवर्तते। ज्ञान हि तस्य शरणम्।

सर्वं ज्ञानप्लवेनैव वृजिन सन्तरिष्यसि।

अयं ज्ञानप्लव एव बुद्धियोग. कर्म-मार्ग-प्रदर्शक.। न तेन पथि भ्राम्यति जन.।

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय।
बुद्धौ शरणमन्विच्छ कृपणा फलहेतव.। (गी. २। ४९)

बुद्धियुक्तो न पुण्यपापभावना जातु हृदये धारयति। अतो न स लिप्यते फलेन। फलासक्तिरेव तादृश कर्मबन्ध जनयति।

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योग कर्मसु कौशलम्॥ (गी. २। ५०)

कर्म च धर्मानुकूलमेवानुष्ठेयं न तु तद्विरुद्धम् । कर्म, अकर्म, विकर्म च पुरतो वर्तते । एषां परस्परं भेदोऽवश्यं ज्ञेयः ।

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।

कर्मणामभावोऽकर्म, विरुद्धं कर्म तु विकर्म । तत्त्यक्तवा कर्माकर्मणोः समन्वय एव साधीयान् भवति । कर्म कृत्वाऽपि न तत्कृतं मन्वानः कर्मण्यपि कृतेऽकर्मवत् पश्यति । स एव कर्मणि कुशलः ।

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान् मनुष्येषु स युक्त कृत्स्नकर्मकृत् ॥ (गी. ४ । १८)

कर्म कुर्वाणश्च कर्तव्यबुद्ध्यैव तत्र प्रसज्जेतेति बहुधोक्तम् । परं कर्तव्यस्य पालनं तदैव निष्पद्यते यदा तद् यथोचितेन पथाऽनुष्ठीयते । स्वेच्छाचारेणोपेक्षया च नानुष्ठितमपि कर्मानुष्ठितं सम्पद्यते । अतः कर्माकर्मविकर्मनिर्णये शास्त्रस्य प्रामाण्यं सर्वोपरि ।

यः शास्त्र-विधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुख न परां गतिम् ॥
तस्माच्छास्त्र प्रमाण ते कार्याकार्य-व्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्त कर्म कर्तुमिहार्हसि ॥ (गी. १६ । २३-२४)

स्वभावानुकूलं कर्म च धर्मः । तदेव कुर्वन्तु मानवः साफल्यं लभते । स्वधर्म-विरुद्धं कर्म कृत्वा न कोऽपि लाभ. ।

स्वे स्वे कर्मण्यभिरतः ससिद्धि लभते नरः ।
स्व-कर्म निरतः सिद्धिं यथा विन्दति तच्छृणु ॥ (गी. १८ । ४५)

तस्मिन् स्वभावविहिते कर्मणि कृते मानवस्य स्वतः सिद्धं धर्मानुष्ठानम् ।

श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ (गी. १८ । ४७)

कामं कर्म स्वाभाविकं दोषयुक्तं परं तदपि न त्याज्यम्, यतो नास्ति किमपीह जगति यत्सर्वथा निर्दोषं स्यात् । दीप्ततमोऽग्निरपि धूमेन भूतिना च वृतः । सर्व-कालुष्य-नाशिनी गंगाऽपि नाना-नदानीत-मलकलुषतामाप्नुते । धेनुरपि पुरीषाशिनीति न दोष-मात्रेण त्यज्यते । अतः स्वधर्मानुकूलं कर्मानुष्ठेयमेव ।

नास्ति लोके कश्चिदपि विनैव कर्म यः सिद्धिं लभेत । ब्रह्मनिष्ठो राजर्षिर्जनकोऽपि स्वकर्मणि व्यापृतोऽभवत् । पूर्णकामा ऋषयोऽपि तपोऽनुष्ठाने लोककल्याणे चाभिरता आसन् । महात्मा बुद्धः, तीर्थंकरो महावीरश्च त्यक्तसंसार-बन्धनावपि प्राणिमात्रस्य

सेवायामरमेताम् । सर्वे महापुरुषा यावज्जीवं कर्मनिरता भूत्वैव मृता अप्यमरतां लभन्ते । न ते शय्यायां शयाना आतुरा इव मृत्युं कामयन्ते । तेषा तु जीवनव्रतमिदम्—

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एव त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ (ई. उ. २)

आरब्धं कर्म यथाशक्यं साधु भद्रं शुचित्वेन (ईमानदारी से) चानुष्ठेयम् । यतः

'Handsome is who handsome does'

इत्याङ्गलोक्त्यनुसारेण साधुकर्मकर्तैव सुकर्मा । न कृतेनैव कर्मणो निष्पत्तिः । जीवतो लक्षणमिदं यद् यावज्जीवं कर्मानुष्ठानम् कर्मठतानुप्राणितस्य सोत्साहस्य सौजसो जीवनस्य यापनम् । गुहामधिशयानाः केवलं स्वक्षेमाय प्रयतमानाः कुक्षिम्भरयः पशुभ्योऽपि हीनप्रायाः । अत साध्वेवोक्तम्—योगः कर्मसु कौशलमिति ।

न ऋते श्रान्तस्य सख्याय देवाः

जगदिद निधान विविधाना सरसता-प्रसूतीना भूतीनाम्, महीयसा श्रेयसा च। अनल्प-जीवनीयोपकरण-पूरित सकल-सुख-साधनसाधित च भुवनमखिल श्रम शील-स्यैव जनस्यामावहर नाश्रान्तस्य।

यथा सत्यपि मधुरतरे पुष्टि-करे तुष्टि-करे रोग-हरे च बहुलेऽपि पुर स्थापिते चतुर्विधे खाद्य-जाते न चालयन् पाणि मुख च न क्षमेत कोऽपि भोक्तुम्, तथैव विद्यमाने-ष्वपि सकल-मणिगणादि-द्रव्य-राशिषु वसुधाकुक्षिभरिषु रजत-स्वर्णादि-खनिज-पदार्थेषु घनिक-जन-कोश-पूरेषु तल्लब्धयेऽयतमानो मानवो न विभुः कार्षिणीमप्यधि-गन्तुम्। कटु कण्टकानि विदलित-सुरभि-पाटल-पटलानि च सहैव वर्तन्ते जीवने भुवने यने च, यथोद्योग यथाकौशल च कल्पन्ते मनुजा सचयाय तदेकतरस्य। केवल विधि-हतक-विलसित भणन्त स्वदौर्गत्य प्रतिकूल काल-कीलित वा वदन्त स्व-साफल्य गोमय-विनायका इव मोदक-दूषणा अजगरा इवाङ्गागत-सत्व वृत्तय, मत्कुणा इव पररक्त-जीविन तूलोपबर्हा इव शय्यामात्र विभूषणा मृत्पिण्डा इव भुवो भारभूता गोवृन्दारका इव रथ्यास्वाहिण्डमाना गेहेनर्दिन. पात्रेसमिता उदर-भरणैक-प्रयोजना. कृमि-कीटवद् दारिद्र्य एवोत्पद्यन्ते विलीयन्ते च। पर कमलिनीषण्डा इव पङ्केरुहा अपि विमल-सलिल-तलादुपरि स्फुरन्तः सोद्योगा. ससाहसा मनस्विनोऽकिञ्चना अपि जन्मत स्व-पौरुष-बलात् कुल-तिलकतामुपसीदन्ति नातिचिरेण। नास्ति किमपीहा-साध्य सश्रमाणाम्। निदाघ-प्रखर-कर-कर निकर-विकिरण-दहनायमानवालुके मरु-प्रदेशेऽपि निरन्तराविरलवारिराशि-परिपूर्ण-गह्वर सागर सम्पादयितु क्षमन्ते ते, मषी-मलीमस-गहनतम-स्तोम-मेचका बहुलतमिस्रामपि दिनकर-विभा-विभासुरामिव विद्यु-द्दीप-दीप्ति-दीपिता वासरायिता विदधति। त एव प्रभव. करतलेऽपि सर्षपाणि रोपयितुम्।

भगवानपि भूतभावनो जगदिद सिसृक्षुस्तप एवाश्रयति। नातपस्का श्रम-रहितो वा किमपि लब्धु कर्तुं वा समर्थ.। देवा अपि श्रम-शीलस्यैव साहाय्यमा-

चरन्ति । ऐतरेय ब्राह्मणे रोहितं प्रति शक्रेण गीता गाथाऽपीदमेव गायति—

नानाश्रान्ताय श्रीरस्ति इति रोहित शुश्रुम ।
पापो नृषद्वरो जन इन्द्र इच्चरतः सखा ॥
चरैवेति चरैवेति ॥
पुष्पिण्यौ चरतो जंघे भूष्णुरात्मा फलग्रहिः ।
शेरेऽस्य सर्वे पाप्मानः श्रमेण प्रपथे हताः ॥
चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम् ।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चिरम् ॥
चरैवेति चरैवेति ॥ (ऐ. ब्रा. ३३।३)

अन्यत्रापि च देवेभ्य आशास्तेऽन्य ऋषि —

'कृधी न ऊर्ध्वं चरथाय जीवसे ।'

दीर्घं-जीवनस्य प्रयोजनं सततं श्रम एवोन्नतये । को नामार्थस्तन्द्रिलस्य चिरायुषा । श्रमार्थित जीवनमिद न किमपि सम्पद्यते तमन्तरा ।

कृपन्नित्काल आशितं कृणोति यन्नध्वानमपवृङ्क्ते चरित्रैः ।
वदन् ब्रह्माऽवदतो वनीयान् पृणन्नापिरपृणन्तमभिष्यात् ॥
(ऋ १०, ११७, ७)

सश्रमाणामेव कृते धरणी विविध-विभव-धारिणी नाना-विलासलास्य-लासिनी च । सुवर्ण-पुष्पितेयं श्रम-शीलैरेव चीयते, भुज्यते, अभिलषित-बहु-विहारवती च विधीयते । "उद्योगिनमेव पुरुष-सिंहं लक्ष्मीरुपैति ।" भीरुमलसं कापुरुषोपहसन-व्यसनिनी वनितेव लब्धाऽपि सा दूरतः परिहरति । नाश्रमशीलो देवानामपि साहाय्यस्य अनुग्रहस्य वा पात्रम् । तेऽपि तस्यैव सहाय-कृतो य उद्यमी साहसी धीरो गुणवान् विद्वांश्च । पुरुषार्थः केवलो लोकस्य देवानां चानुकम्पयिता प्रभावयिता समर्थयिता च । जीवितमपि न श्रमं विना चिरं भवितुमुत्सहते । इन्द्रियाणि हि तस्यैव सक्षमाणि यः सदा श्रमेण नित्यं व्यायच्छति । श्रमेण जीविकामुपार्जयतः नाति प्रचुरोऽप्यर्थः क्षेमावहः । अश्रमोपनतस्तु विभवो व्यसनेषु विलासेषु च व्येति चौरैर्वा ह्रियते चिकित्सकैरपि वा भुज्यते दायादैर्वण्ट्यते वा । अपावनं तादृशं द्रव्यं न सुकृते युज्यते श्रम एव विश्वस्य समाजस्य सर्गस्य च प्रतिष्ठा । भारभूता एव प्रजाना विनैव श्रमं द्रव्याण्युपहरन्तोऽकर्मण्या दुश्चरितान्येव स्वानि लोके प्रख्यापयन्ति । न ते श्रमस्य महत्त्वं वेत्तुं क्षमाः । अद्य तु श्रमस्य सर्वत्रादरः । शासनेऽपि स महिमानमनुभवति ।

'कृतं मे दक्षिणे हस्ते जयो मे सव्य आहितः ।'

इति येषामुद्योगिना सङ्कल्पस्त एव सकल-विभूति विभूषित जगदिद दुहन्ति । किमत्र श्रमं विना ? न विद्या, न यश, न सुखम्, न प्रभाव., न श्रेय, न वा प्रेयः । आलस्यालयास्तु पृथ्वी-भार-भूता भाग्यमेवाक्रोशन्तो यथागतास्तथैव व्रजन्ति लोकादस्मात् ।

देवास्तपोऽप्येषन्ते प्रसादाय । कष्ट तु तप, महांस्तत्र ताप । सृष्टेर्विकास-स्तपसैव । तत्तपोऽपि किं न श्रमः ? श्रमेणैव भाग्यस्य जागरण भवति अश्रमशीलस्य तु भाग्यमपि स्वपिति । यथोक्त रोहित प्रति शक्रेण—

आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठत ।
शेते निषद्यमानस्य चराति चरतो भग । चरैवेति । (ऐ ब्रा ३३।३)

श्रमशीलस्य श्रमेण जगत सर्वं व्यापारा, प्रवर्तन्ते सर्वा क्रिया, विकास, प्रगति, अभ्युदय सर्वमेतत् किं श्रम विना सभवति ?

कलि. शयानो भवति सञ्जिहानस्तु द्वापरः ।
उत्तिष्ठस्त्रेता भवति कृत सम्पद्यते चरंश्चरैवेति । (ऐ. ब्रा. ३३।३)

श्रमेण कृषकोऽन्नमुत्पादयति, श्रमेणैव श्रमिको वस्त्र वयते, श्रमेणैव शिल्पी चित्राणि शिल्पकार्याणि करोति निर्मिमीते चोपयोग्यानि वस्तूनि । गृहे बद्धा पयस्विनी धेनुरपि श्रममन्तरा बिन्दुमात्र पयोऽपि न यच्छति । वैज्ञानिकाना श्रमेणानेके सुख-प्रदा आविष्कारा अस्माक सौविध्याय जाता । परेषामपि श्रमेण चेद् वय सुखिन कर्तुं न स्वयमपि श्राम्यन्त सुखिन स्याम । अश्रान्तस्य तु भोजनमपि न साधु परिणमति । कुतस्तस्य निद्रा यस्या आनन्द दिवा-श्रान्त शर्करा-कर्कशाया, नग्नायामेव भुवि पाषाणमेकमुपधाय शयानोऽपि कर्मकरोऽनुभवति । दुराशामात्रमेतद्यदि पाणौ पाणिं निधाय 'धाता कृपालुश्चेद् गृहपटलमप्युत्पाट्य स्वयमपि प्रदास्यति' इत्युक्त्वा स्थीयते तूष्णीम् । परश्रमार्जित धनमुपभुञ्जानास्तु मस्कुणायन्ते परोपजीविन ।

'नाय लोकोऽस्त्ययज्ञस्य कुतोऽन्य कुरु-सत्तम ।'

अतो देवाना कृपाकाक्षिभिरपि श्रम एव विधेयो येन ते प्रसीदेयुरिति विविच्योक्तम्—

'न ऋते श्रान्तस्य सख्याय देवा ।'

मौनं सर्वार्थ साधनम्

नाना-कर्म-प्रपञ्च-चञ्चुरे जगत्यस्मिन् समापतितेषु प्रयोजन-जातेषु किं-कर्तव्यता-विमूढा जनाः प्रायशो विविधानि साधनान्यनुधावन्ति। सफलतामधिगच्छन्तु मानवा न वाऽङ्गीकृतंस्तंस्तंश्रयायैः स्वार्थेषु परं सर्वेष्वमोघतममव्यय-साध्यमकष्टमय-मनपायमपरहार्यं सकलार्थसाधनं साधनं मौनं नाम यस्मिन् प्रयोग-नियोजितेऽकुशलोऽपि कुशलः, अपण्डितोऽपि पण्डितः, नोरीकृतमपि चोरीकृतं सम्पद्यते।

कस्यामपि विबुधगणमण्डिताया परिषदि समाकलितभद्रवेशो देवानां प्रियोऽपि शृण्वन् वावदूकाना वचांसि स्मयमान इव केवलं शिरः कम्पयन् जोषमास्ते चेत् सकलं-रपि वशीकृत-वाग्रहस्यैः 'अधिगत-सकलागमः सर्व-विद्यासु कृत-भूरि-परिश्रमोऽयम् किमपि स्खलितं विभावयन् वदतामभीषा दाक्षिण्यानुरोधान्न प्रकटीकरोति' त्येव गृह्यते। उक्तवति तु किमपि तस्मिन्, विज्ञाय दोषपूर्णं वचनं 'मूर्ख एवायं कलित-विद्वदाडम्बरो वञ्चयितुमस्मानागतः, इत्यभिज्ञायलेऽवमान्यते च। इत्थं साधीयानयं स्वाज्ञता-प्रच्छादनोपायो यन्मौनम्।

कृतापराधोऽपि जनोऽभाषमाणोऽन्यैः समीपवर्तिभिः सह किमपि पठन्निव शब्दान इव चाभिनयन् क्षम. स्वाकार-संवरणे। वृथैव कृतालापस्तु वार्तारसावेश-वशात् प्रसङ्गे कस्मिन्नपि रहस्यं प्रकाशयेन्निगृह्येत च।

अर्थी च स्वार्थवशात् कमपि वदान्यं विशेषाधिकारसम्पन्नं पदाधिकारिणं बोपगतः प्रार्थयमानः प्रयोजन-सिद्धिं तूष्णी तिष्ठति तस्मिन् साफल्यमेवाऽऽशास्ते। 'मौनं स्वीकारलक्षणम्' इति हि प्रतिपादितमभियुक्तैः। न यावत्स प्रत्याचष्टे, प्रयतनीय-मेव तत्र। अन्ते च स प्रसीदत्येव।

प्रतिवादिनाऽभियुज्यमानोऽभियुक्तो न्यायाधिकरणे वाक्कौलन-पटुना वच-रचनासु सविक्षेपमवदधता वाक्कौलेन बहुधा पृच्छ्यमानोऽपि यदा न किमप्युत्तरयति तदा स्व-पक्ष्येण प्राड्विवाकेन समाधीयते 'विवलक्षोऽयमुन्मत्तो न वेत्ति करणीयम-

करणीय वेति वृथैवास्मिन् प्रश्ना । जड एतद्विध किन्नानुतिष्ठति किमस्य दोषानुसन्धानेन' इति । अगत्या च बहुधाऽभियोगमुक्त स जायते, पर वारमेकमप्युत्तरयन् 'वञ्चकोऽयम्,' 'धूर्तोऽयम्' 'दण्ड्योऽयम्' कृतदम्भोऽयम्' इति क्रुद्धै धर्माधिकृतं सुतरा दण्ड्येत ।

नैतावदेव । कोऽपि सप्रयोजनो जन उत्कोचदानेनापि स्व-कार्यं सिषाधयीषु कमपि नियोगानुकूलमधिकारिण निभृतमुपसरति निवेदयति च स्वार्थम् । कालेऽस्मिन् लुब्धोऽधिकृतो यदन्नप्रसक्त प्रकृते कर्मण्युदास्त एव, न त प्रत्याचष्टे, न वाञ्छीकुरुते । तस्य मौनाकलन सम्मति-लक्षण लक्षयित्वा चार्थी स्वय तस्मै यावच्छक्यमर्थ जातमुपहरति । असावपि मौनमाकलयन्नधिकमेव लभते ।

अन्यच्च । बहुभिर्बलवद्भिरनपराधमेवाक्रान्तो दुरात्मभिर्दुर्बलोऽप्रतिकुर्वन् मौनमास्ते चेत् त्वरित तैर्मुच्यते । प्रतिरोधे तु कृतेऽतितरा क्षति लभेत ।

कामपि प्रणयिनी कामयमान कामुकस्तस्या नाङ्गीकुर्वत्यामपि न प्रत्याचक्षणाया पोषिताशो दान मानादिना ता तोषयति । तस्या मौनमेवामुष्य मनोरथ पूर्ति-हेतु । बहुधा मौनमाकलयन्ती सा बलादपि क्रियते विटै । प्रकामयमाना तु पाद-पुष्पिकाप्रहारैरेव तस्य तथा प्रसाद कुरुते यथा न भूयोऽभिकामयते ताम् ।

यत्र चानेकेषा कमपि प्रश्नमधिकृत्य विवाद तत्रापि मौनमेव श्रेयस्करम् । तथाहि कतरस्यापि पक्षस्य समर्थनेऽन्यस्य विरोध क्रीत स्यात् । प्रक्षालनाच्च पङ्कस्य दूरादस्पर्शन वरम् ।

बहुधा कलहाना मूलमप्रिया वागेव । विवाद शतापक्षया मौनाश्रयणमेव वरम् । न च तस्मिन् साधिते वाचो विग्लापन जायेत । मित-भाषण हि वाक्सयम । असयम तस्या मिथ्यावादिता तस्या च निरनुभावता सम्पद्यते । यतवादिना हि वागमोघा निग्रहानुग्रहमो प्रभु । तेषामेव वाणीमर्थोऽनुधावति ।

इत्थ मौनमतितमा गुणावह दोष-हर च । पर प्रायिकमेवैतत् । कदाचिद्धि मौनमनर्थामन्त्रकमपि सिध्येत् । यथा समाया विद्वानपि वाचयम । सन् सर्वैरज्ञ इत्येव मन्येत । वृथाऽऽक्षिप्तो लोकेन निर्दोषोऽप्यप्रत्याचक्षाणो सत्य दोषेणाभियुज्यत । शीलवती योषाऽधिक्षिप्ता दुर्जनै शालीना जोषमासाना बलात्क्रियेत कलङ्किता वा स्यात् । निर्वाचनावसरे वाचाटा एव जय लभन्ते न तूष्णीभावुका । आत्मप्रख्यापनस्य युगेऽस्मिन् मौन-व्रतिना नैव निर्वाह । उदर-भरणेऽपि तेऽक्षमा स्यु । अतो नाय सार्वत्रिको सिद्धान्त —

मौन सर्वार्थ-साधनमिति ।

धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्

अस्मिन्नु सकल-सुख-साधन-साधिते बहुविध-वैभव-विभाविते जगति जीव-निकायस्य निखिलस्यापि पार्थिव-सौख्य-भाजनताऽऽकारः कामो विद्यत एव। तत्र शिरोमणेर्मानवस्य कृते तु धर्मार्थकाममोक्षात्मकाः पुरुषार्थाः प्रतिपादिता आचार्यैः; परं तेषा सिद्धिरपेक्षतेऽखिल-कृत्य-सम्पादन-क्षमं नीरुजं शरीरम्। विकलकरणा अविकल-करणा अपि चाहर्निश रोग-बलान्ता न कस्मै चिदप्यर्थाय कल्पन्ते। तथाहि-धर्म एव प्रथमं विभावनीयः। संयमः, आहाराचार-नियम-पालनम्, स्वाध्याय., पित्राचार्यादि-पूजा,यज्ञानुष्ठानम्, आश्रिताना पालनम्, शरणागतस्य भयाद् रक्षणम्, वर्णाश्रम-कृत्याऽऽ-चरणम्, एतानि विशिष्टानि चान्यानि कर्माणि धर्म एवान्तर्भूतानि। नैतेषु कृतमपि साध्वसाधु वा सम्पाद्यं गद-परिक्लिष्ट-वपुषा। रोगेषु हि न मन. समाधीयतेऽनुष्ठेये कृत्ये, न निगृह्यते तदपथ्यात्, न स्थिरतामेति विधेये, न प्रस्फुरन्त्यङ्गानि, न भुक्तमपि परिणमतीति कुतो बलम्। न चाबलः क्षमते व्रत-कृतमायासं सोढुम्, क्षयङ्कारं च न प्रभवेद् बलीयसो रक्षितुं शरणागतम्, पालयितुमाश्रितान्, अर्जयितुं निखिल-साधन-साधनं धनम्, स्थिरयितुं च प्रभु-पद-समर्पित-प्रभाव राज्यम्। महत् खलु कष्टं तपसि। एवं प्रथमः पुरुषार्थः सतत स्वस्थस्य सबलस्यैव च साध्य.।

द्वितीयस्तावदर्थः द्रव्यार्जनमिति यावत्। सर्वेषामपि लोकव्यवहाराणां मूलं द्रव्यम्। उपभोग्यानि वस्तूनि हि तेनैव क्रीयन्ते। दासा अर्थमयं वेतनं लिप्सन्ते। श्यामलोचनाश्च नव-नवसज्जा-विशेषान् चित्राणि चामरणानि निखिल-विलास-राशीश्च कामयमाना धनिनमेवोपतिष्ठन्ते, पर स्वस्थो नीरोगश्चैव निरपायमर्थ-मर्जयितुं क्षमो न तु कश्चन। रोगी तु पैतृकमन्येन वा प्रत्तं राज्यं धन च न रक्षितुमपि शक्तः किमिति स्वयमुपार्जयितुम्।

धर्माचरणस्य द्रव्य-सग्रहस्य चोद्देश्यमेतावदेव यत् सांसारिकाणां विषयाणा-मुपभोगः। विविध-रस-गरभं चतुर्विधं भोज्यम्, मधुर-शीतला विहारा., चित्रा वेष-भूषाः अतुला विलासा., अनुपमा उपहसित-सुराङ्गनावाग्नोपमाः कामिन्य सर्वेऽप्येते

विषया आरोग्य-कृपा-भाजनानामिव कृते सुखावहाः । रोगी तु तान्न भोक्तुं नापि हातुं कल्पते, केवलं दशं दशं धुनोति शिरः, भोगाय प्रयतमानस्तु जीवितेनाऽपि वञ्च्यते । एवं जीवनस्य तृतीयः पुरुषार्थः कामोऽपि रोगहीनस्यैव सुखाय ।

चतुर्थस्तु चरमः परम-कृच्छ्र-साध्यो मोक्षो नाम न यः स्वस्थेनाऽपि सुकरोऽधिगन्तुं का कथाऽस्वस्थस्य ? 'अनेक-जन्म-संसिद्धस्ततो याति परां गतिम्' इत्युक्त्या नैक-जन्म-कृत-साधना-सापेक्षोऽयं निराकांक्षैः, निस्पृहैः, निर्विकारैः, निर्लिप्तैः, यदृच्छालाभ-सन्तुष्टैः, यथोपपन्न-जीवनयात्रैः, परमहंसैरेवाधिगन्तव्यः । रोगी तु प्रत्यक्षेऽपि जीवने घुणैरिव रोगैरन्तरा भक्षितः केवलं पथ्यम्, भेषजम्, पौष्टिकं खाद्यम्, अपरुषा शय्याम्, प्रोत्साहनानि ससान्त्वनानि च वचनान्यपेक्षते । क्व स प्राणायामादि-साधना साध्नुयात् ?

एवंविधे व्यतिकरे जीवनस्य साफल्यमपि नीरोगतापेक्षम् । महाभारते जीव-लोकस्य सुखेषु सदाऽऽरोग्यमपि परिगणितम् । तथाहि—

अर्थागमो नित्यमरोगिता च
प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या
षड् जीवलोकस्य सुखानि राजन् ॥ (म.भा.उ.)

संसारत्यागिना योगिनामपि कृते शरीरस्य रोगेभ्यो रक्षणाय सशोधनकार्याणि वर्णितान्याचार्यैः । तेषामपि स्वास्थ्य-साधनं युक्ताहार-विहारता नितरामनुपेक्षणीया । यथा चोक्तं भगवद्गीतायाम्—

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।
न चातिस्वप्न-शीलस्य जाग्रतो नैव चार्जुन ॥ (गी ६।१६)
युक्ताहार-विहारस्य युक्त-चेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ (गी.६।१७)

सर्वेषामपि भोगानामेकायतनमिदं हि शरीरम् । तस्मिन्नारोग्यभाजि भोगा भोगा अन्यथा तु ते रोगा एव । अतो धर्माचरणार्थं शरीरं स्वास्थ्यं वोपेक्षमाणा जना बोध्यन्ते धर्माचार्यैः—

शरीरमाद्यं खलु धर्म-साधनम् ।

आरोग्य-शालिनि काय एव स्थिरं मनः, विशेष-स्फुरणा-मयी बुद्धिरपि सव्याहृतं प्रस्फुरति । न रोगिणो मस्तिष्कमपि कृत्ये प्रभवति । इयमुक्तिरधात्र प्रमवति—

'अन्धे चिन्ते कुतः प्रज्ञा ।'

तथा च—

'Sound mind in a sound body.'

अतः प्राक्तनैराचार्यैः सर्वेषामपि नराणां कृते नियम-परिग्रहस्य विधानं कृतम्। अनियत-जीवना हि कदर्थ्यन्ते विविधैः रोगैः। आरोग्य-शालिनां स्वर्गायतेऽयमेव लोकः। स्वस्थो जनो यथा परुष-परुषायामपि पाषाण-निचितायामपि भुवि निर्द्वन्द्वं निद्रा-रसमनुभवति, रूक्षानपि चणकान् सरुचि भुञ्जानः सुधा-सारमिव स्वदते न तथा रोग-ग्रस्तो मसृण-मसृणाया तूलिका ऽऽ स्तरण-सुस्तराया शय्याया शयानः पीयूष-मयानीव मधुरतराणि फलानि भक्षयन् निद्रासुखमाहार-निर्वृतिं वा भजते। इत्थं सकल-जीवनानन्द-प्रदमारोग्यमेव जगतीह कमनीयतममभिलषणीयतममास्वादनीय-तममिति सुतरामुक्तमभियुक्तैः—

धर्मार्थकाममोक्षाणामारोग्य मूलमुत्तमम्।

कामी स्वतां पश्यति

अस्मिञ्जगति विविध-भाव-बन्धुरे स्वाभीप्सित-सिद्धि-मधुरे नित्यं घटन्ति नैका घटनाः फलन्ति विविधा अवस्थाः उदयन्ते नाना-रूपाणि वस्तूनि, लक्ष्यन्ते सुरूपाः कुरूपाश्च जनाः, स्पृश्यते सुधार-गिरि-शिखिर- हिमराशि-ललितो नन्दन-वन-विकचित-नवल-प्रसून-परिमल-ललित-सुरभि- दहन-शिखा-परिप्लुष्ट इव निदाघ-दिवस-दिवसकर-किरण-कृत-ताप-तपनायितश्च समीरणः, भुज्यन्ते सुधा-माधुरी-मधरयन्तो मधुरतर-मधुरसेन कटु-तिक्त-क्षार-कषायाश्च पदार्थाः। तेषां साधुताऽसाधुता वा केवलमात्मनो रुचेरनुबन्धिनी। यत्र खलु प्राणिना कामो भवति तदेव वस्तु साधु नान्यत्। यदुक्तं बृहदारण्यकोपनिषदि—"न वा अरे पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवति; न जायायाः कामाय जाया प्रिया भवति, आत्मनस्तु कामाय जाया प्रिया भवति, न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रिय भवति न वा अरे ब्रह्मणः कामाय ब्रह्म प्रिय भवत्यात्मनस्तु कामाय ब्रह्म प्रिय भवति न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति न वा अरे देवानां कामाय देवाः प्रिया भवन्ति आत्मनस्तु कामाय देवाः प्रिया भवन्ति न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति, न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रिय भवति।"

(बृ उ.२।४।५)

एषंकारमयता विविध-प्रकृति-निवृत्ति-मूल जनानाम्। यत्र यस्य उदयते जनस्य, तत्सर्वमात्मनीनमिव कलयति। यथा कस्मिंश्चित्पञ्जर-गते शुके रटति यथेच्छ स्वामि-प्रेतमेव तदयं परिचिनोति समर्पयते च जनः। वान्दविकः (हलवाई) बूचिमाऽऽमिदो-रिण्डकादिभक्षण-प्रेरणामेव तस्याशयं कथयति, शाक-विक्रयी च न निर्दिश्य तारस्वरं ब्रूते, 'नहि नहि सुधोज्ज्वलं ब्रूते मास्तुकम्, साधुकम्, सतीनात् गुञ्जनानि, तमस्तराशि,

गोजिह्वाम, पटोलकानि क्षीणीत' इति। साधुः कश्चित् प्रत्याचक्षणस्तम् बोधयति, 'रे भोगपरायणाः ! शुकोऽप्ययं प्रबोधयति वो राम रामेति जपितुम्' इति, लुण्टाकाश्च 'अरे, बध्नीत, मारयत लुण्टतेमम्' इत्येवं भावं तस्य स्वीकुर्वन्ति। कोऽपि पलायित-स्तस्करः स्वभावादप्यात्म-मुखे पश्यन्तं रक्षिणं (Policeman) दृष्ट्वा भयात् 'अभिज्ञातोऽहमनेन, अत एव बद्धैकतानया दृष्ट्या मां पश्यति' इति बुद्ध्वा स्विन्नगात्रो जायते। रथ्या-गतं पान्थं वस्तु-कौतुकादपि विपणि-निहित-दृष्टिं पणिश्चिक्रीषुमेव कलयति। स्वभावादपि वातायनोपहितमुखी बहिर्दृश्यानि निभालयन्ती तरुणीं विलोक्य विटः 'ध्रुवं मामियं कामयते, तत एव मयि बद्ध-चक्षु' रिति चिन्तयन् प्रसीदति। सदोषश्चेत् परेण कथितां स्वाभाविकीमपि निर्दोषामप्यन्य-परामपि वाचं स्वाधिक्षेपपरामेव प्रत्येति। काणो यथा ममदर्शितायास्तात्पर्यं काणत्वमेव जानाति। अभिलाषुकः सर्वमपि स्वाभिप्रायानुसारमेव बुध्यते। एतदेव मनोवैज्ञानिकं सत्यं समुद्घाटयता कालिदासेनोक्तम्—

स्निग्धं वीक्षितमन्यतोऽपि गमने यत् प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव।
मा गा इत्युपरुद्धया यदपि सा सासूयमुक्ता सखी
सर्वं तत् किल मत्परायणमहो कामी स्वतां पश्यति॥ (शा.२।२)

इयं कामवृत्तिः सर्वत्र प्रत्यक्षमेति। तयाऽनुरुद्धो जनो बहुधाऽचेतनेष्वपि स्वाभिप्रेत-भावनां करोति। तदैवोर्वशी-विरह-पर्युत्सुकः पुरूरवा नदीमपि स्वप्रिया-मेवाकलयति—

तरङ्ग-भ्रू-भङ्गा क्षुभित-विहग-श्रेणि-रशना
विकर्षन्ती फेन वसनमिव संरम्भ-शिथिलम्।
पदावर्तं यान्ती स्खलितमभि सन्धाय बहुशो
नदीवेगेयं ध्रुवमसहना सा परिणता॥ (विक्र.४।५२)

श्रावणमासे लुप्तदृष्टिर्निखिलमपि जगत् शष्प-श्यामलं पश्यति। काम-परवशः सकलमपि वृत्तमात्मपरमेव निभालयति, स्वकीया भावनाऽन्यत्राऽप्युनुभूयते तेन। स्वराग-रक्तमिव भुवनं प्रतीयते। विक्रमोर्वश्यां प्रिया-विरहितो राजा मयूरं सौन्दर्य-प्रतिद्वन्द्विन्याः कलाप-प्रतिभट-केशकलाप-धारिण्या उर्वश्या विनाशेन मुदितं विभावयति वदति च—

मृदु-पवन-विभिन्नो मत्प्रियायाः विनाशाद्
घन-रुचिर-कलापो निःसपत्नोऽद्य जातः।
रति-विगलित-बन्धे केशपाशे मुकेश्याः
सति कुसुम-सनाथे किं करोत्येष बर्हीं॥ (विक्र० ४।२२)

श्रावणमासे लुप्तदृष्टिर्निखिलमपि जगत् शष्प-श्यामलं पश्यति। काम-परवशः सकलमपि वृत्तमात्मपरमेव निभालयति, स्वकीया भावनाऽन्यत्राऽप्युनुभूयते तेन। स्वराग-रक्तमिव भुवनं प्रतीयते। विक्रमोर्वश्यां प्रिया-विरहितो राजा मयूरं सौन्दर्य-प्रतिद्वन्द्विन्याः कलाप-प्रतिभट-केशकलाप-धारिण्या उर्वश्या विनाशेन मुदितं विभावयति वदति च—

मृदु-पवन-विभिन्नो मत्प्रियायाः विनाशाद्
घन-रुचिर-कलापो निःसपत्नोऽद्य जातः।
रति-विगलित-बन्धे केशपाशे मुकेश्याः
सति कुसुम-सनाथे किं करोत्येष बर्हीं॥ (विक्र० ४।२२)

अन्यत्र च स एव गगन-निचुल-नीलकण्ठ-जलधर-सहज-चेष्टितेषु स्व-सत्कार-मिवानुभवति—

विद्युल्लेखाकनकरुचिर श्रीयितानं समाभ्रं
व्याधूयन्ते निचुल-तरुभिर्मञ्जरीचामराणि ।
घर्मच्छेदात्पटुतरगिरो बन्दिनो नीलकण्ठाः
धारासारोपनयन-परा नैगमाश्चाम्बुवाहाः ॥ (विक्र. ४।१३)

कामेन तथा स्वपरायणो मानवो भवति यथा जीवितायितां प्रियामात्मविरह-कर्कशां ज्ञात्वा न खिद्यतेऽपि तु प्रसन्न एव भवति । उत्कण्ठा-कृशामपि मदनलुप्त-शक्ति-कामपि सुन्दरतरा जानन् सत्यवसरे तथावस्थामेव रमयितुं प्रयतते । तत एव सुरतमृदिताया बालवनितायास्तनिमा तं सुखयति—

मणिः शाणोल्लीढः समर-विजयी हेति निहतो
मदक्षीणो नागः शरदि सरितः श्याम-पुलिनाः ।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गलित-विभवाश्चार्थिषु नृपाः ॥

दमयन्ती-वियोग-कदर्थितो नलो लता राग-विह्वला विलासिनीमिव पश्यति । चम्पक-कोरकावली. कामस्य बलिदीपिका मन्यते, दाडिम-लता च विरहिणीमाकलयति, नागकेसरं च मदन-शर-फल-तीक्ष्णीकरणोपयुक्तं शाणं स्वीकुरुते ।

नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गी मकरन्द-शीकरैः ।
दृशा नृपेण स्मित-शोभिकुड्मला दरादराभ्यां दरकम्पिनी पपे ॥ (नै.च १।८५)

शकुन्तला-मुख-कमल-मुग्धी-कृतमिव तामभिचञ्चूर्यमाणं भृङ्गं विलोक्य दुष्यन्तस्य—

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीम्
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिक-चरः ।
करौ व्याधुन्वत्याः पिबसि रति-सर्वस्वमधरम्
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती ॥ (शा.१।२३)

इयमुक्तिस्तस्य कामवृत्तिमेव स्फुटी-करोति ।

यत्र स्वात्म-विषयेऽनुरागस्य वृत्तौ सन्देह स्तत्रैतादृशीनां चेष्टा स्वविषया साधु प्रतीयते । केनाप्यंशेन तादृशेषु लक्षणेषु स्फुटीभवत्सु भूयसा सा प्रतिपत्तिः । मालविकायामियं प्रवृत्तिः स्पष्टं पुष्टिमुपैति यदा मालविकाया गीतं नृत्यं च श्रुत्वा

जनमिमनुरक्तं विद्धि नाथेति गेये
वचनमभि नयन्त्या स्वाङ्ग-निर्देशपूर्वम् ।
प्रणयगतिमहृष्ट्वा धारिणी-संनिकर्षा—
दहमिव सुकुमार-प्रार्थना-व्याजमुक्तः ॥ (मा.म.२।५)

परीक्षागतायां अपि मालविकायां गानादिकमात्मपरतया चिन्तयन् राजा कामिनामात्म-परायणता साधु समर्थयते । विरह-वेदनायां च स वसन्तस्यात्मानं प्रति मदवेदनामिवानुभवति ।

आमत्तानां श्रवण-सुभगैः कूजितैः कोकिलानां
सानुक्रोश मनसि रुजः सह्यतां पृच्छतेव ।
अङ्के चूत-प्रसव-सुरभिर्दक्षिणो मारुतो मे
सान्द्रस्पर्शैः करतल इव व्यापृतो माधवेन ॥ (मा.म.३।४)

दमयन्ती-वियोग-दूनो नलः केतकं दृष्ट्वा दीपितव्ययस्तत् स्व-पराग-दानं शरान् क्षिपतः कामस्य साहाय्यमिवाचरन् लक्षयति—

धनुर्मधुस्विन्नकरोऽपि भीमजा-परं परागैस्तव धूलि-हस्तयन् ।
प्रसून-धन्वा शरसात्करोति मामिति क्रुधाऽक्रुश्यत तेन केतकम् ॥
((नै.च.१।८१)

दोहद-धूपितेषु दाडिमी-द्रुमेषु निलम्बितान् दाडिमानपि विदर्भ-सुता-स्तन-पीनतामध्ये धूमपायिनोऽधोमुखीभूय लम्बमानान् तपस्विन इवालोकयति

विदर्भसुभ्रू-स्तनतुङ्गतापते घटानिवापश्यबलं तपस्यतः ।
फलानि धूमस्य भयान्नधोमुखान् स दाडिमे दोहद-धूपिनि द्रुमे ॥
(नैष. १८२)

नल-विरह-विधुरिता दमयन्ती च चन्द्रोदयादुद्दीप्तमन्मथा 'मनश्चन्द्रे निलीयते' इति श्रुतिवाक्यं स्वाभिप्रायानुकूलं बुध्यते—

हिमसुभिर्मलंपिठंजठं मन्यते मयि निमज्जतु भीम-सुता-मनः ।
मम किल श्रुतिमाह तर्षिका नल मुखेन्दु-परां विबुधः स्मरः ॥
(नैष.४।५२)

निसर्गोऽयं कामिनां यो/ स्व-वृत्त्यैव विश्वं निभालयन्ति, चेतनमचेतनं वा न पश्यन्तः स्वोपकरणतयोपयुञ्जते ते ।

'कामार्ता हि प्रकृति-कृपणाश्चेतना ऽ चेतनेषु ॥' (पू.मे.)

तेषा मायतया रागानुरक्तमिव, प्रियतमयमिव, क्रीडामयमिवात्म-प्रतिबिम्बमयमिव चेतनतामयमिव मलामयमिव सौन्दर्यमयमिव भुवनं भासते । एतत्समीक्ष्य साधूक्तम्-'कामी स्वतां परयति' इति ।

मति-दर्पणे कवीनां विश्वं प्रतिफलति

वेदेष्वात्मनो विषये निगदितम् 'कविर्मनीषी परिभूः स्वयम्भू' इति। मनन-शक्ति-सम्पन्नः, भ्रमण-परिशीलनादिना सर्वस्य जगतः परितो भवन् नव-नवोन्मेष-शालिन्या प्रतिभया प्रतिभात-वस्तु-वर्णन-वैचित्र्येण नव-कल्पना-परिकल्पन-सामर्थ्येन च स्वय नव सृष्टेः प्रभवन् देश-कालादि-सीमातिक्रान्तमपि वस्तु गोचरीकुर्वन्नन्तर्दृशः क्रान्तद्रष्टा कविर्भवति। अतएवाघटित-घटना-पटुर्विधाता कविः सृष्टिश्चेयं चकित-चकितं विदधती जनमन स्ववैविध्येन तस्य काव्यमुच्यते—

पश्य देवस्य काव्यं न ममार न जीर्यति।

तस्यैव परमात्मनः प्रतिरूपोऽयं मानव कविरपि स्वप्रतिभया नित्य-नव-रसास्वादोद्वेलां परमाह्लादिनीं सृष्टिं सृजति, नहि नहि, विधातुरपि कृतेर्गुणमयीं कृतिं कर्तुं स कृती। एतदेव विभाव्योक्तं मम्मटभट्टैः—

नियतिकृतनियमरहितां ह्लादैकमयीमनन्य-परतन्त्राम्।
नव-रस-रुचिरां निर्मितिमादधती भारती कवेर्जयति॥ (का. प्र. १)

न तस्य रचना धातुः कृतिरिव देशकाल-सीम-सीमिता सुखदुःखादि-मिश्रितानुभूतिमयी, प्राकृतनियमाधीना केवल षड्रसमयी च। तस्य सृष्टिः काव्यमेव यत्र सोऽद्भुत प्रजापतिः। तस्य लेखन्येव तूलिकायाश्छेदन्याश्च (छेनी) सर्वं व्यापारमनुतिष्ठति, शब्दमयान्यपि, भावमयान्यपि, कल्पना-प्रसूतान्यपि, अमूर्तान्यपि द्रव्याणि धर्मास्थिमयानि, घनानि यथार्थानि मूर्तानि च सा प्रस्तौति। न तस्य सृष्टेः साक्षात्करणं शोक-घृणा-भयादिकोद्वेग-जननाय कल्पते। अत एवोक्तं केनाऽप्यभियुक्तेन—

अपारे काव्य-संसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्व तथेदं परिवर्तते॥
शृङ्गारी चेत्कविः काव्ये जात रसमय जगत्।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत्॥ (ध्वन्या. ३)

जनमिमनुरक्तं विद्धि नाथेति गेये
वचनमभि नयन्त्या स्वाङ्ग-निर्देशपूर्वम् ।
प्रणयगतिमदृष्ट्वा धारिणी-संनिकर्षा—
'दहमिय सुकुमार-प्रार्थना-व्याजमुक्तः ॥ (मा.प्र.२।५)

परोक्षागतायां अपि मालविकायां गानादिकमात्मपरतया चिन्तयन् राजा कामिनामात्म-परायणतां साधु समर्थयते । विरह-वेदनायां च स वसन्तस्यात्मानं प्रति समवेदनामिवानुभवति ।

आमत्तानां श्रवण-सुभगैः कूजितैः कोकिलानां
सानुक्रोशं मनसि रुजः सह्यतां पृच्छतेव ।
अङ्के चूत-प्रसव-सुरभिर्दक्षिणो मारुतो मे
सान्द्रस्पर्शैः करतल इव व्यापृतो माधवेन ॥ (मा.अ.३।४)

दमयन्ती-वियोग-दूनो नलः केतकं दृष्ट्वा दीपितज्यथस्तत् स्व-पराग-दानैः शरान् क्षिपतः कामस्य साहाय्यमिवाचरन् लक्षयति—

धनुर्मधुस्विन्नकरोऽपि भीमजा-परं परागैस्तव धूलि-हस्तयन् ।
प्रसून-मन्वा शरसात्करोति मामिति क्रुधाऽक्रुश्यत तेन केतकम् ॥
((नै.च.१।८१)

दोहद-धूपितेषु दाडिमी-द्रुमेषु निलम्बितान् दाडिमानपि विदर्भ-सुता-स्तन-पीनताप्तश्रये धूमपायिनोऽधोमुखीभूय लम्बमानान् तपस्विन इवालोकयति

विदर्भसुभ्रू-स्तनतुङ्गतामृते यदानियापश्यदलं तपस्यतः ।
फलानि धूमस्य यमानयोमुखान् स दाडिमे दोहद-धूपिनि द्रुमे ॥
(नैच. ।८२)

नल-विरह-विधुरिता दमयन्ती च चन्द्रोदयादुद्दीप्तमन्मथा 'मनश्चन्द्रे निलीयते' इति श्रुतिधावयं स्वाभिप्रायानुकूलं बुध्यते—

किमसुभिरलंघितैर्जड मन्यसे मयि निमज्जतु भीम-सुता-मनः ।
मम किल धृतिमाह तर्षिकां नल मुखेन्दु-परां विधुयः स्मरः ॥
(नैच.४।५२)

निसर्गोऽयं कामिनां ये स्व-वृत्त्यैव विश्वं निर्मालयन्ति, चेतनमचेतनं वा न पश्यन्तः स्वोपकरणतयोपयुञ्जते ते ।

'कामार्ता हि प्रकृति-कृपणाश्चेतना ऽचेतनेषु ॥' (पू.मे.)

तेषां भावनया रागानुरक्तमिव, प्रियमयमिव, क्रीडामयमिवाराम-प्रतिबिम्बमयमिव चेतनाचामयमिव कलामयमिव सौन्दर्यमयमिव भुवनं जायते । एतदभोदय साधूक्तम्-

'कामी स्वतां पश्यति' इति ।

मति-दर्पणे कवीनां विश्वं प्रतिफलति

वेदेष्वात्मनो विषये निगदितम् 'कविर्मनीषी परिभूः स्वयम्भूः' इति। मनन-शक्ति-सम्पन्नः, भ्रमण-परिशीलनादिना सर्वस्य जगतः परितो भवन् नव-नवोन्मेष-शालिन्या प्रतिभया प्रतिभात-वस्तु-वर्णन-वैचित्र्येण नव-कल्पना-परिकल्पन-सामर्थ्येन च स्वयं नव सृष्ट्यै-प्रभवन् देश-कालादि-सीमातिक्रान्तमपि वस्तु गोचरीकुर्वन्नन्तर्दृशः क्रान्तद्रष्टा कविर्भवति। अतएवाघटित-घटना-पटुर्विधाता कविः सृष्टिरूपेयं अचिन्त-चरितं विदधती जनमनः स्वर्वैचित्र्येण तस्य काव्यमुच्यते—

पश्य देवस्य काव्यं न ममार न जीर्यति।

तस्यैव परमात्मनः प्रतिरूपोऽयं मानवः कविरपि स्वप्रतिभया निरय-नव-रसाभिभावोर्वरां परमाह्लादनीं सृष्टिं सृजति, नहि नहि, विधातुरपि कृतेर्गुणमयीं कृतिं कर्तुं स कृती। एतदेव विभाव्योक्तं मम्मटभट्टैः—

नियतिकृतनियमरहितां ह्लादैकमयीमनन्य-परतन्त्राम्।
नव-रस-रुचिरां निर्मितिमादधती भारती कवेर्जयति॥ (का. प्र. १)

न तस्य रचना धातुः कृतिरिव देशकाल-सीम-सीमिता सुखदुःखादि-मिश्रितानुभूतिमयी, प्राक्तननियमाधीना केवलं षड्रसमयी च। तस्य सृष्टिः काव्यमेव यत्र सोऽद्भुतः प्रजापतिः। तस्य लेखन्येव तूलिकायाश्छेदन्यादश्च (छैनी) सर्वं व्यापारमनुतिष्ठति, शब्दमयान्यपि, भावमयान्यपि, कल्पना-प्रसूतान्यपि, अमूर्तान्यपि द्रव्याणि अर्थक्रियमयानि, घनानि यथार्थानि मूर्तानि च सा प्रस्तौति। न तस्य सृष्टेः साधारकरणं शोक-घृणा-भयादिकोद्वेग-जननाय कल्पते। अत एवोक्तं केनाप्यभियुक्तेन—

अपारे काव्य-संसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते॥
शृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत्।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत्॥ (ध्वन्या. ३)

कवेरन्तर्दृष्टिर्न क्वापि प्रतिहन्यते । सूक्ष्मतमाः स्थूलतमाश्चापि पदार्थाः प्रत्यक्षाः परोक्षाश्च योगिन इव प्रणिधानेन प्रतिभानवशात् पुरत एव प्रस्फुरन्ति । नास्ति किमपि तत्त्वं यत्कवेरगोचरम् । तथाहि—

न तच्छास्त्रं न सा विद्या न तच्छिल्पं न सा कला ।
जायते यन्न काव्याङ्गमहो भारो महान् कवेः ॥

अतः सकलमपि न न तस्यान्तर्दृशः पुरो भवति । दिवाऽपि गहनतमस्तोम-वशाद् बहुल-पक्ष-तमी-मयेष्विव कान्तारपथेषु, अविरलाऽनवोद्वमन-ज्वाला-जटाल-शिखर-कुहरेषु ज्वालामुख-शिखरिषु, अमितनक्र-चक्रमकरनिकर-करालितेषु प्रचल-वीचि-माला-दोला-प्रेंखोल-जलराशिषु वारिराशिषु च भुवो गर्भेऽपि, स-गह्वरेऽपि द्यु-चत्वरेऽपि कवेर्दृष्टिरबाधं प्रतिपद्यते विमर्शनीयं वस्तु ।

न केवले जगति विद्यमानं सम्भावितं च स वर्णयितुं क्षमः ; नवामपि सौन्दर्य-प्रवणा निखिल-जन-विस्मय-करीमभूतपूर्वामश्रुत-पूर्वामदृष्ट-पूर्वामवाङ्मनसगोचरा-मतीन्द्रियां सृष्टिमपि रचयितुं समर्थः । तस्य हि कल्पना-शक्ति-द्विविधा ग्राहिका निर्मायिका च । एकयाऽनुभूतमपि पदार्थं भावातिरेकात् स्मृति विषयमपि स्व-प्रतिभया पुरोवर्तिनमिव यथार्थं वर्णयति । एवं तस्य प्रतिभा पाश्चात्य-काव्य-विद्भिः इमेजिनेशन (Imagination) अथवा कल्पनाशक्तिः Imaginative Power इत्युच्यते । परया तु स स्वानुभवं कल्पनां चाश्चित्यासंभाविनीमपि विस्मयावहां चारिमातिशय-शालिनी नवामेव सृष्टिं निरूपयति । इयमुत्प्रेक्षणाशक्तिः फैन्सी (Fancy) इति संज्ञयाऽऽख्यायते । इमे द्वे अपि शक्ती कविं योगिनमिव त्रिकालदर्शिनम्, विज्ञानिनमिव वस्तु-तत्त्व-विदम्, चित्रकारमिव चित्रकर्मपटुम्, विलासिनमिव प्रवृद्धरागम्, ऐन्द्रजालि-कमिवास्यानोपनतवस्तु-प्रस्तावकम् सकल-शास्त्र-विशारदमिव बहुश्रुतम्, भूचक्रमिव ध्रुव-भ्रमणशीलम्, तार्किकमिव न्यायवृत्तिम्, बहुप्रज्ञम्, बहुश्रुतम्, बहुदर्शिनम्, बहुपरि-शीलिनम्, बहुचिन्तनं विदधतः ।

किं न स प्रस्तौति स्वकृतिषु ? प्राजीवनमदर्शनीयां अपि सुरलोकगोचराः कमनीयतमा रमण्यस्तासां च चित्रीयापायकं सौन्दर्यम्, कल्प-शत-दुर्लभाः सम्पदः, विचित्राणि वृत्तिं निबध्नन्ति दर्शनाणा हृद्यानि कल्पनाया अप्यगोचरतां गतं देवलोक-दुर्लभं वस्तु, अनुभवैकवेद्यः सुमनसां ललितमसृणः परिमलः सर्वमपि कवेः प्रतिभाया विषयः । तिरश्चां विविधान् व्यापारान्, बालानां सहज-मधुराः क्रीडाश्च मानव-चेष्टा-सामान्येनैव स हृद्यमेव वर्णयति । भूतिकलायाः परमं कौशलं शिशुपालवधस्य निम्ने पद्ये चापु विभाव्यते—

विक्रंसया कृत्रिम-पत्रि-पङ्क्तेः कपोत-पालीषु निकेतनानाम् ।
सन्ध्यागमाशङ्कि-शिखण्डिनाऽऽर्यो मनः कृत्रिममेव मेने ॥ (शिशु-३।५१)

अत्र विवेकवता मानवानामपि भ्रमनिरूपणात्सजीवतैव शिल्पि-विरचित-विटङ्क-गत-खगकुलस्य सुतरा प्रतिभाति । अन्यत्र चाट्टप्टनगरसंभवस्य वन्यवारणस्य पलायित-नृप-सदन-गतस्य विस्मयोऽपि द्रष्टव्य —

वन्यो हस्ती स्फटिक-घटिते भित्तिभागे स्वबिम्ब
दृष्ट्वा दूरात् प्रति-गज इति त्वद्द्विषा मन्दिरेषु ।
हत्वा कोपाकुलितरदनस्तत्पुनर्वीक्षमाणो
मन्द मन्द स्पृशति करिणीशङ्कया साहसाङ्क ॥ (का. कल्प. ४।४)

कवे काव्य-जगति न तरुलता अपि स्वसमय सीमान पालयन्ति, कालिदासस्याल-कायाम् तु पर्यायलभ्यान्यपि कुसुमानि नित्यसुलभानि ।

हस्ते लीला कमलमलके बालकुन्दानुविद्ध
नीता लोध्र-प्रसव-रजसा पाण्डुतामानने श्री. ।
चूडा पाशे नवकुरबक चारु कर्णे शिरीष
सीमन्ते च त्वदुपगमज यत्र नीप वधूनाम् ॥ (उ. मे. २)

अपि च

यत्रोन्मत्त-भ्रमर-मुखरा पादपा नित्य पुष्पा
हस-श्रेणी-रचित रशना नित्य पद्मा नलिन्य ।
केकोत्कण्ठा भवन शिखिनो नित्य भास्वत्कलापा
नित्य ज्योत्स्ना प्रति-हत-तमो वृत्ति रम्या प्रदोषा ॥ (उ मे ३)

विस्मय-लोकस्य सृष्टिस्तस्य मन्ये विस्मयमपि विस्मापयते । अभिज्ञान-शाकुन्तले मारीचस्याश्रमे—

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चन पद्म रेणु कपिशे पुण्याभिषेक क्रिया ।
ध्यान रत्न-शिला गृहेषु विबुध-स्त्री-सन्निधौ सयमः
पद्वाञ्छन्ति तपोभिरन्य मुनयस्तस्मिंस्तपस्यन्त्यमी ॥ (शा ७।१२)

इतोऽपि विस्मयकरं हृदयहर बुद्धि-वैभव-प्रकाश वाङ्मनसागोचर सौन्दर्य-ह्वर्यचित्र-व्यापारबन्धुर च जगत् कवि-पञ्चाननस्य बाणस्य काव्यबन्धे । तत्र वैभव दारिद्र्यम् च, उल्लासातिशय शोकस्य च चरम परिपाक, उपहसित-सकल-लोक-मर्यादः सविलास-रतिर-द्विगुणितानुरागो राग कृत-बन्धु-हृदय सविभागो विरागश्च, पार्थिव कुतूहलवर दिव्य च मन्यरित-मति-भ्रमर सौन्दर्यम्, अविज्ञात-खेदानुभवो नर्म-परिहास, विपुरित-सुख-श्लाघश्च विलाप, सुरूप कुरूप च नगर-सुषमा वनश्रीश्च, पावन

तपोवनं सवल-कुत्सानामङ्गणं पक्वणं च मानवानां तिरश्चां च निसर्ग-विश्रब्धचेष्टाः, नियति-रमणीयानि धिक्कृत-सुर-वन-रामणीयकानि रोमाञ्चोदञ्चनानि च विकट-गिरि-कटक-कुटिल-कूट-गह्वर-कटु-कान्तार-भीषणानि प्रकृतेः स्वरूपाणि नय-प्रपञ्च-वक्राः स्वभाव-सरसाश्च व्यापाराः सर्वमपि प्राचुर्येण सुलभम्। उदयमानस्यास्तं यतश्च प्रभाकरस्य निशा-वसन-चटुल-करस्य दिग्वधू दुकूलायिताच्छाच्छातपस्य प्राचीमुख चुम्बतः वार्धक्य-पलितस्य इव पाण्डरिमाणं वहतश्च रजनी-पतेरतिशयशोभनीया छटा भूयो भूयः प्रस्तूयते। शिञ्जद्वारवाणाना सैनिकाना पुरस्कृत-गर्जित-यान प्रयाणम्, आखेटक-व्यसनिना शवराणा क्रूरकर्माणि, विभवानुरूपकन्यका-परिणय-संभारा म्रियमाणस्य प्रभाकरवर्धनस्य आतुरजनोचिता, पितृ-व्यसन-विषण्णस्य भ्रातृवध-वृत्तान्तश्रवण-क्षुब्धस्य च हर्षवर्धनस्यावस्थे, विजय-मद-मत्त-भट-दल-विलुण्ट्यमानाना ग्रामीणाना चीत्काराश्च समानयोगक्षेन तत्रोपवर्णिताः।

न केवलं चक्षुषोर्गोचर एव मानसेऽपि चानुभूतिमात्रवेद्ये कवीनामप्रतिहता प्रतिभा। तेषामुल्लिपु जीवनस्य सनातन सत्यमालक्ष्यते शब्दमयम्। 'अविवेकः परमापदा पदम्' 'दिने दिने यन्नवतामुपैति तदेव रूप रमणीयतायाः'। 'प्राणाबन्धः कुसुम-सदृशं प्रायशोह्यङ्गनाना, सद्यःपाति प्रणयि हृदय विप्रयोगे रणद्धि,' 'कामी स्वता पश्यति,' 'सर्वः कान्तमात्मीयं पश्यति,' 'ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः।' 'सुखमुपदिश्यते परस्य' एतासूक्तिषु न तथाऽनुभूयते मानसी वृत्ति र्यथा निम्नाद्धितेपूद्धरणेषु—

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तर-सौहृदानि॥ (शा. ५।२)

"दृष्ट्वा च प्रथम रोमोद्गमः ततो भूषणरवः, तदनु कादम्बरी समुत्तस्थौ। अथ तस्याः कुसुमायुध एव स्वेदमजनयत्, ससंभ्रमोत्थानो व्यपदेशोऽभवत्। उरसम एव गति रुरोध, नूपुररवाकृष्टहृसमण्डलमपयशो लेभे। निःश्वासप्रवृत्तिरेवाशुकं चलं चकार, चामरानिलो निमित्तता ययौ। अन्तः प्रविष्टचन्द्रापीडसपर्शलोभेनैव निपपात हृदये हस्तः, स एव करः स्खलनावरणव्याजो बभूव। आनन्द एवाश्रुजलसमपातयत् चलित-वर्णविलेप-कुसुमरजो व्याजमासीत्।"

अत्र चन्द्रापीडदर्शनेनोद्भूतरागोद्गमायाः कादम्बर्या हृदय-दशा अनुभावगुणेन वर्णिता। अन्यत्र च तस्या अन्तर्द्वन्द्वः—

'वपने, रिमिरमारब्धम्' इति निगृह्यैव लज्जया, 'गन्धर्वराज-सुनि, कथमीदृशं साहसमवलेप विनयेन, अयमसावद्भुतसन्नो यामभाग' कस्य नयः' इत्युपरुद्धयैव

मुग्धतया, 'स्वैरिणि, मा कुरु यथेष्टमेकाकिन्यविनयम्' इत्यामन्त्रितेव कुमारभावेन, 'भीरु नाय कुल-कन्यकाना क्रम' इति गर्वितेव महत्त्वेन, 'दुर्विनीते, रक्षाविनयम्' इति तर्जितेवाचारेण, 'मूढे मदनेनानेन लघुता नीतासि इत्यनुशासितेवाभिजात्येन''' इत्यादौ। कौशलमेवेद कवेर्दुर्विज्ञेयाकूते लज्जा कवाट-घटिते कुमारी हृदये प्रविश्य तद्व्यापार-समीक्षण यत्।

"यत्र च कन्यकाजनस्य कपोल तलालोक एव मुखप्रक्षालनम्, लोचनान्येव वर्णोत्पलानि, हसितच्छवय एवाङ्गराग, निश्वासा एवाधिवासगन्धयुक्तय अपरद्युतिरेव कुङ्कुमानुलेपनम्, आलापा एव तन्त्रीनिनादा, भुजलता एव चम्पकवेत्रयमाला, करतलान्यव लीताकमलानि, स्तना एव दर्पणा निजदेहप्रभैवाशुकावगुण्ठनम् जघन-स्थलान्येव विलासमणिशिलातलानि कोमलाङ्गनिराग एव चरणालक्तकरस, नखमणिमरीचय एव कुट्टिमोपहार-कुसुमप्रकरा।

'यत्र चालक्तकरसोऽपि चरणातिभार, वकुलमालिकामेखला कलनमपि गमन-विघ्नकरम्, अङ्गरागगौरवमप्यधिकश्वासनिमित्तम्, अशुकभारोऽपि ग्लानिकारणम्।

(काद पू)

एवविधानि सौन्दर्यातिशयस्य विस्तृतानि वर्णनानि कवे प्रतिभाया दूरगामिता व्यञ्जयन्ति। अपरत्र तु स सहृदयान् विस्मय सागरे निक्षिपन् व्यञ्जनयैव तादृशी चित्रीयावहा सृष्टि द्योतयति—

चित्ते निवेश्य परिकल्पितसत्त्वयोगाद्
रूपोच्चयेन विधिना रचिता दृशाङ्गी।
स्त्री-रत्न-सृष्टिरपरा प्रतिभाति मा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्या॥ (शा २।९)

प्राकृतेषु वर्णनेषु कवीना दृष्टिरतितरा सूक्ष्मा।

कर्तुं यच्च प्रभवति महीमुच्छिलीध्रामवन्ध्या
तच्छुत्या ते श्रवण-सुभग गर्जित मानसोत्का।
आ कैलासाद् विसकिसलयच्छेदपाथेयवन्त
सम्पत्स्यन्ते नभसि भवतो राजहंसा सहाया॥ (पू मे)

अत्र पृथ्व्या घनाघनरसितश्रवणकृतमुद्गतशिलीन्ध्रत्वमुर्वरत्वव्यापन च राजहंसाना विसकिसलय-सनाथ चञ्चूना मेघेन सह यान खग हृदय परिचय पान्थाना च सहयात्रिय-लालसत्व कवेरन्तर्वृत्ति-परिचितत्व च बोधयति।

उदयति वितनोत्यंरश्मिरज्जावहिमरुचीहिमधाम्नि याति चास्तम्।
वहति गिरिरय विसक्रियालयच्छेदपाथेयवन्ति

अत्रोदयमानस्य रवेरस्तमनोन्मुखस्य चन्द्रमसश्च सहैव क्षितिजोभयकोण-स्पर्शित्व कवि घण्टाद्वयपरिवारितस्य शक्रगजस्य शोभायाः स्मारयति ।

क्वचिच्च दुर्गमा वनकरिवप्रकेलिदन्तुराः पाषाणशिला उल्लिखन् वृद्धवेश्या अपि काव्यविषयतामानयति ।

अयमतिजरठा. प्रकाम-गुर्वीरलघुविलम्बि-पयोधरोपरुद्धाः ।
सततमसुमतामगम्यरूपाः परिणत-दिक्करिकास्तटीर्बिभर्ति ॥ (शिशु.४।२९)

अन्यत्र विमानदृश्यं जाह्नवी-कालिन्दी-सरस्वतीनां मेलनं रत्नमालामिवानेक-रागां पुरतः प्रस्तौति ।

क्वचित्प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सित-पङ्कजानामिन्दीवरैरुत्खचितान्तरेव ॥
क्वचित्खगानां प्रियमानसानां कादम्बसंसर्गवतीव पङ्क्तिः ।
अन्यत्र कालागुरु-दत्तपत्रा भक्तिर्भुवश्चन्दन-कल्पितेव ॥
क्वचित्प्रभा चान्द्रमसी तमोभिश्छायाविलीनैः शबलीकृतेव ।
अन्यत्र शुभ्रा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभःप्रदेशा ॥
क्वचिच्च कृष्णोरग-भूषणेव भस्माङ्गरागा तनुरीश्वरस्य ।
पश्यानवद्याङ्गि ! विभाति गङ्गा भिन्न-प्रवाहा यमुना-तरङ्गैः ॥ (र.वं.१३।५४-५७)

भीषणेषु संगरेषु, प्रकृते रोमहर्षकेषु च दृश्येषु न कवीनां दृष्टिः प्रतिहता । सान्यपि ते तेनैव नैपुण्येन यथायथं वर्णयन्ति यथा शोभनानि ।

शिलीमुखोत्कृत्त-शिरः-फलाद्या च्युतैः शिरस्त्रैश्चषकोत्तरेव ।
रणक्षितिः शोणितमद्यकुल्या रराज मृत्योरिव पानभूमिः ॥ (र.वं. ७।४९)

प्रकृतेश्च भीषणं दृश्यं यथा—

निष्पूजस्तिमिताः क्वचित्क्वचिदपि प्रोच्चण्ड-सद्यहवनाः
स्वेच्छागुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः ।
सीमान. प्रदरोदरेषु विलसत्स्वल्पाम्भसो यास्वयं
गृध्यद्धिः प्रतिमूर्यकैरजगरस्वेदद्रवः शोषते ॥ (च. च, २।१६)

स एव भवभूतिरन्यत्र विलापाङ्गनानां प्रमोदाकुला राज्ञां वर्णयति—

मन्त्रैः कल्पित-मङ्गल-प्रतिसराः स्त्री-हस्त-रक्षोत्पत-
व्यक्षोत्तंसभृतः विनष्ट सहगा हुतपुष्पशेष-स्रजः ।
एता. शोणित-पङ्क-मुद्ग-मधुपः संभूय कान्तैः पिब-
न्त्यस्मिन्-स्नेह-सुरा वसात-चषकैः प्रीताः विलापाङ्गनाः ॥ (मा. मा. ५।१८)

एतत्सर्वं कवे प्रत्यक्षदृश्यमिव प्रतिभाति ।

एतावता सिद्धमेव यन्नास्ति जगति तत्सूक्ष्म स्थूल वा दिव्य पार्थिव वा लौकिकमलौकिक सभवमसभव वा किमपि वस्तु यन्न कवे प्रतिभागोचरता व्रजति तस्यान्तर्दृष्टि प्रत्यक्षे परोक्षे वा सर्वत्र विषये तुल्य प्रस्फुरति । तदैवानन्दनिष्यन्दनानि काव्यानि ते निर्मातु प्रभवन्ति कृतयश्च तेषा सामाजिकाना मनासि बलादात्मसाद् विदधति । ततो नातिरञ्जनेय यदुक्तम्—

मति-दर्पणे कवीना विश्व प्रतिफलति ।

———

सृष्टिरिय सकलाऽपि प्राणिना पुंस्त्वे स्त्रीत्वे चेति लिङ्गद्वये (Two Sexes) विभक्ता। पुरुषो नारी चोभे अपि जगदिद पल्लवयत । यथा न केवला भूमिर्नापि केवल बीज वृक्षोद्गमाय प्रभवति, तथैव नैकल पुरुषो न वैकाकिनी नारी सन्तते प्रजननाय। काममद्य सूचीवेधादिना (Injection) रेतसि सचारिते स्त्री कल्पते प्रसवाय, पर बीज तत्त्व रेत पुरुषस्यैव न तु स्त्रिया । वस्तुत स्त्रिय पुस च योऽय सयोग, ब्रह्मणो मायायाश्च, पुरुषस्य प्रकृतेश्च सष्टुस्तस्य शक्तेर्वा भवति। उभयो-र्मिथुनीभाव एवार्धनारीश्वरत्व नरो गच्छति। इत्थ नारी नरश्च मिथोऽन्यस्य पूरको। नैक विनेतरस्य सामग्र्यम्। अत समाजे पुरुष स्त्री चोभे अपि समानमेव महत्त्व भजत । ना भर्ता गृहपतिश्चेत् नारी सदनस्य लक्ष्मी शोभा वा। नित्य कर्ममय पौरुषमय व्यवसायमय सघर्षमय च क्लेश बहुल नरस्य जीवन रमाभिरामा रामैव तारुण्य सहज विभ्रम-विलास रामणीयकैर्जनयन्ती रस (प्रेमाणम्) सरसयति।

एतादृशी महिम मयी जननी भगिनी पुत्री प्रेयसीति नैकरूपता बिभ्रतीय योषा बहुधा लोकैरनाद्रियते। केचन तां विलासैक प्रयोजनामपरे च सन्ततयुत्पादनैकार्थां स्वीकुर्वन्तो निराद्रियन्ते। न तस्या मनोभावानामादर, न सम्मानस्य चिन्ता, न शीलस्यापेक्षा, न सुख दुख सभावना, न विकासस्यावसर, न जीविते सौविध्यम्, न स्वावलम्बिता। सभ्यैरपि बर्बरैरिव सोपेक्ष्यते सर्वेषु कार्येषु पुरुषैरिति महान् खेद। विस्मरन्ति ते तस्या एव सविध्या कुक्षे प्रसूता यामसहाया सावहेल बलात् कुर्वन्ति। न जातु ध्यायन्ति, यामनादरेण सभावयाम सैव शिशून् न पितामही सती कार्यव्यग्राया जनन्या बहुधा लालितवती। कुत्सितया दृष्ट्या वीक्षितैव रमणी सोदरारूपेण पावन स्नेहमस्माक मनसु सचारयति। युगेभ्यो निराकृता निन्दिता च योषिदात्मजा भवन्ती वात्सल्य-स्रोतासि प्रवाहयति मानसेषु। तस्या बहुरूपतामेवाकलय्य प्रतिपादित कविकुल-गुरुणा कालिदासेन—

गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणा-विमुखेन मृत्युना हरता त्वा वद किं न मे हृतम् ॥ (र व.८।६७)

परमादर्शं वचनमिदम् । क्वैतादृशी दृष्टि पुरुषस्य स्त्रीषु आसीत्कश्चित्कालो यदा पुरुषस्यार्धाङ्गत्वेन स्वीकृता नारी यज्ञादिषु कर्मसु दक्षिणं भाग भूषयन्ती तस्य मूर्तिमती दीक्षेवाभवत् । यदा सदेहा सहिक्रयेव सा पत्यु प्राणायिता तस्य गृहस्वामित्वम-गात् । नैकला सा पातिव्रत-धर्मं बद्धा बभूव निरङ्कुश पुरुष कृत्वा । सोऽपि पत्नीव्रत-बद्धोऽपेक्ष्यत । आसीत्तदा व्यवस्था न यद् भर्ता तस्या परामर्शं विना किमपि कर्तुम-चेष्टत । साकारा भारतीव सा स्वज्ञान प्रकाशेनादीप्यत प्राक्शयच्च शिशूनामन्तरम् । तदा वधूरासीत् सुमगली याऽऽशास्यत विवाह्यवसरे—

सम्राज्ञी श्वशुरे भव, सम्राज्ञी श्वश्वां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु ॥ (ऋ.१०।८५।४२)

इति । इत्थ गृह-राज्यस्य सम्राज्ञी सा सर्वेषा पालकतया ममभाव्यत । तद-धीन कुलस्य योग-क्षेम इति कृत्वा सोपादिश्यत—

अघोर-चक्षुरपतिघ्न्येधि शिवा पशुभ्य सुमना सुवर्चा ।
वीरसूर्देव कामा स्योना शं नो भव द्विपदे श चतुष्पदे ॥ (ऋ१०।८५।४४)

तया सुमगल्या सहाभिन्नतनुत्वेन विहरत पत्युरभूत् स्वर्गायित गृहम । तस्ये-यमासीदाशीर्हृद्या तदा—

इहैव स्त मा वियौष्टं विश्वमायुर्व्यश्नुतम् ।
क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥ (ऋ१०।८५।४०)

'देवि, सुभगे, शुभे, भद्रे, प्रिये, आर्ये' इत्यादिभि सम्मानमयै. सम्बोधनै' सम्बोधिता सा प्रतिष्ठामन्वभवत् । न केवल नारी परेते भर्तरि तमन्वगात्, पतिरपि तस्या मृताया स्वजीविताशस्यापि प्रदानेन यमालयादपि ता न्यवर्तयत् । प्रमतिपुत्रो रुरुरस्य निदर्शन य स्त्रप्रिया प्रमद्वरा सर्पदश-मृता स्वायुषोऽर्धं प्रतिपाद्याजीवयत् । (तु. म.भा. आ. ९१।२५)

पर बालान्तरे दैवस्य प्रातिकूल्येन, पुरुषस्याभिमानेन वा, तस्यैव निरङ्कुशत्वेन वा, स्वदैन्येन वा मोहेन, अपया, जाड्येन शीलेन वा क्रौर्येण वाऽऽचारव्यवस्थापकानाम् शोचनीयतमा दीन-दीना दशा साऽभजत् । अहो, महद्धैर्यं योषित । किं न तया सोढम् ? उपानदिव सदा चरणस्थाना, शुनीव कटुशब्दभर्त्सिता, अनायेवोपेक्षिता, मार्ग धूलिरिव पादमृदिता, पतितेव सर्वाधिकारवञ्चिता, गर्भदासीव गृहकर्मसम्पादनयापितकाला, दुःशीलेव पदपालापपात्री, रासभीव निर्दय ताडिता, शून्य-गृह बलभीव दीन-दर्शना,

कौशिकीव असूर्यम्पश्या, वन्दिनीव विहिताभ्यन्तरनिवासा शिक्षया, दीक्षया, सम्मानेन, मर्यादया, प्रेम्णा च वञ्चिता परिजनस्य, घृणायाः, गालीनाम्, ईर्ष्यायाः, असूयायाः, उपहासस्य, कुविचाराणाम्, अत्याचाराणाम्, बलात्काराणाम् पात्री जाता ।

आहारो द्विगुण. स्त्रीणां बुद्धिस्तासां चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृत ॥

'परं साहसिका. स्त्रिय.' 'क्रूर-हृदया अविश्वसनीया नारी', इत्येतादृशी संकीर्णतमा भावना तासा कृते समाजे बलीयसी जाता ।

स्वयं परनारीलम्पटोऽपि वार-वनिता-कटाक्ष-विक्षेप दर्शन-समकालमेव भ्रूकुंस इव नृत्यन्नपि दासी-चरण-रजो-धूसरललाटोऽपि कुमारी-शत-शील-भञ्जनोऽपि स्व-कर्माणि जातु निरीक्षते पर दोषंवद्दव् सतीमपि सुशीलामपि, सुगुणामपि सुदाक्षिण्यामपि सदा दुःशीलामेव शङ्कते । तस्या. प्रत्येक कृत्यमन्यथैव सभावयति । गवाक्षजालेन बहि' पश्यन्तीमपि पर-पुरुषमिव प्रतीक्षमाणा जानाति । सरलमपि तस्या व्यवहारं वञ्चनापाटवमेव मनुते । मौग्ध्यमपि मौढ्यपक्षे करोति । लज्जा-विनय-शालीनता-शालिनीमपि वशीकरण-प्रयोगनिपुणामाकलयति । विद्यावतीमपि मिथ्याभिमानपरुषोऽकिंचिज्ञामेव ख्यापयति । सुमार्गं बोधयन्तीमपि स्वाभिपङ्करता वध्यते । स्वल्पेऽपि तस्याः स्खलितेऽश्रव्यानाख्येयासह्यगालीप्रदानेन सम यथोपलब्ध-साधनैस्ता ताडयति । सततात्याचारदूनायामसाध्य-रोगग्रस्तायां च तस्यां नोचिता परिचर्यामाचरति ।

बहुधंतादृशामत्याचाराणां मूल धनमेव भवति । दैवाद् यदि निर्धनसुता धनिनेनोह्यते, मध्यवित्तगृहे वा धनिन पुत्री परिणीयते, तदा यौतुकलुब्धा श्वशुरादयस्तामधिकाधिक पीडयन्ति निभृत घ्नन्ति च । कुलवधूना विपद कारण प्राय. स्त्रिय एव । श्वश्रू मातरो ननान्दारो वा ताः सतत वर्धयन्ति । मिथ्याभिमोगर्जननी सुत पत्न्या विरज्यते ।

अर्थपारवश्येनापि स्त्रीणा दुर्दशा । यावत् कालात् पति-पत्न्यो भर्तृभार्याभावः समपद्यत तदवधि पुमान् स्त्रिय स्वाश्रिता क्रीतामिवान्नवणं. शीलयति यथेच्छ च पीडयति । इत्थमनेकैर्दोषै स्त्रीणा पुरुषाणा च मध्ये दौर्मनस्यस्य महान् खातो निखातः । क्व तावदेकात्मता क्व चाद्यतनी विषमता भर्तृभार्याविश्वृतभेदमूला । इममेव दशा पश्येऽस्मिन् केनाऽपि कविना नायिकामुखेन वर्णिता—

पुराऽभूदस्माकं प्रथममयिभिन्ना तनुरियम्
सतामु स्व प्रेयान्, यदपि हतानाः प्रियतमाः ।
इदानीं नायस्तं यदपि कलत्रं किमपरं
हतानां पापानां कलिकलुषितानां फलमिदम् ॥

क्रमश प्रवृत्त ईदृशे भेदभावे नारीणा दशा दिने दिने दीनतरा ऽजायत। यदोपानहीव पत्न्या पत्यु सर्वाधिकार सजातस्तत एव समाजस्य दौर्भाग्येनाऽपि साधु व्यलासि। अन्यथा कथ कालिदासोऽपि ब्रूयात्—

'उपयन्तुर्हि दारेषु प्रभुता सर्वतोमुखी।' (शा० ५।२६)

नार्या भोगैकप्रयोजनत्वमपि तदवध्येव जातम्। तेनाऽपि तस्या गौरवमवा-हीयत। एतस्य प्रतिध्वनि कालिदासस्य शब्देषु—

अपि स्वदेहात् किमुतेन्द्रियार्थात् यशोधनाना हि यशो गरीय। (रघु० १४।३५)

किं सीतेन्द्रियार्थमात्रम्? एतावदेव मूल्य भारत-महिष्या? धिग् धिग् एता-दृशीं भावना तत्रैव यत्नोदीरितमासीत्—

विद्या समस्तास्तव देवि भेदा स्त्रिय समस्ता सकला जगत्सु। (मार्क० पु०)

अनया भावनया प्रेरितैरेवाच यैर्घोषितम्—

'स्त्रीशूद्रौ नाधीयाताम् इति। असूर्यम्पश्या, अज्ञातजगद्गतय, यावज्जीवन चुल्लीधमनेन शिशूत्पादनेन वा कृतार्थीकृतदेहा पशुवत्काल यापयेयु। विवाहे, गृहकर्मसु, समाज-कल्याणे न क्वापि नारीणा मूल्यम्, न भावानामादर, न सुखदु खादिजिज्ञासा, न सम्मानम् न मर्यादा।

न केवलमेतादृशी स्थितिरार्येष्वेव, यवनेषु ततो ऽपि हीनतरा यत्र तस्या प्रयो-जन सत्यमेव काम तृप्तिर्नायत्। केवल विवाहे तद्विच्छेदे च तस्या सम्मतेर्महत्त्व नान्यत्र। अतएव ते यथावसर स्वजातीया परकीया वा कन्या पत्नीर्बलाद् दूषयन्ति विक्रीणन्ति बहुधाऽत्रमानयन्ति च।

अद्य पाश्चात्य समाज एव नारी साधु इत्मन्यते। तत्र पुरुषैस्तुल्या एव तस्या अधिकारा। सर्वेष्वपि क्षेत्रेषु तस्या अवसर। न तत्र तासा विषय—

'पर साहसिका स्त्रिय,' 'आहारो द्विगुण स्त्रीणा बुद्धिस्तासा चतुर्गुणा। षड्गुणो व्यवसायश्च कामश्चाष्टगुण स्मृत।' 'न स्त्री स्वातन्त्र्यमर्हति' इत्यादयो ऽन्यायपरा व्यवस्थाः। सर्वोच्चमपि पद साऽर्हति। न तत्र विषम परिवार-जीवनम्।

अद्य भारते यत्र तत्र श्रूयते, अहो विषमा दशा अबला स्म, एतादृशी बलीं लब्ध्वा किं सुख मया अनुभूतम्। नित्य कलहायते सा, अतस्तु वंधुर्यमेव सुखाय, इत्यादि। अन्यतश्च विषण्णवदना पाण्डु-कवलितेवास्थिमयीव दीना नारी करुण विलपति। जीवन दुर्वहमारोपितम्, अकाल-पलिता केशा, यौवन एव वार्धक्य स्वागतम्। प्रातरारभ्य कलह, अशान्ति, विनण्डा, भर्त्सना, अवसाद। किं नानुभूयते कटुतरम्। सर्वमिद स्त्रीणामुपेक्षामूलम्। सुशिक्षिता, सुसस्कृता, सुपोषिता रमणी रमयति मन

पुरुषस्य । गृह तया स्वर्गायते । यदि कर्तव्यपरायणा वधू पतिं प्राणानिव, तस्य पितरौ चात्मन पितरौ, बन्धून् स्वबन्धूनिव, गृहच स्वगृहमनुभवति पतिरपि तस्या सुखे दुःखे च सहचर, तस्या कष्ट-प्रदानि कारणानि यावच्छक्यमपास्यन्, तदर्हं सम्मान प्रदर्शयन्, तद्विरक्तिहेतून् परिहरन्, तस्या गुरुभ्योऽप्यात्म गुरुजनेभ्य इव पूर्णं विनय दर्शयन् प्रेम्णा लालयति ताम्, श्वशुर. श्वश्रूश्च स्वसुतायामिव तस्या निर्व्याज स्निह्यत, न परगृहादागता विभावयत, न पार्थक्य दर्शयत, तस्या परिचरितानि सवात्सल्यमभिनन्दत, न कदाऽपि तस्या अवमानना विधत्त, ननान्दा च न तस्या लालनमीर्ष्याकलुषाक्षी गर्हयति, भ्रातृजायोचित सन्मान तस्यै प्रयच्छति, निरक्षतस्य स्नेहस्यादान प्रदान च करोति चेत् को विशेष स्वर्गस्य तस्माद् गृहात् ?

अद्य पाश्चात्य गार्हस्थ्यजीवन, तत्रत्यस्य नारी समाजस्य सम्मानपूर्णां दशा समीक्ष्य स्वदुरवस्था चानुभूय भारतीया स्त्री स्वदास्यमूला सामाजिकी रूढी सावहेलमधिक्करोति, शास्त्रीयेभ्य सामाजिकाचारेभ्य सा सतिरस्कार द्रुह्यति । अद्य प्रतिशोधभावनया—

'manu is fit to be hanged on the altar of progress'

एष तस्या घोष. । भारतेऽपि सा शनै शनैरधिकरोति सर्वमपि क्षेत्रम् । लभमाना प्रगतयेऽवसर सुविधाश्च सर्वत्राऽपि स्व-प्रतिभायाश्चमत्कार स्फुटीकरोति । पर नाद्यापि सा सर्वथा सुखमनुभवति । नेदानीमपि भारतीयैरवगत जीवन दर्शनम् । ते क्रोशन्ति निन्दन्त स्वगार्हस्थ्यमनारतम् । यतो भूयसेदानीमपि दुर्दशैव नारीणा प्राय समाजे । नाहभाव सम्प्रत्यपि गतो विलय पुरुषस्य । स स्पृहयति पाश्चात्यकौटुम्बिकसुखाय पर न जानाति तस्य मार्गम् । सत्यश्चेत्तस्य कामोऽचिरेण सोऽनुभवतु यथार्थस्थितिम् । सन्मानयतु नारीम्, प्रयच्छतु तस्या अधिकारान्, अपाकरोतु तस्या कष्टकारणानि । अर्पयतु यथार्थं स्नेहम्, दर्शयतु तदर्हम् सम्मानम्, आचरतु तस्या. प्रतिष्ठाम्, अनुपालयतु मर्यादाम्, धुनोतु चिरसञ्चित स्वश्रेष्ठतानुभावुकमिथ्यामदम्, परिचिनोतु तस्या गुणान्, परिशीलयतु तस्या ऋणानि, नचिराद् भूय सोऽधिगमिष्यति पृथ्वीस्थ एव स्वर्ग्यं सुखम् । पाशबन्ध मारणीयतया घोषितस्य मनोरेव वचन तेन विभावनीय पालनीय परीक्षणीय च—

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राऽफला क्रिया ॥ (मनु०)

प्रायः सर्वो भवति करुणा वृत्तिरार्द्रान्तरात्मा

प्राणिनामखिलानामिह जगति सर्वेऽपि व्यापारा आश्रयन्ति विविधान् मनो भावान्। ते च चेतसी वृत्तिमनुहरन्ति। जडानामपि हि पदार्थानां वृत्ति स्वसत्त्वानुरोधिनी। अन्तर्निहित जलमय सारा हि प्रयुक्ता सलिलकणान् स्च्योतयन्ति। ज्वलनाणुनिर्मितानि च द्रव्याणि दहन कणानव मुञ्चन्ति। प्रमाण चात्र प्रकृति। तत्र हि सिकतिलानि, पाषाण मयानि च वस्तूनि सतत जल-सेक पिच्छिला यपि नान्त मलेदनमनुभवन्ति खण्डिता यपि नीरसतामेव प्रदर्शयन्ति। पर वनस्पतय सलिल तत्त्व प्रधाना निष्पीडिता खण्डिताश्चूर्णिता अनलसात्कृता वा रसकणान् प्रस्नुवन्ति। अम्मयो निशाकरोऽपि स्व रश्मिभिर्हिम कणानव वर्षति। धातवोऽपि दहन-तत्त्व प्रधाना घृष्टास्ताडितास्तापिताश्च स्फुलिङ्गानुद्भावयन्ति तरलता वा व्रजन्ति। सूर्य पर वह्निमयो दाहकमेव तेजो वमति। एवंव प्रवृत्तिर्मनिवानाम्। ये केचन रूक्ष प्रकृतय. निस्नेहा स्वय तुष्टा, आत्मरता, आशु कोपना, असर्पणा, विनोदे क्रीडासु काव्येषु चागृहीत-रुचय, शून्या एव ते प्रेम करुणादि कोमल भावानुबन्धेन। न कदापि द्रवति तेषा हृदय परेषा करुण करुण क्रन्दितमाकर्ण्य शोकोद्भावन वा दृश्य वीक्ष्यापि। कोमल वृत्तयोऽतितरा भावुका सहसैव प्रस्नुता भवन्ति कचिद् दुर्गत कष्टायमान पीडितमातुर वा विलोक्य। तरल प्रकृतिर्हि स्वल्पमपि समीपे भजन्नूष्माण व्रजति द्रुतताम्। बाष्पसारो हि मेघोऽधिगतोष्मा स्पृष्ट सहसा शीतल समीरेण स्रवति सलिलम्। उष्णजलेन जाड्यातिशयेन च घनता गता हिमानी लब्ध्वा स्तोकमपि ताप पुन सलिलता भजते। सरस-प्रकृतिर्हि शोक-तापमधिगत्य विद्रुत हृदयश्चक्षुर्द्वारेणाश्रुकणान् मुञ्चति।

प्रेमा, हर्ष, शोक, शम, लज्जा, दया च कोमला इमे भावा न रूक्षे मनसि—स्थितिमनुरुध्यते। अन्यस्य कष्ट समीक्ष्य यदि कश्चिद् व्यथामनुभवति सैव करुणा। न च रोषणो रूक्षो वा भावैराकुलितो जायते। भावुका एव सरस प्रकृतय। यथावसर येषा हृदय भावा दोलित सम्पद्यते ते भावुका। न ते जातु न श्लक्ष्णीभवन्ति मन-

प्रमाथिभिर्हृदयं । तिर्यक्षु दृश्यत एतादृशी वृत्तिः । नादानुरोधी मृग परिचयवशाद् विजातीयानामपि मानवाना स्नेहेनाकुलो जायते । मद-विह्वलोऽपि वारणो वीणा-ध्वनि-परवशो जायते, सोऽपि नितरा प्रभु-भक्त । बहुधा स्वामिनि मृते स्वयमपि विजहतोऽमून् श्रूयन्ते गजा. । एवंव वृत्तिर्गाना ये क्रूरा अपि जाङ्गलिकैर्वीणा ध्वनि परिगृहीता निगृह्यन्ते । अश्वाना तु स्वामिप्रियता सगीत-रतिश्च विश्रुतचरंव । एवं भावुकताया. प्रेमादिपरवशतायाश्च परस्परानुबन्धिता सुतरा सिध्यति । एवंव वृत्ते. सरसता मानवाना कलासु राग जनयति, प्रतिभा च नव परि-कर्मणेऽलभावुकीमुद्-भावयति । अनयैव भावुकतया वशीकृतो भगवान् वल्मीकजन्मा-निहत सहचरी विरह-विधुर-क्रौञ्च क्रन्दन-श्रवण-समुपजात कारुण्योऽनुकम्पोपनतप्रतिभ. सहसैव त व्याध शशाप—

मा निषाद । प्रतिष्ठा त्वमगम शाश्वतीः समा ।
यत्क्रौञ्च-मिथुनादेकमवधी. काममोहितम् ॥ (रा.मा)

एनामेव गाथा कवे कारुण्यस्यापिका महाकविः कालिदासो रघुवश एव गीतवान्—

तामभ्यगच्छद् रुदितानुसारी मुनि कुशेध्माहरणाय यात ।
निषाद विद्धाण्डज दर्शनोत्थ श्लोकत्वमापद्यत यस्य शोक ॥
(र.व १४।७०)

प्रायो गुणिन उदाराभिजना विलासानुरागिणो भवन्तीति तेषु भावुकता सुतरा जायते । कारणान्तरै काम पारुष्य ते मनस्यादध्यु पर कृत्रिममेव तद् भवति । अतो विगलति प्रयत्नाहित काठिन्य तेषा हृदयात् समुपस्थिते कस्मिश्चिदपि कारणे । क्रूरकर्माप्यशोक. कालिङ्ग-समरे वृत्त घोर नरवंशस समीक्ष्य तथा विद्रुतहृदयोऽ-भवद् यथा जीवमात्रस्य हिंसन युद्ध च सर्वथा वर्जितवान् । पुरातनी मानसी सरसतैव तस्य पुन प्राबल्यमयाद् या त सर्वथा सग्राम-वर्जनाय प्रेरितवती ।

वस्तुतश्चेतनाया एव धर्म. सरसता । अत एव पशुपक्षिश्वापदाना सर्वेषा यदा कदा कारुण्य-परवशत्वं श्रूयते । कालिदासस्य सरसतमाया शाकुन्तलाख्याया सृष्टौ पतिगृह-गमनोद्यताया शकुन्तलाया विरहेण तपोवनस्य न केवल तिर्यञ्च, लता अपि कातरता व्रजन्तीति चित्रम्—

उद्गीर्ण दर्भ-कवला मृगी, परित्यक्तनर्तना मयूरी ।
अपसृत-पाण्डु-पत्रा मुञ्चन्त्यश्रूणीव लता ॥ (शा-४।१२)

रघुवशेऽपि वाल्मीकि-तपोवने परित्यक्ताया सीताया करुण-क्रन्दनेन पार्श्व-वर्तिन्याः प्रकृतेरपि सशोकत्वं वर्णितम्—

नृत्य मयूरा', कुसुमानि क्षा वृदभानुपात्तान् विजहुर्हरिण्य ।
तस्या. प्रपन्ने समदु खभावमत्यन्तमासीद् रुदित वनेऽपि ॥
(रघ १४।६९)

एनामेव सरसता हृदयान्तर्वर्तिनी मानवत्वेन सभावयन् दूतीकृत मेघ कविः करुणामय मनुते । कथ न स्यात्स करुणामय ? पुष्करावर्तकाना महता मेघाना विश्वविश्रुतेऽभिजने जात इत्युच्च-कुलज, त्रिलोकनाथस्य वृष्ट्यधिपतेर्महेन्द्रस्य वरिष्ठ कर्मचारीति गुरु-कर्तव्य-भार पुन सारवत्त्वेन सभावितः सुहृत्कार्यं करिष्यामीति प्रतिपद्यमान, आश्रयीभूतस्य सानुमत आम्रकूटस्य दावाकारमुपप्लव सतत-वृष्ट्या शमयन्, यत्र तत्र विश्रामनिशासु प्रियतमया विद्युद् विलासिन्या रममाणः कृषक-वधूना भ्रूविलासानभिज्ञदृष्टिप्रसादाना भाजनम्, नगर-वार योषाणा रति-नखाङ्केषु शिशिर-शीकर सेक विदधत् तासा कर्ण-शिरीष चुम्बि-कटाक्षं क्रीडन्, भक्ति नम्र शूलिन परिचरन् कुसुमावचयखिन्न-कुसुमलावीना छाया-प्रदानेन परिचय जनयन् अलका प्रयाति । एव सरसप्रकृतिः स कथ न यक्ष-दशा तत्पत्न्याश्च विरहदूनता निरीक्ष्य विद्रुतान्तर सम्पद्येत ? सरसता हि प्रकृति-सुकुमारा न जातु सन्निकर्षं ताप सहते । परमाणव एव ते तादृशा ये रसमया सन्त तापाधिक्येऽधिक रस त्यजन्ति । तत्किमिति न दूयता दयालुर्दयनीया दशा दीनाना दर्शं दर्शम् ? न हि करुणा वज्रसारे क्रूराणा मनसि सन्तिष्ठते । तत्र तु दव-दहन-प्लुष्टा लतेव लघ्वेव लोप व्रजेत् । कमलिन्या इवागाधसलिल-पूर-पूरित सर प्रेमादि-सुकुमारवृत्तिसश्चयीभूतमन्तःकरणमेव करुणाया आस्पदम् । न सा दयनीयमेव, दयालुमपि नितरामुपकरोति । तया सुतरा शोभते देही । जीवनस्य स्वारस्यमेव तया सम्पद्यते । अत एव भावुका श्रुत्वैव कस्यापि शोचनीया दशा विकलवा भवन्ति । करुणरसप्रधानानि रूपकाणि विलोक्याद्यापि दृश्यन्तेऽश्रुधारा मुञ्चन्त सहृदया । केवलं चित्रमिदमिति विभावयन्तोऽपि न शकनुवन्ति विद्रवणात् चेतो निरोद्धुम्, न पारयन्ते कण्ठ-गद्गदत्व नियन्तुम्, न प्रभवन्ति वाच्छन्तोऽप्यात्मान सयतीकर्तुम् । सर्वमिद सरसवृत्ते फलम् । तत एव क्रोधपरुषोऽपि दीने, स्त्रीषु, आतुरे, बाले शस्त्र न प्राहरत् । अतः साधूक्तं महाकविना कालिदासेन—

'प्राय. सर्वो भवति करुणा-वृत्तिरार्द्रान्तरात्मा,' (उ मे)

हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा ।

अस्मिन्ननन्तेऽसारे पारावारकल्पे संसारे साध्वसाधु वा गुणा दोषा वा सदसच्च, विद्याऽविद्या च, सुकृत दुष्कृत च, क्लेशैकफलानि श्रेयोऽतिशयकराणि च कर्माणि ह्रासो विकासश्च, उत्थान पतन च स्वर्गो नरक च धर्मोऽधर्मश्च, अमृत गरल च, प्रकाशस्तिमिर च किं बहुना सर्वमपि शुभमशुभ च विद्यते। मसृण-सान्द्र परिमल-लालित पाटला—कुसुम मर्मभिन्ति च कण्टकानि सहैवैकस्मिन्नेव वृन्ते दृश्यन्ते। गन्धसारतरोरेव तले गरलकरालित फणी निरन्तर निवसति। न च प्रत्येक वस्तु निखिलस्यापि कृते। मतिमास्तु सारग्राही ततो ग्राह्य चिनोति हेय चोपेक्षते।

पर नास्ति शक्तिरखिलस्य प्राणिजातस्यासत. सदुद्धर्तुम्। सन्नेव सद् ग्रहीतु-मसच्च हातु क्षम। येषा करतलामलकायित विश्वम्, ये केचनागाधादपि सागरात्सूक्ष्ममपि मुक्ताफल चेतु प्रभवन्ति न ये कुवैकटिका इवासारैरपि वर्णमात्रमुदर्शं द्रव्यै प्रतार्यन्ते, न येषामाडम्बर एव श्लथते दृष्टि, समीक्षण-विचक्षणाना येषा पुरतो दोषा दोषा गुणाश्च गुणा भवन्ति ते एव स्फटिकमिव (फिटकरी) जलात् पङ्कम् अवद्यादनवद्य पृथक्कर्तुं समर्था। कथ खलु पाण्डु-कदर्थित पाण्डुर पाण्डु च विभेदयितु कल्पेत? स तु प्रत्युत दुष्टमेव निर्दुष्टत्वेन स्वीकुर्यात्। यथा उच्यते—

गुणा गुणज्ञेषु गुणा भवन्ति
ते निर्गुणं प्राप्य भवन्ति दोषा ।
यथा किराती करि-कुम्भ-जातां
मुक्तां परित्यज्य बिभर्ति गुञ्जाम् ॥

न च स्व कृतिमपि मनुजो यथार्थ्येन विभावयति। निज काव्यम्, आत्मन कर्म, स्वजनस्य रूप वा न कोऽपि निन्दति। अरमणीयामपि रमणी कामयमानो

जनो न रम्भाया अपि स्पृहयति । 'सर्वः कान्तं ह्यात्मीयं पश्यति ।' तत्र निर्णयाय परीक्षका एव प्रभवः । तै शिवं सुन्दर सत्यं वा निर्णीत चेत् तथैव ज्ञेयं तत् । अत एव परीक्षकाः सर्वत्र पूजिताः—

परीक्षका यत्र न सन्ति देशे नार्घन्ति रत्नानि समुद्रजानि ।
आभीर-देशे किल चन्द्रकान्तं त्रिभिर्वराटै विपणन्ति गोपाः ॥

दृष्टे विवेकस्य चोपयोगो हेय-वर्जने ग्राह्य-ग्रहणे च । फलवपि सारत्वेन गृह्णन् को नाम मतिमानिति समर्थ्येत ? विवेकी—चेत् तादृशोऽपि तर्हि को विशेषोऽविवेकिनस्तस्मात् ? प्रकाश एव तिमिर-निराकरिष्णु., दहन एव च खलुप दाह-प्रभु. । एवमेव सदसद्विवेकी क्षमो दोषगुणनिर्णये ।

काक-कोकिलयोर्न कश्चिद् भेदः स्वरूपतः । पर यदा तयोर्वाचो भेद एव वटुर्मधुरो वा कर्णगोचर, स्फुट काकः काकत्वेन कोकिलश्च तत्त्वेन स्वय निश्चीयते । अत एवोक्तम्—

कोकिलोऽहं भवान् काक' समान. कालिमाऽन्वयोः ।
अन्तर कथयिष्यन्ति काकली-कोविदाः पुन' ॥

न कश्चिच्चेत् प्रभवति तयोर्भेदज्ञाने, न स तर्हि समर्थो रसालमपि निम्ब-फलात् मधुर्यष्टि च (मुलहठी) गुडूच्याः (गिलोय) पृथगवगन्तुम् । किं स स्वदेत वैधेयः सरस सगीतम् ? तस्मै तु गर्दभी-रेङ्कारोऽपि तन्त्री-झङ्कार एव । किं पुरो-भागी तादृशो निर्णेतुं प्रभवेत् गुणदोषयोरेकतरम् ? विपरीतमपि विपरिणमयितुं वल्परे स. । अतो न तादृशोऽर्ध्यते जातु दोष-गुण-विभागाय ।

परं सत्यवसरे गुणदोष-परीक्षायाः, न विदुषा करणीयमालस्य, न दर्शनीयमौ-दासीन्यम्, नाश्रयणीयोपेक्षा । तथा कुर्वन् हि स गुणानां गुणवतो वा तिरस्कारं कृत्वाऽपयश एवाश्रयेत् कर्तव्याकरण-कृत च दोष समाश्रयेत् । उभयथाऽपि हानिः । यदि गुणवान् विद्वान् वाऽनुधैरगुणैश्च स्व-तुल्यो मन्यते, तर्ह्यपार्थं तस्यान्त'-सम्पत् । दौर्भाग्यमेवंतत्सम्पद्येत गुणानाम् । गुणाश्च दोषा मन्यन्ते चेत् स्वतो दोषाणा गुणत्वमापतति, लोकश्च तानेव गुणान् मन्यमानो मनसि निधातुं प्रयतमानो वञ्च्यते, सर्वमपि तन्त्रं चाकुलीभवति, विपरीतंव गति. परिणमेत् । अतो न सन्नुदासीत गुण-दोष-निर्णये, नावसर दद्यात् दोषाणा प्रभवितुम्, हसो यथा नीरात् क्षीरमाददाति, तथैव विद्वान्पि सहसा दोषेभ्यो गुणान् पृथक्कुरुते ।

नीरक्षीरविवेके हंसालस्य त्वमेव कुरुषे चेत् ।
विश्वस्मिन्नधुनाऽन्यः कुलव्रतं पालयिष्यति कः ॥ (भ. नि.)

नहि तस्मादन्य तादृश दुष्कर कर्म कर्तुं प्रभु, तस्य कर्म को ऽन्यो विदधीत ।

जगति सभवति कलुषस्यापाकृति क्षारद्वारा । यस्य मलीमस भस्मसात्कर्तुं वर्तते शक्ति, स एव तद् दूरीकरोति । किं न मिश्रयन्ति पश्यतोहरा स्वर्णे लोहम्, ताम्रम्, सीसम्, त्रपुश्च ? अन्यदपि यत्किञ्चिदन्तर्धातु तत्र सभवति, सर्वं तत्र निक्षिप्यते चोरित सुवर्ण-भार पूर्त्यै । न च तन्निर्मितानि भूषणानि निभाल्य कश्चिदपि प्रत्येति तत्र मिश्रित धातुम् । निकषऽपि बहु वार घृष्ट सत् मिश्रणमेव प्रत्याययति न तु मिश्रित वस्तु । पर प्रज्वलिते वह्नौ निक्षिप्यते चेत् सर्वं कलुष पार्थक्य व्रजति काञ्चन च दग्ध श्यामिक द्विगुण भासते । एवमेव विदुषा पुरत कृतीना गुणा दोषाश्च, विशुद्धि छल च प्रस्फुटति । अतएव धीमन्त स्वयमेव न किमपि साध्व साधु वा निर्णयन्तो विदुषा समक्ष प्रस्तुवन्ति । तं साधु निर्णीत चेद् गुणवत् तत् कार्यं नान्यथा । एतदेव समीक्ष्योक्त शाकुन्तले कालिदासेन—

आपरितोषाद् विदुषां न साधु मन्ये प्रयोग विज्ञानम् ।
बलवदपि शिक्षितानात्मन्यप्रत्यय चेत ॥ (शा प्र)

बहवो मिथ्याभिमानिन स्वरचिते कथिते पठिते वा लेशमात्रमपि दूषणानां न स्वीकुर्वंते सर्वोत्कृष्ट च तत्स्थापयन्ति । लोके न तद् बहु मन्यते । यथा मुरारिरनर्घं राघवे—

देवीं वाचमुपासते हि बहव सार तु सारस्वत
जानीते नितरामसौ गुरुकुल क्लिष्टो मुरारि कवि ।
अब्धिर्लङ्घित एव वानर भटै किन्त्वस्य गम्भीरता-
मापाताल निमग्न-पीवर तनु र्जानाति मन्थाचल ॥ (अन प्र)

न लोके भवति किमपि स्वतो गुणवद् विगुण वा । आत्मान श्लाघमानो न जातु जनोऽन्यैरपि प्रशस्यते । पर साधुभि प्रशस्यते चेत्स सत्य प्रशस्य श्रेष्ठश्च । विद्वास एव निकषोपला सारवत्तायां असारतायां वा । एतदेव समर्थ्यते कविकुलगुरुणा रघुवशे—

त सन्त श्रोतुमर्हन्ति सदसद्व्यक्तिहेतव ।
हेम्न सलक्ष्यते ह्यग्नौ विशुद्धि श्यामिकाऽपि वा ॥ (र व १।१०)

एकं सद्विप्रा बहुधा वदन्ति

जगतीह सकलानामपि विधेयाना भूताना भव्याना च नियन्ता कश्चिदगोचरो शक्ति-विशेष इति प्राय सर्वेषामास्तिकाना मतम्। सा च शक्तिरीश-देव-खुदा-गॉड ब्रह्मादि पदव्यपदेश्या यथामत स्वीक्रियते। केचिच्च सर्वशक्तिमतस्तादृशस्य परमात्मन स्थानेऽनेकान् देवानर्धदेवान् वा कामदातृत्वेनोपासते। आर्येषु च बहुदेववाद, एकेश्वरवाद, अनीश्वरवाद एवविधानि अन्यानि च मतानि विद्यन्ते। वैचित्र्यमिदमार्यसस्कृतेर्यस्यामेकस्माद् देवादारभ्य त्रयस्त्रिशत्कोटि यावत् स्वीक्रियन्ते यथाविधि पूज्यन्ते च येन रहस्यमजानन्तो वैदेशिका आधुनिक हिन्दूधर्मं बहूनामुपासनाना सम्प्रदायानामसगतिमयमाडम्बर कथयन्तो निन्दन्ति। वेदेष्वपि हि अग्निरिन्द्र, विष्णु, सविता, पूषा, भग, मित्र, वरुण', अर्यमा, सूर्य, उषा, द्यौ, पृथिवी, बृहस्पति, ब्रह्मणस्पति, एवविधा अन्येऽपि च देवा ऋक्षु स्तूयमाना उपलभ्यन्ते। उपनिषत्सु तु एकस्यैवात्मन प्रतिपाद्यत्वेऽपि विष्णु-शिव नृसिंहादिदेवेष्वन्यतमस्य सर्वनियन्तृत्व निरूपितम्। पुराणेषु तु देवाना सख्या त्रयस्त्रिशत्कोटि-समिताऽन्यतश्चब्रह्मविष्णुमहेशाना यथावसरमुपास्यत्व साधितम्। एतमेव प्रपञ्च समीक्ष्य विचारकैरार्यधर्मे बहु-देववादस्य (Polytheism) एकेश्वरवादस्य (Monotheism) चास्तित्व वर्णितम्। शर्मण्यदेशोद्भवेन मोक्षमूलर महोदयेन (Max Mullar) इच्छादेववादस्य च (Henotheism) सत्व निरूपितम्। देवाना पृथ्व्यादिरूप प्राकृतत्व प्रतिपाद्य तैर्जडत्वमेव तेषां साध्यते।

अत्रेद तत्त्वम्। यदा देवाना महती सख्या निरूप्यते तत्र ते प्रकृति शक्तीनामेवाकार-विशेषा (Different aspects of Natural Powers) सिद्ध्यन्ति। यथा बृहदारण्यकोपनिषदि—'अष्टौ वसव, एकादश रुद्रा, द्वादशादित्यास्त एकत्रिशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिशो,' इति निरूपितम्। अष्टौ वसवश्च अग्नि, पृथिवी, वायु, अन्तरिक्षम्, आदित्य, द्यौ., चन्द्रमा, नक्षत्राणि। एतेषु

होदं सर्वं वसु हितमेते होदं सर्वं वासयन्ते । एवं रुद्राः खलु दश प्राणाः, आत्मैकादशः । संवत्सरस्य द्वादश मासा एव द्वादशादित्याः । मेघ एव इन्द्रो यज्ञश्च प्रजापतिः । एतेन यद्यपि प्रकृतिशक्त्यभिन्नत्वं सिद्ध्यत्येव परं नार्या जडोपासकाः । तेषां हि सिद्धान्तोऽयम्—

'अन्ध तमः प्रविशन्ति येऽसंभूतिमुपासते ।'

सर्वस्य जगत एतच्छक्ति चालितत्वाज्ज्ञेयत्वं भवति तेषाम् । परं यस्तु सर्वेषां साक्षी द्रष्टा श्रोताऽभिमन्ता च स एक एव ब्रह्मेति । अध्यात्मभावनया (Metaphysical Conception) तेषु सर्वेषु देवेषु तस्यैव ब्रह्मणः सत्त्वं स्वीक्रियते । नह्यग्नीन्द्रादीनां तत्त्वेनोपासनोच्यते ऽपि तु ब्रह्मण एव विभूति-स्वीकारेण । इन्द्रो ह्यात्मा 'तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण, परोक्ष-प्रिया हि देवाः ।' इत्यैतरेयोपनिषदि दर्शितत्वादात्मैवेन्द्रः । प्रकाशकत्वाच्च स एवाग्निः । व्यापकत्वात्स एव विष्णुः, बृंहणाच्च ब्रह्मा, द्योतनाच्च स एव सूर्यादीनां पुरुषाकारत्वं (Anthropomorphism) दृश्यते ।

वस्तुत आर्याणां दर्शनमेकस्मिन्ननेकेषामनेकेषु चैकस्यैव तत्त्वस्य प्रतिपत्तिः । 'एकस्यैव पुरुषस्य माहाभाग्यादेक एवात्मा बहुधा स्तूयते । यदाऽसौ सर्वात्मा देवोऽनेकासु शक्तिषु विविधाकारो दृश्यते, तदा पार्थक्येनानेकश एव तस्य स्तुतिः । यदा तु तत्त्वतः सर्वेषां देवानां तदभिन्नत्वं प्रतिपाद्यते तदा तस्यैवैकाकिनः प्रशंसा । इति बुध्यंस्तु न ना मुह्यति तत्र । इदमवुद्ध्यैव पाश्चात्यैरार्याणां बहुदेवोपासकत्वं काम-देवत्वं च प्रतिपादितम् । परं बहुदेवोपासनया सह ब्रह्ममयत्वस्यापि प्रतिपादनं विद्यत एव । अतएव—

अग्निं मित्रं वरुणमिन्द्रमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद् विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः ॥

एवं च यजुष्षु स्वयंभुवो ब्रह्मण एवानेक देवात्मत्वं निरूपितम्—

तदेवाग्निस्तदादित्यस्तद् वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः ॥ (य. वे. ३२।१)

न च तस्मादन्यत् किञ्चिदिहास्ति । सर्वमपि चेतनाचेतनात्मकं विश्वं स एव ।

एषो हि देवः प्रदिशोनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः ।
स एव जातः स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः ॥ (यवे. ३२।४)

स एकएव परमात्मा ज्ञेयः स्तुत्यश्च । न तस्मादन्यत् किंचनेह विद्यते ।

येनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम् ।
तस्मिन्निद सं च विचैति सर्वं स ओत प्रोतश्च विभु. प्रजासु ॥
(य. वे. ३२।८)

निखिलेयं सृष्टिर्मृत्युश्च तस्यैवाश्रय इति को नामापरो देवस्तमतिशयीत ।

यस्य ब्रह्म च क्षत्र च उभे भवत ओदन. ।
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥ (क. उ. २।२५)

एव सहितासु सर्वत्रैकस्या एव देवतायाः स्तुत्यत्व लभ्यते ।

उपनिषत्सु च स एवोपास्यत्वेन वर्णितः ।

एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा य करोति ।
तमात्मस्थं येऽनु पश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥ (कठ. ५, १२)

तस्यैकात्मनो विज्ञानमेवोपनिषदामुपासना ।

न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाऽभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥ (कठ ५, १२)

तस्मिन्ज्ञाते सति तेन सहाभेदेनात्मनो भावनमेव चरमः पुरुषार्थ उपासना-फलम् । आत्मैव तत्र लीयते । न यथा लवणमुदके विलीन पुनरुद्भियते सायुज्य तु गच्छति, तथैव परमात्मनि तस्मिनु लीन आत्मा न पुनः पार्थक्यं याति ।

'स यथा सैन्धव-खिल्य उदके प्रास्त उदकमेवानु विलीयेत । नाहास्योद्-ग्रहणायेव स्याद्यतो यतस्त्वाददीत लवणमेवैवं वा अरे इदम्महद् भूतमनन्तमपारं विज्ञान-घन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति ।'

पुराणेषु यद्यपि देवतावादस्य विकासो ब्रह्म-विष्णु-महेशानां चोपास्ति-प्रस्तावो लभ्यते यत्र तत्र तेषामेकतमस्य श्रेष्ठत्वं चोपलभ्यते तथापि सर्ग-स्थिति-सहार-रूप-व्यापार-कर्तृतया एकस्यैव परमात्मनो भेदत्रय स्वीकारेण अर्थापत्त्या एकस्यैव देवस्योपासना सा फलति । ब्रह्मण प्रशंसया विष्णो प्रत्याख्यान शिवस्य प्रशस्त्या च ब्रह्म-विष्णवपेक्षाकरणं साध्यते । एतेन मिथो ऽभेदात् न कतमोऽपि तेषां गरिष्ठो लघिष्ठो वेत्यर्थापत्त्याऽऽपतति । अयमेवार्थ कविकुलमुकुटमणिना कालिदासेन प्रतिपादित कुमारसभवे—

एकैव मूर्तिर्विभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम् ।
विष्णोर्हरस्तस्य हरिः हरान्नि[illegible]ेधास्तयोस्तावपि धातराद्यौ ॥ (७।४४)

कथमनेन बहूनामुपासनं सिध्येत् ? न खलु नाना-रूप-नाम-धारण-मात्रेणैक-एव वास्तविकं भूयस्त्वमधिगच्छति ।

नामान्यपि चैकस्यैव बहूनि । तथाहि—स एव एकः परमात्मा रमणाद् रामः, रमन्ते हि योगिनोऽस्मिन्निति, कर्षणात् कृष्णः, कर्षति हि परेषां हृदयमात्माभिमुखमपस्कान्तः (Magnet) इव लोहम् । शयनाच्छिवः, अन्तरात्मतया सर्वस्मिन्नपि चराचरे ह्यसौ शेते । बृंहणादेव स ब्रह्मेति विराड्ह्यसौ जगदात्मा । रोदनाद् रुद्रः, रोदयति हि कालात्मना प्राणिनः । ईशनादीश्वरः, कर्तुमकर्तुमन्यथा च स प्रभुः । इन्दनात् स इन्द्रः, ऐश्वर्यवान् इदं सर्वं द्रष्टा हि सः । अञ्जनात् प्रकाशनात् स एवाग्निः । प्रसोति प्रेरयति सर्वान् प्राणिन इति सविता । स्वरणात् प्रकाशनात्-सूर्यः, वेवेष्टि व्याप्नोति सर्वं जगदिति स विष्णुः । पुष्णाति सर्वमपि चराचरमिति पूषा । बृंहणशीलानां वाचां स्वामी । यथोक्तम् बृहदारण्यके—'तस्यैव रे महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेद.' इत्यादि ।

सर्वभूतानात्मनि वासयत इति स वासुदेवः । वसन्त्यस्मिन्सर्वाणि भूतानीति वासुः स चासौ देव इति वासुदेवः । एवं स एवैको देवो विविधैर्नामभिरुच्यते पूज्यते च ।

ये केचनान्यदेवानपि भजन्ति वस्तुतः प्रकारान्तरेण तस्यैव परमात्मनः सा भक्तिः । एतच्चान्यत्रोक्तं केनापि—

आकाशात्पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥ (वि. स. ना.)

एवं बहु-विध-विमर्शेनैतावदेव सिद्ध्यति यदेकमेव सन्तं परमात्मानं विद्वांसो महिम-ख्यापकैरनेकैर्नामभिः स्तुवन्ति । न तेन वस्तुतः स स्वरूपात् भिद्यते ।

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥

एतदेवाभिप्रेत्य साधूक्तम्—

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः ॥

स्वधर्मे निधनं श्रेयः पर-धर्मो भयावहः

नाना-प्रकृति-विचित्र-चरित्र-शालिना प्राणिनामालयेऽस्मिन् जगति परिवर्तन-शीलतया सकलानामपि सूक्ष्माणा स्थूलाना वा पदार्थाना धारणा अपि जनाना नित्यं नैक-विधा । तदेव श्वो व्रजत्युपेक्षणीयता यदद्य प्राणेभ्योऽपि प्रियतर लोकस्य । ह्यस्तनं हेयमपि समाश्रयत्युपादेयतामद्य । सैव स्थिति. साम्प्रतिके युगे धर्मस्यापि जाता । आसीत्कदाचन मानवस्य जीवने तस्याक्षुण्ण प्रभुत्वमसाधारणं वर्चस्वमसविभक्तं प्राधान्यम् । विश्व-साम्राज्यान्यपि सुरलोक-वैभवान्यपि सर्वोच्च-पदान्यपि सुरासुर-दुर्लभानि सुखान्यपि तदर्थमुपेक्ष्यन्त । जीवनस्य सर्व-प्रथमः पुरुषार्थः, त्रयाणामप्युत्तर-परमार्थाना मूलम्, राजनीते , दर्शनस्य, कलानाम्, साहित्यस्य, आचाराणाम्, विचारा-णाम्, आहाराणाम्, विहाराणाम् लोक-सव्यवहाराणा च नियामको धर्म एवाभूत्, परमद्य स्त्रीणाम् निष्कर्मण्यानाम् च स विषय' । राजनीतौ, साहित्ये, शिल्पे, कलासु, वाणिज्ये, न्याय-कर्मणि शिक्षायाञ्च सर्वत्र तस्य बहिष्कारः । नेदृशी कस्याप्युपेक्षाऽद्य यादृशी धर्मस्य । सहस्रेष्वेको याथार्थ्येन धर्माचरणं करोति सोऽप्युपहस्यते भोग-परायणैर्जनैः । ततोऽपि विषमा स्थितिरस्य धर्म-ध्वजैः कृता येऽस्य नाम्ना सकलानपि भोगान् भुञ्जते । नास्ति कतमदपि कुत्सित कर्माधिभूमि यन्न तैर्वञ्चकैरनुष्ठीयते । लोकस्याक्षणोर्धूलि प्रक्षिप्य धर्मात्मानमात्मानं प्रख्याप्य दम्भैः पाखण्डैश्च स्वाना-चारान् प्रच्छादयन्ति । तेषामाचरितानि दृष्ट्वा दृष्ट्वा च धर्मे श्रद्दधाना अपि जहति तस्य श्रद्धा निष्ठा च ।

केचित्तु धर्मो व्यवसाय-साधनीकृत । सुखानां प्रलोभनेन, पदाकांक्षया, रमण्यापत्त्या राज्य-लाभ-प्रत्याशया वा परम्परागत धर्मं तेऽरुचिकरं वसनमिव परि-त्यज्यापर स्वीकुर्वते । इतरे च दम्भिन. स्वमेव धर्मं सर्वोपरि मन्यमानाः परेषा च सगुणमपि धर्मं विविधैर्दोषप्रख्यापनैः कुत्सयन्त. पद-धन-कान्ता-प्रदानादिभिः प्रलोभ्य स्वेषु धर्मेषु दीक्षयन्ति । परं धर्मोऽन्यमेव तैर्गुंहीतोऽनुध्यमानैरस्य यथार्थतत्त्वम् ।

अद्य धर्मस्यान्य-भाषासु रिलीजन (Religion) मजहब-पन्थ-प्रभृतय. पर्यायो प्रचलिता न ये वस्तुतस्तदर्थं बोधयन्ति । एते शब्दा समयापेक्षया परिवर्तमानान् सम्प्रदायान् सूचयन्ति ये आचार विचार-भेदेन देश-कालादि भेद व्यपेक्षया यत्रतत्र प्रचलिता । न ते शाश्वता सनातनाश्च, प्रत्युत राजनयिकान् आधिपत्यश्च स्वार्थान् लक्ष्यीकृत्य प्रवर्तिता । न खलु धर्म कृषकस्य इव क्षणे २ परिवर्तनीयरूप स्वेच्छाचारमय. । न वा महत्त्वाकाक्षाया पूर्त्यै परीक्षाप्रमाणपत्रमिव प्रचार-साधन स । बुद्धौ, मनस्याचारे च निर्विशेष स आधीयते सनिष्ठे ।

धर्मस्य लक्षणानि बहुधा प्रतिपादितान्याचार्यै । 'चोदनालक्षणो धर्म,' 'यतोऽभ्युदय नि श्रेयस सिद्धि स धर्म' 'धारणाद् धर्म इत्याहुधर्मो धारयते प्रजा," 'स्वरूप रक्षणो धर्म' इत्यादीनि । प्रथमेन लक्षणेन प्रवृत्तियोग्य-धर्मणामनुष्ठानस्य, निवृत्ति योग्याना च कर्मणा परित्यागस्य येन प्रेरणा क्रियते स धर्म । 'सत्य वद, अहरह सन्ध्यामुपासीत, स्तेय मा कार्षी 'मृत्युरेष यो वै काम, त जहि' एतादृशै कृत्याकृत्यप्रवृत्ति-निवृत्ति प्रतिपादकैर्वाक्यैर्यस्य विधान विधीयते स धर्म, यस्य च निषेध सोऽधर्म इति प्रतिपादित भवति ।

अन्येन च लक्षणेन लोकेऽस्मिन् कायिक वाचिक मानसिकात्मिकसस्कारेण सहाधिकीं समृद्धि सम्पादयता मृत्योरुत्तर चामुष्मिल्लोके कल्याण साधयता कर्मणा-माचरण धर्म इति प्रतिपाद्यते । दुष्कर्मभिरधर्माचरणेन वा कामभैश्वर्यस्य पराकाष्ठा चुम्बेज्जन, सर्वातिशायी बलवान् मनीषी वा काम जायेत परम् आत्मा तस्य नित्य पतयालुता भजति । ऊर्ध्व-पवित्रत्वमात्मनो धर्म प्रकृति, पर दुराचारेण धर्म प्रति-कूल-कर्मानुष्ठानेन ता देहिनामात्मा मुञ्चति । मूलत स दिनाद्दिन हीयते । अपरस्मिश्च लक्षणे प्राणिना 'धारको धर्म' इत्युक्त । एतच्च स्वभावोपनतस्य कर्मणोऽनुष्ठानेन साध्यते । स एवाराय शिष्टाया परिभाषाया ।

वस्तुतो यस्य पदार्थस्य यत्स्वभावोपनत चेष्टित तदेव तस्य धर्म । तस्या चरणेन न प्राणी स्वरूपतोऽवहीयते । अग्नेर्यथा दाहकत्व धर्म, यावद् दहति, तावदेव सोऽस्ति, दहनसामर्थ्येऽपहतेऽस्यास्तत्वमपि न स्वीक्रियते । शीतस्पर्शवत्वमपा लक्षणम् । शैत्य हि तासा धर्म । वह्ने सन्निवर्पात् दिनकरतापसम्पर्काद् वा शैत्य विहायोष्मा ताभिरङ्गीक्रियते चेदस्वाभाविक तदाचरितम । पुनस्तापकारणेऽपाकृते जाड्य नैसर्गिक ता भजन्ति । तर्पणा क्रौयम्, सूर्यस्य प्रकाशन तापदान च तेजोमयत्व वा धर्म । निस्तेजस्कस्य तु भास्करमेव सूर्यत्वम । एव मानवस्य दीनेषु दयनम्, दु खिना रक्षणम्, अशरणानाम, अनाथानाम असहायानाम् च वाञ्छितपूरणम्, भीताना भयवारणम्, सर्व भूत मैत्री न ऋजुत्वम् प्रबुद्धत्वम्, अपारुष्यम्, शुचित्व चा यानि च

कर्माणि यैस्तस्य मानवत्वं न विडम्बनामावहति । तान्येव कर्माणि तस्य धर्मः । विरहितस्तैरन्य सामान्यं भजन् न मनुजतापदार्हः सः ।

यतः स्वरूप-रक्षको धर्मः, ततः सहज एव स आचरणीयो न तु कृत्रिमोऽन्य-स्माद् वा गृहीतः । यतः—

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः । (गी.१८।४५)

प्रकृति-समंजसः स्वाभाविक-कर्म-सम्पदा सम्पन्न एव धर्मः प्राणिनां कल्याण-कृत् । अन्येन तु नेह न चामुत्र कश्चिल्लाभ. ।

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव. ।। (गी.१८।४६)

यदेकमिन्द्रियं नेतरस्य कर्मानुतिष्ठति तदा कथं मानवः स्व-धर्मं विहायान्यं पालयेत् ।

अद्य जनानां कृते स्वधर्मं परित्यज्यान्यधर्मस्य ग्रहणं सामान्यं कर्म जातम् । परं धर्मः खलु प्रकृतिमनुसरति । एको निरामिष-भोजी वैष्णवो यावनं खीष्टं वा सम्प्रदायं स्वीकरोति चेत् कथं तस्य परम्परागतानां संस्काराणां परित्यागः संभवेत् कथं वा स सर्वंभक्षिभिः सहैकात्म्यं स्थापयेत् । दृश्यतेऽद्यापि यथा बहवो हिन्दवो मृत्यु-भयादर्थ-लोभाद् वा यवनाः खीष्टमतवादिनो वा संवृताः परं न सर्वथा तेषां प्राक्तनाः संस्कारा अद्यापि लोपं गच्छन्ति । अन्ये च यवनाः स्वीकृत-हिन्दू-धर्मा अपि हृदयाद् यथापूर्वमेवानार्य-भाव-वन्तः । स्व-संस्कारानुकूल एव धर्मे मानवः सिद्धिं विन्दति । अत एवोक्तम्—

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ।। (गी.१८।४८)

यदि निर्दोष एव धर्मोऽन्विष्येत, निष्फल एव सकलोऽप्यारम्भः सिध्येत् । यतः क्वचिज्जातिभेदोऽपरत्र संकीर्णताऽन्यत्र मिथ्याविश्वासा इति क्व निर्दोषत्वम् ?

वस्तुतस्तु न धर्मा अनेकाः । एक एव धर्मोऽङ्गभेदेन बहुत्वं गतः । यतो वैदिकस्यैव धर्मस्याहिंसा-तत्त्वं मुख्यत आदाय बौद्धो जैन-धर्मश्च प्रवृत्तः । सर्वेषां देवानामेकदेवत्वं निराकारत्वं च परमेश्वरस्यादाय शिष्यधर्मस्य (सिख) प्रवृत्तिः । सत्यम्, शुचित्वं चोपादायैकस्य परमात्मन. सत्त्वमुररीकृत्यैस्लाम-धर्मस्य प्रचलनम्, सर्व-भूत-मैत्रीम्, दीनेषु करुणाम्, ईश्वरस्य सर्वोपरित्वं ज्ञानाधारामुपासनामादायैव खीष्ट-धर्मस्य जन्म । एवं नाम्ना भेदेऽपि मूलतः किं नैषामेकत्वम् ? दोषाणां मार्गणे च न कस्मिंस्तावद् दोषाः ? किमहिंसादिभिरपि बौद्धैर्न कारितानि

विश्वस्मिन्नकाण्डे मृत्युताण्डवानि ? किं न तत्रापि वामाचारा मिथ्याविश्वासा वा ? त्याग-वृत्तिमयेऽनीश्वरवादिन्यपि जिन धर्मे न किं बहुदेवदेवीनामन्धश्रद्धायाश्च विद्यमानता ? जाति-साम्यवति सिखधर्मेऽपि न किं कर्गल निर्मित एव लिपिप्राये पुस्तके गुरोरीश्वरस्य च भावना ? किं न तत्रापि विचाराणा सकीर्णता ? सूद्धार-(सुधार) परिणत्या प्रसिद्धे इस्लाम धर्मेऽपि किं न विद्यते पीर-पैगम्बरादि पूजा ? किं न ते समाधि स्थलेषु (कब्र) प्रार्थना विदधति ? किं न तत्र शिया सुन्नी कादिया-अहमदिया प्रभृतयो भेदा ? किं न तेषु सकीर्णताया अन्यधर्मान् प्रति घृणाया वा पराकाष्ठा ? तद्धर्मानुयायिना चगेज-तैमूर नादिरशाहप्रभृतीना सधर्मसु विधर्मसु च कृता भीषणा अत्याचारा अद्यापि विश्वेतिहासस्य पृष्ठानि रक्त-रक्तानि दर्शयन्ति। भूतमैत्री करुणा बुद्धिवाद च गृहीत्वा प्रचलिते खीष्ट धर्मे न किं दोषा ? न किं तस्य धर्मगुरुभि (पोप) स्वानुयायिना कृते स्वर्गस्यैकाधिकार सुरक्षितीकृत ? न किं तैरात्मने धनदातृणा कृते देवलोकस्य प्रवेशपत्राणि दत्तानि। न किं तै सधर्मसु रोमहर्षणा क्रूराचारा अनुष्ठिता। सम्यमन्यैरेतैर्दर्शित पाशव तु सर्वाण्यपि प्रावृत्तानि वृत्तानि प्रत्याययत्युपेक्ष्याणि। अद्यापि ते न केवले स्वर्गे, विश्वस्मिन्नपि ब्रह्माण्डेऽपि खीष्ट-धर्मेऽश्रद्धानान् निवासानर्हानिव स्वीकुर्वते। तेऽपि कामभेकेश्वरवादिन पर देवान्तरेष्वपि विश्वासभाज। कुल धन-कृतस्तेषामपि समाजे परस्परमुच्च-नीचाधारो भेद.।

एवविधे व्यतिकरेऽविद्यमाने वास्तविके भेदेऽपि सामान्येन च दोषाणामस्तित्वे सर्वेषु धर्मेषु, कस्तावल्लाभ एकतमस्य त्यागेऽन्यतमस्य च ग्रहणे ? स्वस्यैव धर्मस्य पालन तदा श्रेयस्कर सिध्यति।

आर्याणामैतिह्य धर्मस्य कृते सर्वस्वमप्युपहरता दुर्लभानपि प्राणान् त्यजता महाप्राणाना महामानवाना चरितं सनाथितम्। सर्वेष्वपि राजमण्डलेषु मुगल-सम्राजोऽकबरस्य गतेषु सामन्तभावम्, राजपुत्रेष्वपि स्वभगिनीं सुता वा प्रदाय राज्य पराधिकार वा क्षीणत्सु, स्वभ्रातु सगर सिंहस्य सुते च यवनधर्म स्वीकृत्य मोहब्बतखां सज्ञालाभेन मृत्यवेऽपि स्व धर्म-धुरन्धरो मेद पाट वसुन्धरा परिवृढो प्रत्यर्थि-हृदय-कुटिलया खड्ग-धारया कवच-वलुप यवनोर पटेषु विस्तृता स्वधारामपीलेपेन स्व-प्रतापमुद्रा लिखन्नेकलोऽपि प्रतापो न विधर्मभि सह सन्धिमियेष। नव-वर्षं देशीयोऽपि बालो हकीकतो बहुधा बाध्यमानोऽपि कूटमल्लै (कटमुल्ले) र्यवनधर्ममल्लै प्रेर्यमाणोऽपि पितृभ्यां मृत्युमेवाजवाद न तु धर्म-शुल्का नवाभ (नवाब) कन्याम्। विपक्ष-यश-क्षपण-पटु पराक्रमस्य, मदमत्तावरगजीव-गजघटि वहयिनो—गोपाल सिंहस्य शिष्याणां दशम-गुरो शौर्य-दौष्कस्य गोविन्दसिंहस्य प्रवया यदि पिता तेगबहादुर

बालावपि बालारुण-कराल तेजसौ कुसुम-मृदुल-कलेवरौ सुतौ च प्राणव्ययेनापि स्वधर्मं ररक्षुः। आर्य-धर्म-धौरेयस्य, महाराष्ट्र-मेदिनी-दास्य-कलुष-भार-लुण्टाकस्य शिवबीरस्य (शिवाजी) तनयः स्नेणोऽपि वारविलासिनी-भ्रू-भंग-कम्प्र-हृदयोऽपि प्रणयिनी-मान-दुर्ग-भञ्जन-मात्र-पौरुषोऽपि शम्भुवीरो (सम्भाजी) विजयदर्पात् पित्रा दत्तपूर्वाणामिव पराजयाना निष्क्रयमिव राज्योपहारमवरंगजीवेन क्रियमाणं धर्ममूल्यं सावज्ञ धिक्कुर्वन् प्रतिफले घातकैः कृतं शिरश्छेदमेव बहु मेने। धर्मव्ययेन जातोऽपि स्वर्गलाभो न सुखाय। न जानन्ति ते बराका नियतापायिना प्राणाना वैभवाना च कृते परधर्मदीक्षा स्वीकुर्वाणा धर्मस्य गरिमाणम्।

'धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।'

'यतो धर्मस्ततो जयः' 'धर्मो विश्वस्य जगतः प्रतिष्ठा' इत्यादीनि वचनानि च तत्र प्रभवन्ति। स्व-सहज-धर्म-परित्यागेऽपरस्य च धर्मे गृहीते सर्वत्र व्यवस्थाया आकुलीभाव-प्रसङ्गः। अतएव विविच्योक्तं भगवता श्रीकृष्णेन—

श्रेयान् स्व-धर्मो विगुणः पर-धर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः पर-धर्मो भयावहः॥ (गी.३।३५)

रूपरेखाः

गतानुगतिको लोको न लोकः पारमार्थिकः

मानवो बुद्ध्या, शरीर-बलेन, साधनैर्विद्यया च युक्तः श्रेष्ठः प्राणी। बुद्धेरुपयोगो विवेके भवति। नात्र कोऽपि पूर्णः। सदसद्विवेकेन वस्तुनो ग्रहणं प्रज्ञायाः फलम्। लोकानामनुकरणे प्रवृत्तिः। मूढः परप्रत्ययनेय-बुद्धिः। तातस्य कूपोऽयमिति ब्रुवाणाः क्षारं जलं कापुरुषाः पिबन्ति। नवानुसन्धाने, सत्यान्वेषणे च विद्याया विवेकस्य सदुपयोगः, रूढिग्रस्ता नरा न याथार्थ्य-स्पृशः। मूर्खाणामन्धपरम्परानुयायिनां प्रथा-पालने आग्रहः। प्रथानां पालनं च नापि तत्त्वेन कार्यं नापि त्याज्यम्। निदानमनुसन्धेयं कथमस्या आरम्भ इति। प्रास-वाक्यस्यापि रहस्यं जिज्ञासितव्यम्। गड्डरिका-प्रवाहेणैव तदनुसरता न भवति तत्त्वस्पर्शं उद्योगः। अतो बहुधा प्रतारणमपि तेषां भवति। न निष्प्रयोजना लोक-संव्यवहाराः। कस्यापि कार्यस्य करणात्पूर्वं प्रयोजनमन्वेष्यम्। तेन रहस्यमुद्भिद्यते। धूर्त-नीतिज्ञा दार्शनिका वैज्ञानिकाश्च न विना विश्लेषणं किमपि स्वीकुर्वन्ति। अतीन्द्रिये विषये सत्यप्यनुकरणे आवश्यके तत्त्वज्ञानायावश्यं प्रयतितव्यम्। अन्यथा 'अन्धेनैव नीयमाना यथान्धाः।' क्वचिच्छ्रद्धा तर्कविरहिता ग्राह्या मन्यते परं जिज्ञासा तत्रापि न हेया। यद्यपि संशयालुता न सर्वत्रोचिता परं सर्वथा तदभावोऽपि हानिकर एव।

२—नीर-क्षीर-विवेके हंसालस्यं त्वमेव तनुषे चेत् ।
विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः ॥

जगदिद दोषैर्गुणैरमृतेन विषेण पथ्येनापथ्येन च पूर्णम् । शीतमुष्ण, सुख दु ख, पाप पुण्य चेति यथा द्वन्द्वास्तथैवान्येऽपि क्वचिद् दोषा गुणाश्च परस्पर मिश्रिता न लक्ष्यन्ते । तदा विवेकिना सदसद्विश्लेषण शक्तिमता कार्यमिद यत्तत्र विचार्य सतोऽसतश्च विवेक कुर्युं । विद्वास एवंतत्र समर्था । त एव निकषोपला शुभस्य अशुभस्य च । हेम्न सलक्ष्यते ह्यग्नौ विशुद्धि श्यामिकाऽपिवा । मूर्खेषु गुणा अपि दोषा जायंते । परीक्षका यत्र न सन्ति देशे नार्घन्ति रत्नानि समुद्रजानि । आभीर देशे किल चन्द्रकान्त त्रिभिर्वराटैर्विपणन्ति गोपा ॥

अज्ञेषु यदि तिष्ठन् विद्वान्न सत्यासत्यस्य कृत्याकृत्यस्य सतोऽसतो वा विभाग कुर्यात् कस्त जानीयादय बुध इति । विदुष एवेद कार्यम्, 'पाप-पुण्य गुण दोष मय विश्व कीन्ह करतार । सन्त हंस गुण गहहिं पय परि हरि वारिविकार (तुलसी) ॥ काक कृष्ण पिक कृष्ण. को भेद पिक काकयो । प्राप्ते वसन्तसमये काक काक पिक पिक ॥ रे रे कोकिल मा भज मौन किञ्चिदुदञ्चय पञ्चम रागम् । नो चेत्त्वा मिह को जानीते काव कदम्बक-पिहिते चूते ॥ (भा वि)

३—सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणते हि विमृश्य-कारिणं गुण-लुब्धाः स्वयमेव सम्पदः॥

मानवो बहुधा भावावेशेन किमपि कार्यं करोति, पश्चात्तपति च फलेन तस्य। क्षिप्रकारिता बहुधा हानि-करी सम्पद्यते। करणात्पूर्वं फलस्य विमर्शो विधेयः। अविचार्यं किमपि विदधतो लोका न जातु मोदन्ते। सहसा कथनेऽपि मुखादवाच्य वचनं निस्सरति यस्य परिणति. कलहे युद्धे विनाशे च जायते। अतो विज्ञा शान्त हृदयेन विविच्यैव करिष्यमाणं कर्म तत्फलं च पूर्वं निश्चिन्वन्ति पश्चाच्चानुतिष्ठन्ति। तस्य फलमपि सूप्तबीजस्येव भवति।

"उचितमनुचितं वा कुर्वता कार्य-जातं परिणतिरवधार्या यत्नतः पण्डितेन।
अति-रभस-कृतानां कर्मणामाविपत्तेर्भवति हृदय-दाही शल्य-तुल्यो विपाकः॥"

आवेश-वशान्मानवः पूर्वं किमप्याचरत्यनुचितं कर्म। विवेके तु जागृते तप्यते। हानिकरं फलं स प्रत्यक्षं पश्यति। न तु लज्जया कस्मैचिद् वक्तुमुत्सहते। योजनाबद्धस्य कार्यस्य विपरीते परिणामेऽपि भवति प्रतीकारः। पर नाविचारितस्य। चतुरङ्ग-क्रीडायामिव (शतरंज) चिरकारी न केनापि जीयते। रभस-कारिणो नृपाः शत्रुभिरभिभूयन्ते। विमृश्यानुष्ठातृणां तु कार्यं सत्फले नैवानुमीयते। अतो न सहसा किमपि कार्यम्।

४—भिन्न-रुचिर्हि लोकः

संसारे-विविध-वस्तु सारे प्राणिनामपि प्रवृत्तयो नेक-विधा । एकमेव द्रव्य न सर्वेषा कृते शोभनम् । यद् दृष्ट्वैको जनोऽनुरज्यते तदेवाभिवीक्ष्यापरो विरज्यते । कश्चिन्मधुरान्ने कृताभिनिवेश., इतरस्य रसना अम्ले रसे विशेषेण त्वरते । कोऽप्याडम्बर-प्रियस्तर्ह्यन्योऽकृत्रिमवेषमेव बहु मनुते । चित्त-वृत्तेर्वैचित्र्यमिदमेव मानवाना चारित्र-भेद तनुते । काका निम्ब-फलानि सविशेषमदन्ति, कोकिलास्तु रसालमञ्जरी-रास्वादयन्ति पर क्रमेलकः पारियात्र-फलानि कण्टकाश्च जिघत्सति । तदुक्तम्—

'क्रमेलकं निन्दति कोमलेच्छुः क्रमेलक. कण्टकलम्पटस्तम् ।'

अत एवैको गुणवान् न खलाना रुच्यनुकूल. । दुष्प्रवृत्तयो जना सद्वृत्तीना नादर विदधति । पङ्कज रविं दृष्ट्वा विकसति शशिनि समुदिते तु मुद्रा भजति । चकोरस्य चन्द्रमसा, मयूरस्य जलदेनैव सह स्नेहः । नहि कोऽपि रूपगुणवयोऽभिजनवा-नपि विकत्थितुं शक्तः सर्वासा कामिनीना प्रियोऽहम् इति । अभिनवरसानुभूतिसरसं नाटक पश्यन्तोऽपि श्रोत्रिया न तत्र रसमनुभवन्ति । रुचेरेव भेदादेकस्या एव शक्ते-र्ब्रह्मणो रूपे देव-विशेषे लोकाना भक्ति । रुचीना वैचित्र्याद्दजुकुटिल नाना-पथ-जुषा नृणामेको गम्यस्त्वमसि पयसामर्णव इव । 'मुण्डे मुण्डे मतिर्भिन्ना,' 'न काम-वृत्ति-वंचनीयमीक्षते ।'

५—वरमद्य कपोतः श्वोमयूरात्

लोकानां प्रवृत्तिरुज्ज्वल-भविष्यदाशया वस्तुषु जायते। नीतिरपि समृद्धायति कर्म समर्थयते। परं भाविनः सुखस्याशया वर्तमानस्य त्यागो नोचितः। श्वोऽहं भूयसीं सम्पदं लब्धास्मीति कृत्वाऽद्यतनं सुखं कोऽप्युपेक्षते चेन्न स मतिमान् मन्येत। अनिश्चिता हि नियतिः प्राणिनाम्। 'करतलगतमपि नश्यति यस्य पुनर्भवितव्यता नास्ति।' को जानाति किमनुभविष्यत्यागामिनि कालेऽद्यतनो धनिकः। द्यूतकारा यथा विजयाशयाऽर्जितमपि विभवनाशयन्ति, तथैव भविष्यदाशया लब्धमपि सुखं त्यजन्ति मूर्खाः। विदुषा च वचनानि—उपस्थितं परित्यज्यानुपस्थितस्य कल्पने मानाभावः। 'उपस्थितस्य गतिश्चिन्तनीया।' 'ध्रुवाणि तु परित्यज्य योऽध्रुवाणि निषेवते। ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव तत्।' अत एव 'वर्तमानेन कालेन वर्तयन्ति विचक्षणाः।' भूरि-लाभस्य संभावनायां वर्तमान उपलब्धोऽल्पोऽपि नोपेक्षणीयः। आगामिनो नास्ति निश्चयः। लोक-भाषायामपि वदन्ति—'नौ नकद न तेरह उधार।'

६—स्त्रीणां प्रियालोक-फलो हि वेषः ।

नारीणां सौन्दर्यस्य प्रयोजनं विशेषतः प्रियाणा लोभनमेव । कामो हि मनोभवः संकल्पमात्र-जन्यः । तस्य प्रथमाऽवस्था चक्षूरागः । चक्षुरिन्द्रियस्य विषयश्च रूपम् । यत्र लावण्यं सविशेष नयनानामुत्सवद तत्रैव नयन-प्रवृत्तिरिति लोके दृश्यते । प्रसाधनैः सज्जा-विशेषेण भूषणादिभिश्च रूपस्यैवोत्कर्षः साध्यते । अत एव साधारण-सौन्दर्य-सम्पदपि कामिनी चारुवयोवेशशालिनी वारमेकं यूना दृष्टि-मामन्त्रयत्येव । शोभयितुमात्मानमेव दर्शनीयं वासो धार्यते । निर्विशेषा हि परेषामवलोकने कामं जीर्णकन्थाः परिदध्युर्नग्ना वा नृत्येयुस्तुल्यैव स्थितिस्तेषां कृते । परं यदा मनसि जायतेऽभिलाषः, 'अपि नाम स मयि दृष्टिपातं कुर्यात्, अप्यहं तस्मै रोचेय' इति, तदाऽधिकाधिका कामिन्याः शृंगारे प्रवृत्ति जायते । उद्देश्यं च तस्य स्वाभिमतस्य प्रियस्य विलोभनम् तस्य प्रणयस्य च प्राप्तिः । अत एव न विधवानां तपस्विनीना विरहिणीना वा प्रसाधनमुचितमुक्तम्, वासक-सज्जाना पतिवराणा कुमारीणा वेश्यानां च न प्रतिकूलम् । यदि कृतेऽपि शृङ्गारातिशये न प्रेयसो मोहनाय क्षमेत, वैफल्यमेव तस्य । अत एवोक्तम् 'प्रियेषु सौभाग्य-फला हि चारुता ।' 'किं वा हि तद् रूपं न येन चक्षुर्वशीक्रियते । 'योषा जारस्य चक्षसा विभाति ।'

७—किमिव हि मधुराणां मण्डनं नाकृतीनाम्

लोके भूषणानि स्वरूपमुज्ज्वलयितुमेव धार्यन्ते यथा साधारण्यप्याकृतिस्तैः सविशेष रोचना सम्पद्येत। अत एव लोकस्य मोहकाना वस्त्राणां कुसुमादिस्रजां भूषणाना च धारणे प्रवृत्ति.। परं बहुधा परिधातुर्वर्ण-रूप-वयो-वेषौचित्यादि-सापेक्षता परिधाने परीक्ष्यते। कस्मिन्नवसरे कीदृशस्य वसनस्य मण्डनस्य चोपयोगिता स्यादिति विचारयन्ति लोका.। क्वचिच्च सुन्दरमपि वासो न सज्जते, यथा श्यामा-शरीरे रक्तं वर्णोज्ज्वल वा। परं गौराङ्ग्याः कपोलयोस्तिलकालकोऽपि रमणीयकमातनोति। शोभनाऽऽकृतिर्हि स्वयं मण्डनम्। अतिरिक्तं प्रसाधनं न साऽपेक्षते। धारितमपि तत् स्वयं कृतार्थता व्रजति। सर्वास्ववस्थासु हि तस्या रमणीयता। अत' किमपि परेषा दूषकमपि धारितं सुन्दरस्य चारुतामेवादधाति। यथोदितं कालिदासेन—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिक-मनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

उर्दूकविनाप्युक्तं केनापि—

'नहीं मोहताज जेवर का जिसे खूबी खुदा ने दी।'

८—अनुत्सेकः खलु विक्रमालंकारः

प्रकृतिरिय प्राय प्राणिना यत्किमपि कृत्वोज्जित कार्यं विकत्थन्तेतमाम्, गर्वातिशयस्तेषा जायते स्वस्मिन् पौरुषातिरेक सभाव्य। पर विक्रमस्य सर्वथोत्कर्षो यदा वीरोऽपि जनो विनयालकृत स्यात्। उक्त च 'क्षमा शक्तौ हि भूषणम्।' विक्रान्तोऽपि, गुणवानपि, विद्वानपि, धनवानपि, शीलवानपि श्लाघते चेदात्मान, *तस्य लाघवमेव तन्मन्यते। 'सम्पूर्णकुम्भो न करोति शब्दमर्धो घटो घोषमुपैति नित्यम्।'* बल-दुर्मदा हि खला स्व-शक्ति-प्रदर्शनेन दुर्बलेष्वातक विधित्सन्ति।

यथा—

विद्या विवादाय धन मदाय शक्ति परेषा परिपीडनाय।
खलस्य, साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय॥

अत एव न सज्जना पराक्रमे सत्यपि मुखेन वदन्ति, नात्मान श्लाघन्ते, सत्यवसरे तु सिंहा इव सोत्फाल रिपूनभिभवन्ति। न ते परस्मादपि स्व-स्तुति शुश्रूषन्ति।

शरदि न वर्षति गर्जति, वर्षति वर्षासु निस्वनो मेघ।
नीचो वदति न कुरुते, सुजनो न वदति करोत्येव॥ तथा

'अद्यापि दुर्निवार स्तुति कन्या वहति कौमारम्। सद्भ्यो न रोचते सा सन्तस्तस्यै न रोचन्ते॥' अतएव विकत्थमान रावण प्रति लक्ष्मणस्योक्ति—

'राजन् न गर्जन्ति महाप्रभावा, कि कत्थसे प्राकृतवत् स्वमद्य॥'

सर्वथा शोभते वीराणा विनयोत्तर शौर्य प्रकर्षं।

६—ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः

यथा लोकाः शान्तं शीतलं भस्म-पुञ्जं निर्भयं लङ्घयन्ति परं ज्वलन्तं कृशानुं लंघयितुं नोत्सहन्ते, एवमेव तेजस्विनं शक्तिशालिनं वा जनं न कोऽप्यवमन्तुं समर्थः, निर्बलं क्षमा-शीलं नम्र-स्वभावं तु सर्वेऽपि तिरस्कर्तुं साहसं विदधति। कामं नरः सुशीलो दयालुः समवेदनाशीलो भवेन्न परं स्व-तेजः सर्वथा त्यजेत्। यथा पालितं शान्तं लालयन्तं च गृह-कुक्कुरं शिशवोऽपि पुच्छादि कर्षणेन पीडयन्ति, परमाखेट-कुक्कुरं तीक्ष्ण-प्रकृतिं वीक्ष्य वयस्का अपि शङ्कन्ते, का कथा पीडनस्य। सर्वथाऽतेज-स्कस्य नात्र भुवि निर्वाहः। 'विषं भवतु मा वास्तु फटाटोपो भयंकरः।' 'अवन्ध्य-कोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः। श्रमर्ष-शून्येन जनस्य जन्तुना न जात-हार्देन, न विद्विषादरः॥' पाण्डवाः शमशीलतयैव कष्टं सेहिरे; ऋषयः शान्तास्तपः कृशा इति रक्षसां पीडनीया अभवन्। 'सिंह नेंव गजं नेंवबृकं नेंव च नेंव च। अजा-पुत्रं बलिदद्यात् देवो दुर्बल-घातकः॥' मार्जारः श्वानं दृष्ट्वा भीत. पलायते, परं निकटे सन् रोषाकुले चक्षुषी दर्शयति चेत् सारमेयोऽपि त्रस्यति। विनयेनान्यायं सहमानं जनं सर्वोऽपि पीडयति। जगति प्रेमादरोवा भयेनैव जायते। 'बसै बुराई जासु तन, ताही को सनमान। भले भले कहि छाँडिये, खोटे ग्रह जप दान॥'

(बिहारी)

विषदोऽभिभवन्त्यविक्रमं रहयत्याप्लुपेतमाशयतिः।
नियता लघुता निराकृतेरगरीयान्न पदं नृप-श्रियः॥

अतः सर्वैरपि स्वं तेजः प्रतिपत्तव्यम्।

१०—गुण-ग्रहा वचने विपश्चितः

लोके सन्मार्ग-प्रदर्शका आचार्या गुरवो भवन्ति, सदा च ते मान्यन्ते। पर शिक्षा यतोऽपि लभ्येत, तत एव स्वीकार्या। न तस्मिन्नवसरे शिक्षयितुर्जातिर्वयो लिंग वा समीक्ष्यते। विद्वाम सदा कथने गुणानेव पश्यन्ति न योग्यताम्। यथाऽशुचि-स्थाने पतितमपि काञ्चन ग्राह्य भवति, तथैवाशुचे कुत्सितादपि श्रेयस्कर वाक्य श्रोतव्यम्। न तत्र कोऽपि दोष। गुण-ग्राहिषु गुणा गुणत्व बिभ्रति नागुणज्ञेषु। 'गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुण प्राप्य भवन्ति दोषा। यथा किराती करि-कुम्भ-जाता मुक्ता परित्यज्य बिभर्ति गुञ्जाम्॥' 'बालादपि सुभाषित ग्राह्यम।' दत्ता-त्रेय श्वान मार्जार मूषकमपि च स्व-गुरुत्वेनामन्यत। महात्मा गाधो वानरस्य मूर्ति-त्रयादिमा शिक्षामगृह्णात्। १—परस्य दोषान्मा पश्यत। २—न पर-दोषान्-शृणुत। ३—परच्छिद्र दृष्ट्वा श्रुत्वाऽपि न वदत। व्यासपुत्र शुको घर्मव्याधा-ज्ज्ञान प्राप। स्त्रियो नरो वा वृद्धा बाला वा नीचा उच्चैर्वा येऽपि गरीयासोगुण-वन्त स्तत एव गुण ग्रहण विधेयम्। शत्रुरपि हित वदन्मानयितव्य। विधर्मिणामपि श्रेयास आदर्शा ग्राह्या। 'गुणा पूजा स्थान गुणिषु न च लिंग न च वय।' 'कनक-भूषण सग्रहणोचितो यदि मणिस्त्रपुणि प्रनि बध्यते। न स विरोति न चापि स शोभते भवति योजयितु वंचनीयता।' 'परीक्षका यत्र न सन्ति देशे नार्घन्ति रत्नानि समुद्रजानि। आभीरदेशे किल चन्द्र कान्ति निमिर्वराटं विपणन्ति गोपा॥'

११—सेवाधर्मः परम-गहनो योगिनामप्यगम्यः

संसारे परेषा सेवा परिचर्याऽतिप्रशस्ता, इह सन्त्यनेके रुग्णा असहायाः क्षुधिता अनाथा विपद्ग्रस्ता वा। तेषां साहाय्यं सर्वोत्कृष्टो धर्मः। सदुपयोगो ह्ययं प्राणिनां साधनानाम्, 'परोपकार-शून्यस्य धिङ् मनुष्यस्य जीवितम्। जीवन्तु पशवो येषां चर्माऽप्युपकरिष्यति॥' सेवा च केचिदर्थाऽऽशया केऽपि प्रसादाभिलाषेण धनिनां राज्ञां वा कुर्वन्ति। वस्तुतः सैव सेवा दास्य-वृत्तिरुदिता, 'सेवा श्ववृत्तिराख्याता,' तत्रैव मानवाना मानहानिः सत्त्व-भ्रंशो वा जायते। परमसहायाना निर्बलानाम-परिचिताना विनैव स्वार्थं या सेवा विधीयते, सैव सेवा। 'दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम्। व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः।' भवति सेवाभावे महत्कष्टम्। स्वार्थंस्तत्रोपेक्ष्यते, व्याधिः क्षीयते। प्राणाः संकटे क्षिप्यन्ते। परं न ये तथाप्युद्विग्ना भवन्ति त एव परमार्थे सेवकाः। न तत्र प्रत्युपकारैषणा विधेया। 'इयमुन्नत-सत्त्व-शालिनां महता काऽपि कठोर-चित्तता। उपकृत्य भवन्ति दूरतः परतः प्रत्युपकार-शंकया॥ न च कोऽपि जनो विचारयेत् 'किं मेऽन्य-साहाय्येन, न मम केनचित्प्रयोजनमिति।' सति काले सर्वैरपि पर-साहाय्यमपेक्ष्यते। 'दन्तस्य निष्कोषणकेन नित्यम् कर्णस्य कण्डूयनकेन वापि। तृणेन कार्यं भवतीश्वराणां किमङ्गवाग्घस्तवता नरेण।' सेवा-व्रती न पराक्षेपेण कष्टैर्वाक्षुभ्यति, नात्म-मौख्य-मसौविध्यं वा गणयते, परीक्षा नाम सा सत्त्वस्य। तत्रोत्तीर्णोनरो विश्वमेव जयति। भूमिरपि सेविता रस प्रयच्छति तरवो मधुराणि फलानि लताश्च सुमनंसि वित-रन्ति। पर योऽविचलः सेवा-व्रते, स सेवकः। अत एव योगिनामपि सेवा-धर्मो दुर्लभ उक्तः।

१२—इन्द्रियाणां प्रसंगेन दोषमृच्छत्यसंशयम्

ससार खलु विषवृक्ष उक्तो विषयामवत्या। ज्ञानेन्द्रियाणि हि प्राणिना मनासि विषयानभिवर्तयन्ति। 'इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः।' इन्द्रियाणा हि चरता यन्मनोऽनु विधीयते। तदस्य हरति प्रज्ञा वायुर्नावमिवाम्भसि॥' अतएवेन्द्रिय-निग्रहेणानासक्त्या विषयोपभोगेन वा विरज्यते। विषयाऽऽसंगो हि आत्मनो विनिपात-हेतुः। 'सगात्संजायते कामः कामात्क्रोधोऽभिजायते। क्रोधाद् भवति संमोहः, समोहात्स्मृति-विभ्रमः। स्मृति-भ्रंशाद्बुद्धिनाशोबुद्धि-नाशात्प्रणश्यति॥' (गीता) रूपरस-गन्ध-स्पर्श शब्दा इन्द्रियाणा मात्रा। 'मात्रास्पर्शास्तु कौन्तेय शीतोष्ण-सुख-दु खदा'। आगमापायिनोऽनित्यास्तास्तितीक्षस्व भारत॥' मृगो नादासक्ततया व्याधेन वध्यते। जिह्वा-लौल्येन वानरो निगृह्यते। भोगासक्त्या पुरुषा वारागनाभिः खिलीक्रियन्ते। रूपासक्त्या चक्षू रज्यते काम-यातना चानुभूयते। इन्द्रियाणीमानि शरीररथस्य हया। मनस्तु सारथिः। पर तत् खल्वसंयतेन्द्रियैर्बलाद् ह्रियते। तदैवात्मा भव-सागरे निमज्जति। वशीकृतानीन्द्रियाणि येन, मुक्तः स संसार-बन्धनात्। न स कर्मभि-र्लिप्यते। अन्ययेमानि जीवमेत तथा वशीकुर्वन्ति यथा जन्म-शतेनापि न मुच्यते। अतो निग्राह्याण्येवेन्द्रियाणि।

१३—विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः

जगति चपल-वृत्तयो धीर-प्रकृतयश्चोभय-विधा जना । स्वल्पेऽपि सङ्कटे समुपस्थिते कातर्यं व्रजन्त, रूपादिषु अनुभूत-मात्रेषु हृतेन्द्रिया प्रथम-विधाः । ये तु सत्यपि भयकारणे न विभ्यति, विषादमूलेष्वपि समुपस्थितेषु न विषीदन्ति, विद्यमानैरपि विषयैर्न ह्रियन्ते ते खलु धीर-पद-वाच्या । अन्ये तु विडम्बना-पात्राणि । 'ननु प्रवातेऽपि निष्कम्पा गिरय ।' साधारणीषु स्थितिषु तु सर्वेऽपि धैर्यं प्रदर्शयन्ति, क्षोभ-कारणे विद्यमानेऽपि न येषा विचलति मनः, अविभ्यतस्तत्प्रतीकारायैव प्रयतन्ते, विदित्वाऽपि भय-कारणं साहसात्तत्र प्रवृत्तिर्विजयश्च तस्य सत्या धीरता । 'भिन्नेषु भिन्न सन्धाने भिषजा सान्निपातिके । कर्मणि व्यज्यते प्रज्ञा, स्वस्थे को वा न पण्डित.।' जातमात्रेऽपि विकारे ते नियच्छन्ति तम् । तत्रोपित्वाऽपि निर्लिप्तता तु विस्मय-कारिणी ।

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चन पद्म-रेणु-कपिशे पुण्याभिषेक क्रिया ।
ध्यान रत्न-शिला-तलेषु, विबुध-स्त्री-सन्निधौ सयम
यद् वाञ्छन्ति तपोभिरन्य-मुनयस्तत्रिर्मस्तपस्यन्त्यमी ॥ (शा ७।१२)

अत साधूक्तम्—विकारहेतौ सति विक्रियन्ते येषा न चेतासि त एव धीरा ।

१४—कामार्ता हि प्रकृति-कृपणाश्चेतनाऽचेतनेषु

कामो नाम प्राणिनामचिन्तित उपप्लव., सहसोपनतो वात्याऽऽघातः, अनभ्रः करकापातो येन सहसैव मथ्यन्ते तेषामिन्द्रियाणि, लुप्यते विवेकः, वशीक्रियते मानसम्, नाश्यते धैर्यम्, विफलता नीयते ज्ञानम्, विडम्ब्यते तपः, चाल्यते समाधि.। न स्फुरति मति कृत्येऽकृत्ये वा। रागाग्निना हृतासनेव निर्वास्यते लज्जा, सन्तोऽपि तेन खली-क्रियन्ते। संकल्प-प्रभवोऽयं कल्पने महतोऽपि खिलीकर्तुम्।

'शम्भु-स्वयम्भु-हरयो हरिणेक्षणानां येनाक्रियन्त सततं गृहकुम्भदासाः।'
वाचामगोचर-चरित्र-विचित्रिताय तस्मै नमो भगवते मकर-ध्वजाय।'

अस्य बलादनुनिष्ठानि ते दुःसाहसानि, तरन्ति जलधिम्, लंघयन्ति गिरीन्, विशन्ति पातालम्। विकार-हृत-विवेका पूज्यानगम्यानपि गच्छन्ति। पराशरस्य धीवर-सुतायाम्, प्रजापते स्व-दुहितरि, विभाण्डकस्य मृग्याम्, बृहस्पते. स्वभ्रातृ-जायायामभिलाष। नार्यपि वशीकृतानेन पितरं भ्रातरम् अन्य वा न विचारयति 'यः पार्श्वतो भवति लतेव त परिवेष्टयन्ति।' हृत-विवेकाः काम-विकला सजल-जलदानपि प्रहर्तृन् बुध्यन्ते, लता अपि प्रेयसी-भुज-बदाचरन्ति। तरु-शाखा अपि विलासिनी-देह-यष्टीरिवालिंगन्ति। पुष्पाण्यपि वल्लभा-करतलमिव वक्षसि धारयन्ति। रासभ्यपि देवांगनायते तेषा कृते। महिष्यपि प्रौढेव रमयति तान्। वाक-रुताद् भीताऽपि प्रमद महानान्धकार-मलीमसे पथि निर्भयं व्रजति काम-सहाया।

मात्रा स्वसा दुहित्रा वा न विविक्तासनो भवेत्।
बलवानिन्द्रिय-ग्रामो, विद्वांसमपि कर्षति॥
दिवा काकरुताद् भीता रात्रौ तरति नर्मदाम्।
तत्र सन्ति जले ग्राहा मर्मज्ञा सैव सुन्दरी॥

बलीयानू रिपु. कामः प्राणिनाम्।

१५—सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः

सर्वेषा प्रवृत्तिरिह जगति भवति प्रियस्य वस्तुन सग्रहेऽप्रियस्य च हाने । न कोऽपि वाञ्छति त्यक्तुमिष्टम्, सत्यवसरे नश्यत् च रक्षितु प्रयतते । पर बहुधा समापतति सकटे न सभवति सर्वथा रक्षणम्, प्रतिभाति प्रत्यक्ष सर्वस्वहानि. । किमत्र प्रतिविधेयम् ? तत्र केचिदबुद्धिमन्तो हठादखिलमपि त्रातु प्रयतमाना स्वयमपि नश्यन्ति । अन्ये च न शक्तावय प्रतिकर्तुम, गच्छति चेद् गच्छतु' इति सवस्वमपि नाशयन्ति । पर न नीतिमतामय पन्था । तेषा यावच्छक्तय भवति प्रयत्नो रक्षणे, यदा तु न समस्तस्य रक्षा सभवति तदाऽशत्यागेनापि त्रायन्ते शिष्टम् । फल्गुनस्त्यागेन सारवतो ग्रहण तत्र क्रियते । यथा जलयाने ब्रुडति सागरे लघूकरणाय तस्य, प्राण रक्षार्थं वस्तुसभारा जले क्षिप्यन्ते । रत्नाना समक्ष धातवस्त्यज्यन्ते । पर बहुधा धर्मं विचार्य स्वात्मनाऽपि दीना परिपाल्यन्ते । यथा पोताद् रिक्तीक्रियमाणात् पूर्वं स्त्रिय. शिशवश्चावतार्यन्ते । दुर्गाद् वाऽवरुद्धात् तेषा कर्मचारिणामाश्रिताना च निष्क्रामणमर्हम् । आपदर्थं धन रक्षेद् दारान् रक्षेद् धनैरपि । आत्मान सतत रक्षेद् दारैरपि धनैरपि ॥ त्यजेदेक कुलस्यार्थे, ग्रामस्यार्थे कुल त्यजेत् । ग्राम जनपदस्यार्थे आत्मार्थे पृथिवी त्यजेत् ॥ सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डित । अर्धेन कुरुत कार्यं सर्वनाशो हि दु सह ॥ राष्ट्र-रक्षायै राजा पुत्रस्यापि त्याग विदध्याच्चेत्तदपि कल्याणाय कल्पते ।

१६—न्याय्यात्पथः प्रविचलन्ति पदं न धीराः

विद्वास प्रकृत्या सन्मार्गमनुरुन्धते, खलाश्चासन्मार्गम्। कोकिलाना रसाले काकाना तु कटुनिम्बे रुचि। न च सरल साधु पथ, प्राय. कण्टकाऽऽकीर्णोऽयम्। अनुभूयन्ते तत्र महान्ति कष्टानि, अर्ज्यते खल-विरोध, सह्यन्ते प्रायेण परेषामाक्षेपाः। पर न सख्यावन्त कदचित् सख्यान विवेक स्वदृढता वा त्यजन्ति। 'तुङ्गत्वमितरा नाद्रौ नेद सिन्धावगाहता। अलघनीयताहेतुरुभय तन्मनस्विनि॥' एव मनस्विनस्ते नीतिमार्गमनुरुन्धाना राज्ञामपि विरोधमुपेक्षन्ते। 'नरपति-हित-कर्ता द्वेष्यता याति लोके जन-पद-हित-कर्ता त्यज्यते पार्थिवेन्द्रै'। इति महति विरोधे वर्तमाने समाने नृपति-जनपदाना दुर्लभ कार्यकर्ता।"

वस्तुतो न्याय-मार्ग स एव य सन्तोऽनुसरन्ति, मतो ह्युदयतेरवि सैव प्राची। न स जातु दिगधीन उदेति। "वयमिह पदविद्या तर्कमान्वीक्षिकी वा यदि पथि विपथे वा वर्तयाम स पन्था। उदयति दिशि यस्या भानुमान्, सैवपूर्वा, नहि तरणिरुदीते दिक्पराधीन-वृत्तिः॥

'तर्कोऽप्रतिष्ठ श्रुतयो विभिन्ना नैको मुनिर्यस्य मत प्रमाणम्। धर्मस्य तत्त्व निहित गुहाया महाजनो येन गत स पन्था॥ 'न जातु कामान्न भयान्न लोभाद् धर्म त्यजेज्जीवितस्यापि हेतो'।' 'निन्दन्तु नीति निपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्। अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथ प्रविचलन्ति पद न धीराः॥'

१७—बहु-प्रजा निर्ऋतिमाविवेश

लोके प्रजा सन्तानार्थिन्य, पाणिग्रहणस्य प्रयोजनमपि सन्तेरधिगतिरेव चोदिता शास्त्रकारैः। पितृणामृणान्मुक्तिरपत्याधीना। प्रकृत्याऽपि जनो वात्सल्य-निर्भर। 'अपुत्रस्य गृह शून्यम्' इति चोच्यते। पर बहु-सन्तति दोषायैव सम्पद्यते। धनिकानामपि बहव पुत्रा पुत्रिका वा स्युश्चेत् सर्वदा दाय विभजनैर्गोत्रश्री शीघ्रमेव क्षयमेति, पत्नीणा वा विवाहे यौतुकादिना गच्छति। दरिद्रस्य तु बह्वपत्यता कुष्ठे पामेवातिशयेन कष्ट-प्रदा। यतस्तेषा भरण-पोषणे शिक्षणे च भूयसोऽर्थस्य व्ययोऽपेक्ष्यते। परम् 'भोजने यत्र सन्देहो धनाशा तत्र कीदृशी।' तत्रापि सन्तति सद्गुणा स-विद्या च स्याच्चेत् तोषोऽपि क्रियेत। पर रासभीसूनाविव च बाल्ये रूपेण पित्रोर्मनो मोदयति पश्चाच्च दुर्व्यसनैर्दुश्चरितेन च कुल कलकयति सुतै शल्याविद्धमिव हृदयम्। एकेनापि पुत्रेण कुल समुन्नीयते, बहुभिरपि किंशुकैरिव निर्गुणै शिशिर-समयैरिव बहुल-दोषै, शूलैरिव मर्मवेधिभि, सर्पैरिव कुटिल गतिभिर्वंशस्यापकीर्तिर्जायते। 'एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम्। सहैकादशभि पुत्रैर्भार वहति गर्दभी।' 'वरमेको गुणी पुत्रो न च मूर्खशतान्यपि। एकश्चन्द्रस्तमो हन्ति न च तारागणोऽपि तु॥' एव निर्गुणोऽपि जायमानोऽधिका सन्तति केवल क्लेशाय कल्पते। अद्यत्वे चान्न-सकटे सति प्रतिदिनमुपचीयमाना जनसख्या कठिना समस्या। प्रतिवर्षं पञ्चाशल्लक्ष परिमाणा वृद्धि। परिवार-नियोजन कृत्रिमैरुपायै. साध्यते। तेनाचारस्यैव वृद्धि.। कुमारीणामपि नि शकतया सहवासे प्रवृत्ति। स्त्रीणा स्वास्थ्यहानि। विलास-प्रधानेऽपि काले नियन्त्रितोपभोगस्यैव व्यवस्था साधीयानुपाय।

१८—कर्म कः स्वकृतमत्र न भुङ्क्ते

प्राणिनो जीवन्त शुभान्यशुभानि वा कर्माणि निशकमनुतिष्ठन्ति । शुभानि सत्परिणामानि । तद् विपरीतानि चाशुभानि । केषा चित्फलमिहैव जन्मनि । इतरेषा चान्यस्मिन् । 'पूर्वजन्म कृत कर्म तद्दैवमिति कथ्यते ।' इत्य स्वय कर्म-बलात्स्व-भाग्य निर्माण क्रियते । भारतीय दर्शनानुसारेणात्मन शरीरधारण तत्कर्म फलानु-रोधादेव । सत्कर्मणा फल नासाधु जायते । 'नहि कल्याण कृत्कश्चिद् दुर्गति तात गच्छति ।' अवश्यमेव भोक्तव्य कृत कर्म शुभाशुभम् ।' स्वोद्यमस्य परिणतिर्यथा सुखे तथैव सत्कर्माऽऽचरणेन नि श्रेयस-सिद्धि । सकलस्य जीवनस्य विनैव क्लेश यापनाय शुभाना कर्मणामेवानुष्ठानम् । पापकर्मणा फल तद्विपरीतमेव प्रच्छन्नस्यापि कर्मण परिणामो नापलाप्यते । 'त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभि पक्ष स्त्रिभिर्दिनै । अत्युत्कटं पाप-पुण्यैरिहैव फलमश्नुते ॥' पुरुषाणा कुष्ठाद्युपभोग स्त्रीणा च वेश्या वृत्त्या दुरन्तश्च दुष्कर्मणा सूचका । अद्य कर्मफलशका-हीना जना यथेच्छ पापानि कुर्वन्ति । पर पीडन व्रतता गतम् । पर नोपेक्षया कोऽपि परिणत्या रक्ष्यते । अतो यथा साध्य शुभमेव कर्मानुष्ठेयम् ।

१६—उपनतमवधीरयन्त्यभव्याः

लोकेऽस्मिन् प्राणिना जीवने सर्वेषामपि सम्पदा विपदा च काल आयाति ।

कल्याणो बतगाथेय लौकिको प्रतिभाति मे ।
एति जीवन्तमानन्दो नर वर्षशतादपि ॥

बहूना सम्पद् विपद् वा स्वयमर्जिता भवाति । यथाऽवसर च निखिलोऽपि जनो लभते साधनानि सुविधाश्च यासा प्रयोगेण सकलमपि जीवित सुखयित प्रभवेत् । *बुद्धिमस्त. ता अभिनन्दन्ति, कृत्वा सदुपयोगमायतिमुज्ज्वला विदधति । परे चालस्ये*-नोपेक्षया गर्वेण वा काले ता अनादृत्य पश्चात् प्रत्यानतु चेष्टन्ते । न खलु गत समयो भूय उपलभ्यते । यथा कोऽपि पुरस्थ भोजन निरादृत्यान्यत्र भोक्तुमाशास्ते, पर न लभते स क्वापि । उपनतस्यावसरस्य साधनाना च सदुपयोग कार्य । न तानि पुनरावर्तन्ते । बुद्धिमन्तो ऽभिज्ञाय तत्र गृहीत क्षणा जायन्ते । जीवितमपि नेद सामान्यम् । नैतदुपयुज्य सन्मार्गे वृथैव यापयन्ति ये, तेषा पश्चात्ताप एव शिष्यते । अन्धो यथा गले निधीयमाना स्रज सर्प-शङ्कया धुनोति, पश्चाच्च लब्धु कामयते । तथैव अभद्रा अकल्याण दर्शिन , अनात्मज्ञा समक्षमागत शुभ तिरस्कुर्वन्ति । 'Time once gone cannot be recalled' इत्याङ्गलोक्तिरपि तत् समर्थयते । अत समुखागतस्य भद्रस्य सावधानमभिनन्दन विधेयम् । यत श्रीर्निहिता तत्र ।

२०—सुखमुपदिश्यते परस्य

जीवितेऽस्मिन् सकलोऽपि जनोऽनुभवति सशय शतानि। जायन्ते प्राय स्खलितानि तस्य। समापतन्ति पुरत प्रमादावमरा। अभिभवन्ति त व्यसनासगा। न कोऽपि वञ्च्यते तदनुभूतिभि। पर दृश्यते, स्व प्रमादे विषाद, परस्य चोपहास। दुश्चरितोऽपि प्रतिवेशिनमाक्षिपति, तमुपदिशति साध्वाचरणाय, नात्मानमालोकयति। बहुधाऽन्य सकट उपहस्यते जनै। पर शूलाविद्ध एव तत्पीडा जानाति। 'न हि वन्ध्या विजानाति गुर्वीं प्रसव-वेदनाम्।' स्वय विपदि पतितो विकार-काले ऽविकृत मना सत्य पण्डित। स एव परोपदेशे प्रभवति। आत्मना रोगातुर पर पथ्यमुपदिशन् विडम्ब्यत एव लोके। 'परोपदेशे पाण्डित्य सर्वेषा सुकर नृणाम्।' आत्मालोचन खलु विधेयम्।

'गच्छत स्खलन क्वापि भवत्येव प्रमादत। हसन्ति दुर्जनास्तत्र समादधति सज्जना॥' 'खल सर्षपमात्राणि परच्छिद्राणि पश्यति। आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति॥' अत सुमतय स्वय साध्वाचरन्त एव परानपि तथोपदिशन्ति। तेषामेव शिक्षा दर्पण इवान्येषा मनसि प्रतिफलति। तत्रैव परीक्षा। 'मुखमस्तीति वक्तव्य दश-हस्ता हरीतकी।' को न शक्त उपदेष्टुम्। 'ज्ञान भार क्रिया बिना।' 'कथनी तज करनी करै पण्डित जानो सोय।'

अत स्वयमाचरणं पथ्यम्। तत्रैव कष्टम्। सुखमुपदिश्यते परस्य।

सहायक-ग्रन्थ-सूची (Bibliography)

ग्रन्थ	रचयिता
(१) ऋक्संहिता	
(२) अथर्वसंहिता	
(३) यजु संहिता	
(४) शतपथब्राह्मणम्	
(५) ऐतरेयोपनिषद्	
(६) छान्दोग्योपनिषद	
(७) तैत्तिरीयोपनिषद्	
(८) ईशोपनिषद	
(९) कठोपनिषद	
(१०) बृहदारण्यकोपनिषद्	
(११) वैदिक माइथोलोजी	मैकडानल
(१२) वाल्मीकि—रामायणम्	
(१३) महाभारतम्	
(१४) ओरिजिनल टैक्स्टस ऑव सस्कृत	जे मूर
(१५) सस्कृत डामा	कीथ
(१६) रघुवश	कालिदास
(१७) कुमारसम्भवम्	,,
(१८) हर्षचरितम्	बाण भट्ट
(१९) ऋतुसहार	कालिदास
(२०) शाकुन्तलम्	,,
(२१) विक्रमोर्वशीयम्	,,
(२२) मालविकाग्निमित्रम्	,,
(२३) मेघदूतम	,,
(२४) कादम्बरी	बाणभट्ट
(२५) काव्यमीमांसा	राजशेखर
(२६) काव्यप्रकाश	मम्मट

(२७) औचित्यविचार चर्चा	क्षेमेन्द्र
(२८) रसगङ्गाधर	जगन्नाथ
(२९) शिशुपाल-वधम्	माघ
(३०) किरातार्जुनीयम्	भारवि
(३१) काव्यतत्व समीक्षा	नरेन्द्रनाथ चौधरी
(३२) साहित्य दर्पण	विश्वनाथ
(३३) मालती माधवम्	भवभूति
(३४) सस्कृत-साहित्य का इतिहास	बलदेव उपाध्याय
(३५) सस्कृत-साहित्य की रूपरेखा	चन्द्रशेखर पाण्डेय
(३६) सस्कृत-साहित्य का इतिहास	कीथ
(३७) सँस्कृत साहित्य का इतिहास	चिन्तामणी विनायक वैद्य
(३८) Riddles of Ramayana	,,
(३९) महाभारत-मीमांसा	,,
(४०) कालचक्र	सिद्धेश्वर वर्मा
(४१) महाभाष्यम्	पतञ्जलि
(४२) वाक्यपदीयम्	भर्तृहरि
(४३) वृत्ति—वार्तिकम्	अप्पयदीक्षित
(४४) गङ्गा वेदाङ्क	
(४५) वैदिक ज्योति	आचार्य वैद्यनाथ
(४६) उरु ज्योति	वासुदेवशरण अग्रवाल
(४७) वैदिक मलेक्शन ३य सस्करण, भाग १	पीटर्सन
(४८) वैशेषिक सूत्रम्	
(४९) ध्वन्यालोक	आनन्द वर्धन
(५०) साहित्यदर्पण भूमिका	कणे
(५१) वैदिक सस्कृति और साहित्य	बलदेव उपाध्याय
(५२) भारतीय दर्शन	,,
(५३) कुवलयानन्द	अप्पयदीक्षित
(५४) कालिदास एण्ड भवभूति	जी पी भट्टाचार्य
(५५) कालिदास का भारत वर्ष	भगवत्शरण उपाध्याय
(५६) कालिदास	चन्द्रबली पाण्डेय
(५७) नैषधीय चरित	श्रीहर्ष